Since words like Tulya etc. depend on the Upameya only in instances like तेन (कमलेन) तुल्यं मुखं, or on Upamāna only in instances like तत् (कमलं) तुल्यं अस्य (मुखस्य), or on both, in instances like इदं (मुखं) च तत् (कमलं) च तुल्यम्, it follows that the apprehension of their comparability (तुल्यत्व) becomes possible by our recalling the similarity of attributes (between the Upamāna & Upameya). Thus the similarity of attributes being implied there results the Implicit Upamā when words like तुल्य are used.

Similarly there results Implicit Upamā when there occurs Vat (in the sense of Tulya) as laid down in the Sūtra, *tena tulyam kriyā ched vatih*. (Vat is affixed to a noun provided the action is comparable to that of the noun).

प्रदीपः –यथादिशब्दानां धर्मविशेषसंबन्ध एव शक्तत्वात् । तुल्यादिशब्दास्तु नैवम् ।

प्रदीपः–'पद्मेन तुल्यं मुखम्' इत्यादावुपमेये, 'पद्मं तुल्यं मुखस्य' इत्यादावुपमाने, 'मुखं पद्मं च तुल्यम्' इत्यादावुभयत्रापि सामान्यतस्तुल्यत्वं बोधयित्वा विश्रान्तेषु तेषु धर्मविशेषं विना कथं तुल्यतेति प्रतीतानुपपत्त्या धर्मविशेषसंबन्धप्रतीतेरिति ।

उ०ः–षष्ठ्या एव विशिष्य दृष्टांतत्वेनोपादाने बीजं चिंत्यम्। नन्वेवं तुल्यादिपदैरपि चंद्रेण तुल्यमित्यादौ तृतीयार्थान्वयद्वारा श्रुत्यैवोपमानत्वोपमेयत्वयोर्बोधात् श्रौती स्यादित्यत आह **तस्मादिति** । **प्रतीत्यनुपपत्त्येति** । अयं भावः । सादृश्यप्रयोजकसाधारणधर्मसंबंधो ह्युपमा । सादृश्यं चातिरिक्तः पदार्थः । धर्मविशेषश्च क्वचिदुपात्तः क्वचिदाक्षिप्त इत्यन्यत् । यथादयश्च तत्प्रयोजकधर्मविशेषसंबंध एव शक्ताः न तुल्यादयः । ते हि सदृशमात्रवाचका इति । **उपमेय इति** । समानविभक्त्यंतपदोपस्थाप्यत्वादिति भावः । **उपमाने इति** । तत्त्वादेवेति भावः । एवं च सादृश्यादिपदयोगेऽप्यार्थ्येव । अपरे तु 'तत्तत्साधारणधर्मसंबंध उपमा'। उपमानत्वं च साधारणधर्मवत्त्वेनेषदितरपरिच्छेदकत्वम्। तद्धर्मवत्तया परिच्छेद्यत्वं चोपमेयत्वमित्युपमानानीति (पा. सू. २।१।५५) सूत्रे भाष्ये स्पष्टम् । उपमानविशेषणानि ते इति। उपमाननिष्ठसाधारणधर्मबोधकानीत्यर्थः । एवमुपमानत्वमपीवाद्यर्थः । यदोपमानविशेषणोपमानत्वद्योतकास्ते इत्यर्थः । **उपमाने तत्संबंधमिति** । उपमानत्वस्वरूपस्य साधारणधर्मघटितत्वात्तत्र तत्संबंधबोधोस्त्वित्यर्थः । **षष्ठी हीति** । सा हि राज्ञः पुरुष इत्यादौ स्वस्वामिभावसंबंधबोधिका, प्रकृत्यर्थस्य विशेषणत्वबोधिका च । सा च विशेषणस्येतरविशेषणत्वार्थं संबंधस्याऽऽकांक्षणात्तन्निष्ठविशेषणत्वस्य तन्निष्ठस्वामित्वस्य बोधकत्वेऽपि पश्चात्प्रधाने पुरुषे संबंधस्य द्विष्ठतास्वभावत्वात् संबंधघटकं स्वत्वं बोधयति। तदाह **यदनंतरमुपात्तेति**। राज्ञ इत्यतश्च राजस्वामिकमिति बोधः । पुरुषपदेन च तद्विशेषसमर्पणमिति

प्रभाः–स्तथा मुखमित्यादौ यादृशधर्मवांश्चन्द्रस्तादृशधर्मवन्मुखमित्युभयविशेष्यकबोधवच्चन्द्र इव मुखमित्यादावपि तथैव बोधः। अत एव हंसीधवलश्चन्द्र इत्यादौ भिन्नलिङ्गत्वादेर्दोषत्वम् । पुंस्त्वान्वितधवलत्वस्य हंस्यामन्वयायोगात् । अन्यथा तु हंसीसदृशश्चन्द्रो धवल इत्यन्वयसंभवाद्दोषत्वं न स्यात् । एवं चोपमानोपमेययोर्द्वयोरपि साधर्म्यस्य शब्दादेवान्वयबोधाच्छ्रौतीत्वम् । चन्द्रेण तुल्यं मुखं मनोज्ञमित्यादौ, मुखस्य तुल्यश्चन्द्र इत्यादौ च भिन्नविभक्तिकत्वेनोपमानोपमेययोर्द्वयोः

प्रदीपः–केचित्तु—'उपमानोपमेयभावरूपसंबन्धस्य श्रौतत्वार्थत्वाभ्यां विशेषः' इति व्याचक्रुस्तदयुक्तम्। 'साधर्म्यस्याऽऽर्थत्वात्तुल्यादिपदोपादाने आर्थी' इति प्रकाशविरोधात्। यस्यैव ह्यार्थतया उपमाया आर्थत्वं तस्यैव श्रौततया श्रौतत्वौचित्यात्। किं च साधर्म्यमेवोपमेति तस्यैव श्रौतत्वार्थत्वाभ्यामुपमाभेदो युक्तः। अत एव 'यथादिना सादृश्यरूपः संबन्ध एव साक्षादभिधीयते षष्ठीवत्, तुल्यादिभिस्तु धर्म्यपि' इति व्याख्यानमनुपादेयम्। ननु तथाप्यनुपपन्नो विभागः। पूर्णायां द्योतकोपमानयोरेव हि समासः संभावितः। न च यथादिभिः सममसौ दृश्यते येन समासे श्रौती स्यादिति चेत्, न। 'इवेन नित्यसमासो

उ०:–'षष्ठी शेषे' (पा. सू. २-३-५०) इति सूत्रे भाष्ये स्पष्टम्। एवमिवादिभिः स्वसमभिव्याहृतचंद्रादावुपमानत्वं तन्निर्वाहक आह्लादकत्वादिसाधारणधर्मसंबंधश्च बोध्यते। तत्र साधारणधर्मवत्त्वेनेतरपरिच्छेदकत्वरूपोपमानत्वप्रतीतिस्तद्धर्मवत्परिच्छेद्यप्रतीतिं विनाऽनुपपन्नेति तमपि बोधयतीति भावः। एवं च चन्द्र इवेत्यत आह्लादकोपमानभूतचंद्राभिन्नमाह्लादकमुपमेयं मुखमिति बोधः। अत एवेवादिसमभिव्याहारे उपमानोपमेययोः समानविभक्तिकत्वनियमः। साधारणधर्मसंबंधश्च क्वचिद्विशेषणतया यथा चंद्र इव मुखमाह्लादकमित्यादौ। क्वचिद्विशेष्यतया यथा चंद्र इव मुखमाह्लादयतीत्यादौ। अत्र ह्युपमानचंद्रकर्तृकाह्लादाभिन्न उपमेयमुखकर्तृकाह्लाद इति बोधः। अतोऽत्रापि तयोः समानविभक्तिकतैव। ये त्वत्र चंद्रसादृश्यप्रयोजको मुखकर्तृक आह्लाद इति बोधं वदंति तेषां तयोः समानविभक्तिकत्वनियमे मानं चिंत्यम्। यत्तु वाचनिकी समानविभक्तिकतेति। तन्न। व्याकरणे तादृशवचनानुपलंभात्। एवं गज इव गच्छति देवदत्त इत्यादौ बोध्यम्। वनगज इव शूरः समरभूमिं गच्छती-

---

प्रभाः–साधर्म्यस्य शब्दादप्रतीतेस्तुल्यादिपदप्रयोगे आर्थी। पद्मं मुखं च तुल्यमित्यादावुभयत्र साधर्म्यप्रतीतावप्युपमानोपमेयभावसंबन्धस्य प्रमाणान्तरैणैवावगमेनार्थत्वादार्थीत्वमिति व्याचख्युः। तत्रोपमानोपमेयत्वस्य श्रौतत्वार्थत्वाभ्यां व्यवस्थां तदुक्तां मूलग्रन्थविरोधेन तावद्दूषयति—**साधर्म्यस्येति**। युक्तिविरोधमप्याह—**किं चेति**। हंसीव धवल इत्यादौ चोपात्तधर्मस्यैवेवादिना बोधननियमेन पुंस्त्वविशिष्टधावल्यस्य हंस्यामन्वयासंभवेन दुष्टोपमात्वं संगतमिति ज्ञेयम्। अत एव उक्तदोषादेव। साक्षाद्विशेष्यतया सादृश्यविशिष्टधर्मिप्रतिपादकैस्तुल्यादिभिस्तु विशेषणतया सादृश्याभिधानादार्थीत्वमित्यर्थः। **अनुपादेयमिति**। एवमपि तुल्यादिपदैः सादृश्योक्तिरस्त्येवेति नैतद्युक्तमित्यर्थः। **पूर्णायामिति**। श्रौत्यामिति शेषः। आर्थ्यां

"इवेन नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च" इति नित्यसमासे इवशब्दयोगे समासगा ।

क्रमेणोदाहरणम् ।

स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति ।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा ॥ १ ॥(—)

चकितहरिणलोललोचनायाः क्रुधि तरुणारुणतारहारिकान्ति ।
सरसिजमिदमाननं च तस्याः सममिति चेतसि संमदं विधत्ते ॥२॥ (—)

When there is a necessary compound, characterised by the presence of Iva, in accordance with the Vārtika, "With Iva, is compounded necessarily (the preceding word), the case-termination (of the preceding word) not being dropped, and the original accent of the preceding word being retained," there results Upamā (Explicit) in Compound. Illustrations in due order:—

Even in the dream (of your foes), the Glory of Triumph does not forsake you, the fountainhead of prowess in battles, just as a woman who holds the husband under her sway does not forsake him, her beloved, the fountainhead of ardent love (prabhāva), even in her dream. (1)

At his heart, he is exulting in the thought that this (red) lotus and the face of hers the beauty of which is as charming (hāri) and bright (tāra) as of the young dawn,—while she, with eyes tremulous like those of a startled deer, is in a rage—are equals. (2)

प्रदीपः—विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इत्यनेनेवशब्देन समं समासविभक्त्यलोपयोः संभवात् । विभक्त्यलोपदर्शनाच्च तत्रासमासव्यवहारो मूढानाम् । तत्र वाक्ये श्रौती यथा—**स्वप्नेऽपीति** ।

अत्र विजयश्रीरुपमेया । स्वाधीनपतिका उपमानम् । न मुञ्चतीति साधारणो धर्मः । यथेत्युपमाप्रतिपादकं विवक्षितम् । एवमग्रेऽप्यूह्यम् । न चैतेषां क्वयोरपि समास इति वाक्यगा श्रौती । वाक्यगा आर्थी यथा—**चकितेति** । इयं समशब्दप्रयोगादार्थी । समासे श्रौती यथा—

उ०ः—त्यादावुपमानगजकर्तृकवनगमनाभिन्नमुपमेयशूरकर्तृकं समरकर्मकं गमनमिति बोधः । साधारणधर्मरूपगमनस्य विधेयतयोपमाविधेयिकाऽत्र धीः । व्याघ्र इव यः पुरुषः स गच्छतीत्यादावुपमानशूरव्याघ्राभिन्नपुरुषकर्तृकगमनमिति धीः । शूरत्वादिसाधारणधर्मस्योद्देश्यतयोपमोद्देश्यिकाऽत्र धीः । अत एव भेदाभेदप्रधा-

उ०ः – नोपमेति प्राञ्चः। यद्यपि चंद्रमुखयोस्तत्त्वेन भेदस्तथापि साधारणधर्मवत्त्वेनाभेदान्वययोग्यता बोध्येति। अधिकं मंजूषायां द्रष्टव्यम्। **धर्मविशेषसंबंध एवेति**। अस्य शक्त्या स्वसामर्थ्येन बोधनं तदन्वयतात्पर्यग्राहकतया बोध्यम्। तत्क्तोपमानत्वस्य तु द्योतका इति बोध्यम्। **तुल्यादिशब्दास्त्वति**। ते च सदृशवाचकाः। सादृश्यं च साधारणधर्मप्रयोज्यो धर्मविशेष इत्याहुः। न चेदृशश्रौत्यार्थीविवेको विफलः। आर्थ्यामुपमानोपमेयनिर्णयविलंबेनाऽऽस्वादविलंबः, तदभावः श्रौत्यामिति तत्साफल्यादिति बोध्यम्। **उपमेय इति**। समानविभक्त्यन्तपदोपस्थाप्यत्वादिति भावः। **उपमान इति**। तत्त्वादेवेति भावः। **संबंधस्येति**। स संबंध एवेवार्थः। **अनुपादेयमिति**। धर्मबोधेऽपि यावदप्राप्तं तावद्विधीयत इति सादृश्यस्यैव विधेयत्वादित्यपि बोध्यम्। **न च यथादिभिरिति**। असादृश्य एव यथाशब्देन समासविधानादिति भावः। **इवेन नित्यसमास इति**। व्याकरणे वैकल्पिकत्वांगीकाराद्वार्तिके तथाऽपाठाच्च नित्यपदप्रक्षेपोऽप्रामाणिकः। **स्वप्नेऽपीति**। वैरिभिः स्वप्नेऽपि तव विजयानुभवादित्यर्थः। प्रभावात्तपोविशेषात्प्रभव उत्पत्तिर्यस्य तमित्यर्थः। ('प्रभावस्य प्रभवं उत्पत्तिहेतुं त्वामित्यन्वयः' इति चन्द्रिका।) समरेषु न तु समरे। अत्र यत्तत्पदप्रकृतिकप्रकारवाचिथाल्प्रत्ययांतयथाशब्दादियोगे यद्धर्मवती स्वाधीनपतिका तद्धर्मवती विजयश्रीरिति उभयविशेष्यको बोधः। पश्चात् यत्तद्भ्यां धर्मस्यैक्यबोधात्सादृश्यं फलति। राज्ञः कांतस्य च बिंबप्रतिबिंबभावः। तदालिंगितस्वप्राधिकरणकत्यागाभावोऽनुगामी साधारणो धर्म इति बोध्यम्। **चकितेति**। (सखीं प्रति नायिकासौभाग्यं कयाचिन्निवेद्यते।) भीतहरिणवच्चंचलनेत्राया इत्यर्थः। क्रुधि कोपे। तत्रापि कांतमित्याह—तरुणेति। तरुणारुणवत्तारा पुष्टा हारिणी मनोहरा कांतिर्यस्य तदिति आननविशेषणम्। संमदं हर्षम्। (पुष्पिताग्रा छंदः।) सरसिजमाननं च सममित्यत्र प्रथमं सादृश्यवदभिन्नमिदं द्वयमिति बोधे पश्चान्मनसा व्यंजनया वा परस्परनिरूपितसाधारणधर्मप्रतीतिरिति ध्येयम्। अ-

---

प्रभाः – पूर्णायां सदृशादिपदैर्वाचकैरेव समासात्। द्योतकेति वा सामान्यबोधकपरम्। **नित्यसमास इति**। तेन 'उद्बाहुरिव वामनः' इत्यादौ विशेषणबोधकेनोद्बाहुपदेन नैराकाङ्क्ष्यादसमासेऽपि वामनपदे नैव समास इति ज्ञेयम्। इवेन समास इत्येव

अत्यायतैर्नियमकारिभिरुद्धतानां
दिव्यैः प्रभाभिरनपायमयैरुपायैः ।
शौरिर्भुजैरिव चतुर्भिरदः सदा यो
लक्ष्मीविलासभवनैर्भुवनं बभार ॥ ३ ॥ (—)

अवितथमनोरथपथप्रथनेषु प्रगुणगरिमगीतश्रीः ।
सुरतरुसदृशः स भवानभिलषणीयः क्षितीश्वर न कस्य ॥४॥ (—)

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजंगवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥ ५ ॥ (—)

(The king) who sustained this world with the four expedients (of statecraft), that were far-reaching (in their consequences) and curbed the unruly, that were exalted (divyaih) and glorious (प्रभाभिः sc. सम्पन्नैः), that never came to a standstill (अनपायमयैः) and were an abode of the free play (विलास) of wealth, just as Viṣṇu (शौरि = कृष्ण = विष्णु) sustains this world with his four arms, that are very long and curb the unruly (demons), that are divine and glorious, that never come to a standstill and are a place for the free play of Lakṣmī. (3)

O Lord of Earth, who would not long for you, who are like the divine tree (i. e. कल्पतरु), in that like it your wealth is lauded in virtue of the exuberance (गरिमन्) of its great capacities (प्रगुण) for enlarging the range of aspirations never unfulfilled? (4)

The magnitude of his depth is indeed (सत्यं) like that of the lover of the Ganges (i. e. Ocean); on the battlefield, his sight is unbearable like that of the sun (अम्बररत्न) in summer. (5)

प्रदीपः—अत्यायतैरिति। अत्रेवेन समासः। समासे आर्थी यथा—**अवितथेति।** अत्र सुरतरुसदृश इत्युपमानद्योतकयोः समासः। तद्धिते श्रौत्यार्थी च यथा—**गाम्भीर्येति।** अत्र गङ्गाभुजंगवदिति श्रौती। 'तत्र तस्येव' इत्यनेन इवार्थे वतेर्विधानात्। निदाघाम्बर-रत्नवदित्यार्थी। 'तेन तुल्यम्—'इत्यर्थे वतेः प्रयोगात्।

उ०:—रुणसदृशकांतिमत्त्वं साधारणो धर्मः। **अत्यायतैरिति।** आयतिः (आयतं) उदर्कशुद्धिर्दीर्घता च। उद्धतानां गर्ववतां दानवानां च। दिव्यैरुत्कृष्टैः स्वर्गीयैश्च। प्रभाभिः प्रकृष्टशोभावद्भिः। भातेः कर्तरि क्विप्। अनपायमयैः

स्वाधीनपतिका कान्तं भजमाना यथा लोकोत्तरचमत्कारभूः तथा जयश्रीस्त्वदासेवनेनेत्यादिना प्रतीयमानेन विना यद्यपि नोक्तेर्वैचित्र्यम्, वैचित्र्यं चालंकारः, तथाऽपि न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारः। न खलु व्यङ्ग्यसंस्पर्शपरामर्शादत्र चारुताप्रतीतिः अपि तु वाच्यवैचित्र्यप्रतिभासादेव। रसादिस्तु व्यङ्ग्योऽर्थोऽलंकारान्तरं च सर्वत्राव्यभिचारीत्यगणयित्वैव तदलंकारा उदाहृताः। तद्रहितत्वेन

Though, but for its suggestion viz. "As a woman, who though holding her husband under her sway dotes upon him, is a source of wonder such as is due to an extraordinary fact of life, so is the Glory of Triumph (a source of wonder), thanks to her attending on you," the statement does not possess any charm,–and it is charm that constitutes a figure,—yet, the style of Dhvani or Gunībhūtavyaṅgya does not apply (to the stanza in question). For the apprehension of charm, in the present case (अत्र), is not due to a consciousness of a touch of suggestion, but is solely due to the perception of a charm in the expressed sense. But the figures thereof (i. e. expressed sense) have been illustrated without taking into account the suggested sense like Sentiment etc. and other figures (embodied in the illustrations), since they (i. e. suggested sense & other figures) are invariably present everywhere. Were they (i. e. figures) to be illustrated, however, without these (i. e. the suggested sense & other figures), they would bring

---

प्रदीपः–ननु चित्रभेदा अलंकारनिर्णये निर्णेष्यन्ते इति पूर्वमवादीः, इदानीं 'स्वप्नेऽपि' इत्युदाहरसि न तच्चित्रं भवितुमर्हति। अत्र हि स्वाधीनभर्तृका कान्तं भजमाना यथा चमत्कारभूस्तथा जयश्रीस्त्वदासेवनेनेत्यादि वस्तुरूपं व्यङ्ग्यं विना नोक्तेर्वैचित्र्यम्। वैचित्र्यं चालंकारत्वनिष्पत्तय इति व्यङ्ग्यमवश्यापेक्षणीयम्। अतस्तस्य प्राधान्ये ध्वनित्वम्। अप्राधान्ये गुणीभूतव्यङ्ग्यत्वम्। तस्मात्पूर्वापरविरुद्धाभिधानमिति चेत्, मैवं वादीः। न खलु व्यङ्ग्यपराम-

---

उ०ः–अपायाभावप्रचुरैः। उपायैः सामभेददानविग्रहैः। अदः एतत् भुवनम्। लक्ष्मीः कमला संपच्च। (वसंततिलका छन्दः।) भुजैरिवोपायैरित्यत्र भुजसादृश्य-

---

प्रभाः–पठितवामनपदेनाप्यनभिधानादसमासाद्वाक्यगैवेयं बोध्या। **वस्तुरूपमिति।** जयश्रियस्त्वदासेवनेन चमत्कारित्वमित्यर्थरूपमित्यर्थः। यथा तथेत्यंशस्तु वाच्यकोटिगत एवानूदित इति भावः। वैचित्र्यं चमत्कारित्वम्। तस्य उक्तव्यङ्ग्यस्य।

प्रदीपः – र्शादेवात्र चारुताप्रतीतिः, अपि तु वाच्योपमामात्रपरामर्शादेव। चारुत्वहेतुश्चालंकारः। अवर्जनीयसंनिधेश्च व्यङ्ग्यस्यास्फुटतरतया न ध्वनिगुणीभूतव्यङ्ग्यव्यवहारप्रवर्तकतेति न कश्चिद्दोषः। नन्वेवमप्युदाहृते रसादिरूपव्यङ्ग्यसद्भावाच्चित्रतानुपपत्तिः। किं चानुप्रासाद्यलंका-

उ० : –प्रयोजकात्यायतत्वादिधर्मवद्भिरित्यादिरेव बोधः। गजो वनं गच्छतीव शूरः समरभूमिं गच्छतीत्यादौ क्रियासमभिव्याहृतेवादेरुत्प्रेक्षाद्योतकत्वमेवेति न तत्रोपमालंकारः। स्पष्टं चेदं सन्निधायके भाष्ये। **अवितथेति**। अन्वर्थत्वाञ्छितविषयसंबंधिमार्गसंपादनेषु प्रकृष्टगुणानां गरिम्णा गीता श्रीर्यस्य। (गीतिश्छन्दः।) **द्योतकयोरिति**। द्योतकपदम् बोधकपरम्। **गांभीर्येति**। गांभीर्यं दुर्ज्ञेयांतःकरणत्वं अतलस्पर्शित्वं च। भुजंग उपपतिः समुद्रः। शंतनोरेव पतित्वात्। दुरालोकः दुःखेनालोकयितुं शक्यः। अंबररत्नं सूर्यः। अत्र बोध उक्तदिशोह्यः। उत्तरत्र निदाघांबररत्नतुल्याभिन्नो दुरालोक इति बोधः। तुल्यत्वप्रयोजकं च दुरालोकत्वमिति पश्चान्मनसा व्यंजनया वा बुध्यते। स चेत्थम्। उपमानदुरालोकनिदाघांबररत्नाभिन्नो दुरालोको राजेत्येवमिति बहवः। अत एवाऽऽर्थीत्वम्। नामार्थयोरभेदान्वयस्यैतद्विग्रहवाक्ये कृप्तनिर्वाह्याय अस्य वतेरपि धर्मिवाचकतैवोचिता। अनुशासनस्य तथैव शक्तिग्राहकत्वाच्च क्रिययोस्तुल्यत्व एव तेन तुल्यमिति वतिः साधुः। अत एव ब्राह्मणवदधीत इत्यत्र ब्राह्मणपदस्य तत्कर्तृकाध्ययने लक्षणेति भाष्यकृतः। एवं च चंद्रवन्मुखमित्यादौ भवतिक्रियामध्याहृत्य चंद्रभवनसदृशं मुखभवनमित्येव वाच्योऽर्थः। चंद्रमुखयोः सादृश्यं तु व्यंजनयैवेति बोध्यम्। गंगाभुजंगवदित्यत्र गंगाभुजंगपदस्य तत्संबंधिगांभीर्यगरिमलक्षकत्वेन गंगाभुजंगसंबंधिगांभीर्यसदृशमेतत्संबंधिगांभीर्यमिति बोधः। तदनंतरं गांभीर्ययोः सादृश्यमूलाभेदाध्यवसायेनाभिन्नधर्ममूला पश्चाद् गंगाभुजंगराज्ञोरुपमाप्रतीतिः। गंगाभुजंगस्येवास्य गांभीर्यगरिमेत्यादिवाक्ये षष्ठ्युपपत्तये गांभीर्यगरिमेत्यस्याऽऽवृत्त्या गंगाभुजंगेप्यन्वयेन तादृशबोधस्यैवानुभवेन वृत्तावपि तथैवौचित्यात्। एवमरविंदतुल्यो भातीत्यस्यारविंदतुल्यकर्तृकं भानमिति वाच्योऽर्थः। भानमेव च साधारणो धर्मः। एवं चोपमाविधेयिका धीः। यदा तु धर्मांतरेण तुल्यत्वं तदोपमाया उद्देश्यतावच्छेदकत्वमिति दिक्।

तु उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम् ।

(४) तद्वद्धर्मस्य लोपे स्यान्न श्रौती तद्धिते पुनः ।

---

about insipidity (of instances). Hence it should not be urged (against us) that we are indulging in statements, the later of which conflict with the earlier ones.

Likewise would there be (the different divisions) when the (common) property is omitted. There cannot be, however, the Explicit variety with a Taddhita derivative.

प्रदीपः–रान्तरसद्भावात्संकरालंकारोदाहरणान्येतानि युक्तानि, न तु शुद्धाया उपमाया इति चेत्, न। रसादिरूपव्यङ्ग्योऽलंकारान्तरं चैतेष्वव्यभिचारीति तत्रौदासीन्यमालम्ब्योपमालंकारोऽयमीदृश इत्यभिप्रायेणालंकारमात्रमुदाहृतं न तु चित्रकाव्यम्। अत्र ‘ चन्द्रधवलः पटः’ इत्यादिको रसालंकाराभ्यामसंभिन्न एव विषयः किमिति नोदाह्रियत इति चेत्, तद्रहितत्वेनोदाहरणे वैरस्यप्रसङ्गात्। तादृशवाक्यस्याकाव्यत्वेन तस्या अप्यनुपमात्वात्।

अथ लुप्ता विभजनीया। सा च सप्तधा। तत्रैकस्य लोपे त्रिधा। उपमानस्य साधारणधर्मस्य द्योतकस्य च लोपात्। उपमेयमात्रस्य लोपादर्शनात्। द्विलोपेऽपि त्रिधा। धर्मवाद्योर्धर्मोपमानयोर्वाद्युपमेययोश्च लोपात्। अन्यस्य द्विकस्य लोपासंभवात्। त्रिलोपे त्वियमेका। उपमेयं विनाऽन्येषामेकैकमात्रसत्त्वे उपमाया असंभवादिति दर्शयन्नेव यथासंभवं तासां सप्तविधानामपि विभागमाह—**तद्वदिति** ।

उ०ः–**न खलु व्यंग्येति** । सत्यपि व्यंग्ये समुत्कटयालंकारकृतचारुतया प्रथमतश्चित्ताकर्षणादिति भावः। विद्यमानव्यंग्यस्य ध्वन्यादिप्रयोजकता नेत्याह **अवर्जनीयेति** । **अस्फुटतरतयेति** । अत्रालंकारवैचित्र्यप्रतीतिव्यवहितप्रती-

---

प्रभाः–**एवमपीति**। उक्तव्यञ्जकस्य ध्वनित्वाद्यप्रयोजकत्वेऽपीत्यर्थः। ननु तात्पर्यविषयव्यङ्ग्यराहित्यं मुखतश्चमत्कारिव्यङ्ग्यशून्यत्वं वा चित्रत्वमिहास्त्येवेत्यत आह—**किंचेति** । **औदासीन्येति** । तद्विषयविवेकमकृत्वेत्यर्थः। तथा च क्वचिच्चित्राभावेऽपि न क्षतिरित्याह—**न त्विति** । वस्तुतस्तूपमाप्राधान्यादस्त्येव चित्रत्वमिति ज्ञेयम्। **अकाव्यत्वेनेति** । काव्येऽलंकारा उपमादय इति तत्परिचयार्थमुदाहरणं काव्यरूपमेवोचितं न त्वन्यदित्यर्थः। उपमानस्येत्यादि सावधारणम्। **उपमानस्यैवेत्यादि** । अत एवाह—**उपमेयमात्रस्येति** । धर्मवाद्योः धर्मः साधारणो वादिर्वाशब्दप्रभृतिरिवादिस्तयोः । **विभागमाहेति** । व्यवस्थामाहेत्यर्थः। **धर्मसा-**

धर्मः साधारणः । तद्धिते कल्पबादौ त्वार्थ्यैव । तेन पञ्च ।

उदाहरणम्,

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा ॥ ६ ॥ (—)

आकृष्टकरवालोऽसौ संपराये परिभ्रमन् ।
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समः प्रभुः ॥ ७ ॥ (—)

करवाल इवाचारस्तस्य वागमृतोपमा ।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे ॥ ८ ॥ (—)

Gloss:—Property, viz, the common one. With a Taddhita derivative such as with the affix Kalpap etc., there can be only the Implicit variety. Thus five (varieties of धर्मलुप्ता). To illustrate:—

Like nectar as it is, the word of him who is blessed and graced by an uncommon profusion of gentleness should, O Heart, be carried out. (6)

As he moved about in the battle, with the sword drawn, that sovereign was looked upon by the hostile army as an equal of Death. (7)

You will survive, O friend, (only) if you are aware of the fact that his demeanour is like a sword, his speech like nectar, his mind almost like venom. (8)

प्रदीपः – धर्मस्य साधारणस्य। तद्वत्समासे वाक्ये तद्धिते च श्रौती आर्थी चेत्यर्थः। तत्र विशेषमाह—'न श्रौती तद्धित–' इति । इवार्थ एव हि तद्धिते सा श्रौती भवेत् । इवार्थश्च वतिरेव । स च 'तत्र तस्येव' इत्यर्थकतया नित्यं धर्मसाकाङ्क्ष इति धर्मानुपादाने श्रौती तद्धिते न भवत्येव । आर्थी तु यद्यपि वतिरूपे तद्धिते न संभवति 'तेन तुल्यम्–' इत्यर्थे उक्तन्यायेन नित्यं तुल्यक्रियाकाङ्क्षत्वेन धर्मलोपे तदसंभवात्, तथापि कल्पप्–देश्य–देशीयर्–बहुच्–रूपे संभवत्येवेति पञ्चधा धर्मलोपोपमेत्यर्थः । तत्र वाक्ये श्रौती यथा—**धन्यस्येति**। अत्रामृतवचसोः परिणामसुरसत्वादिसाधर्म्यं, तच्च नोपात्तम्। आक्षेपात्तु लब्धस्य संबन्धो यथाशब्देन तद्बोधं विनाऽपर्यासेन श्रुत्यैव बोध्यत इति धर्मलोपे श्रौतीयम्। एवमग्रेऽप्यूह्यम्। वाक्ये आर्थी यथा—**आकृष्टेति** । आकृष्टकरवालत्वं च न साधारणो धर्मः । यमस्य दण्डायुधत्वेन प्रसिद्धेः । अन्त्यत्रयं यथा—**करवाल इवेति** । अत्र करवाल इवेति

उ० : – तिक्तयाऽस्फुटतरत्वम्। यत्र वाच्यप्रतीत्यव्यवधानेन व्यंग्यप्रतीतिस्तत्र तदुभयमिति भावः । अस्फुटतरातिरिक्तव्यंग्यराहित्येनाव्यंग्यत्वमत्रेति रहस्यम् ।

(५) उपमानानुपादाने वाक्यगाथ समासगा ॥ २ ॥

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स ।
दीसइ अहव णिसम्मइ सरिसं अंसंसमेत्तेण ॥ ९ ॥ (—)

कव्वस्सेत्यत्र कव्वसममिति, सरिसमित्यत्र च णूणमिति पाठे एषैव समासगा ॥

When the Upamāna is not stated, there becomes possible (1) Upamā in a sentence; or again (2) that in a compound.

Gloss:—Neither is seen nor heard *anything* that would be comparable, by the least fraction, to poetry of sentiment, that confers the wealth of supreme relief on senses one and all. (9)

The same Upamā will turn into one in a compound with the reading कव्वसमम् (काव्यसमम्) instead of कव्वस्स (काव्यस्य), and णूणम् (नूनं) instead of सरिसम् (सदृशम्).

प्रदीपः—समासे श्रौती। अमृतोपमेति समासे आर्थी। विषकल्पमिति तद्धितगा आर्थी। **उपमानेति**। अत्र तद्धितगा न संभवति। उपमाप्रतिपादकस्य तद्धितस्य वतिकल्पवादेरुपमानादेव विधानेन उपमानानुपादानेऽसंभवात्। न वा श्रौती। इवादीनामुपमानमात्रान्विततया तदनुपादाने तेषामप्यनुपादानात्। अतो वाक्यसमासयोरेव। तयोरप्यार्थ्येवेति द्विप्रकारा लुप्तोपमानोपमा। तत्र वाक्यगा यथा—**सअलेति**। अत्र विशेषत उपमानं नोपात्तम्। चिन्त्यमेतत्। इदमेव 'कव्वस्स' इत्यत्र 'कव्वसमम्,' 'सरिसं' इत्यत्र 'णूणं' इति पाठे समासगोदाहरणम्।

उ०:—**नन्वेवमिति**। राजविषयकरतिभावस्य भकारानुप्रासस्य च स्वप्नेऽपीति पद्ये सत्त्वादित्याशयः। **तस्या अप्यनुपमात्वादिति**। उपमालंकारत्वाभावादित्यर्थः। वाचकवाच्योपस्कारद्वारा रसाद्युपकारकस्यैवालंकारत्वादिति भावः। नीरसेऽपि स्ववैचित्र्येणाऽऽपाततश्चमत्कारमात्रं नत्वलंकारत्वमिति तात्पर्यम्। **एकस्य लोप इति**। लोपोऽत्रानुपादानम्। ननु चंद्रत्वमुखत्वादिधर्मप्रतीतेर्न धर्मलोप इत्यत आह **साधारणस्येति**। **नित्यं धर्मेति**। इवस्य साधारणधर्मसंबंधे शक्ते-

---

प्रभाः—**काङ्क्ष इति**। न च कुशाग्रीया बुद्धिरित्यादौ 'इवे प्रतिकृतौ' इत्यधिकारविहितच्छप्रत्ययतद्धितस्य धर्मसाकाङ्क्षत्वाभावादिवार्थकत्वाच्च तद्धिते श्रौती संभवत्येवेति वाच्यम्। इवादेरिव धर्मविशेषसंबन्धं विना पर्यवसानाभावस्य तत्राभावेन श्रौतीत्वाभावात्। अत एव सादृश्यपदप्रयोगेऽपि न श्रौतीत्वम्। यथा 'परस्पराक्षिसादृश्यात्' इति

उ०ः—स्तदुपादानं विना तदर्थबोधाभावात्। किंच षष्ठीसप्तम्यन्तात्तद्विधानेन षष्ठ्याद्यर्थस्य धर्मोपादानं विनाऽन्वयासंभवादिति भावः। **धर्मलोपे तदसंभवादिति**। इदमपि व्यंग्योपमामादायैव। **धन्यस्येति**। अनन्यसामान्यस्येति (न विद्यते अन्यत् सामान्यं सादृश्यं यस्य इति) बहुव्रीहिः। चेत इति संबोधनम्। **आकृष्टेति**। (करवालः खड्गः।) संपराये युद्धे। प्रत्यर्थिसेनया शत्रुसेनया। कृतान्तो यमः। क्रूरत्वमत्र साधारणो धर्मः। **करवाल इवेति**। तत् तदा। यदि वेत्सि तर्हि जीवसीत्यन्वयः। अथ वा यदि जीवसि तर्हि वेत्सि इत्यन्वयः। तत्समीपावस्थाने तव जीवनमेव दुर्लभमिति भावः। अत्र घातकत्वमाधुर्यनाशकत्वानि क्रमेण साधारणा धर्माः। उपमाशब्दस्य सदृशमात्रवाचकत्वेपि साधारणधर्मसंबंधे नित्यसाकांक्षत्वाभावाच्छक्तत्वाभावाद्वाऽऽर्थीत्वम्। **विषकल्पमिति**। ईषदसमाप्तौ विधीयमानस्य कल्पपः सादृश्ये पर्यवसानादिति भावः। **उपमानमात्रान्विततयेति**। उपमानानन्तर्यनियमेनेत्यर्थः। **सअलेति**। सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य। दृश्यतेऽथवा निशम्यते सदृशमंशांशमात्रेण॥ अपिरत्र गम्यः। करणं चक्षुरादि। परविश्रामो विषयांतरवैमुख्यम्। तज्जन्यशोभादावित्यर्थः। (आर्या मुखविपुला।) **अत्र विशेषत इति**। अत्रास्मद्दर्शनश्रवणाविषयत्वेन दुर्लभतयोत्कृष्टगुणं अस्मदगोचरं किंचिदुपमानं भविष्यतीति सादृश्यपर्यवसानादुपमानलुप्तोपमैवेयम्। एतेनासमालंकारोऽयमुपमातिरिक्त इति रत्नाकराद्युक्तमपास्तम्। अत एवोपमानानुपादान इत्युक्तं न त्वसत्त्व इति। वस्त्वन्तरस्य विशिष्यानुपादानमात्रेणोपमानलोपव्यवहारः। एतेनाऽनन्वयोऽत्रेत्यप्यपास्तम्। अनन्वये उपमानासत्त्वस्यैव विवक्षितत्वात्। **चिन्त्यमेतदिति**।

प्रभाः—रघौ प्रथमे सर्गे इत्यादिषु बोध्यम्। **सअलेति**। 'सकलकरणपरविश्रामश्रीवितरणं न सरसकाव्यस्य। दृश्यतेऽथवा निशम्यते सदृशमंशांशमात्रेण॥' इति संस्कृतम्। **विशेषत इति**। उपमानतावच्छेदकामृतत्वादिरूपेणेत्यर्थः। **चिन्त्यमिति**। विचार्यमित्यर्थः। अयमाशयः—अत्र हि न दृश्यते न वा श्रूयत इत्युपमानाभावकथनात्तत्सादृश्यरूपाया उपमाया असंभवादसमालंकार उपमातिरिक्त एवालंकाररत्नाकरादिभिरुक्त इत्युपमाभेदोदाहरणत्वमयुक्तमिति प्रतिभाति। विचार्यमाणे तूपमैवेयम्। अस्मद्दर्शनाद्यगोचरत्वेऽप्यत्युत्कृष्टं किंचिदुपमानं भविष्यतीत्युपमायामेव पर्यवसाना-

(६) वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि ।
कर्मकर्त्रोर्णमुलि,

वाशब्दः उपमाद्योतक इति वादेरुपमाप्रतिपादकस्य लोपे षट्,—समासेन, कर्मणोऽधिकरणाच्चोत्पन्नेन क्यचा, कर्तुः क्यङा, कर्मकर्त्रोरुपपदयोर्णमुला च भवेत् ।

उदाहरणम् :—

ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलंकृता ॥ १० ॥ (म. भा. द्रो. प.)

With the omission of the Vādi, it is possible, (1) in a compound, (2–3) in a Kyach-derivative of an object or abode, (4) in a Kyaṅ-derivative, (5-6) in a Ṇamul gerund with the object or subject prefixed.

Gloss :—The word Vā indicates Upamā. Vādeh, therefore, means: of the word conveying Upamā. On its omission, six varieties may be possible:- (1) in a compound; (2–3) in a Kyach formed from a noun signifying an object or abode; (4) in a Kyaṅ formed from a noun signifying the subject; (5–6) and in a Ṇamul with the subject or object prefixed.

To illustrate:—

Then the Eastern Quarter (Lit. the Quarter of the Great Indra) was graced with the moon, the lord of moon–lotuses, that was pale-white like the cheek of a love-lorn lady (Kāminī), and that was the delight of the eye. (10)

प्रदीपः—द्योतकलोपे वाक्यगा तावन्न संभवति । 'मुखं चन्द्रो रमणीयम्' एतावन्मात्रेणोपमाप्रत्ययाभावात् । नापि तद्धितगा । वतेः कल्पबादीनां च द्योतकतया तत्प्रयोगे द्योतकलोपस्यैवासंभवात् । न वा श्रौतीत्यन्यथा विभजते—**वादेरिति** । वाशब्द उपमाद्योतक इति वादेरुपमाद्योतकस्येत्यर्थः । तस्य लोपे समासे क्यचि क्यङि णमुलि चोपमा । तत्र क्यचि द्विधा । कर्मणोऽधिकरणाच्च विधानेन तस्य द्वैविध्यात् । क्यङि त्वेकैव । कर्तुरेव

उ०ः—तद्बीजं तु काव्यमेवात्रोपमानम् । चंद्रस्य सदृशं मुखमित्यादौ चंद्रस्यैवोपमानतावगमात् । एवं चोपमेयलोप इति वक्तुमुचितमिति । उद्धारस्तु काव्यस्य सममित्यस्य काव्यनिष्ठसादृश्यप्रतियोगीत्यर्थः । काव्यस्य वर्णनीयतयोत्कर्षायोपमेयस्य विवक्षितत्वादित्याहुः । **तद्विधानादिति** । एवं च सादृश्यबोध-

तथा

असितभुजगभीषणासिपत्रो रुहरुहिकाहितचित्ततूर्णचारः ।
पुलकिततनुरुत्कपोलकान्तिः प्रतिभटविक्रमदर्शनेऽयमासीत् ॥ ११ ॥ (—)

पौरं सुतीयति जनं समरान्तरेऽसा-
वन्तःपुरीयति विचित्रचरित्रचुञ्चुः ।
नारीयते समरसीम्नि कृपाणपाणे-
रालोक्य तस्य चरितानि सपत्नसेना ॥ १२ ॥ (—)

मृधे निदाघघर्मांशुदर्शं पश्यन्ति तं परे ।
स पुनः पार्थसंचारं संचरत्यवनीपतिः ॥ १३ ॥ (—)

Again,

At the sight of valour on the part of (his) adversaries, the sword (असिपत्र) of this (hero) grew fierce like a black cobra; his movements became swift owing to the mind being pre-occupied with a keen anxiety (to fight). His body thrilled into horripilation, and (eventually) the beauty of his cheeks rose up. (11)

He looks after the citizen as after his own son; renowned (चुञ्चु) for marvellous deeds he deports himself in the midst of battle, (as freely) as in his harem. The hostile army behaves like a woman at the sight of the exploits of him, armed with a sword, in the van (सीमन्) of the battle. (12)

The enemies look at him, in the battle, as at the summer-sun; but the king stalks about as Pārtha (अर्जुन) did (quite unconcerned). (13)

प्रदीपः – तद्विधानात्। णमुल्यपि द्विधा। कर्मकर्त्रोस्तद्विधानात्। तत्र समासे द्विधा। द्वयोस्त्रयाणामपि वा उपमानादिपदानां समासात्। तयोराद्या यथा—**तत इति**। अत्र गण्डपाण्डुनेति द्वयोः समासः। द्वितीया यथा–**असितेति**। अत्रासितभुजगेत्यादावुपमानधर्मोपमेयशब्दानां त्रयाणामपि समासः। क्यच्क्यङोर्भेदत्रयं यथा—**पौरमिति**। अत्र पौरं सुतीयतीत्यत्र 'उपमानादाचारे' (पा. सू. ३–१–१०) इति कर्मणः क्यच्। समरान्तरेऽन्तःपुरीयतीत्यत्र तु

उ०ः – क्वादिलोपे षड्विधेत्यर्थः। **तत इति**। (महाभारते द्रोणपर्वणि रात्रियुद्धे १८४ अध्याये चन्द्रोदयवर्णनम्।) कुमुदनाथत्वं तद्विकासित्वात्। गंड इव पांडुरिति उपमानानीति समासः। नेत्रानन्देन तज्जनकेन। माहेंद्री प्राची। **असितेति**। असितभुजगस्तीक्ष्णविषः सर्पजातिभेदः। तद्वद्भीषणस्तीक्ष्णधारत्वादसिरेव पत्रं यस्य सः। रुहरुहिका रभसोत्कंठा तदाहितश्चित्र आश्चर्यभूतस्तूर्णस्त्वरितश्चारो

(७) एतद्विलोपे क्विप्समासगा ॥ ३ ॥

एतयोर्धर्मवाद्योः । उदाहरणम्:—

सविता विधवति विधुरपि सवितरति तथा दिनन्ति यामिन्यः ॥
यामिनयन्ति दिनानि च सुखदुःखवशीकृते मनसि ॥ १४ ॥ (—)

परिपन्थिमनोराज्यशतैरपि दुराक्रमः ।
संपरायप्रवृत्तोऽसौ राजते राजकुञ्जरः ॥ १५ ॥ (—)

When these two are omitted, we get an Upamā (1) in a Kvip derivative or (2) in a compound.

Gloss:—Of these i. e. of property and Vādi.

To illustrate:—

According as the mind is under the sway of joy or grief, the sun acts like the moon, or, (otherwise), even the moon acts like the sun; the nights act like days, or, (otherwise), the days act like nights. (14)

That elephant-like king looks radiant as he becomes prepared for the battle, hard to be vanquished, even in their high-soaring aspirations, (मनोराज्य)–hundreds of them,—on the part of the antagonists. (15)

प्रदीप:—'अधिकरणाच्च' इत्यनेनाधिकरणात्। नारीयते इति 'कर्तुः क्यङ् सलोपश्च' (पा. सू. ३–१–११) इत्यनेन कर्तुः क्यङ्। णमुलि भेदद्वयं यथा—**मृधे इति**। अत्र निदाघघर्मांशुदर्शमिति कर्मणि णमुल्। निदाघघर्मांशुमिव पश्यन्तीत्यर्थात्। पार्थसंचारमित्यत्र कर्तरि। 'उपमाने कर्मणि च' (पा. सू. ३–४–४५) इति सूत्रे चकारात्।

उ०: –गमनं यस्य सः। उद्गतकपोलशोभः। (पुष्पिताग्रा छंदः।) यत्तु पूर्वोदाहरणे उपमानानीति समासाच्छ्रौती, अत्र त्वसितभुजगवद्भीषण इति मध्यमपदलोपिसमासादार्थीति भेदमाहुः, तन्न। विनिगमनाविरहात्। **पौरं सुतीयति इति**। पौरं नागरजनं सुतमिवाऽऽचरतीत्यर्थे उपमानादाचार इति क्यच्। उपमानवाचकात्कर्मण आचारेऽर्थे क्यजिति सूत्रार्थः। उपमानादित्यनेन इवार्थस्य वृत्तौ प्रवेशः सूचितः। अत्राऽऽचारः स्नेहपालनादिरूपः। एवं चोपमानभूतसुतकर्मकाचाराभिन्नः पौरकर्मकाचार इति बोधः। एवमंतःपुर इवाचरतीत्यर्थकांतःपुरीयतीत्यत्रापि बोध ऊह्यः। अत्राऽऽचारः स्वच्छंदगमनादिः। **विचित्रेति**। विचित्रचरित्रैर्वित्त इत्यर्थः। तेन

प्रभा:—दतो नालंकारान्तरमिति। **पौरमिति**। अत्र क्यच्क्यङोराचारमात्रमर्थः। प्रकृतिभूतसुतादिपदानां तत्सादृश्ये लक्षणेति सादृश्यवाचकाभावाद्वाचकलोपः। एवं णमु-

(८) धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते ।

When the property and the Upamāna happen to be omitted, the Upamā is in evidence in (1) a compound (वृत्ति) and (2) a sentence.

प्रदीपः – अथ द्विलोपे विभजनीया । तत्र धर्मवाद्योर्लोपे वाक्यगा न संभवति । शिष्टयोर्मुखं चन्द्र इत्येतावन्मात्रयोरुपादाने उपमाऽनवगमात् । नापि तद्धितगा । तद्धितस्यापि कल्पवादित्वेन तत्सत्त्वे द्विलोपाभावात् । नापि श्रौती । इवाद्यभावादित्यन्यथा विभजते— **एतदिति** । एतद्विलोपे एतयोर्द्वयोर्धर्मवाद्योर्लोपे । क्विब्गा यथा— **सवितेति** । यद्यप्याचारे क्विब्विधानात्तस्यैव च समानधर्मरूपत्वेन क्विपि धर्मलोपो नास्ति तथापि क्विप एव लोपाद्धर्मलोपव्यवहारः । अत एव समानार्थत्वेऽपि क्यङत्र नोपात्तः । तस्याल्लुप्तत्वेन धर्मलोपाभावात् । समासगा यथा— **परिपन्थीति** । अत्र राजायं कुञ्जर इवेत्युपमा । **धर्मेति** ।

उ॰ – वित्तश्चुंचुप्चणपाविति (पा. सू. ५-२-२६) चुंचुप्प्रत्ययः । नारीवाऽऽचरति नारीयते । कर्तुः क्यङ् । आचारोऽत्र विनयादिः । (वसन्ततिलका छन्दः ।) अत्र सादृश्यसदृशैतन्मात्रबोधकाभावात् वाचकलुप्ता बोध्या । यत्तु सुतपदस्य सुतसादृश्यलक्षकत्वेऽपि सादृश्यवाचकाभावाद्वाचकलुप्तेति, तन्न । चंद्रप्रतिपक्षमाननमित्यादावपि वाचकलुप्तापत्तेः । **मृधे इति** । रणे इत्यर्थः । (परे शत्रवः । निदाघघर्मांशुदर्शं पश्यन्ति । ग्रीष्मसम्बन्धिसूर्यमिव पश्यन्तीत्यर्थः । पार्थसंचारं संचरति । पार्थ इव संचरतीत्यर्थः ।) णमुल्प्रकृतिः साधुत्वमात्रार्था । णमुलर्थो भावः । अन्ययकृतां भावे एव विधानात् । तस्मात् कर्मणोरेव कर्त्रोरेव चोपमानोपमेयभाव इति लुप्तोपमैवेयं इति । **सवितेति** । सुखिते मनसि सूर्यश्चंद्रसदृशः । आह्लादकत्वात् । दुःखिते चंद्रः सूर्यसदृशः । दुःखदत्वात् । एवमुत्तरत्र । (विधवति विधुरिवाऽऽचरति । सवितरति सवितेवाऽऽचरति । दिनन्ति दिनानीवाऽऽचरन्ति । यामिनयन्ति यामिन्य इवाऽऽचरन्ति । आर्या छन्दः ।) **क्विप एवेति** । यद्यपि क्विप्प्रकृतेः कर्तृभूतस्य सादृश्यप्रयोजकाचारलक्षणेति कथं धर्मलोपः । तथापि तन्मात्रबोधकाभावाल्लोपव्यवहारः । **परिपंथीति** । शत्रुमनोराज्यैरपीत्यर्थः । साक्षाद्दुराक्रम एवेति किं वक्तव्यमिति भावः । संपरायो युद्धम् । **राजाऽयं कुंजर**

प्रभा : – लोऽपि भावेभावे धातुसंबन्धे च विधानान्नोपमावाचकत्वमित्यूह्यम् । **कुञ्जर इवेत्युपमेति** । परसेनाविद्रावकत्वादेः सामान्यस्याप्रयोगादुपमितसमासबोध्येत्यर्थः । परिप-

ढुण्ढुण्णन्त मरीहसि कण्टअकलिआँइ केअइवणाइं ।
मालइकुसुमसरिच्छं भमर भमन्तो ण पावहिसि ॥ १६ ॥ (—)

कुसुमेण सममिति पाठे वाक्यगा ।

(९) क्यचि वाद्युपमेयासे

आसे निरासे ।

अरातिविक्रमालोकविकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥ १७ ॥ (—)

अत्रात्मा उपमेयः ।

Gloss:– As you hover about the clumps of Ketakī that bristle with thorns, you will perish, o bee! Never will you come across *anything* comparable to the Mālatī blossom. (16)

In a Kyach derivative, when the Vādi and the Upameya are dropped.

Gloss:– आसे i. e. when they are dropped.

With the eyes dilated (विकस्वर) at the sight of the valour of the foe, he, with his massive arm rendered terrible by a sword, demeans (himself) like the thousand-weaponed (कार्तवीर्य अर्जुन). (17)

Here the Upameya is आत्मन् (self).

प्रदीपः – तद्धिते तु नेयम्। उपमानलोपे तद्धितस्यैवाभावात्। नापि श्रौती। उपमानाप्रयोग इवादेरप्रयोगात्। तत्र समासगा यथा–**ढुंढुण्णन्त इति**। कुसुमसरिच्छमित्यत्र 'कुसुमेण समं' इति पाठे इयमेव वाक्यगा। **क्यचीति**। आसे निरासे। उदाहरणम्–**अरातीति**। अत्र यद्यपि विशेषणद्वारोपात्तः कर्तैवोपमेयस्तथापि न तथात्वेन, किं तु कर्मत्वेन। अन्यथा क्यचोऽसंगतत्वापत्तेः। तथा चाऽऽत्मानं सहस्रायुधीयतीत्यर्थ इत्युपमेय आत्मा

उ०: –इवेति। उपमितं व्याघ्रादिभिरिति (पा. सू. १–४–५६) ससासः। दुराधर्षत्वस्य समानधर्मस्य प्रसिद्धत्वात् न न्यूनपदत्वम्। औपम्यं समासगम्यम्। अत्र रूपकं तु न। मनोराज्यशतैरित्यादेरनन्वयादित्याहुः। **ढुंढुण्णन्त इति**। ढुंढुलायमानो मरिष्यसि कंटककलितानि केतकीवनानि। मालतीकुसुमसदृशं भ्रमर भ्रमन्नपि न

प्रभाः – न्यीत्यादि न सामान्यपरमिति भावः। **ढुण्ढुण्णन्त इति**। 'अन्वेषयन्मरिष्यसि कण्टककलितानि केतकीवनानि। मालतीकुसुमसदृशं भ्रमर भ्रमन्नपि न प्राप्स्यसि॥' इति संस्कृतम्। अत्रापि दुर्लभतयोत्कृष्टं कुसुमान्तरमप्रकृतं प्रकृतमालत्युपमानतया विवक्षितमिति ज्ञेयम्। **अत्र यदीति**। शक्त्या लक्षणया वा उपमाना-

(१०) त्रिलोपे च समासगा ॥ ४ ॥

त्रयाणां वादिधर्मोपमानानाम् । उदाहरणम्—

तरुणिमनि कृतावलोकना ललितविलासवितीर्णविग्रहा ।
स्मरशरविसराचितान्तरा मृगनयना हरते मुनेर्मनः ॥ १८ ॥ (—)

अत्र सप्तम्युपमानेत्यादिना यदा समासलोपौ भवतः, तदेदमुदाहरणम् ।

क्रूरस्याऽऽचारस्यायःशूलतयाऽध्यवसायात्, अयःशूलेनान्विच्छति 'आयःशूलिकः'—इत्यतिशयोक्तिर्न तु क्रूराचारोपमेय-तैक्ष्ण्यधर्म-वादीनां लोपे त्रिलोपेयमुपमा । एवमेकोनविंशतिर्लुप्ताः । पूर्णाभिः सह पञ्चविंशतिः ।

And with the omission of three, it (i. e. Upamā) becomes possible in a compound.

Gloss:—Of three, viz. of the Vādi, (the common) property and the Upamāna. To illustrate:—

The deer-eyed one ravishes the mind of the hermit: she who has just begun peeping into youth, who has given a corporate form (in the shape of herself) to graceful amours, and whose heart bristles with a swarm of Cupid's arrows. (18)

This becomes an (appropriate) instance, provided (यदा) there are assumed to take place a compound and omission, in accordance with the Vārtika सप्तम्युपमान etc.

'आयःशूलिक' which is explained as अयःशूलेन अन्विच्छति (one who seeks to gain his point by the *steel-spike*) is an instance of अतिशयोक्ति, since therein we have the supersession of 'cruel conduct' by the idea of its being the 'steel-spike'. It should not, however, be taken as an instance of Upamā with the three constituents dropped, i.e. in which the Upameya: क्रूर आचार, the property: तैक्ष्ण्य, and the Vādi are omitted.

Thus there become possible nineteen varieties of the Elliptical, which, with the six ones of the Full-fledged, make *twenty-five* in all.

प्रदीपः—लुप्त इति यथोक्तोदाहरणमेतत् । हंसायत इत्यादौ कर्तैवोपमेयः । तस्य चानुपादाने वाक्यमेव न पर्याप्यत इति विशेषात् क्यङि नेयं संभवति । यद्यपि द्विलोपेऽन्यदपि भेदत्रयं

उ०:—प्राप्स्यसि ॥ ढुंढुलायमानः अन्वेषमाण इत्यर्थः । एकाकारशब्देन प्रार्थमनित्यर्थ इत्यन्ये । काचित् सौभाग्यमात्मनः सूचयंती प्रियसन्निधौ भ्रमरं प्रत्येवमाह ।

प्रदीपः—संभवति, यथा उपमानोपमेययोः, उपमानवाच्योः, उपमानधर्मयोरिति, तथापि तेषूपमायाः प्रसङ्ग एव नास्तीति न न्यूनत्वमाशङ्कनीयम्।

त्रिलोपे तूपमेयातिरिक्तत्रितयलोप एव संभवतीत्युक्तम्। सापि समासमात्रे। अन्यत्र बोधकाभावात् तत्राऽऽर्थ्येव इवादेर्लोपात्, इत्येकविधैवेत्याह—**त्रिलोप इति**। यथा—**तरुणिमनीति**। अत्र यदि मृगशब्देन लक्षणया तल्लोचने विवक्ष्येते तदा नेदमुदाहरणम्। यदा तु मृगलोचने इव नयने यस्या इत्यर्थो विवक्ष्यते तदा 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्च' इत्यनेन मृगलोचनेत्युपमानपूर्वपदस्य नयनशब्देन बहुव्रीहावुपमानवाचिनि मृगलोचन इति पूर्वपदे उत्तरपदभूतस्य लोचनशब्दस्य लोपे उपमेयभूतस्य नयनमात्रस्योपादानादिदमुदाहरणम्।

केचित्तु "उपमानमात्रोपादानेऽपि त्रिलोपा संभवति। यथा 'अयमायःशूलिकः' इति। अत्रायःशूलपदेन क्रूर आचार उपमेयः। तीक्ष्णत्वादिकं च साधारणो धर्मः। न च तयोरेकमप्युपात्तम्। नापीवादिः" इति मन्यन्ते। तन्न युक्तम्। यतः क्रूरस्याचारस्यायःशूलतयाऽध्यवसानादतिशयोक्तिरियं न तूपमा। अन्यथाऽध्यवसानमूलातिशयोक्तेर्निर्विषयत्वापत्तेः।

उ०ः—(गाथा छन्दः।) अत्र प्रकृतत्वान्मालती उपमेया। कुसुमांतरस्याप्राप्त्युपदेशेन त्वदप्राप्यमुत्कृष्टगुणमस्योपमानमिति प्रतीतेरस्त्युपमितिक्रियानिष्पत्तिरिति बोध्यम्। **क्वचीति**। विषयसप्तमी। **निरास इति**। वाद्युपमेययोर्लोपे इत्यर्थः। **अरातीति**। मदग्रेऽपि वैरिविक्रम इति नयनविकासः। कृपाणेनोदग्रो भीषणो बाहुर्यस्य सः। सहस्रमायुधानि यस्य तमिवात्मानमाचरतीति कर्मणि क्यच्। आयुधसहस्रनिर्वाह्यस्य प्रतिपक्षोत्सारणस्यैकेन कृपाणेन निर्वाहाद्वीरप्रकर्षः। सहस्रारायुधीयतीति पाठे सहस्रारं चक्रमायुधमस्य विष्णोस्तमिवाऽऽचरतीत्यर्थः। **विशेषणद्वारेति**। सहस्रारायुधीयतीति पाठे इदम्। स सहस्रायुधीयतीति पाठे साक्षादुपात्त इति बोध्यम्। **अन्यथा क्यच इति**। इच्छाक्यच् तु नायम्। अरातीत्यादिविशेषणासामंजस्यात्। तथाऽपीत्यतःप्रागुपमेयधर्मयोरिति पाठः। उपमानधर्मयोरिति पाठस्त्वयुक्तः। तल्लोपेऽनुपदमेव ढुंढुणंत इत्यस्योदाहरणात्। **तरुणिमनीति**। तरुणिमनि सति मृगनयना मुनेः मनो नयते हरतीत्यन्वयः। ललिताय विलासाय च वितीर्णो दत्तो विग्रहः शरीरं यया। स्मरशरैर्विशीर्णीकृतमान्तरं यस्याः सा (अपरवक्त्रं छन्दः।) **नेदमुदाहरणमिति**।

अनयेनेव राज्यश्रीर्दैन्येनेव मनस्विता ।
मम्लौ साथ विषादेन पद्मिनीव हिमाम्भसा ॥ १९ ॥ (—)

इहाभिन्ने साधारणे धर्मे,

ज्योत्स्नेव नयनानन्दः सुरेव मदकारणम् ।
प्रभुतेव समाकृष्टसर्वलोका नितम्बिनी ॥ २० ॥ (—)

इति भिन्ने च तस्मिन्, एकस्यैव बहूपमानोपादाने मालोपमा । यथोत्तरमुपमेयस्योपमानत्वे (पूर्ववदभिन्नभिन्नधर्मत्वे),

---

Mālopamā that results when with reference to the same object, several Upamānas come to be stated, the common property being the same, as in

Thereupon she withered away through sadness, like the prosperity of the kingdom through unjust rule, like spirited nature through proverty, like the lotus plant through frost. (19),

or different, as in

The lovely woman (lit. with lovely hips) is, like moon-light, a delight to the eyes; like wine, a source of ravishment; like sovereignty, she has drawn together, under her sway, all the people. (20);

प्रदीपः–तदेवं धर्मलोपे पञ्च । उपमानलोपे द्वौ । द्योतकलोपे षट् । धर्मवाद्योर्लोपे द्वौ । धर्मोपमानयोर्लोपे द्वौ । द्योतकोपमेयलोपे चैकः । त्रिलोपे त्वेकः । इत्यूनविंशतिर्लुप्तभेदाः । पूर्णभेदाश्च षट् । इत्येवं पञ्चविंशतिः ।

उ०ः–अत्र स्वमात्रबोधकपदाभावात्त्रयाणां लोपसंभवेन चिंत्यमेतदित्याहुः । **अत्रायःशूलेति**। अयःशूलपदेन स्वार्थसदृशो लक्ष्यते इति भावः। **अतिशयोक्तिरिति** । अयःशूलशब्दादयःशूलत्वेन स्वार्थसदृशक्रूराचारलक्षकात्तेनान्विच्छतीति ठक्प्रत्यये उक्तरूपसिद्धेरिति भावः । **निर्विषयत्वापत्तेरिति** । कमलमनंभसीत्यादावपि कमलादिपदैः स्वार्थसदृशमुखादेर्लक्षणादेतद्भेदापत्तेरिति भावः । वस्तुतोऽयं पूर्णालुप्ताविभागो वाक्यसमासप्रत्ययविशेषगोचरतया शब्दशास्त्रव्युत्पत्तिकौशलप्रदर्शनपरत्वादत्र शास्त्रे न व्युत्पाद्यतामर्हति । सा चेयमुपमा वस्त्वलंकारस्वरूपाणां व्यंग्यानां वस्त्वलंकारयोर्वाच्ययोश्चोपस्कारकतयाऽलंकारतां भजते ।

प्रभाः–नुक्तौ ह्युपमानलुप्तेति नोदाहरणमिदमित्यर्थः । लुप्ताभेदानुपसंहरति—**तदेवमिति** । चित्रमीमांसायां त्वन्येऽपि लुप्ताभेदा दर्शिताः । तथाहि—"वाचकलुप्ता षड्विधा

अनवरतकनकवितरणजललवभृतकरतरङ्गितार्थिततेः ।
भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिरतिविमला ॥२१॥ (—)
मतिरिव मूर्तिर्मधुरा मूर्तिरिव सभा प्रभावचिता ।
तस्य सभेव जयश्रीः शक्या जेतुं नृपस्य न परेषाम् ॥ २२ ॥ (—)

(इत्यादिका) रशनोपमा च न लक्षिता । एवंविधवैचित्र्यसहस्रसम्भवात् । उक्तभेदानतिक्रमाच्च ।

---

and Raśanopamā which results when, in a regular succession, the Upameya of the preceding Upamā becomes the Upamāna of the following one, (the common property being the same or different, as above,) e.g.:

Of him (the king), towards whose hand, filled with drops of water for making unceasing gifts of gold, surges the queue of supplicants, are like the words the thoughts, like the thoughts the acts, like the acts the fame, extremely stainless. (21),

Like the thoughts of that king is his figure pleasing; like the figure is his council swelling with prowess; like his council his triumphal glory cannot be won over by the enemies. (22);

have not been defined. For, it is possible to have thousands of such variations, and yet they do not go beyond the varieties specified.

प्रदीप :– नन्वन्येऽप्युपमाभेदाः संभवन्ति। तथाहि—एकस्यैवोपमेयस्य बहूपमानसंबन्धो मालोपमा । सा च द्विधा–साधर्म्यस्याभेदात्तद्भेदाच्च । तत्राद्या यथा—

उ० : – न चैवमन्यानुपस्कारकसादृश्यनिबंधने 'स च्छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात् पवनावधूतः । अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाऽऽबभासे' इत्यादौ अलंकारव्यवहारानापत्तिः । आपणे विक्रीयमाणतादृशायां ताटंकादे-

---

प्रभा : – इहोक्ता। 'कर्तर्युपमाने' इति णिनौ सप्तम्यपि दृश्यते कोकिल इवालपति कोकिलालापिनीति । तथा 'इवे प्रतिकृतौ' इति कन्प्रत्यये 'लुम्मनुष्ये' इति लुपि चेवेत्यर्थे 'चञ्चापुरुषः सोऽयं यः स्वहितं नैव जानाति' इत्यष्टमी । एवम् 'यद्भक्तानां सुखमयः संसारोऽप्यपवर्गेति' इत्यत्र धर्मस्य सुखमयत्वस्य पदान्तरेणोपादाने क्विपि नवमी । तथा उपमानलुप्ता वाचकसमासयोर्द्विविधोक्ता तृतीयापि दृश्यते—'यच्चोराणामस्य च समागमो यच्च तैर्वधोऽस्य कृतः । उपनतमेतदकस्मादासीद्वत काकतालीयम् ॥' अत्र काकतालपदयोर्लक्षणया काकागमनतालपतनपरयोरिवार्थे 'समासाच्च तद्विषयात्' इति ज्ञापकात्काक इव ताल इव काकतालमिति समासे काकतालसमागमसदृशश्चौराणामस्य च समागम इत्यर्थः । ततः काकतालमिवेति पुनरिवार्थे तेनैव सूत्रेण च्छप्रत्यये

प्रदीप :—**अनयेनेवेति**। अत्र म्लानिरेव सर्वोपमानसाधर्म्यम्। अन्त्या यथा—**ज्योत्स्नेवेति**। अत्र ज्योत्स्नादीनां नयनानन्दहेतुत्वादयः साधारणधर्मा भिन्नाः। पूर्वपूर्वोपमेयस्योत्तरोत्तरमुपमानत्वे रशनोपमा। सापि द्विधा—साधर्म्याभेदात्तद्भेदाच्च। तत्राद्या यथा—**अनवरतेति**। अत्र विमलत्वमेव सर्वासूपमासु साधारणो धर्मः। अन्त्या यथा—**मतिरिवेति**। अत्र मूर्त्यादीनां मधुरत्वादयो धर्मा भेदवन्तः। त एते भेदाः किमिति नोक्ता इति चेत्, उक्ता एव। उक्तभेदान्तर्भावात्। तथापि तेन तेन रूपेण किं नोक्ता इति चेत्,

उ० :—नायिकाकर्णाद्यनुपस्कारकत्वेऽपि अलंकारव्यवहारवदुपपत्तेः। कदाऽप्यलंकारभावमप्राप्य मंजूषादिगतकटकादिवत् अलंकुर्वाणगतधर्ममात्रसंस्पर्शनिबंधनत्वाच्च। एतेन यत्र सकलवाक्येन प्राधान्येन व्यंग्योपमा तत्राप्यलंकारध्वनिव्यवहारो व्याख्यातः। इयं चोपमा यथेवसदृशतुल्यादिशब्दोपादाने वाच्यालंकारः। सुहृत्प्रतिपक्षादिशब्दोपादाने लक्ष्या। **साधर्म्यस्याभेदादिति**। एकशब्दबोध्यत्वेन सर्वोपमानगतत्वादित्यर्थः। **तद्भेदादिति**। प्रत्युपमानं विश्रांतेरित्यर्थः। यथा माला काचिदेकजातीयैः कुसुमैः काचिद्विजातीयैस्तथेयमपि सजातीयैर्विजातीयैर्वा बहुभिरुपमानैर्घटितेति द्विविधा मालोपमेत्यर्थः। **अनयेति**। मनस्विता पाण्डित्यम्। इतरत्स्पष्टम्। **ज्योत्स्नेवेति**। पद्यं स्पष्टार्थम्। **अनवरतेति**। निरंतरस्वर्णदानाय जललवभृते तत्संबद्धे करे तरंगिता पूर्वपश्चाद्भावेन श्रेणीभूय मिलिता अर्थिततिर्यस्य। भणितिर्वचनम्। (गीतिश्छन्दः।) **मतिरिवेति**। चिता व्याप्ता। तस्य नृपस्य सभेव तस्य जयश्रीः परेषां जेतुं शक्या नेति संबंधः। (उद्गीतिश्छन्दः।)

प्रभा :—तालपतनजन्यकाकवधसदृशश्चोरकर्तृकदेवदत्तवध इति बोधः। अत्र च्छप्रत्ययार्थद्वितीयोपमायामुपमानभूतस्य तालपतनजन्यकाकवधस्यानुपादानादुपमानलुप्तेयम्। तथा प्राथमिकोपमावाचकोपमानोभयलुप्ता। इयमेव उपनतमकस्मादित्यनुक्तौ धर्मोपमानलुप्ता। एवं वाचकधर्मयोः क्विप्समासयोरिव (?) चञ्चापुरुष इति कनो लोपे धर्मानुपादाने च भवतीति द्वात्रिंशल्लुप्ताभेदाः।" इति। अत्रेदं बोध्यम्—पूर्णायां साधारणो धर्मः क्वचिदनुगतः। यथा स्वप्नेऽपीत्यत्र न मुञ्चतीति। क्वचिद्वस्तुप्रतिवस्तुभावापन्नः। यथा—'यान्त्या मुहुर्वलितकंधरमाननं तदावृत्तवृन्तशतपत्रनिभं वहन्त्या। दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात इव मे हृदये कटाक्षः॥' इत्यत्र भिन्नाभ्यां वलितावृत्तशब्दाभ्यामेकस्य धर्मस्य बिम्बप्रतिबिम्बभावापन्नकंधरावृन्तविशेषणतयोपादानात्तथात्वम्। कंधरावृन्तयोस्तु सादृश्यादभेदेनाध्यवसानाद्बिम्बभावः। बिम्बप्रतिबिम्बभावापन्नधर्मं प्रति विशेष्यतया वस्तुप्रतिवस्तुरूपो धर्मः क्वचित्। यथा—'सा

(११) उपमानोपमेयत्वे एकस्यैवैकवाक्यगे।
अनन्वयः।

उपमानान्तरसंबन्धाभावोऽनन्वयः।

2. ANANVAYA.

When in one and the same sentence, one and the same thing stands both as the Upamāna and the Upameya, there results "Ananvaya."

Gloss:—'Ananvaya' (want of connection) is so called because it consists in the negation of connection with any other Upamāna (but itself).

प्रदीप:-एवंविधवैचित्र्यसहस्रसंभवात्सर्वेषामाख्यातुमशक्यत्वात्। **उपमानेति।** उपमानान्तरव्यवच्छेदाय यदेकस्यैवोपमानोपमेयत्वे भेदोपचारेणैव निबध्येते सोऽनन्वयः। तदेतदुक्तम् 'उपमानान्तरसंबन्धाभावोऽनन्वयः' इति बहुव्रीहिसमासात्। यद्वा संज्ञायोगनिर्वचनं तत्। अनन्वयः संबन्धाभावः। स चार्थादुपमानान्तरेण उपमेयभिन्नेनेति। एवकारो वैचित्र्यविशेषस्फोरणार्थः। एकवाक्यगे इति विपर्यासोपमाव्यावर्तनाय। तत्र हि

उ०:-**वैचित्र्यसहस्रेति।** बिंबप्रतिबिंबभावादिभेदेन लोकसिद्धकविकल्पितादिभेदेनोपस्कार्यभेदेन निरवयवादिभेदेन अन्योन्योपायत्वरूपपरंपरितत्वे उपायत्वस्यानुकूल्यप्रातिकूल्यादिभेदेन तेषां परस्परं गुणने इयत्ताया वक्तुमशक्यत्वादिति भावः। **इत्युपमालंकारः। उपमानेति।** न विद्यतेऽन्वयः संबंधोऽर्थादुपमानांतरेण यत्र सोऽनन्वय इति अन्वर्थमलंकारनामेदम्। तत्रान्वर्थसंज्ञाबललब्धमर्थमाह **उपमानांतरेति। भेदोपचारेणेति।** भेदेऽसत्यपि तद्घटितसा-

प्रभा:-तेन जगृहे साध्वी हठात्साध्वसकम्पिता। वानरेणातिलोलेन वाताधूतेव वल्लरी॥' इत्यत्र साध्वसवातयोर्बिम्बप्रतिबिम्बभावापन्नयोः कम्पिताधूतशब्दाभ्यामेको धर्मो विशेष्यतयोक्तः। एवमन्यत्रापि बिम्बप्रतिबिम्बभावसंकीर्ण एव वस्तुप्रतिवस्तुभावो न केवलः। केवलबिम्बप्रतिबिम्बभावेन साधारण्यं यथा—'पाण्ड्योऽयं–' इति रघौ। अत्र हि हरिचन्दनबालातपौ हारनिर्झरौ (बिम्बप्रतिबिम्ब-भावापन्नौ?।) क्वचित् श्लेषेण साधारण्यं यथा—'सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव' इत्यादौ। क्वचिदुपचारेण यथा—'पङ्कजैरिव कुमारमीक्षणैर्विस्मयेन विकचैः पपुर्जनाः' इत्यत्र विकासस्य पुष्पधर्मस्य नेत्रेषु। समासभेदाश्रयणेन यथा—'तया विवृद्धाननचन्द्रकान्त्या प्रफुल्लचक्षुःकुमुदः कुमार्या। प्रसन्नचेतःसलिलः शिवोऽभूत्संसृज्यमानः शरदेव लोकः॥' इत्यादावाननरूपश्चन्द्र इत्युपमेये चार्थाङ्गीकरणात्। पूर्वोक्तः श्लेषः सभङ्गोऽयं त्वभङ्ग इति भेद इति दिक्। अथोपमायां शाब्दबोधप्रकारः कथ्यते—

उदाहरणम्—

न केवलं भाति नितान्तकान्तिर्नितम्बिनी सैव नितम्बिनीव।
यावद्विलासायुधलास्यवासास्ते तद्विलासा इव तद्विलासाः ॥ २३॥ (—)

(१२) विपर्यास उपमेयोपमा तयोः ॥ ८ ॥

To illustrate:-

That beautiful lady of superb charms looks splendid like herself alone;—not this much only,—also her amours, the very abodes of Cupid's (विलासायुध) gentle frolics (लास), are (only) like themselves. (23)

3. UPAMEYOPAMĀ.

When there takes place an exchange of places of them two (i. e. the Upamāna and the Upameya), there results " Upameyopamā. "

प्रदीप :– वाक्यद्वये तथाभावः। उदाहरणम् **न केवलमिति**। अत्र दशाविशेषादिभेदाद्भेदोपचारः। **विपर्यास इति**। तयोरुपमानोपमेययोर्विपर्यास उपमेयोपमानभावः। अर्था-

उ० :– द्वयोपचारेणेत्यर्थः। आपाततः शाब्दबोधोपपत्तये उपमानांतरव्यवच्छेदबोधाय च आहार्यस्तदुपचारः। एतेन देशकालादिभेदाद्भेदोऽत्रेति परास्तम्। तथा सत्युपमाया एवाऽऽपत्तेः। गगनं गगनाकारमित्यादौ तद्युगे तद्देशे वा यथा गगनं तथैतद्युगे एतद्देशेऽपीति बोधात्। अनन्वये तु निरुपमानत्वनिमित्तोत्कर्षाय स्वयमेव स्वस-

प्रभा :– तत्र सादृश्यं पदार्थान्तरमिति प्राचां मतम्। साधारणधर्मरूपमेव तदिति नव्यानाम्। तत्राद्यमते तावदुच्यते—तत्र चन्द्र इवाह्लादकं मुखमित्यादाविवार्थे सादृश्ये चन्द्रादेर्निरूपितत्वसंसर्गेणान्वयः। सादृश्यस्य च प्रयोजकतासंसर्गेण आह्लादकत्वादौ साधारणधर्मे पदार्थैकदेशेऽप्यनुभवबलादन्वयः तद्विशिष्टस्य चाभेदेन मुखादावुपमेये। तेन चन्द्रनिरूपितसादृश्याप्रयोजकाह्लादकत्वविशिष्टाभिन्नं मुखमिति बोधः। इवाद्युक्तसादृश्यस्योपमानविशेषणत्वमते तु बोधः प्रागुक्तः। समानधर्माप्रयोगे तु सादृश्यस्योपमेय एवान्वयः। निपातार्थतया भेदे नानार्थान्वये बाधकाभावात्। चन्द्रसुन्दरमिति समासे तु चन्द्रनिरूपितसादृश्यप्रयोजके चन्द्रपदस्य लक्षणा। तस्या भेदेनार्थे पदार्थैकदेशेऽपि सौन्दर्येऽन्वयः। तदनङ्गीकारे तु चन्द्रपदस्यैव तादृशसौन्दर्यवति लक्षणेति पूर्ववदेवान्वयबोधः। चन्द्र इव भाति मुखमित्यादौ चन्द्रनिरूपितसादृश्यस्य प्रकारतासंसर्गेण धात्वर्थे भानेऽन्वयाच्चन्द्रनिरूपितसादृश्यप्रकारकभानविषयो मुखमिति बोधः। अत्रैव सौन्दर्येणेत्युक्तौ तृतीयार्थः प्रयोज्यत्वं भाने सादृश्य एवान्वेति। तेन सौन्दर्यप्रयोज्यचन्द्रनिरूपितसादृश्यप्रकारकभानविषयो मुखमिति धीः। गज इव

उ०ः—मानधर्मेत्युक्त्या परो नैतत्समानधर्मेति प्रतीयते। **बहुव्रीहीति**। उपमानांतरसंबंधाभावपदं बहुव्रीहिणाऽनन्वयमाहेत्यर्थः। **यद्वा संज्ञेति**। संज्ञाभूतस्यापि योगकथनमित्यर्थः। तथा च योगरूढोऽयमिति भावः। **उपमानांतरेणेति**। नन्विदमयुक्तम्। कस्याप्युपमानस्याभावेनांतरशब्दप्रयोगासंगतेरत आह **उपमेयभिन्नेनेतीति**। एकस्येत्युपमाव्यवच्छेदाय। **एवकार इति**। एकस्यैवेति भिन्नशब्दबोध्यत्वव्यवच्छेदकैवकार इत्यर्थः। **वैचित्र्येति**। यद्यप्यस्या वदनमिव वक्त्रमित्यत्रानन्वय एव तथापि स दुष्ट इति वैचित्र्यस्फोरणायेत्यर्थः। एकवाक्यगे इत्यस्य एकौपम्यबोधकशब्दप्रतिपाद्येत्यर्थः। तत्फलमाह **विपर्यासेति**। उपमेयोपमेत्यर्थः। वस्तुतस्तु तत्र द्वितीयसदृशव्यवच्छेदफलकत्वाभावेन योगलब्धार्थेनैव वारणसंभवान्नेदमस्य व्यावर्त्यम्। किं तु तादृशस्थले एव तस्य फलस्य संभवात् स्वरूपकथनमिति ध्येयम्। **न केवलमिति**। नितांतकांतिः अतिशयितकांतिः। यावंतो विलासा आयुधानि यस्य स कामस्तस्य लास्यवासा नृत्यस्थानानि। (एवकारो भिन्नक्रमो नितम्बिनीशब्देन सम्बध्यते। यावत् 'अपि तु' इत्यर्थे इत्युदाहरणचन्द्रिका। उपजातिश्छंदः।) अत्र साधर्म्यमात्रमिवार्थः। न तु भेदांशो बाधात्। रूपके चंद्राद्यभेदबुद्धिः फलं, तत्कृत एव चमत्कारः, अत्र तु पर-

---

प्रभाः—गच्छति, पिक इव रौतीत्यादाविवार्थसादृश्यस्य धात्वर्थे गमनादावन्वयासंभवात्तस्य गमनादिकर्तर्येवान्वयः। गजसदृशो गमनानुकूलकृतिमानिति बोधः। कुतः सादृश्यस्य धात्वर्थेनान्वय इति चेत्, घटो न पश्यतीत्यत्र घटान्विताभावस्य दर्शने कर्मतासंसर्गेणान्वयवारणाय धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणान्वयबोधे विशेष्यतया विभक्तिजन्योपस्थितेर्हेतुत्वादिति तार्किकाः। अन्ये तु गजसदृशो यः स गच्छतीत्यत्रेव गज इव गच्छतीत्यत्रापि सादृश्यस्य विधेयत्वेनाप्रतीतेस्तदनुभावोपपत्त्यर्थं गजनिरूपितसादृश्यप्रयोजकगमनाश्रय इत्येव गज इव गच्छतीत्यादौ बोधः। घटो न पश्यतीत्याद्युक्तबोधापत्तिस्तु धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतासंसर्गेणान्वयबुद्धिं प्रति तज्जन्योपस्थितेः प्रतिबन्धकत्वकल्पनयैव निरसनीया। वनं गज इव समरं शूरो गच्छतीत्यादौ तु गजादिपदानां गजकर्तृकगमनादौ लक्षणा। तत्सादृश्यस्य धात्वर्थगमनादावन्वयः। तेन वनकर्मकं यद्गजकर्तृकं गमनं तत्सदृशसमरकर्मकगमनाश्रयः शूर इति धीरित्याहुः। ननु सिंहतुल्यो भातीत्यत्र सिंहभानसदृशभानस्य बोधो दुर्घटः। तुल्यत्वस्य निपातभिन्ननामार्थत्वेन धात्वर्थभेदेन साक्षादन्वयायोगात्। सिंहतुल्यो यो देवदत्तः स भातीत्युद्देश्यतावच्छेदकत्वेन तुल्यत्वबोधे तु

तयोः उपमानोपमेययोः परिवृत्तिः, (अर्थात्) वाक्यद्वये, इतरोपमानव्यवच्छेदपरा (उपमेयेनोपमा इति) उपमेयोपमा ।

Gloss:—Of them two i. e. of the Upameya and the Upamāna; Exchange of places-of course-in two sentences, designed for excluding any other Upamāna (but itself). Upameyopamā is so called because it consists of an Upamā with the Upameya (as an Upamāna).

उ० : – स्मिन् स्वसाधर्म्याभावकृतः। न तु स्वाभेदबुद्धिकृतः तस्याः सिद्धत्वादिति ततो भेदः । एतदग्रेऽत्र दशाविशेषादिभेदात् भेदोपचार इति क्वचित् पठ्यते सोऽपपाठः । तथा सत्युपमाया एवाऽऽपत्तेः । देशकालभेदेनाप्ययमेव तत्तुल्य इति प्रतीतेस्तत्राप्यनन्वय एवेत्याशय इत्यन्ये । ननु 'भुवनत्रितयेऽपि मानवैः परिपूर्णे विबुधैश्च दानवैः । न भविष्यति नास्ति नाभवन्नृप यस्ते भजते तुलापदम्' ॥ इत्यादौ सर्वथैवोपमाननिषेधात्मकोऽसमालंकारः प्राचीनैरुक्तः । उपमानलुप्तोपमाऽतिव्याप्तिवारणाय सर्वथैवेति । एवं च तद्ध्वनिनैव चमत्कारोपपत्तौ अनन्वयस्य पृथगलंकारत्वं किमर्थम् । यदि तु रत्यनुकूलतया कुतश्चिदंगात् भूषणापसारणं यथा चमत्काराय, तथा प्रकृते उपमालंकाराभाववर्णनमेव चमत्काराय न तु तत्रासमनामा पृथगलंकार इत्युच्यते । तर्हि तद्ध्वनिनैवोपपत्तिरिति चेन्न । पर्यायोक्तसादृश्यमूलाप्रस्तुतप्रशंसादौ ध्वन्यमानार्थसत्त्वेऽपि वाच्यार्थकृतचमत्कारमादायालंकारत्ववदुपपत्तेः । अन्यथा दीपकादावपि उपमाभिव्यक्त्यैव चमत्कारोपपत्तौ तेषामपि पृथगलंकारत्वं न स्यादित्याहुः । केचित्तु सर्वेभ्य उत्कृष्टगुणस्त्वमिति प्रतीतेर्व्यतिरेकालंकारध्वनिरेवात्रेति वदन्ति । तच्चिंत्यम् । **इत्यनन्वयः । विपर्यास इति ।** तयोः काव्यनिबद्धोप-

प्रभा : – तस्य विधेयत्वं विवक्षितं न सिध्येत् । न च तुल्यपदेन तुल्यत्वप्रकारकं लक्ष्यते तच्चाभेदेन भानेऽन्वेतीति वाच्यम् । तथा सति क्रियाविशेषणत्वेन नपुंसकत्वापत्तेरिति चेत्, अत्राहुः—'क्रियाव्ययविशेषणानां क्लीबतेष्यते' इत्यनुशासनं सिद्धार्थानुवादकत्वात्स्तोकं पचतीत्यादिमात्रपरं न सार्वत्रिकमिति न दोष इति । धातोरेव लक्षणया सर्वार्थबोधकत्वमन्यस्य तात्पर्यग्राहकत्वमित्यपि केचित् । चन्द्रवत्सुन्दरमिति 'तेन तुल्यं–' इत्यादिविहितवतेः सादृश्यवदर्थकत्वेऽपि सादृश्ये लक्षणा । तस्य सुन्दरपदार्थैकदेशेन सुन्दरत्वेनान्वयादिवादिप्रयोगस्थल इव बोधः । लक्षणया सादृश्यबोधनात्पारमार्थित्वम् । एवं चन्द्रवन्मुखमित्यादौ चन्द्रनिरूपितत्वस्यैकदेशे सादृश्येऽन्वयाच्चन्द्र-

उदाहरणम्—

कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति बत यस्य ॥ २४ ॥ (—)

To illustrate :—

Whose wealth ever shines bright like his thoughts, and whose thoughts (shine) like his wealth; whose glory ever shines bright like his figure and whose figure like his glory; whose courage ever shines bright like his realm, whose realm like his courage. How gratifying indeed (बत) ! (24)

प्रदीपः—द्वाक्यद्वये। एकवाक्ये तथाऽसंभवात्। मुखमिव चन्द्र इत्यस्य निन्दाभिव्यक्तौ प्रतीपरूपत्वात्। उपमेयोपमेति यौगिकी संज्ञा। विपर्यासश्चायमुपमानान्तरव्यवच्छेदार्थः। उदाहरणम्—**कमलेवेति।**

उ०ः—मानोपमेययोरित्यर्थः। **विपर्यास इति**। स च वाक्यद्वये एव संभवति। तत्र वाक्यद्वयं शाब्दमार्थं वा। तेन 'रामरावणौ मिथस्तुल्यौ' इत्यादौ नाव्याप्तिः। तत्रापि रामो रावणतुल्यो रावणो रामतुल्य इति वाक्यार्थभेदप्रतीतेः। **यौगि-**

प्रभाः—निरूपितसादृश्यवदभिन्नमिति बोधः। चन्द्रवत्सौन्दर्यमस्येतीवार्थे 'तत्र तस्येव' इति विहितवतेः प्रयोगे तु चन्द्रपदस्य तत्सौन्दर्ये लक्षणया चन्द्रसौन्दर्यनिरूपितसादृश्यवन्मुखसंबन्धि सौन्दर्यमिति सौन्दर्ययोः सादृश्यबोधोत्तरं तयोरभेदाध्यवसायादेकधर्ममूला पश्चान्मुखचन्द्रयोरपि सादृश्यधीरित्याहुः। अरविन्देन तुल्यं मुखमित्यत्र निरूपितत्वं तृतीयार्थः पदार्थैकदेशसादृश्यान्वयी। अत्रैव सौन्दर्येणेत्युक्तौ प्रयोज्यत्वं तृतीयार्थस्तत्रैवान्वेति। मुखमरविन्दं च सममित्यत्र प्रथमं शब्दादुभयं सदृशमिति बोधे पश्चान्मानसी वैयञ्जनिकी वा परस्परनिरूपितसादृश्यप्रतीतिः। प्रसिद्धनिरूपितसादृश्यस्य वा 'पाण्ड्योऽयमंस—' इत्यादिबिम्बप्रतिबिम्बभावस्थले तु हारहरिचन्दनविशिष्टो राजा बालातपनिर्झरविशिष्टपर्वतसदृश इति बोधोत्तरं सादृश्यप्रयोजकधर्माकाङ्क्षायां बालातपाद्युपमानोपमेयधर्माणां सादृश्यमूलभेदाध्यवसानेन साधारणधर्मत्वसिद्धिः। हारहरिचन्दनाभ्यामुक्तरूपाद्रिरिव राजेत्युक्तौ प्रयोजकत्वतृतीयार्थः सादृश्यान्वयी। उक्तरीत्या सादृश्यस्य तत्प्रयोज्यत्वादिति दिक्। सादृश्यस्य समानधर्मरूपत्वे तु चन्द्र इव सुन्दरं मुखमित्यादौ चन्द्रवृत्तिसमानधर्माभिन्नसौन्दर्यवदभिन्नं मुखमिति धीः। चन्द्रसुन्दरमिति समासे तु चन्द्रपदस्य तद्वृत्तिसमानधर्मवन्मुखमिति धीः। एवं तुल्यादिपदोपादानेऽप्यूह्यम्। एवं क्यजादावप्युपमानपदानां तत्सादृश्ये लक्षणा। तस्य च प्रयोजकतया अभेदेन वा क्यजाद्यर्थाचारविशेषत्वं स चोपमेये आश्रयतयान्वेतीत्यलम्। इत्युपमालंकारः ॥ १ ॥ ननु 'पितुर्नियोगाद्वनवासमेवं

(१३) संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

समेन उपमानेन ।

4. UTPREKṢĀ.

Further, what consists in *fancying* the matter under description to be the same as its equal is "Utprekṣā."

Gloss:—Its equal i. e. the Upamāna.

प्रदीपः–सम्भावनमिति । समेनेत्यत्र सह एकरूपतयेति शेषः । तेन प्रकृतस्य संभविनोऽर्थस्य समेनासंभविना सहैकरूपतया यत्संभावनं तदुत्प्रेक्षालंकार इत्यर्थः । सा चेयं हेत्वादिसंभावनाभेदाद्बहुप्रकारा । तत्र हेतूत्प्रेक्षा यथा—

उ०ः–कीति । उपमेयेनोपमा यत्रेति यौगिकीत्यर्थः । एकस्य साधारणधर्मत्वे इयमिति बोध्यम् । तदाह । **विपर्यासश्चायमुपमानांतरव्यवच्छेदार्थ इति** । एकेन हि धर्मेण तत्साम्ये एकत्र वर्णिते तेन धर्मेणापरस्य साम्यमर्थप्राप्तं पुनः शब्देनोच्यमानं तृतीयसदृशव्यवच्छेदफलकमिति भावः । अत एवात्रोपमा न । साधारणधर्मसंबंधकृतचमत्काराभावात् । **कमलेवेति** । (कमला लक्ष्मीः । विभा कान्तिः । धृतिः धैर्यम् । बत हर्षे । गीतिश्छन्दः) अत्रातिस्पृहणीयत्वप्रचितत्वविस्तृत-

---

प्रभाः–निस्तीर्य रामः प्रतिपन्नराज्यः । धर्मार्थकामेषु समां प्रपेदे यथा तथैवावरजेषु वृत्तिम् ॥' इत्यत्रैकस्यैव रामस्योपमानत्वमुपमेयत्वमेकवाक्यगतमस्तीत्यतिव्याप्तिः । वृत्तिसाम्यमात्रस्यैव प्रतिपाद्यतया सदृशान्तरव्यवच्छेदाप्रतीतेरिष्टापत्त्यसंभवात् । अत आह—**उपमानान्तरेति** । एवं च तत्रैतत्फलाभावान्नातिव्याप्तिरिति भावः । उक्तार्थस्य प्रकाशारूढत्वं दर्शयति—**तदेतदिति** । कथमनेनोक्तार्थलाभस्तत्राह—**बहुव्रीहीति** । उपमानान्तरसंबन्धस्याभावो यत्रार्थाद्गम्यते इत्यर्थात्तल्लाभ इति भावः । एवं तु सति एकवाक्यगत इत्यस्य वैयर्थ्यम् । उपमेयोपमादेरुक्तविशेषणेनैव व्यावृत्तेरत आह—**यद्वेति** । एवं च नैतल्लक्षणान्तर्गतं किं तु संज्ञाप्रवृत्तिनिमित्तकथनमिति नोक्तदोष इति भावः । कथं तर्हि 'पितुर्नियोगात्–' इत्यादावतिव्याप्तिवारणमिति चेत्, तत्र वृत्त्योरेव साम्यविवक्षणान्न तु रामेणैव रामस्येत्याशयात् । यत्र तु 'लोहितपीतैः कुसुमैरावृतमाभाति भूभृतः शिखरम् । दावज्वलनज्वालैः कदाचिदाकीर्णमिव समये ॥' इत्यादौ शेखरादेरेकस्यैवोपमानोपमेयत्वं बिम्बप्रतिबिम्बभावापन्नधर्मेण 'पाण्ड्योऽयं–' इत्यादिवदानुभविकम् । तत्रावस्थाभेदमवेक्ष्य तात्पर्यविषयसाम्योक्तेर्नातिव्याप्तिः । एकस्यैवेत्येवकारेण देशकालादिभेदेन तात्पर्यम् । विषयत्वव्यवच्छेदस्य प्रत्ययात्तस्य च लक्षणे प्रवेशात् । तदाह—**एवकार इति** । वैचित्र्यमितरा-

उ०ः—त्वानि त्रिषु साधारणधर्माः। **इत्युपमेयोपमा**। वाच्यसाधर्म्यालंकारं निरूप्य व्यंग्यसाधर्म्येषु निरूपणीयेषु प्रथमं प्राधान्यात् उत्प्रेक्षामाह—**संभावनमिति**। उत्कटकोटिकः संदेहः। **अथ** वाच्यसाधर्म्यालंकारनिरूपणोत्तरम्। उत्प्रेक्षा निरूप्यत इति शेषः। **समेन**। प्रकृतमात्मनः समं करोतीति सममुपमानम्। उत्कटा प्रकृष्टस्योपमानस्येक्षा ज्ञानं उत्प्रेक्षा। एवं चोत्कटोपमानकोटिकप्रकृतविषयकसंभावनमुत्प्रेक्षेत्यर्थः। **समेनासंभविनेति**। अलोकसिद्धेन कविकल्पितेनेत्यर्थः। तदुक्तं चक्रवर्तिना। 'यदाऽयमुपमानांशो लोकतः सिद्धिमृच्छति। तदोपमैव येनेवशब्दः साधर्म्यवाचकः॥ यदा पुनरयं लोकादसिद्धः कविकल्पितः। तदोत्प्रेक्षैव येनेवशब्दः संभावनापरः॥' इति। इदं चेवशब्दसमभिव्याहारे एव। अन्यत्र संभविनाऽपि। तेन मुखं चंद्रं मन्ये इत्यादेः संग्रहः। चंद्र इव मुखमित्यादौ तु उपमैव। **एकरूपतयेति**। तादात्म्येनेत्यर्थः। एवं चासदृशयोः संभावनं नोत्प्रेक्षालंकारः। सादृश्यातिरिक्तमूलकस्मरणादिवत्। किं तु वस्तुमात्रम्। तेन 'वदनकमलेन बाले स्मितसुषमालेशमावहसि यदा। जगदिह तदैव जाने दशार्धबाणेन विजितमिति॥' इत्यादौ नोत्प्रेक्षा। अत्र स्मितस्य सं-

---

प्रभाः—लंकाराद्विशेषो निरपेक्षतारूप इत्यर्थः। **विपर्यासेति**। उपमेयोपमेत्यर्थः। तत्र विपर्यासोपमायाम्। तथाभाव उपमानोपमेयभावः। एकस्यैव कथमुपमानोपमेयभाव इत्यत आह—**अत्रेति**। एवं सति 'लोहितपीतैः—' इत्यादितः कोऽत्र विशेष इति चेत्, अयं विशेषः—यत्तत्रावस्थाभेदोपादानेन साम्यबोधने तात्पर्यं न त्वत्र। किं तु स्तुतिपरार्थवादवाक्यार्थवदतात्पर्यविषयीभूतं साम्यमनौपम्यपरमिति। **तयोरिति**। अनेन च 'भणितिरिव मतिः—' इत्यादिरशनोपमाव्यावृत्तिः। तत्रोपमेयाया मतेरेवोपमानतारूपविपर्यासेऽपि भणितेरुपमानभूताया उपमेयत्वरूपतदभावात्। **असंभवादिति**। न च मुखमरविन्दं च परस्परेण सममित्यादावेकवाक्येऽप्युपमेयोपमास्त्येवेति कथमसंभव इति शङ्कयम्। तत्राप्यरविन्देन मुखं समं मुखेन चारविन्दमित्यर्थतो वाक्यभेदसत्त्वादित्याशयात्। नन्वेवं सति मुखमिव चन्द्र इत्यत्रोपमेयोपमाया अभावात्कथमलंकारः स्यादत आह—**मुखमिवेति**। ननु 'रजोभिः स्यन्दनोद्धूतैः' इति रघुचतुर्थसर्गे, 'सविता विधवति विधुरपि सवितरति—' इत्यादावतिव्याप्तिः। तृतीयसदृशव्यवच्छेदाप्रतीत्या तत्रोपमेयोपमात्वानङ्गीकारात्। अत आह—**विपर्यासश्चायमिति**। व्यवच्छेदार्थं इत्यनन्तरं लक्षणे विवक्षित इति शेषः।

उ०ः—भावनोत्थापकत्वेऽपि जगद्विजितरूपविषयविषयिसाधारणत्वाभावात् । संभावना च रमणीयधर्मनिमित्तिका ग्राह्या । तेन 'नूनं स्थाणुनाऽनेन भाव्यम्' इत्यादौ निश्चलत्वादिसाधारणधर्मनिमित्तकसंभावनायां नातिव्याप्तिः । रूपकवित्तावतिव्याप्तिवारणाय संभावनमिति । प्रकृतस्येत्यस्य च प्रकृतताावच्छेदकरूपेण ज्ञातस्येत्यर्थः । तेन यत्राऽऽहार्यसंभावनं तत्रैवोत्प्रेक्षा । तेन 'रामं स्निग्धतरश्यामं विलोक्य वनमंडले । प्रायो धाराधरोऽयं स्यादिति नृत्यन्ति केकिनः ॥' इत्यत्रानाहार्यसंभावनायां नातिव्याप्तिः । अत्र तेषां नृत्यप्रवृत्त्या संभावनाया अनाहार्यत्वम् । आहार्यत्वेपि तत्कोटिसहचरितभूयोधर्मवद्विशेष्यकत्वस्योत्कटकोटिकत्वस्य संभवात् । इव नूनं मन्ये जानेऽवैमि ऊहे तर्कयामि शंके उत्प्रेक्षे इत्यादिभिः प्रतिपादकैः सहिता यत्रोत्प्रेक्षासामग्री तत्र वाच्या सा । यत्र प्रतिपादकशब्दरहितं तत्सामग्रीमात्रं तत्र व्यंग्या । यथा वक्ष्यमाणेष्वेवेवादिपदाऽऽदाने । यत्र तत्सामग्रीरहितं प्रतिपादकमात्रं तत्र संभावनामात्रमेव नोत्प्रेक्षेति बोध्यम् । **हेत्वादीति** । आदिना फलस्वरूपे । **बहुप्रकारेति** । जातिगुणक्रियाद्रव्याणां अभावस्य च संभावितत्वेन स्वरूपोत्प्रेक्षा पंचधा । एवं हेतुफलयोरपि जात्यादिरूपत्वेन तयोरपि प्रत्येकं पंचविधत्वम् । एवमुत्प्रेक्षानिमित्तस्य धर्मस्योपादानानुपादानाभ्यां बहुभेदेत्यर्थः । परं तु ईदृग्वैचित्र्यस-

---

प्रभाः—तथा चोपमानान्तरव्यवच्छेदफलक उपमानोपमेययोर्विपर्यास इति लक्षणं सुस्थमिति भावः । इत्यनन्वयः ॥ २ ॥ उपमेयोपमा च ॥ ३ ॥ उत्प्रेक्षालक्षणार्थं दर्शयति—**तेनेति** । यथोक्तशेषपूरणेनेत्यर्थः । 'हृतसारमिव—' इत्यत्र नैषधीयद्वितीयसर्गे संभावनाविषयस्य चन्द्रस्याप्रकृतत्वादाह—**संभविन इति** । स्वतःसिद्धस्य विषयस्येत्यर्थः । समेनेत्यस्योपमानेनेत्यर्थे उक्तव्याप्तितादवस्थ्यमतस्तदर्थमाह—**असंभविनेति** । असंभावितेनार्थेनेत्यर्थः । आरोप्येणेति वक्तव्ये संभावनाया आहार्यत्वसिध्यर्थमसंभविनेत्युक्तम् । तदर्थश्चासंभवित्वेन ज्ञातत्वम् । तेन 'विरक्तसंध्या—' इति रघुचतुर्दशसर्गपद्ये (इत्यत्र) नातिव्याप्तिः । एकरूपतया अभेदेन । संभावनमुत्कटोपमानकोटिकसंदेहविषयीकरणम् । तेन संदेहे नातिव्याप्तिः । एतच्च सादृश्यहेतुकत्वेन विशेषणीयम् । तेन 'वदनकमलेन बाले स्मितसुषमालेशमावहसि । जगदिह तदैव जाने दशार्धबाणेन विजितमिति ॥' इत्यादौ नातिप्रसङ्ग इति संक्षेपः । **हेत्वादीति** । आदिना फलस्वरूपयोः परिग्रहः । हेतुफलभिन्नं स्वरूपशब्दार्थः ।

उदाहरणम्—

उन्मेषं यो मम न सहते जातिवैरी निशाया-
मिन्दोरिन्दीवरदलदृशा तस्य सौंदर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु ते पादयोः पद्मलक्ष्मीः ॥ २५ ॥ (—)

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ २६ ॥ (मृच्छकटिक-१-३४.)

इत्यादौ व्यापनादि लेपनादिरूपतया संभावितम् ।

To illustrate:—

O lady of graceful form! I fancy that the Beauty-of-the-lotus is clinging to your feet, in exultation, possibly with the idea (इति): "By this lady, with eyes like lotus-petals, has been stubbornly quelled, with the charm of her face, the vanity of beauty on the part of the moon, my born enemy, who cannot brook my bloom at night." (25)

The darkness, as if, *anoints* the limbs; the sky *showers*, as it were, collyrium; like service tendered to an evil person, the sight has become unavailing. (26)

In instances like these, permeation etc. comes to be fancied as anointing etc.

प्रदीपः—**उन्मेषमिति**। अत्र पद्मलक्ष्म्याः कामिनीचरणयोः स्वभावलग्नत्वं यथोक्तहर्षहेतुकलग्नत्वतादात्म्येन संभावितम् । स्वरूपसंभावनं यथा—**लिम्पतीवेति**। अत्र गम्यमानं तमसो व्यापनादि लेपनादिरूपतया संभावितमिति स्वरूपोत्प्रेक्षेयम् । अत एव 'तमसो लेपनकर्तृत्वमत्रोत्प्रेक्ष्यम्' इत्यलंकारसर्वस्वकारमतमपास्तम् । विवक्षितविवे-

---

उ०:—हस्त्रं न चमत्कारातिशयायेति न ग्रंथकृतोक्तम्। **उन्मेषमिति**। (नायकस्य नायिकां प्रति चाटूक्तिरियम्।) विकासमित्यर्थः। (यः इन्दुः। मम पद्मस्य) जातिवैरी सहजशत्रुः। तस्य इन्दोः। मन्दाक्रान्ता छन्दः) **स्वभावलग्न-**

प्रभा:—ननु 'उन्मेषं–' इत्यादौ हर्षस्य हेतुत्वेन लगने संभावनं, न त्वभेदेनेति कथमुक्तलक्षणसमन्वयस्तत्राह—**अत्रेति**। अत्र लग्नत्वस्य तादात्म्येन संभावनोक्तिः फलतः पर्यवसानाभिप्राया। तस्य पदार्थैकदेशत्वात्। किं तु स्वभावलग्नायां हर्षहेतुकलग्नाया अभेदेन संभावनं वोध्यम्। हेतूत्प्रेक्षाव्यपदेशोऽपि पर्यवसानत एव। दध्ना

(१४) ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः ॥ ६ ॥

5. SASANDEHA.

As for 'Sasandeha,' it is doubt, with the difference (from the Upamāna) specified, or unspecified.

प्रदीप :– केन लेपनमात्रस्यैवोत्प्रेक्षणात्। एवं फलाद्युत्प्रेक्षाप्यूहनीया। **ससन्देह इति।** भेदो वैधर्म्यम्। संशयस्तु कविप्रतिभानिर्मित एवालंकारो न तु स्वारसिकः स्थाणुपुरुषादिविषयोऽपि। वैचित्र्याभावात्। अत्र संशयः ससंदेह इति लक्षणम्। भेदोक्तौ

उ० :– **त्वम्।** तत्त्वेनाध्यवसितः स्वाभाविकः शोभासंबंध इत्यर्थः। **संभावितमिति।** अतिमनोहरत्वेन निमित्तेनेति भावः। अत्र लग्नापदेन लक्षणया पृथगुपस्थिते स्वाभाविकशोभासंबंधे यथोक्तहर्षहेतुकपद्मलक्ष्मीलग्नत्वतादात्म्यसंभावना। तात्पर्यानुपपत्त्यैव च लक्षणा। लक्ष्यगतातिशयप्रतीतिश्च प्रयोजनम्। एतावतैवोत्प्रेक्षायां साध्यवसानत्वव्यवहारः प्राचामिति बोध्यम्। न च हेतुफलयोरपि स्वरूपतया स्वरूपोत्प्रेक्षैव सर्वत्र वक्तुमुचितेति वाच्यम्। हेतुत्वफलत्वाभ्यां निर्दिष्टेतरस्य स्वरूपशब्दार्थत्वात्। किंचिद्वैचित्र्यस्यानुभवसिद्धत्वात्। **लिंपतीवेति।** (मृच्छकटिके प्रथमाङ्के गाढान्धकारवर्णनमेतत्।) भ्रमातिशयकारकत्वसकलवस्तुमलिनीकरणत्वादि निमित्तम्। अत्रापि व्यापनाद्युपस्थितिः प्राग्वदेव। **व्यापनादीति।** आदिपदेन कविकल्पितं नभःकर्तृकांजनकर्मकाधःप्रसरणं गृह्यते। तमःकर्तृकांगकर्मकव्यापनं तु स्वतः संभव्येवेति बोध्यम्। अत्रोत्प्रेक्षैव। तिङन्तसमभिव्याहृतेवशब्दस्य संभावनाबोधकत्वात्। स्पष्टं चेदं सन्सूत्रे भाष्ये। **अपास्तमिति।** क्रियोपसर्जनस्य कर्तुरन्यत्रान्वयायोगात्।

प्रभा :– जुहोतीत्यस्य दधिविधित्वव्यपदेशवदित्यूह्यम्। एवम् 'चोलस्य यद्भीतिपलायितस्य भालत्वचं कण्टकिनो वनान्ताः। अद्यापि किं वानुभविष्यतीति व्यापाटयन्द्रष्टुमिवाक्षराणि ॥' इति फलोत्प्रेक्षायामपि स्वाभाविके कण्टककर्तृकव्यापाटने ललाटाक्षरदर्शनफलकपाटनतादात्म्यसंभावनमिति लक्षणसमन्वयो द्रष्टव्य इति दिक्। ननु 'लिम्पतीव–' इत्यत्र तमोव्यापनस्यानुपादानात्कथं तत्र तादात्म्येन लेपनसंभावनेत्यत आह—**अत्रेति।** गम्यमानं व्यञ्जनया प्रतीयमानम्। उत्प्रेक्षायाश्चाध्यवसानगर्भत्वाद्विषयस्यानुपादानेऽपि न दोष इत्यप्याहुः—**अत एवेति।** प्रकाशग्रन्थादेवेत्यर्थः।

उ०ः—तदुक्तं दंडिना। 'कर्ता यद्युपमानं स्यात् न्यग्भूतोऽसौ क्रियापदे। स्वक्रियासाधनव्यग्रो नालमन्यद्व्यपेक्षितुम्॥' इति। देवदत्त इव यज्ञदत्तः पचतीत्यादौ पदांतरोपस्थाप्यकर्तृविशेषणस्य तूपमेयत्वं भवत्येवेति बोध्यम्। प्रथमांतविशेष्यकबोधवादिमतेऽप्याह—**विवक्षितेति**। तन्मतेऽपि प्राप्ताप्राप्तविवेकेन क्रियास्वरूपोत्प्रेक्षा इति व्यवहार इति भावः। उत्तरार्धे तु उपमैव। उत्प्रेक्षासाधकाभावात्। एवं च नामसमभिव्याहृतेवशब्देन तत्रैवोत्प्रेक्षा यत्र संभावनोपयुक्तविशेषणदानम्। यथा 'बालेंदुवक्त्राण्यविकाशभावात् बभुः पलाशान्यतिलोहितानि। सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥' इत्यादौ। यत्र क्वचित् स्थितैरपि नखक्षतैर्वक्रत्वलौहित्यादिनोपमाया वक्तुं शक्यतया वसंतनायकसंगतवनस्थलीसंबंधित्वरूपविशेषणकल्पनमुत्प्रेक्षागमकम्। उपमायां तस्यानुपयोगात्। **इत्युत्प्रेक्षा। ससंदेह इति**। अत्र 'प्रकृतस्य समेन यत्' इत्यनुवर्तते। प्रकृतस्य समेन सादृश्यज्ञानप्रयोज्यो यः संशयः संशयज्ञानं स ससंदेहनामाऽलंकार इत्यर्थः। संदेहेन सह विषयतया तद्विशिष्ट इति ससंदेहः। अत एव 'इतो गता सा क्व गता न जाने गेहं गता मे हृदयं गता वा' इत्यत्र न ससंदेहालंकारः। सादृश्यमूलकत्वाभावात्। अस्य प्रेममात्रोत्कर्षकत्वेऽपि वर्णनीयोत्कर्षकत्वाभावाच्च। असद्विषयेऽपि कस्यचित् प्रेमसंभवात्। संशयश्च समकोटिको ग्राह्य इत्युत्प्रेक्षाव्युदासः। स्थाणुर्वा पुरुषो वेति संशयवारणायाह—**संशयस्त्विति**। सादृश्यमूलकत्वाद्यभावे तु

प्रभाः—युक्तिमप्याह—**विवक्षितेति**। तथा च विवक्षितस्यैव साक्षादुत्प्रेक्षासंभवेन तत्कर्तृकत्वानुधावनं न युक्तमिति भावः। नव्यास्तु "अस्यां मुनीनामपि मोहमूहे भृगुर्महान्यत्कुचशैलशीली। नानारदाह्लादिमुखं श्रितोरुर्व्यासो महाभारतसर्गयोग्यः॥" इति नैषधीयपद्ये मोहनरूपधर्मस्याधारतासंबन्धेन मुनिषूत्प्रेक्षादर्शनादभेदेनैवोत्प्रेक्षेति नियमो न युक्तः। न च मुनिगतधर्मविशेषे मोहस्याभेदेनोत्प्रेक्षितकल्पना युक्ता। अनुभवविरोधात् लक्षणानुगमानुरोधेनानुभवबाधायोगात्। एवं च लिम्पतीवेत्यत्रापि तमसि लेपनकर्तृत्वोत्प्रेक्षैव युक्ता। आख्यातार्थकर्तृत्वस्य प्रथमान्तपदोपस्थाप्येऽन्वयस्य व्युत्पत्तिसिद्धत्वात्। किं च निगीर्णे व्यापने लेपनोत्प्रेक्षाङ्गीकारे तस्या विधेयत्वेन प्रत्ययो न स्यात्। उद्देश्यस्य पृथक्पदानुपात्तत्वात्। इवशब्दान्वितस्योत्प्रेक्षाया उत्सर्गसिद्धत्वाच्च। तस्मात्स्वरूपोत्प्रेक्षा द्विविधा धर्म्युत्प्रेक्षा धर्मोत्प्रेक्षा

भेदोक्तौ यथा—

अयं मार्तण्डः किं स खलु तुरगैः सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षान्महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान्प्रतिभटाः ॥ २७ ॥ (—)

Gloss:—With the difference specified as in the instance:—

May this possibly be the sun? But then it is possessed of seven horses. Is it fire? But surely it does not spread in *all* directions. Is this the god of death in person? But buffalo is his mount. Doubts like these do the hostile warriors entertain, for a long while, as they happen to look at you in the battle. (27)

प्रदीपः—तदनुक्तौ चेति विभागः। तत्र भेदोक्तौ यथा—**अयमिति**। अत्र मार्तण्डत्वादीनां संदेहे सप्ततुरगत्वादीनि वैधर्म्याणि तदाश्रयेषूक्तानि। न चायं व्यतिरेकालंकारः। तस्य संदेहानुयायितया तेनैव व्यपदेशौचित्यात्। ननु भट्टोद्भटेन भेदोक्तौ निश्चयगर्भ एवायं स्वीकृतो न तु निश्चयान्तोऽपि। तत्किमस्यापि स एव पन्थाः। नेत्युच्यते। कुत एतत्। भेदोक्ताविति विभजनात्। निश्चयान्तस्यापि तत्संभवात्। वैचित्र्यानुभवाच्च। यथा—

उ०:—संशयमात्रमेव नालंकार इति बोध्यम्। **अयमिति**। (राजानं प्रति कस्यचिदुक्तिः।) इतः युक्तः। विकल्पान् संशयान्। आजौ युद्धे। (चिरम् इत्यस्य समालोक्येत्यत्र विदधतीत्यत्र वान्वयः। शिखरिणी छन्दः।) अयं किं मार्तण्डस्तदन्यो वेति संशयाकारः। अत्र प्रतापेन दुर्निरीक्ष्यत्वसाम्यान्मार्तण्डत्वसंदेहः। दुराधर्षत्वसाम्यात् कृशानुत्वसंदेहः। क्षणेन सकलसंहर्तृत्वसाम्यात्कृतांतत्वसंदेहः। **उक्तानीति**। मार्तण्डादिवैधर्म्येण आर्तण्डत्वाद्यभावनिश्चयेऽपि कृशानुत्वादिसंशयादस्य निश्चयगर्भता। वैधर्म्योक्तिस्तु सति मार्तण्ड-

प्रभा:—चेत्याहुः। अथोत्प्रेक्षायामन्वयबोधप्रकारोऽभिधीयते—त(य?)त्रोत्प्रेक्षायां पञ्चम्यर्थो हेतुः। तत्र प्रकृत्यर्थहर्षादेरभेदेनान्वयः। हेतोश्च प्रयोज्यतासंसर्गेण लगने तस्य चाभे न स्वाभाविके लगने संभावनं प्राचां मते। तेन हर्षहेतुकलगनतादात्म्यसंभावनाविषयः पादयोः पद्मशोभालगनमिति बोधः। नव्यनये तु हेतोरेव प्रयोज्यतासंसर्गेणोत्प्रेक्षणाद्धर्षहेतुप्रयोज्यमिव लक्ष्मीलगनमिति बोधः। एवं द्रष्टुमिवाक्षराणीति फलोत्प्रेक्षायामभेदेन प्रकृत्यर्थान्वितस्य तुमुनर्थफलस्य साधनत्वसंसर्गेण पाटनेऽन्वयात्तस्य च स्वाभाविके तादात्म्येन संभावनाल्ललाटाक्षरदर्शनाभिन्नफलकपाटनाभिन्नमिवैतत्पाटनमिति बोधः। नव्यनये तु फलस्यैव साधनत्वं संसर्गेणोत्प्रेक्षण-

भेदोक्ताविव्यनेन न केवलमयं निश्चयगर्भो, यावन्निश्चयान्तोऽपि संदेहः स्वीकृतः । यथा—

इन्दुः किं क्व कलङ्कः सरसिजमेतत्किमम्बु कुत्र गतम् ।
ललितसविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं परतः ॥२८॥ (—)

Owing to (the words) "with the difference specified," this (figure) comes to be accepted not only in that variety of doubt pregnant with determination but also in the other, which culminates in determination. As for instance :—

Is it the moon ? Where is the spot ? Is this a lotus ? Where has the water vanished ? By the elegant, amorous words, has it been, in the sequel, ascertained, O deer-eyed one ! that it is the face ! (28)

प्रदीपः–**इन्दुरिति** । तत्किं भट्टोद्भटेनायमुपेक्षितः । प्रतीयमानवद्वाच्ये तादृग्वै-

---

उ०ः–त्वसंशये कृशानुत्वसंशयायोगात् तत्संशयनिवृत्तये कृता । निश्चयगर्भश्चोपमाननिष्ठवैधर्म्योक्तौ । आदावंते च संशयः मध्ये निश्चयः स निश्चयगर्भ इति तल्लक्षणात् । **निश्चयांतोऽपीति** । उपमेयनिष्ठवैधर्म्योक्त्येति भावः । यथेंदुः किमित्यादौ ललितवचनैर्मुखत्वनिश्चयेऽग्रे केनापि रूपेण संशयाभावात् । अस्यालंकारत्वबीजमाह । **वैचित्र्येति** । **इन्दुरिति** । नायिकां प्रति कस्यचिदुक्तिः । हे हरिणाक्षि एतत् (मुखम्) इन्दुः किम् । तर्हि कलङ्कः क्व । सरसिजं किम् । तर्हि अम्बु कुत्र गतम् । इति प्रथमं सन्दिग्धम् । परतः पश्चात् ललितसविलासवचनैः मुखमिति निश्चितम् । (गीतिश्छन्दः ।) **प्रतीयमानवदिति** । आपाततः संशये व्यंग्यनिश्चयकृतो ह्यत्र चमत्कारः । निश्चयस्य वाच्यत्वे तु न स इति भावः । अत्र निश्चयगर्भतया संकीर्णो निश्चयान्तः । शुद्धस्तु 'चपला जलदाच्च्युता लता वा तरुमुख्यादिति संशये निमग्नः । गुरुनिश्वसितैः कपिर्मनीषी निरणैषीदथ तां वियो-

---

प्रभाः–मिति दर्शनफलकमिव पाटनमिति बोधः । एवमन्यत्राप्यूह्यम् । इत्युत्प्रेक्षालंकारः ॥ ४ ॥ **अत्रेति** ससंदेह इति लक्ष्यनिर्देशः । संशय इति लक्षणम् । अत्र च प्रकृतस्य समेनेत्यनुवर्तते । तथा च प्रकृतविषयसमकोटिकः संशयः ससंदेहाख्योऽलंकार इत्यर्थः । समेनेत्यनेन सादृश्यप्रयोज्यत्वलाभात् 'अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन् । निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥' इत्यादौ नातिव्याप्तिः । स्थाणुर्वा पुरुषो वेत्यादिसंशयस्य

किंतु निश्चयगर्भ इव नात्र निश्चयः प्रतीयमान इति उपेक्षितो भट्टोद्भटेन। तदनुक्तौ यथा—

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ २९ ॥

(विक्रमोर्वशीयम् १. १०.)

Bhaṭṭa Udbhaṭa, however, ignores this variety, since, herein the determination is not left to suggestion, as in the other variety in which determination comes in the middle. When the difference is unspecified (the figure appears) as in :—

Was it possibly the moon that lends charm (to objects), who played the creator in the creative process of this (damsel)? (or), was it Cupid himself whose sole delight lies in love? or, was it the month (चैत्र) abounding in flowers? How indeed could the ancient sage, grown cold (जड = जल) by a constant study of the Vedas, and whose sense of curiosity had turned away from objects of sense, be able to create this exquisite form? (29)

प्रदीपः—चित्र्याभावादिति गृहाण। भेदानुक्तौ यथा—**अस्या इति**। अत्र शङ्कयमानस्य

उ०ः—गिनीति' इत्यादौ। अत्र मंजूषादिगतकटकादाविवालंकारव्यपदेशः। किंशब्दनुशब्दादेश्च समकोटिकसंशयविषयत्वे शक्तिः। अयं किं मार्तण्ड इत्यादेरयं मार्तण्डत्वादिसंशयविषय इत्यादिरर्थः। स्वसंशयज्ञापनाय च परं प्रति तथोक्तिः। **अस्या इति**। (विक्रमोर्वशीये प्रथमेऽङ्के उर्वशीमुद्दिश्य पुरूरवस उक्तिः।) अस्याः सृष्टौ यः प्रजापतिर्निर्माता अभूत्स किं चंद्रः किं वा मदनः किं वा पुष्पाकरो मासो वसंतः इति प्रजापतिधर्मिकश्चंद्रत्वादिरूपविरुद्धनानाभावकोटिकः संशयः। (विषयेभ्यः वनितादिभ्यः व्यावृत्तं निवृत्तं कौतूहलं औत्सुक्यं यस्य तादृशः। पुराणो मुनिः ब्रह्मा। शार्दूलविक्रीडितं छंदः।) एतन्निर्मातरि कांति-

---

प्रभाः—तु सादृश्यप्रयोज्यत्वेऽपि कविप्रतिभेत्यादिना चमत्कारित्वोक्तेस्तदभावादेव नातिव्याप्तिरिति ज्ञेयम्। अत्र समेनेत्यनेन सादृश्यस्येव समानकोटिकत्वस्यापि लाभादुत्प्रेक्षाव्यावृत्तिः। **न चायमिति**। असंख्यतुरगयुक्तत्वादिना राज्ञो मार्तण्डाद्युपमानेभ्य

(१९) तद्रूपकमभेदो य उपमानोपमेययोः ।

अतिसाम्यात् (अनपह्नुतभेदयोः) अभेदः ।

---

6. RŪPAKA.

That is Rūpaka which consists in the identification of the Upamāna and the Upameya.

Gloss :—Identification due to extreme similarity, between objects whose distinctness is not disguised.

प्रदीप :– प्रजापत्यादेः कस्यापि न वैधर्म्यमुक्तम्। **तद्रूपकमिति** । अभेदोऽभेदारोपः। बीजं तु तत्रातिसाम्यम् । अभेदश्चात्रानपह्नुतभेदयोर्विवक्षित इति नापह्नुतावतिव्याप्तिः । तदेतत् द्विविधम्—सावयवं निरवयवं च । तत्राद्यं समस्तवस्तुविषयमेकदेशविवर्ति च ।

उ० : – प्रदत्वसत्त्वेन चंद्रस्य च तत्त्वेन कान्तिप्रदत्वं तयोः सादृश्यम्। अस्याः शृंगारोद्दीपकरूपलावण्यादिमत्त्वेनाधरदशनादिरूपपुष्पवत्त्वेन तन्निर्मातरि तादृशलावण्यादिसंपद्वत्तायाः पुष्पवत्तायाश्च सत्त्वेन मदनवसन्तयोरपि तत्सत्त्वात् तद्रूपसादृश्यमूलकोऽयं संशयः । तत्सामग्रीसंपन्नेनैव तद्धर्मवतो निर्माणसंभवात् । केचित्तु 'अस्याः सर्गविधौ' इत्यत्र वितर्कालंकारः, वितर्कश्च संशयोत्तरमनिर्णये ऊहः । तद्व्यंजकश्च नुशब्दादिः । स चेत्थम् । चंद्रान्यो यदि निर्माता स्यात्कान्तिप्रदो न स्यादित्याद्याकारः । अत एव ब्रह्मा यदि निर्माता स्यात् निर्माणसामग्रीमान् स्यादिति संशयोत्तरवर्तितर्कस्याऽऽपाद्यं वेदाभ्यासजड इत्यादिना निषिध्यत इति । तन्न । वितर्ककारणत्वेन त्वयाऽप्यत्र संशयांगीकारेण तस्यैवालंकारत्वात् । सतोऽपि वितर्कस्य वर्णनीयोत्कर्षानाधायकत्वेनालंकारत्वाभावाच्च । संदेहेनैव तस्याः उत्कर्षसिद्धेः । वेदाभ्यासजड इत्याद्युक्तिस्तु जगन्निर्मातरि ब्रह्मणि सति कथमेतेषु तस्याः निर्मातृत्वसंदेह इत्याशंकाऽपनयनार्थमेवेति

प्रभा :– आधिक्योक्तेरिति भावः । परिहरति—**तस्येति** । प्रथमतः संदेहप्रतीतेरनन्तरं च वैधर्म्योपन्यासेन व्यतिरेकप्रतीतावप्युपजीव्यत्वात्संशयचमत्कृतावेव पर्यवसानमित्यर्थः । **अस्यापीति** । प्रकृतसूत्रकर्तुरपीत्यर्थः । **प्रतीयमानवदिति** । निश्चयगर्भे हि वैधर्म्योक्त्या निश्चयो व्यङ्ग्यः निश्चयान्ते तु स वाच्य इति चमत्कारापकर्षादुत्प्रेक्षित इत्यर्थः । **अत्रेति** । प्रजापत्यादेरित्यादिपदेन चन्द्रादिपरिग्रहः । अत्र हि चन्द्रादौ प्रजापतिसंदेह इति दीक्षिताः । एतत्प्रजापतौ चन्द्रादिसंदेह इत्यन्ये ।

उ० : — बोध्यम् । यत्तु 'इह नमय शिरः कलिंगवद्वा, समरमुखे करहाटवद्धनुर्वा' इत्यत्र विकल्पालंकारः पृथगेव । वाशब्दश्चात्र कल्पान्तरपरः । असामर्थ्ये कलिंगनृपतिवत् शिरो नमय, सति सामर्थ्ये करहाटनृपतिवत् धनुर्नमयेत्यर्थात् । व्यवस्थितश्चायं विकल्प इति । तन्न । वर्णनीयोत्कर्षानाधायकत्वेनैतस्यालंकारत्वे मानाभावात् । उपकुर्वन्ति तं सन्तमित्यादिसामान्यलक्षणाभावात् । एतेन नमनरूपैकक्रियाकर्मत्वेनौपम्यं गम्यमानमलंकारताबीजमित्यपास्तम् । तादृशौपम्यस्याचारुत्वाच्च । अन्ये तु अत्रापि संदेह एव, व्यंग्यस्तु निश्चयो मात्सर्यमुत्सार्येतिवत् इत्याहुः । **इति ससंदेहः । तद्रूपकमिति** । योऽभेदस्तद्रूपकमित्यन्वयः । तदिति विधेयलिंगग्राहि । **अभेदारोप इति** । आरोपविषयाभेद इत्यर्थः । यथाश्रुते हि उपमात्वमपि सादृश्यप्रतीतेः स्यात् । ज्ञानानामेव तेषां लौकिकालंकारवत् चमत्कारजनकत्वमित्यन्यत् । उपमानोपमेययोरित्यस्योपमानतावच्छेदकोपमेयतावच्छेदकपुरस्कारेण शब्दान्निश्चीयमानयोरित्यर्थः । तेनाभेदप्रतीतेराहार्यत्वलाभः । तेन भ्रांतिमति नातिव्याप्तिः । अपह्नुतौ अतिशयोक्तौ च नातिव्याप्तिः । अपह्नुतौ स्वेच्छया निषिध्यमानत्वेन, भ्रांतिमति तज्जनकदोषेणैव प्रतिबंधात् । अतिशयोक्तेः साध्यवसानलक्षणामूलकत्वात्तस्य पुरस्काराभावात् । अतिशयोक्तिवत् निदर्शनायामपि नातिव्याप्तिः । शब्दादिति विशेषणात् 'मुखमिदं चंद्रः' इति प्रात्यक्षिकाहार्यनिश्चयगोचरतादात्म्यव्यवच्छेदः । निश्चीयमानयोरित्युक्त्या 'नूनं मुखं चंद्रः' इत्युत्प्रेक्षायां नातिव्याप्तिः । तत्र ज्ञानमलंकारः अत्राभेद इति भेदाच्च । उपमानोपमेययोरित्येतद्विशेषणलभ्यमर्थमाह—**बीजं तु तत्रातिसाम्यमिति** । तेन 'सुखं मनोरमा रामा' इत्यादिशुद्धारोपविषयाभेदनिरासः । यत्तु सादृश्य-

---

प्रभा : — उभयथापि वैधर्म्यानुक्तिरित्यर्थः । इति संदेहालंकारः ॥ ५ ॥ **अभेदारोप इति** । अभेदेन सामानाधिकरण्येनारोप इत्यर्थः । सारोपलक्षणयोः सामानाधिकरण्येन प्रतिपादनमिति यावत् । तदुक्तम् — 'यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात् । उपमेये भवेद्वृत्तिस्त(दा त)द्रूपकं भवेत् ॥' इति । अलंकारभाष्यकारोऽपि लक्षणापरमार्थं यावता रूपकमित्याह । अतिसाम्यं धर्मबाहुल्यम् । तुशब्देन च वृत्तौ तस्य निमित्तत्वमात्रेणोक्तिर्न तु लक्षणाघटकतयेति ध्वनितम् । उपमानोपमेययो-

(१६) समस्तवस्तुविषयं श्रौता आरोपिता यदा ॥ ७ ॥

आरोपविषया इव आरोप्यमाणाः यदा शब्दोपात्ताः, तदा (समस्तानि वस्तूनि विषयोऽस्येति) समस्तवस्तुविषयम् । आरोपिता इति बहुवचनमविवक्षितम् ।

When the objects super-imposed are expressly stated, there results the 'Samastavastuviṣaya' (variety of Rūpaka.)

Gloss:—When the objects super-imposed happen to be expressed in words, like the objects super-imposed upon, there results the Samasta-vastu-viṣaya (Rūpaka), so called because all the objects (super-imposed) come within its purview. The plural number of आरोपिताः is of no consequence.

प्रदीपः–द्वितीयं तु शुद्धमात्रमिति। आद्ये विभागे लक्षणमाह—**समस्तेति।** आरोपिता आरोप्यमाणाः। ते सर्वेऽपि यत्रारोपविषयवच्छाब्दा एव भवन्ति तदा समस्तवस्तुविषयं नाम रूपकम्। समस्तं वस्तु आरोप्यमाणं विषयः शब्दप्रतिपाद्योऽत्रेति व्युत्पत्तेः। आरोपिता इति बहुवचनमविवक्षितमित्यारोप्यद्वयस्थले नाव्याप्तिः।

उ०:–प्रयुक्ताभेदस्येव संबंधांतरप्रयुक्ताभेदस्यापि रूपकत्वमिति। तन्न। सादृश्यामूलकस्मरणस्याप्यलंकारतापत्तेः। चंद्रादिपदानां तद्वृत्तिगुणवति सारोपलक्षणायां अभेदप्रतीतिर्व्यंग्येत्येतावतैव रूपकं वाच्यम्। चशब्दादिव्यंग्यत्वे समुच्चय इव। 'मुखमपरचंद्रः' इत्यादौ तु कविकल्पितापरचंद्रेण रूपकं बोध्यम्। 'मुखचंद्रेण विरहतापः शाम्यति' इत्यादावपि रूपकमेव। न चैवं चंद्राभेदप्रतीतौ विरहतापशामकत्वासंभवः। अभेदप्रतीतेराहार्यत्वेन मुखत्वस्यातिरस्कारेण विशेष्यतया भानेन च तत्त्वसंभवात्। 'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्' इत्यादौ आहार्यनारायणत्वबुद्ध्याऽऽहार्यस्यैव लक्ष्मीकर्तृकालिंगनस्य बोधान्न दोषः। यत्तु आरोप्यमाणो यत्र विष-

प्रभा:–रित्यनेनैव हेतुहेतुमतोरभेदोक्तौ कोकिलानन्दो वसन्त इत्यादावतिप्रसङ्गप्रसङ्गात्। सारोपेत्यादिना चातिशयोक्तिव्यावृत्तिः। **अनपह्नुतभेदयोरिति।** भेदो वैधर्म्यं मुखत्वादि। एतच्चोपमापदस्योपमेयतावच्छेदकविशिष्टपरत्वादेव लभ्यत इति ज्ञेयम्। अथवा गौणसारोपलक्षणामूलव्यङ्ग्यरूपोऽभेदारोप एव रूपकमस्तु। उपमातो वैचित्र्यस्य तत्प्रयुक्तत्वात्। यत्कृतं वैचित्र्यं तस्यैवालंकारत्वौचित्यात्।

यथा—

ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद्द्वीप भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन ॥ ३० ॥ (—)

अत्र पादत्रये, अन्तर्धानव्यसनरसिकत्वमारोपितधर्म एवेति रूपकपरिग्रहे साधकमस्तीति तत्संकराशंका न कार्या ।

To illustrate:—

White due to smearing of the ashes of moonlight, holding the bones of the stars, taking delight in the habit of becoming invisible, the Kāpālikī, in the shape of night, is on the tramp from continent to continent, carrying the magical, fragrant collyrium placed, in the guise of the spot, in the skull-bowl (मुद्राकपाल) of the moon. (30)

There need be no doubt that here, in the three quarters (of the stanza,) is present the Saṅkara of it (i. e. of Rūpaka with Upamā), in view of the fact that the characteristic of being one who takes delight in the habit of becoming invisible is solely an attribute of the thing superimposed and is, hence, a probative circumstance for the acceptance of a Rūpaka.

प्रदीप :– उदाहरणम्—**ज्योत्स्नेति** । अत्र पादत्रये ज्योत्स्नादिषु भस्मत्वादिकमारोप्यमाणं सर्वं शाब्दम् । नन्विदं रूपकोदाहरणं न युज्यते । साधकबाधकाभावेन रूपकोपमयोः संदेहात्संदेहलक्षणसंकरौचित्यादिति चेत् । भवेदेवम् । यद्यन्तर्धानव्यसनरसिकत्वं विशेषणं

उ० :– यात्मतयैव प्रकृतकार्योपयोगी न स्वातंत्र्येण स परिणामः । अत्र च विषयाभेदः आरोप्यमाणे उपयुज्यते । रूपके तु नैवमिति विशेषः । ‘ वदनेनेन्दुना तन्वी स्मरतापं विलुम्पति ’ इत्यादि उदाहरणम् । अत्र हि स्मरतापनाशन-सामर्थ्यं मुखात्मनैवेन्दोः । ग्रीष्मसंतापहारकत्वात् रमणीयशोभाऽऽधारत्वाच्चे-न्दुर्विषयतयोपात्त इति दाक्षिणात्याः । तन्न । इन्दौ वदनतादात्म्यप्रतीतेर्वर्ण-नीयमुखाद्यनुत्कर्षकत्वेनालंकारत्वाभावात् इति दिक् । **आरोपविषयवदिति** ।

प्रभा :– व्यङ्ग्यस्यापि वाच्योत्कर्षकत्वेनालंकारान्तर्भावस्याप्रस्तुतप्रशंसानन्वयोपमेयोपमा-दावङ्गीकारात् । परम्परितरूपके ‘ नियतारोपणोपायः स्यादारोपः परस्य यत् ’ इत्यारोपपदस्य प्रयोगाच्च ‘ उपमानोपमेयस्य गुणसाम्यात्तत्त्वारोपो रूपकम् ’ इति वामनसूत्राच्च ‘ भ्रमिम-

(१७) श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्ति तत् ।

केचिदारोप्यमाणाः शब्दोपात्ताः, केचिदर्थसामर्थ्यादवसेयाः–इत्येकदेशविवर्तनात् एकदेशविवर्ति ।

That is 'Eka-deśa-vivarti' (Rūpaka) in which they (i. e. the things super-imposed) are (some of them) expressed and (others) implied.

Gloss:—Some of the things superimposed are expressed in words; others are to be guessed on the strength of implication. Thus it comes to be called 'Eka-deśa-vivarti' owing to its being present in an explicit form (वि) in a part (of the description).

प्रदीपः– न स्यात् । तद्धि रूपकपरिग्रहे साधकम् । कापालिक्यां तत्संभवाद्रात्रावसंभवाच्च । उपमापरिग्रहे तु रात्रेरेव प्राधान्यात्तस्यानन्वय एव स्यात् । **श्रौता इति** । ते इत्यारोपिताः ।

उ०ः– तेषां श्रौतत्वेऽविवादादृष्टान्ततेति बोध्यम् । श्रौता इत्यस्य व्याख्या शाब्दा इति । सावयवत्वं च परस्परसापेक्षरूपकसमुदायत्वम् । **ज्योत्स्नेति** । (रूपकमुखेन ज्यौत्स्नीं योगिनीत्वेन वर्णयति । ज्योत्स्नैव भस्म ।) छुरणं अंगलेपनम् । (तारका एव अस्थीनि ।) व्यसनं कौतुकम् । (रात्रिरेव कापालिकी योगिनी । चन्द्र एव) मुद्राकपालं कापालिकानां अंजनादिधारणकपालम् । (मन्दाक्रांता छन्दः ।) अत्र समुदायात्मकस्य सावयवरूपकस्यावयवानां सर्वेषामपि समर्थ्यसमर्थकत्वं परस्परं तुल्यम् । तथापि कवेः रात्रौ कापालिकीरूपकस्यैव समर्थ्यत्वेनाभिप्रेतत्वादितरेषां समर्थकत्वं गम्यते । रात्रिकापालिकीत्यस्य कापालिक्यभिन्ना रात्रिरित्यर्थः । उपमानपदस्य लक्षणायामपि व्यंग्याभेदघटितवाक्यार्थस्यापि बोधात् । उपमायां तु सादृश्यघटित एव वाक्यार्थबोध इति विशेषः । **रूपकोपमयोरिति** । 'उपमितं व्याघ्रादिभिः' (पा. सू.–२-१-५६) इति सूत्रेण समास उपमेयविशेष्यक एव बोधः । उपमानोपमेयसमभिव्याहारे उपमेयस्य विशेष्यताया लोकव्युत्पत्तिसिद्धत्वात् । अत एवेदं सूत्रं विशेषणं विशेष्येणेति सिद्धे विशेष्यस्य पूर्वनिपातार्थमिति काशिकायामुक्तम् ।

प्रभाः– रतिमलसहृदयतां' इत्यादौ हालाहलरूपं व्यङ्ग्यं वाच्यस्य भुजगरूपणस्य सिद्धिकृदिति ग्रन्थे रूपकस्य वाच्यत्वोक्तिस्तु वाच्यायमानत्वाभिप्राया साधारणगुणानां तत्प्रतियोजकानां रूपकपदेनोपादानाद्वोपपादनीयेति दिक् । **तदेतदिति** । परम्परि-

यथा—

जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअम् ।
रससंमुही वि सहसा परम्मुही होइ रिउसेणा ॥ ३१ ॥ (—)

To illustrate:—

When he (lit. who) holds the bent sword (मण्डलाग्रलता) in his hand, in the harem of the battle-field, the hostile army, though prone to the (heroic) sentiment, all at once turns back. (31)

प्रदीप:—तथा च यत्र केचिदारोप्यमाणाः शब्दोपात्ताः केचिदर्थसामर्थ्यादवसेयास्तदेकदेशविवर्ति । एकदेशे विशेषेण वर्तत इति व्युत्पत्तेः । उदाहरणम्—**जस्सेति** । अत्र रणेऽन्तःपुरत्वमारोप्यं शाब्दम् । मण्डलाग्रलताया नायिकात्वं रिपुसेनायाः प्रतिनायिकात्वं चारोप्यं न शाब्दम् । किं त्वन्तःपुरत्वारोपसामर्थ्यादेवावसीयते । अन्यथा तस्या-

---

उ०:—मुखचंद्र इति विशेषणसमासे चंद्ररूपकव्यवहारः। यत्तु रूपके विशेषणं विशेष्येणेति (पा. सू.–१-२-५७) समासे उपमेयस्य पूर्वनिपातश्चित्य इति । तन्न । मयूरव्यंसकादिसमासस्य विशेषणसमासपदेन विवक्षणात् । एवं च संदेहः स्पष्ट एवेति भावः । एतदेव ध्वनयन् उदाहरिष्यति—जस्स रणेति । तत्रान्तःपुरस्य विशेष्यत्वे हि मंडलाग्रलतादीनां वाच्यानामनन्वयः स्पष्ट एव । एवं च कापालिकीव रात्रिः कापालिक्यभिन्नेति वा, ज्योत्स्ना भस्मेव ज्योत्स्नैव भस्मेति वा, अस्थ्यभिन्नास्तारका अस्थिसदृशास्तारका वेत्यादिक्रमेण रूपकोपमयोः संदेह इत्याशयः । **रात्राविति** । कापालिक्यभेदानापन्नरात्रावित्यर्थः । **रात्रेरेवेति** । कापालिक्यभेदानापन्नरात्रेरेवेत्यर्थः । **अनन्वय इति** । बाधादिति भावः । कापालिक्यभेदग्रहे तु तद्धर्मांतरेऽन्तर्धानव्यसनरसिकत्वान्वये नानुपपत्तिरिति भावः । ननु अन्तर्धानं स्वस्य चोराणां वेति उपमायामपि न तदन्वयानुपपत्तिरिति चेन्न । साधारणधर्मप्रयोगस्य तदा सत्त्वेनोपमितसमासानापत्तौ मयूरव्यंसकादिसमासस्यैवैष्टव्यत्वेन रूपकस्यैव सिद्धिरित्याशयात् । व्यसनरसिकत्वस्य स्वरसतस्तस्यामनन्वयाच्च । **विशेषेणेति** । रूपकसंघातस्यावयविनः अवयवे कस्मिंश्चिद्रूपके

प्रभा:—तद्रूपकभेदस्य श्लेषमूलस्य शब्दार्थोभयालंकारत्वात्तद्विभागानुक्तिः । 'यस्य रणान्तःपुरे करे कुर्वतो मण्डलाग्रलताम् । रससंमुख्यपि सहसा पराङ्मुखीभवति रिपुसेना ॥' मण्डलाग्रः खड्गः स एव लताकारत्वाल्लता । रसो वीरः शृङ्गारश्च । **अन्यथेति**।

अत्र रणस्यान्तःपुरत्वमारोप्यमाणं शब्दोपात्तम्; मण्डलाग्रलतायाः नायिकात्वम्, रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यादवसीयते। इति एकदेशो विशेषेण वर्तनादेकदेशविवर्ति।

(१८) साङ्गमेतत्

उक्तद्विभेदं सावयवम्।

(१९) निरङ्गं तु शुद्धम्

Here the idea of being the harem super-imposed on the battle-field is expressed in words. The idea of being the heroine (super-imposed) on the bent sword, and that of being the counter–heroine (super-imposed) on the hostile army are guessed on the strength of implication. Thus it is Ekadeśavivarti owing to its being present, in an explicit form (विशेषेण), in a part (of the description.)

This is Sāṅga (Rūpaka).

Gloss:—The one whose two varieties have been specified is such as consists of parts.

While that which does not consist of parts is (called) Śuddha.

प्रदीप: – पर्यवसानात्। अत एकदेशे विशेषेण वर्तनादेकदेशविवर्ति। **साङ्गमिति**। साङ्गं सावयवम्। एतत्। उक्तप्रकारद्वयवदित्यर्थः। साङ्गत्वमनेकरूपकसमुदायः। एकस्मिन्रूपके द्वितीयस्याङ्गत्वेनावस्थानात्। अङ्गशब्दस्य हेत्वर्थत्वात्। **निरङ्गमिति**। निरङ्गमद्वितीयम्।

उ०: – विशेषेण शब्दमुखेन स्फुटतया इत्यर्थः। **जस्सेति**। 'यस्य रणांतःपुरे करे कुर्वतो मंडलाग्रलताम्। रससंमुख्यपि सहसा पराङ्मुखीभवति रिपुसेना॥' मंडलाग्रः खड्ग एव लता, तदाकारत्वात्। रसो वीरः शृंगारश्च। सांमुख्यं युयुत्सा रतेच्छा च। पराङ्मुखता युद्धात् स्वामिसंगमाच्च। (आर्या छन्दः।) **अंतःपुरत्वारोपेति**। अंतःपुरे तासामेवौचित्यादिति भावः। तदाह—**अन्यथेति**। यद्यपि लिंगविशेषात् करग्रहणरससंमुखत्वादेर्नायिकाधर्मत्वेन प्रसिद्धत्वात् श्लिष्टत्वाच्च समासोक्तिविधयैव नायिकात्वावगतिर्वक्तुं शक्या। तथाप्यंतःपुरत्वारोपोऽपि तत्र तंत्रमित्याशयः। न च रूपक-

---

प्रभा: – नायिकात्वारोपं विना तस्याः पुरत्वारोपत्वस्यापर्यवसानादनुपपन्नत्वादित्यर्थः। **समुदाय इति**। परस्परापेक्ष इति शेषः। यथाश्रुते मालारूपकेऽपि त-

यथा—

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत्।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोऽस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥ ३२ ॥ (—)

Gloss:—To illustrate:—

Since, like a doe, she makes her limbs still, at the tunes of a song, since she asks her friend over again the news relating to her beloved, even when it was (once) heard, since she lies down inwardly sleepless, I gather, therefore, that the Mind-born (Cupid) has set about watering the tiny *creeper of love*, in her heart. What a joy! (32)

प्रदीप:—तच्छुद्धमेवेत्यर्थः। यथा **कुरङ्गीवेति**। अत्र प्रेममात्रे लतिकात्वारोपः। अथ

उ०:—संघातात्मकस्यास्य रूपकभेदगणनायां गणनमनुचितमिति वाच्यम्। चमत्कारविशेषजनकतया तत्समुदायात्मकस्याप्यस्य मालारूपकादिवत् तद्भेदेषु गणनात्। यथा मौक्तिकालंकृतिगणनायामेकं नासामौक्तिकमिव तत्संघातात्मिका मौक्तिकमंजर्यादयो गण्यन्ते तद्वत्। ननु वक्ष्यमाणे विद्वन्मानसहंस इत्यादौ राज्ञि हंसत्वारोपो यथा मनसः सरस्त्वारोपमपेक्षते तथाऽत्रापि नायिकाप्रतिनायिकात्वारोपाभ्यां रणेऽन्तःपुरत्वारोपोऽपेक्ष्यते इति परंपरितत्वमस्य स्यादिति चेन्न। रणेऽन्तःपुरत्वस्य सुखसंचारास्पदत्वादिनेव मण्डलाग्रलतादेर्नायिकात्वाद्यारोपस्य लिंगविशेषकरग्रहादिनाऽपि संभवेनास्य परम्परितत्वाभावात्। राज्ञि हंसत्वारोपस्तु मनसि सरस्त्वारोपं विना न भवत्येव। सरोवराधेयत्वं विना राज्ञि हंससाधर्म्यान्तराभावात्। एवं 'ज्योत्स्नाभस्म' इत्यादावपि बोध्यम्। अत एव 'नियतारोपणोपायः' इति वक्ष्यति। एतदित्यस्यान्यवहितपूर्वमात्रपरामर्शकत्वं वारयति—**प्रकारद्वयवदितीति**। **अद्वितीयमिति**। अंगांगिभावहीनमित्यर्थः। केवलस्यैव रूपणादित्याशयः। सावयवत्वं त्वनेकविषयं परस्परसापेक्षं चेति बोध्यम्। **कुरंगीति**। (किशोर्या वृत्तान्तं धात्री निवेदयति।) स्तिमितयति,

---

प्रभा:—त्वापत्तेः। तत्रानेकेषामपि रूपकाणां परस्परानपेक्षत्वात्तद्व्यावृत्तिः। अयमर्थोऽङ्गशब्दादेव लभ्यत इत्याह—**एकस्मिन्निति**। नन्वेकदेशित्वरूपमङ्गत्वं मालायामपि

(२०) माला तु पूर्ववत् ॥ ८ ॥

मालोपमायामिवैकस्मिन् बहव आरोपिताः ।

यथा—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ॥ ३३ ॥ (—)

As for the Mālā (variety of Rūpaka) it is as before.

Gloss:—As in Mālopamā, (in this variety,) many things come to be super-imposed on one.

To illustrate:—

That beloved is a surging flow of beauty, a bursting forth of the raptures of the Height-of-youth, a hypnotic feat (कार्मणकर्म) of grace, a habitation of the spurt of the secrets of gaiety, the lore of ornate (वक्र) expression, a manifestation of the unbounded skill of the Creator, the arrows of the Five-arrowed (Cupid), the crest-jewel of womankind. (33)

प्रदीपः—साङ्गस्यैव वैचित्र्यान्तरमाह—**माला त्विति** । यथैकत्र बहूपमानयोगे मालोपमा तथैकत्रानेकधर्मारोपे मालारूपकमित्यर्थः । यथा—**सौन्दर्यस्येति** ।

उ०:—निष्क्रियाणि करोति । प्रश्नयति, प्रश्नवंतं प्रश्नविषयं करोतीत्यर्थः । अंतः स्वपिति, नयनामुद्रणेऽपि विषयं न गृह्णाति । अभिनवाम् । तस्या एव सेकौचित्यात् । (शिखरिणी छन्दः ।) **अत्र प्रेममात्रे इति** । न तु तदुपपादकत्वेन क्वचिदप्यन्यारोप इत्यर्थः । **वैचित्र्यांतरम्** । एकविषयत्वं परस्परमंगांगिभावानापन्नत्वरूपम् । एवं च सांगस्येत्यस्यानेकरूपकसमुदायस्येत्येवार्थः । क्वचित्तु निरंगस्यैवेति पाठः । एकविषयनानापदार्थारोपरूपत्वान्मालात्वं परस्परसापेक्षत्वविरहाच्च निरंगत्वमिति तदर्थः । अयमेव युक्तः पाठः । पूर्ववदिति व्याचष्टे—**यथेति** । **एकत्रेति** । उपमेये इत्यर्थः । एकस्योपमानस्य नानोपमेयकृतस्तु न कश्चिच्चमत्कार इति न तत्पृथक् गण्यते । **सौन्दर्यस्येति** ।

प्रभा:—प्रत्येकमस्तीत्याशङ्कानिरासायाह—**अङ्गशब्दस्येति** । साङ्गस्यैव शुद्धस्यैव । पूर्वशब्देनोपमापरामर्श इत्याह—**यथेति** । एतदेव सूत्रं सूत्रवृत्तिकृतोरेकत्वे ज्ञापकम् ।

(२१) नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा ॥ ९ ॥

Where a specific super-imposition becomes the occasion (उपाय) for the superimposition of something else, there results the Paramparita (Rūpaka), the word expressive (of the former thing superimposed) being either paronomastic or distinct (from the one expressing the thing superimposed upon).

प्रदीपः – नियतेति । नियतस्य मुख्यस्याऽऽरोपो वस्त्वन्तरतादात्म्यप्रतीतिस्तस्योपायः कारणं यः परस्यामुख्यस्याऽऽरोपस्तत्परम्परितम् । रूपणानां कार्यकारणभावरूपा परम्परा संजाताऽत्रेति योगादिति केचित् । वस्तुतस्तु नियतमारोपणमुपायो यत्र । आरोपणं विना यदारोपणं न संभवत्येवेति यावत् । एवंभूतः परस्यान्यस्य य आरोपः स तथा । एवं चैकरूपणहेतुकं रूपणान्तरं परम्परितम् । कार्यकारणभावरूपा परम्परा संजाताऽत्रेति व्युत्पत्तेः । श्लिष्ट इत्यादि । तदेतद् द्विविधम् । उपायभूते रूपके आरोप्यारोपविषययोर्वाचकस्य श्लिष्टत्वा-

---

उ० : – (कश्चिद्विरही प्रेयसीं परामृशति ।) तरंगिणीति । तरंगत्वेनोत्तरोत्तराऽविच्छेदः । योग्यस्थानप्राप्त्या हर्षः । कार्मणकर्म वशीकरणक्रिया । तत्क्रियाविशिष्टो हि जगद्वशीकरोति । कांतिरप्येतद्विशिष्टा तथेति जगद्वशीकारकत्वं साधारणधर्म इति भावः । नर्मरहसां रहस्यपरिहासानाम् । आवासभूर्वसतिस्थानम् । या यद्वासभूरसति बाधके सा तद्वतीति सामान्यतो व्याप्त्या गृहीततद्वत्त्वं साधारणो धर्मः । एवमग्रेऽप्यूह्यम् । वक्रगिरां साकूतवचसाम् । विद्या उपदेशिका । अनवधि निःसीमं यत् प्रावीण्यं निर्माणकौशलं तस्य साक्षात्क्रिया करणव्युत्पत्त्या प्रत्यक्षहेतुः । (शार्दूलविक्रीडितं छन्दः ।) प्रियायामेकस्यां बहूनां आरोपान्मालात्वम् । यथैकत्र सूत्रे बहूनां पुष्पाणामिति दिक् । **नियतस्य मुख्यस्येति** । वर्णनीयत्वेन प्रकृतस्येत्यर्थः । वृत्तित्वं षष्ठ्यर्थः । **अमुख्यस्य** अप्रकृतस्य । योऽन्यारोप इत्यर्थः । **केचिदिति** । अत्रारुचिबीजं तु 'आलानं जयकुंजरस्य' इत्यादावव्याप्तिः । प्रकृत एव जये कुंजर-

---

प्रभा : – मालोपमायाः सूत्रानुक्ताया वृत्तावेव कथनादित्याहुः । **केचिदिति** । अत्र च सावयवरूपकस्यापि परम्परितत्वप्रसङ्गेऽस्वरस इत्यतः स्वयं तदर्थमाह—**वस्तुतस्त्विति** । **एवं चेति** । एकरूपणानन्तरं रूपकमिति शेषः । सावयवे तु ज्योत्स्नाभस्मेत्यादौ

यथा—

विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥ ३४ ॥ (—)

Gloss:—To illustrate:—

O swan! in the mind (by Śleṣa: the Mānasa lake) of the learned, O sun! bringing about the ebb of the enemy's fortunes (by Śleṣa: bringing about the dilation of the lotuses), O Śiva! not going in quest of forts (by Śleṣa; ever on the look-out for Durgā), O fire! taking up the (challenge for) battle (by Śleṣa: consuming sacred fuel), O Dakṣa! in inculcating a love of truth (by Śleṣa: in showing disaffection towards Satī (i. e. Pārvatī), O Bhīma! in being the prime origin of Triumph (by Śleṣa: born prior to Vijaya i. e. Arjuna), O pre-eminent hero! may you rule the empire augustly, for a hundred Brahman-years! (34)

प्रदीपः—द्विन्नरूपत्वाच्चेत्यर्थः। तत्राद्यं यथा—**विद्वदिति**। अत्र विदुषां मानसं सरोविशेष इत्यारोपहेतुकं राज्ञो हंसत्वारोपणम्। तत्र चारोपविषयारोपणीययोर्हृदय-सरोविशेषयोः श्लेषवता मानसशब्देनैवाभिधानम्। एवमग्रेऽपि। तत्र वैरि-कमलायाः संकोच एव कमलानामसंकोचः। दुर्गाणाम् अमार्गणमेव दुर्गाया मार्गणम्।

उ०:—त्वारोपस्य प्रकृत एव राज्ञि आलानत्वारोपहेतुत्वात्। **परस्यान्यस्येति**। अप्रकृतस्य प्रकृते य आरोप इत्यर्थः। **एकरूपणहेतुकमिति**। यद्यपि दुर्गाणाममार्गणादौ दुर्गामार्गणादीनामारोपो न रूपकम्। किंतु श्लेषमहिम्नाऽऽ-रोपमात्रम्। तथापि रूपणपदमारोपमात्रपरमेवेति न दोषः। इदमेव चास्यो-पायत्वमारोपे, यत्तन्मूलीभूतसाधारणधर्मसंपत्तिः। साधारणधर्मसंपत्तिः रूपके-णैवेत्यत्र न किंचिन्मानम्। यद्वा श्लेषस्थलेऽपि शब्दरूपसाधर्म्यकृत एवाभेदाध्यवसाय इति तस्यापि रूपकत्वमेवेति न दोषः। **विद्वदिति**। (राजानं प्रति कवेरुक्तिः।) हंसः पक्षिभेदः। नीललोहितः शिवः। समित्संग्राम

प्रभा:—ज्योत्स्नादिषु भस्माद्यारोपाभावेऽप्यनेकद्वीपभ्रमणादिप्रसिद्धसादृश्येन रात्रौ कापा-लिकीत्वारोपसंभवान्न परम्परितत्वप्रसङ्ग इति भावः। उक्तं नवम इत्यर्थः। वक्ष्यते चाग्र इत्यर्थः। तदवसरे उभयालंकारप्रस्तावे। **मानसत्वादीनामिति**। सरोविशेषत्वा-

अत्र, मानसमेव मानसम्, कमलायाः संकोच एव कमलानामसंकोचः, दुर्गाणाममार्गणमेव दुर्गायाः मार्गणम्, समितां स्वीकार एव समिधां स्वीकारः, सत्ये प्रीतिरेव सत्यामप्रीतिः, विजयः परपराभव एव विजयोऽर्जुनः,-एवमारोपणनिमित्तो हंसादेरारोपः ।

यद्यपि शब्दार्थालंकारोऽयमित्युक्तम्, वक्ष्यते च, तथाऽपि प्रसिद्ध्य-

---

Here, the superimposition of (the idea of) the swan etc. is occasioned by superimpositions underlying the identification of Mānasa, the mind, with Mānasa, the lake; of the shrinking of the fortunes, with the dilation of lotuses; of the abstention from seeking a refuge behind forts, with the quest of Durgā; of the acceptance of (the challenge for) battle, with the consumption of sacred fuel; of the love of truth, with the disaffection towards Satī (Pārvatī); of Vijaya, the defeat of the enemy, with Vijaya, Arjuna.

Though it has been stated (already) to be a figure of sound and sense,

---

प्रदीप :—समितां स्वीकार एव समिधां स्वीकारः। सत्ये प्रीतिरेव सत्यामप्रीतिः। विजयः परपराभव एव विजयोऽर्जुनः। एवमारोपहेतुकं सूर्याद्यारोपणमिति । ननु श्लेषस्य शब्दपरिवृत्त्यसहतया शब्दालंकारत्वमित्युक्तं वक्ष्यते च। तथा च श्लेषपरम्परितमुभयालंकारो युज्यत इति तदवसर एव वक्तुमौचित्यात्किमित्यर्थालंकारमध्ये पठित इति चेत्। सत्यमेतत्। तथापि श्लेषापवादकं रूपकमित्यलंकारसर्वस्वकारादिप्रसिद्ध्यनुरोधेनोक्तः । तथाप्रसिद्धौ किं बीजमिति चेत्,

---

उ० :—समिधश्च। स्वीकारोऽनुपेक्षणम्। वैश्वानरो वह्निः। सती पार्वती। दक्षः प्रजापतिः। प्राग्भावः प्रथमोत्पत्तिः। भीमः भीषणः पांडवश्च। साम्राज्यम् आज्ञया राजशासकत्वम्। वैरिंचम् ब्राह्मम्। (शार्दूलविक्रीडितं छन्दः।) **दुर्गाणाम्**। विषमभूप्रदेशानाम्। अत्र मानसादिपदं श्लिष्टम्। अत्र श्लिष्टशब्देनार्थद्वयोपस्थितौ श्लेषमहिम्ना प्रकृतसंबन्धिनि अप्रकृताभेदप्रत्ययः। प्रकरणेन प्रकृतसंबन्धिनो विशेष्यत्वात्। स चाभिधामूलव्यंजनयेति बोध्यम्। 'वाचके' इति च बोधके इत्यर्थकम्। ततस्तमेव साधारणधर्ममाश्रित्य प्रकृते राज्ञि हंसत्वाद्यारोपरूपरूपकसिद्धिः। **उक्तम्**। प्राचीनैः। **वक्ष्यते**। अस्माभिः। **उभयालंकार इति**। मानसादिपदस्य परिवृत्त्यसहत्वात् हंसादिपदस्य च

प्रभा :—दीनामित्यर्थः। आदिना कमलविकासित्वादिसंग्रहः। आर्थत्वमर्थगम्यत्वम्। खड्गलताया इव नायिकात्वमित्यर्थः। नन्वेकदेशविवर्तित्वं सावयवस्यैव भेदो न तु परम्प-

नुरोधादत्रोक्तः । एकदेशविवर्ति हीदमन्यैरभिधीयते ।

भेदभाजि यथा—

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ।
सङ्ग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन्राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥ ३५ ॥ (—)

---

and will be so stated again, it has been mentioned in this place, in accordance with the established usage. For, others style it Eka-deśa-vivarti.

When the word (expressive of the thing superimposed) happens to be distinct (from the one expressive of the thing super-imposed upon), it is illustrated as follows:—

The tying-post of the elephant of triumph, the embankment of stones against the ocean of adversity, the eastern mountain of the sun of the sword, the pleasure–cushion of wealth, the Mandara mountain in the sportive act of churning the nectar-ocean of battle,–your arm, o king, that inflicts widow-hood on the wives of the heroic foes, looks splendid. (35)

प्रदीपः – मानसत्वादीनामार्थत्वम् । इदं हि तैरेकदेशविवर्तीत्युच्यते । द्वितीयं यथा— **आलानमिति** । अत्र जयादेर्भिन्नशब्दवाच्यकुञ्जरत्वा (द्या) रोपे सति भुजे आलानत्वा-

---

उ०ः – परिवृत्तिसहत्वादिति भावः । **श्लेषापवादकं रूपकमिति** । बहुव्रीहिः । उभयमप्यर्थालंकार इत्युक्तेश्चेत्यपि बोध्यम् । **तैरेकदेशेति** । यथा रणेऽतःपुरत्वारोपे तद्विशिष्टसंबंधस्य मंडलाग्रलतादावयोग्यतया तद्बलादेव नायिकात्वारोपस्तथा राजनि हंसत्वारोपे तद्विशिष्टस्यांतःकरणसंबंधायोग्यत्वेन तद्बलात् मानसे सरस्त्वारोपेणैकदेशविवर्तीति तैरुक्तमित्यर्थः । नव्यमते तु उक्तलक्षणरीत्या नैकदेशविवर्तित्वमिति बोध्यम् । **आलानमिति** । आलानम् गजबंधनस्तंभः । दृषदामिति दार्ढ्यार्थम् । करवालः खड्गः । चंडमहा रविः । लीला सुखस्वापः । उपधानं शिरोनिधानतूलपटः । संग्राम एवामृतसागरः, लोड्यत्वात् । प्रकृष्टमथनमेव क्रीडा, सुखनिर्वाह्यत्वात् । वीरा ये वैरिणः, तदन्येषामुपेक्षणीयत्वात् । (शार्दूलविक्रीडितं छंदः ।) **युज्यत इति** । कुंजराभिन्नजयाधारत्वसाधर्म्येणेति भावः । एवमग्रेऽपि बोध्यम् ।

प्रभाः – रितस्येत्याशङ्क्याह—**इदं हीति** । मूले इदमपीत्यन्वयः । एकपदोपस्थितयोरन्तःकरणसरोविशेषयोरभेदाध्यवसायेऽपि नैकत्रापरारोपः । तस्य भेदेन विषयनिर्देशापेक्ष-

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे सति एव भुजस्य आलानत्वाद्यारोपो युज्यते ।

अलौकिकमहालोकप्रकाशितजगत्त्रयः ।
स्तूयते देव सद्वंशमुक्तारत्नं न कैर्भवान् ॥ ३६ ॥ (—)

Here the super–imposition of the idea of the tying-post etc. on the arm becomes logically possible only on the super-imposition of the idea of an elephant etc. on triumph etc. which are denoted by separate words.

By whom are you, O king, not extolled,–you who have illumined the three worlds by your extraordinarily great halo and who are the pearl of the eminent race (by Śleṣa : of a fine bamboo) ? (36)

प्रदीपः–द्यारोपो युज्यते । इदमुदाहृतभेदद्वयं परम्परितमालारूपम् । अमालारूपमपि तद् द्रष्टव्यम् । तत्र श्लिष्टवाचके यथा—**अलौकिकेति** । अत्र वंशोऽन्ववाय एव वंशो

उ०ः–एवं जये कुंजरत्वारोपे भुजरूपालानसंबंधित्वं साधारणधर्मः । न चैवमन्योन्याश्रयः । कल्पनामयतया सकलसिद्धेः । कल्पनायाश्च स्वप्रतिभाऽधीनत्वात् । शिल्पिभिः परस्परावष्टंभमात्राधीनस्थितिकाभिः शिलेष्टकादिभिर्गेहविशेषनिर्माणाच्चेति केचित् । वस्तुतो जयकुंजरयोरभेदप्रत्यय इच्छाधीन आहार्य एव । समर्थकारोपः सादृश्यमूलक एवेत्यत्र नाऽऽग्रह इत्यन्योन्याश्रयसंभावनैव नेति दिक् । **अलौकिकेति** । अलौकिकस्य लोकेऽन्यत्रादृष्टस्य महस्य उत्सवस्याऽऽलोकः प्रदर्शनमेव द्योतः तेन प्रकाशितं जगत्त्रयं येन । अलौकिकमहालोको यश इति वा । सद्वंशो महत्कुलं तदेव सद्वेणुः मुक्तोत्पत्तिस्थानं तत्रत्यं मुक्तारत्नम् । अत्र

प्रभाः–त्वात् । अन्यथा विषयनिगरणात्मिकायामतिशयोक्तावपि तत्प्रसङ्गात् । तस्मादार्थ एवायमारोप इत्येकदेशविवर्तित्वमत्रापि युक्तमिति । स्वमते त्वभिधामूलव्यञ्जनोपस्थितस्य सरःप्रभृतेर्मनःप्रभृतौ व्यञ्जनयैवारोपोऽन्यत्र तु खड्गलतादावार्थिक इति विशेषाच्छ्लेषाङ्गकमेवैतदिष्टम् । वेणुरितीत्यनन्तरं श्लिष्टमिति शेषः । **नालंकारानेकत्वमिति** । न रूपकालंकारानेकत्वमित्यर्थः । अलंकारस्य चमत्कृतिजनकतारूपत्वात्तस्याश्च चमत्काररूपकार्यैक्येनैक्यादित्यर्थः । परम्परितेति च सावयवोपलक्षणम् । न्यायसाम्यात् । ननु सापेक्षानेकस्थलेऽलंकारभेदाभावेऽपि निरपेक्षानेकरूपकमालायां कथं नालंकारभेद इति चेत्, सत्यम् । जातावनपेक्षत्वेऽपि चमत्कृतिविशेषजनने सापेक्षत्वादेकत्वम् । लोकेऽपि मालारशनादीनामेकालंकारत्वमुक्तहेतुकमेव

निरवधि च निराश्रयं च यस्य स्थितमनिवर्तितकौतुकप्रपञ्चम् ।
प्रथम इह भवान्स कूर्ममूर्तिर्जयति चतुर्दशलोकवल्लिकन्दः ॥ ३७ ॥
(Cited in वामन's काव्यालंकारसूत्रवृत्ति. ५.१.३१.)

इति च अमालारूपकमपि परम्परितं द्रष्टव्यम् ।

किसलयकरैर्लतानां करकमलैः कामिनां मनो जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ ३८ ॥
(Cited in रुद्रट's काव्यालंकार. ८.५०.)

इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम् ।

Glory to you in the form of the tortoise, who have been the first here (i. e. in this world), who are the *bulb of the creeper of the fourteen worlds*, and whose presence infinite as it is and independent of a support, has never ceased provoking a maze of wonder! (37)

In such instances Paramparita Rūpaka could be found in a form other than Mālā.

A Rūpaka in the Raśanā form like

Cupid captivates the mind of lovers, with the creepers' sprouts–those *hands*, with the (maidens') *hands*–those *lotuses*, with the lotus-plants' *lotuses*–those *faces*, with the maidens' *faces*—those moons. (38)

has not been defined, since it lacks in strikingness.

प्रदीपः– वेणुरिति । भेदभाजि यथा–**निरवधीति** । अत्र लोकशब्दाद्भिन्नेन वल्लिपदेनारोप्यमाणमुक्तम् । परम्परिते चारोप्यारोपविषयानेकत्वेऽपि नालंकारानेकत्वम् । संभूयैव वैचित्र्यप्रकर्षाधायकत्वात् । एवं मालारशनयोरपि द्रष्टव्यम् । यद्यपि रशनारूपकमपि

उ०:– राज्ञि मुक्तात्वारोपे कुलगतो वेणुत्वारोपो निमित्तम् । **निरवधीति** । (विष्णुं प्रति भक्तस्योक्तिः ।) निरवधि बहुकालं, निराश्रयं अपराधीनम् । स्थितं स्थितिः । अनिवर्तितनृत्यादिप्रपंचम् । प्रथमः स्वत एव भूतः स्वत एव लब्धराज्यादिश्च । (भूः भुवः स्वः महः जनः तपः सत्यम् अतलम् वितलम् सुतलम् तलातलम् महातलम् रसातलम् पातालम् एते चतुर्दशलोकाः। तद्रूपा या वल्लिः तस्याः कन्दो मूलम्। पुष्पिताग्रा छन्दः।) लोके वल्लित्वारोपो राज्ञि कंदत्वारोपे निमित्तम् । स च राज्ञि कूर्मत्वारोपे हेतुः । ननु पूर्वश्लोके मुक्ता-

---

प्रभाः– प्रसिद्धम् । **रशनेति** । पूर्वपूर्वमारोप्यमाणानामुत्तरत्रारोपविषयत्वरूपमित्यर्थः । यथा किसलयेष्वारोप्यमाणानां कराणां कमलारोपविषयत्वं कमलानां च मुखारोपविषयत्वमिति । अत्र करकमलैरिति मुखेन्दुभिरिति च योषितामित्यनेनान्वेतीति

(२२) प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः ।

7. APAHNUTI.

That is 'Apahnuti,' however, where after denying the thing under description, another is posited (instead).

प्रदीपः – रूपकम् संभवति। यथा—**किसलयेत्यादि**। तथापि न तादृशवैचित्र्यवदिति न पृथग्लक्षितम्। **प्रकृतमिति**। प्रकृतमुपमेयं निषिध्य असत्यतया व्यवस्थाप्य अन्यदप्रकृतमुप-

उ०ः – त्वारोपे प्रकाशितजगत्त्रयत्वारोपोऽपि निमित्तम्, अत्र कूर्मत्वारोपे निरवधिस्थितत्वारोपोऽपि निमित्तमितीदं द्वयं अनेकारोपनिमित्तत्वान्मालापरंपरितमेव युक्तमिति चेन्न । ज्योत्स्नाभस्मच्छुरणधवलेत्यादेरपि तथात्वापत्तेः । नाना-परंपरासत्त्वे एव मालापरंपरितत्वस्य युक्तत्वाच्च । **किसलयेति** । लतानां नलिनीनां च स्त्रीत्वमार्थम् । करकमलैरिति मुखेंदुभिरिति च योषितामित्यनेनान्वेति । (आर्या छन्दः ।) पूर्वपूर्वारोप्यमाणानां परत्रपरत्रारोपविषयत्वात् रसनारूपता । **न तादृशेति** । उपमेयोत्कर्षप्रतिपादनायोपमानीकृतानामुपमेयीकरणे तदुत्कर्षप्र-तिपादनस्थगनात् । न चारोप्यभेदादविरोधः । एकत्र काव्ये उपात्तत्वादिति दिक् । **इति रूपकम्** । **प्रकृतमिति** । निषिध्येत्यंतेन रूपकव्युदासः । तत्र प्रकृतनिषेधाभावात् । **उपमेयमिति** । इदमुपलक्षणम् । किंचिदपह्नुत्य कस्य-चित् प्रदर्शनमपह्नुतिरित्येव लक्षणम् । अत एव 'केसेसु बलामोडिअ' इत्यादौ स्वयं न प्रपलाय्य गतास्तद्वैरिणोऽपि तु ततः पराभवं संभाव्य तान्कंदरा

प्रभाः – ज्ञेयम् । **न तादृशेति** । यथोपमायां भणितिरिवेत्यादौ राजसंबन्धितया वर्णनीयानां भणित्यादीनामुपमानोपमेयतया ग्रन्थनं प्रकृतोत्कर्षपर्यवसायितया वैचित्र्य-हेतुस्तथा नेत्यर्थः । अथात्र शाब्दबोधप्रकारः कथ्यते—तत्र प्राचां मते विषयिवाचकपदेन विषयवृत्तिगुणवतो लक्षणया सारोपयोपस्थितस्याभेदेन विषयेऽन्वयान्मुखं चन्द्र इत्यादौ चन्द्रवृत्तिगुणवदभिन्नं मुखमित्यादिधीः । मुखचन्द्र इति विशेषणसमासे तु मुखाभिन्नं चन्द्रवृत्तिगुणवदिति साधारणगुणमात्रपुरस्कारेण तद्वति विषयपदस्य लक्षणेति । मुख्य-मते त्वाह्लादकं मुखमिति वाक्ये विशेषणसमासे तु मुखाभिन्नमाह्लादकमिति । कान्त्या मुखं चन्द्र इत्यत्राभेदस्तृतीयार्थः । तस्य चन्द्रवृत्तिगुणे पदार्थैकदेशेऽन्वयः । तेन कान्त्य-भिन्नचन्द्रवृत्तिगुणवदभिन्नं मुखमिति बोधः । लक्षणां विनैवोपमानोपमेययोः समान-

उपमेयम् असत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते, सा तु अपह्नुतिः ।

उदाहरणम्—

अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये
कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि ।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे
रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥ ३९ ॥ (—)

Gloss:—That is 'Apahnuti,' however, where after describing the Upameya as unreal, the Upamāna is established as being real.

To illustrate:—

O daughter of the mountain, this *is not* at all a spot that shines, having attained prominence on the form of the Moon, whose brightness is at its height: to my mind, *it is* Night, his beloved who, getting fatigued with dalliance is fast asleep, on his bosom, cool as it is with the stream of nectar that is oozing (from him). (39)

प्रदीप :—मानं यत्साध्यते सत्यतया व्यवस्थाप्यते सा अपह्नुतिः । सा च शाब्दी आर्थी चेति द्विधा । तत्राद्या यथा—**अवाप्त इति** । अत्र कलङ्को नैवायमिति शाब्दोऽपह्नवः । आर्थस्तु बह्वी-

---

उ०ः—न त्यजंतीत्यपह्नुतिर्व्यज्यते इति प्रकाशकारैश्चतुर्थे उक्तम् । एवं च 'नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखम्' इत्यादावपह्नुतिरेव । अत एव दंडिनोक्तम् । 'अपह्नुतिरपह्नुत्य किंचिदन्यार्थसूचनम् । न पंचेषुः स्मरस्तस्य सहस्रं पत्रिणां यतः ॥' इति । एतेन 'नायं सुधांशुः' इत्यादौ 'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते' इत्यादौ च नापह्नुतिः किं तु दृढारोपरूपकमित्यपास्तम् । 'नेदं मुखं चंद्रः' इति प्रसिद्धापह्नुत्युदाहरणेऽपि मुखत्वनिषेधे चंद्रारोपदार्ढ्यसंपादकताया वक्तुं शक्यत्वेनानुभवसिद्धत्वेन चापह्नुतिमात्रस्योच्छेदापत्तेः ।

प्रभा :—विभक्तिकपदोपस्थितयोराहार्यभेदबोधवादिनां नव्यानां मते तु मुखं चन्द्र इत्यादौ चन्द्राभिन्नं मुखमिति बोधः । मुखचन्द्र इति विशेषणसमासे तु मुखस्य विशेषणत्वात्तदभेदस्य चन्द्रेऽन्वयाद्यद्यपि मुखरूपकमापद्यते न पुनश्चन्द्ररूपकं चन्द्राभेदस्य मुखेऽनवगमात्, तथापि स्वनिष्ठाभेदप्रतियोगित्वसंसर्गेण चन्द्रे मुखान्वयस्वीकाराच्चन्द्राभेदरूपकोपपत्तिः । स्वप्रतियोगिकाभेद एव विशेषणस्य संसर्गो न तु स्वानुयोगिक इति नियमे मानाभावादिति वदन्ति । एतन्मते कान्त्या मुखं चन्द्र इत्यादौ कथं बोध

इत्थं वा—

बत सखि कियदेतत्पश्य वैरं स्मरस्य
प्रियविरहकृशेऽस्मिन्रागिलोके तथा हि ।
उपवनसहकारोद्भासिभृङ्गच्छलेन
प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् ॥ ४० ॥ (—)

Or, as in the following :—

Lo ! How bitter, alas ! is the enmity of Cupid, O friend, towards this love-stricken person grown lean through separation from the beloved ! Inasmuch as, he has tipped each and every arrow with the venom *in the shape of* the bees glistening on the mango-blossoms in the garden. (40)

प्रदीप :–भिर्भङ्गीभिरालोच्यते। तत्कचित्कपटार्थशब्दोपादानात्। यथा—**बतेति**। अत्र छलशब्दबलान्न सभृङ्गाणि सहकाराणि अपि तु सकालकूटाः शरा इति प्रतीयते। क्वचित्परिणामा-

उ० :–यदि तु निषेधपूर्वकारोपे चमत्कारविशेषस्यानुभवसिद्धत्वादलंकारान्तरत्वम् तर्हि प्रकृतेऽपि तुल्यम्। ननु निषिध्येत्यस्य निषेधार्थकत्वे 'शिखा धूमस्येयं परिणमति रोमावलिवपुः' इत्यादौ अपह्नुतिर्न स्यादत आह । **असत्यतयेति** । **साध्यते** । आहार्यनिश्चयविषयीक्रियते । तेन 'न पद्मं मुखमेवेदम्' इत्यादौ नातिव्याप्तिः। तथा विरहिजनवाक्ये 'नायं चंद्रोऽपि तु मार्तण्डः' इत्यादौ नैषा । तज्ज्ञानस्य दोषविशेषजन्यत्वेनानाहार्यत्वात् । 'नायं चंद्रोऽरविंदं वा मुखं वेदं मृगीदृशः' इत्यत्र च नैषा। निश्चयविषयत्वाभावात्। **शाब्दीति**। शब्देन यत्रासत्यत्वमाहेत्यर्थः। **अवाप्त इति** । (पूर्णचंद्रे कलङ्कं दृष्ट्वा पार्वतीं प्रति महेश्वरस्योक्तिः ।) परिणतरुचः पूर्णस्य शशाङ्कस्य वपुषि प्रागल्भ्यं प्रकटत्वं प्राप्त इत्यन्वयः। विगलतोऽमृतस्य स्यंदः प्रस्रवणं तेन शीतेऽमुष्योरसीत्यन्वयः । (शिखरिणी छंदः।) **बतेति**। (सखीं प्रति विरहिण्या उक्तिः।) कामिलोके स्मरस्य कियद्वैरमित्यन्वयः । सहकारेषु तत्पुष्पेषु । छलम् व्याजम् । (प्रतिविशिखम्

प्रभा :–इति चेदत्राहुः—चन्द्राभिन्नमुखादेः कविप्रतिभाकल्पितत्वेन कान्त्यादिगुणानां तत्र प्रयोजकत्वात्कान्त्यादिप्रयोजकं चन्द्राभिन्नं मुखमिति बोधः। प्रयोज्यत्वस्य तृतीयार्थत्वादिति । इति रूपकम् ॥ ६ ॥ **असत्यतयेति**। यथाश्रुते 'शिखा धूमस्येयं परिणमति रोमावलिवपुः' इत्यादावव्याप्तेः । संदेहालंकारव्यावृत्त्यर्थं सत्यतयेति । अन्य-

अत्र हि न सभृङ्गाणि सहकाराणि, अपि तु सकालकूटाः शरा इति प्रतीतिः।

एवं वा—

अमुष्मिँल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः॥ ४१॥ (—)

अत्र न रोमावलिः, धूमशिखेयमिति प्रतिपत्तिः। एवमियं भङ्ग्यन्तरैरप्यूह्या।

For, here, the idea conveyed is: "They are not mango-blossoms with the bees, but arrows tipped with venom."

Or as in the following:—

Cupid as he was being burnt down by Śiva must have indeed plunged into the spacious region of the hips of the deer-eyed one,–that lake filled with the nectar of beauty. Inasmuch as, here a line of smoke indicating (पिशुन) the extinction of the embers of his limbs emerges, from the depth of her navel, *in the shape of* the hair-line. (41)

Here the idea apprehended is:—This is not a hair-line; it is a line of smoke. On similar lines, this (Apahnuti) could be conceived in other modes besides.

प्रदीप:–दिशब्दवशात्। यथा—**अमुष्मिन्निति**। अत्र धूमशिखा रोमावलिवपुः परिणमतीति परिणामशब्दार्थवशान्नेयं रोमावलिः किं तु धूमशिखेति प्रतीयते। एवं

उ०: –प्रतिबाणम्।) उट्टङ्कितम् प्रकाशितम्। (कालकूटम् तीक्ष्णविषम्। मालिनी छंदः।) **अत्र छलेति**। सत्यत्वे व्याजताविरहात्तेन भृंगाणामसत्यत्वप्रतिपादनमिति भावः। (**अमुष्मिन्निति**। वेश्यामुद्दिश्य समृद्धं कामिनं प्रति दास्या उक्तिः।) अमुष्मिन्मृगदृशः पृथुजघनभागे लावण्यामृतसरसि शर्वप्लुष्टः शिवदग्धः स्मरो नूनं निपतित इत्यन्वयः। प्रशमपिशुना शांतिसूचिका। परिणमति प्रादुर्भवति। तप्तांगारस्य जलप्रवेशे धूमशिखा भवतीति स्वभावः। (शिख-

---

प्रभा:–त्साध्यत इत्येतावदुक्तौ रूपकातिव्याप्तेः प्रकृतमित्युक्तम्। तन्मात्रोक्तौ च निषेधालंकारे वक्ष्यामाणेऽतिव्याप्तिरत उभयोपादानम्। 'न पद्मं मुखमेवेदं' इत्यादावप्रकृतस्य निषेधो न तु प्रकृतस्य। तथा समारोपोऽप्यप्रकृतस्य नेति तद्व्युदासः। दण्डी तु—'अप-

(२३) श्लेषः स वाक्ये एकस्मिन्यत्रानेकार्थता भवेत् ॥ १० ॥

एकार्थप्रतिपादकानामेव शब्दानां यत्रानेकोऽर्थः, स श्लेषः ।

उदाहरणम्—

उदयमयते, दिङ्मालिन्यं निराकुरुतेतरां
नयति निधनं निद्रामुद्रां प्रवर्तयति क्रियाः ।
रचयतितरां स्वैराचारप्रवर्तनकर्तनं
बत बत लसत्तेजःपुञ्जो विभाति विभाकरः ॥ ४२ ॥ (—)

8. ŚLEṢA

That is 'Śleṣa' where, in one sentence, is present the capacity to yield senses more than one.

Gloss:—That is Śleṣa, where words which (normally) convey one sense only, possess senses more than one.

To illustrate:—

The sun rises, effectively dispels the gloom of the quarters, breaks the seal of sleep, sets the activities afoot, necessarily brings about the cessation of proclivities to wanton conduct, and shines refulgent, a mass of gleaming lustre. How wonderful!
(or, in the alternative,)

प्रदीपः—भङ्ग्यन्तरैरप्यूह्यम् । यथा 'इदं ते केनोक्तं' इत्यादौ । **श्लेष इति ।** परिवृत्तिसहानामेव शब्दानामेकवृन्तगतफलद्वयन्यायेन यत्रानेकार्थप्रतिपादकता सोऽर्थ-

उ०:—रिणी छंदः ।) अत्र निषिध्येति क्त्वाप्रत्ययार्थोऽपि लक्षणेऽविवक्षितः। तेन 'मंथानभूमिधरमूलशिलासहस्रसंघट्टजव्रणकिणः स्फुरतींदुमध्ये। छाया भृगः शशक इत्यतिपामरोक्तिस्तेषां कथंचिदपि तत्र हि न प्रसक्तिः ॥' इत्यादावारोपपूर्वकापह्नवे नाव्याप्तिः। अपह्नवस्तत्र पामरवचनोपन्यासादर्थसिद्धः। वाक्यभेदश्चात्र । बत सखि, अमुष्मिन्नित्यनयोस्त्वेकवाक्यतेति बोध्यम् । 'प्रजल्पन्मत्पदे लग्नः कांतः किं न हि नूपुरः' इत्यादावपीयमेव । व्याजोक्तिरित्यन्ये । क्वचित् भंग्या व्यंजनया निषेधबोधनम् । यथा 'अंकं केऽपि शशंकिरे' इत्यादौ। **इत्यपह्नुतिः** । तत्र शब्दश्लेषाद्भेदं

प्रभा:—ह्नुतिरपह्नुत्य किंचिदन्यार्थसूचनम् । न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणामिति' इत्यपह्नुतिलक्षणं सोदाहरणं ब्रुवन्नुपमानोपमेयनियममपह्नुतौ नाङ्गीचक्रे । इत्यपह्नुतिः ॥ ७ ॥

अत्राभिधाया अनियन्त्रणात् द्वावप्यर्कभूपौ वाच्यौ ।

(२४) परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः

(King) Vibhākara prospers, effectively dispels the sullenness of the quarters (i. e. of the people in them), brings languid looks to an end, promotes (pious) deeds, resolutely puts a stop to proclivities to wanton conduct, and shines splendid, a mass of gleaming splendour. How wonderful! (42)

Here, the sun and the king are both *expressed* due to the non-restriction of the expressive power (of the words).

9. SAMĀSOKTI.

'Samāsokti' consists in the suggestion (Ukti) of a thing other (than the matter under description), through distinctive attributes used paronomastically.

प्रदीपः – श्लेषः । यथा—**उदयमिति** । अत्र विभाकरनामा राजविशेषो मार्तण्डश्चेत्युभयार्थानि 'उदयमयते' इत्यादीनि वाक्यानि । न चायं द्वितीयार्थस्य ध्वनिरेवेति शङ्कनीयम् । संयोगादीनामभावेनाभिधा या अनियन्त्रणाद् द्वयोरपि वाच्यत्वात् । **परोक्तिरिति ।**

उ० : – दर्शयति—**परिवृत्तिसहानामेवेति । उदयमिति ।** उदयं उदयाचलं समृद्धिं च । दिङ्मालिन्यं तमसाऽपायेन च । निद्राजन्या मुद्रा चक्षुषः, निद्रेव मुद्रा निरुत्साहता च । क्रिया ग्रामगमनादि विहिताः क्रियाश्च । स्वैराचारोऽभिसारादिः स्वेच्छया वेदनिषिद्धाचरणं च । (हरिणी छन्दः ।) **विभाकरनामेति** । एवं च तदंशे परिवृत्त्यसहत्वेन शब्दश्लेषेऽपि उदयमित्यादिषु बहुष्वर्थश्लेषादुदाहरणत्वमित्याह—**उदयमयत इत्यादीनीति । द्वयोरपि वाच्यत्वादिति** । प्रकृतत्वेनेत्यादिः । उभयोः प्रकृतत्वेऽप्रकृतत्वे वा ध्वनित्वाभावादिति भावः । एतेनार्थश्लेषे विशेषणानामेव श्लिष्टत्वं न तु विशेष्याणामपीत्यपास्तम् । केचित्तु 'विभाकरपदं शक्त्या सूर्यं, नृपं योगेन बोधयतीत्येतदंशेप्यर्थश्लेषः, परिवृत्तिसहत्वात्' इत्याहुः । यदि त्वत्र राजा प्रकृतो रविरप्रकृतस्तदा द्वितीयार्थस्य शब्दशक्तिमूलध्वनिरेवेति बहवः । **इति श्लेषः । परमप्र-**

प्रभा : – **श्लेषः स इति ।** अत्रार्थश्लेषस्यैवार्थालंकारत्वेन लक्ष्यत्वाच्छब्दश्लेषव्यावृत्त्यर्थमाह—**परिवृत्तीति** । 'योऽसकृत्परगोत्राणामि'त्यादौ तु गोत्रादिशब्दानां परिवृ-

प्रकृतार्थप्रतिपादकवाक्येन श्लिष्टविशेषणमाहात्म्यात् (न तु विशेष्यस्य सामर्थ्यादपि) यत् अप्रकृतस्यार्थस्याभिधानम्, सा (समासेन संक्षेपेणार्थद्वयकथनात्) समासोक्तिः । उदाहरणम्—

लहिऊण तुज्झ बाहुप्फंसं जीए स को वि उल्लासो ।
जअलच्छी तुह विरहे ण हुज्जला दुब्बला णं सा ॥ ४३ ॥ (—)

Gloss:—Where a matter other than the one under description comes to be conveyed by a sentence that states the matter under description, in virtue of the attributes used paronomastically, (not in virtue of the significance of the substrate of the attributes, though,) there results the 'Samāsokti,' so called owing to two ideas being conveyed (by it), by Samāsa i. e. in brief. To illustrate :—

The Glory-of-Triumph, that used to be in some indescribable ecstasy, on feeling the touch of your arm, has surely ceased to be gay, on (her) separation from you; forsooth, she has grown so feeble ! (43)

प्रदीपः—परमप्रकृतम् । भेदकानि विशेषणानि । श्लिष्टान्यनेकार्थानि । तेन प्रकृतार्थविशेषणवाचिमात्रशब्दस्य श्लेषमहिम्ना यत्र प्रकृतार्थकेन वाक्येनाप्रकृतार्थवचनं सा समासोक्तिः संक्षेपेणार्थद्वयोक्तिः । मात्रग्रहणाद्यत्र विशेष्यपदस्यापि श्लिष्टत्वं तद्व्युदासः । तस्य श्लेषत्वात् । उदाहरणम्—**लहिऊणेति ।**

उ०ः—**कृतमिति ।** अप्रकृतव्यवहार इत्यर्थः । यत्र त्वप्रकृतेन प्रकृताभिधानं तत्राप्रस्तुतप्रशंसेति भावः । **अनेकार्थानीति ।** प्रकृताप्रकृतोभयानुगतानेकार्थानीत्यर्थः । उभयान्वितेति तु न युक्तम् । अप्रकृतस्यानुपादानात् । **अप्रकृतार्थवचनम् ।** अप्रकृतगतव्यवहाररूपार्थस्य वचनं प्रकृतवृत्तांते आरोपो व्यंजनया प्रतिपादनं इत्यर्थः । एवं च समासोक्तौ प्रकृतव्यवहारेऽप्रकृतव्यवहारारोपः । रूपके तु विशेष्ये प्रकृतेऽप्रकृतरूपारोपः । अत एवैकदेशविवर्तिरूपकविषये न समासोक्तिः । **संक्षेपेण** एकेनैव शब्देन । **तस्य श्लेषत्वादिति ।** उपमाध्वनित्वाद्वेत्यपि बोध्यम् । **लहिऊणेति ।** 'लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः । जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा' । (गाथा छन्दः ।) **परमप्रकृतार्थकत्वमिति ।** केवलं तस्य कांतावाचकत्वं नास्ति, विशेषणानां तु उभयगतबाहुस्पर्शप्राप्त्यादिबोधकत्वमित्यर्थः । एवं च लहि-

अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति ।

Here, only the word जयलक्ष्मी (Glory-of-Triumph) does not express the sense of "the beloved."

प्रदीपः–अत्र विशेष्यवाचिनो जयलक्ष्मीशब्दस्य परमप्रकृतार्थकत्वं नास्ति । श्लिष्टत्वं

उ०ः–ऊणेत्यादिपदबोध्यानां अभेदारोपात् व्यंजनया कांताव्यवहाराभेदेन प्रतीयमानस्य जयलक्ष्मीव्यवहारस्य जयलक्ष्मीवृत्तांततया प्रतीयमानस्य चमत्कारकतेति भावः । अत एवोक्तं कुवलयानंदकृतापि 'समासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः' इति । अयं भावः । 'अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः' इत्यादौ श्लिष्टविशेषणप्रतीतप्रस्तुताऽप्रस्तुतवृत्तांतयोः श्लेषभित्तिकाभेदाध्यवसायेनाभेदप्रतीतिविषययोः प्रस्तुतचंद्रादिवृत्तिता । तत्र तयोर्वृत्तांतयोः परस्परं विशेषणविशेष्यभावे कामचारेऽपि प्रस्तुतवृत्तांतो विशेष्यः । तद्बोधकबोध्याप्रस्तुतस्तु अभेदेन तद्विशेषणम् । तत्र यद्यपि प्रस्तुतस्य स्वासाधारणधर्मेण चंद्रेऽन्वययोग्यताऽस्ति, तथापि अप्रस्तुताभेदमापन्नस्य न साऽस्तीति तद्रूपावच्छिन्नस्याप्रकृते धर्मिण्यारोपः । आरोपोऽत्र व्यंजनया बोधः । न चाप्रस्तुताभिन्नत्वेऽपि विशेष्यतायाः प्रस्तुत एव सत्त्वेनास्त्येवान्वययोग्यतेति वाच्यम् । विशिष्टस्यान्वयायोग्यत्वात् । न च रूपकवत्समासोक्तावपि प्रस्तुतचन्द्रेऽप्रस्तुतजाररूपसमारोपश्चारुताहेतुरस्त्विति वाच्यम् । तद्वाचकपदसमभिव्याहाराभावेन तस्यासंभवात् । न चाऽऽक्षिप्तजारादिनाक्षिप्तरूपकमस्तु । 'निरीक्ष्य विद्युन्नयनैः पयोदः' इत्यादौ पयोदे द्रष्टृपुरुषविशेषाक्षेपकनिरीक्षणवदाक्षेपकाभावात् । न च विशेषणसाम्यप्रतीताप्रकृतजारवृत्तांत एव चंद्रवृत्तितया प्रतीयमान आक्षेपकोऽस्तु । अप्रस्तुतस्य प्रस्तुते विशेषणतयाऽप्राधान्येनानाक्षेपकत्वात् । स्फटिके जपाकुसुमनिष्ठलौहित्यस्यारोपेऽपि जपाकुसुमत्वानारोपश्च । एतेनाऽऽक्षेपाऽ-

प्रभाः–त्यसहत्वान्नार्थश्लेष इति भावः । **लहिऊणेति** । 'लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः । जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा ॥' **औपम्येति** । आदिपदेन साधारणविशेषणसारूप्यसंग्रहः । तत्र साधारणविशेषणवशाद्यथा—'विलिखति कुचावुच्चैर्गाढं करोति कचग्रहं लिखति ललिते वक्त्रे पत्रावलीमसमञ्जसाम् । क्षितिप खदिरः श्रोणीबिम्बाद्विकर्षति चांशुकं मरुभुवि हठान्नश्यन्तीनां तवा-

उ०ः–संभवेऽपि परनायिकामुखचुंबनस्य श्लेषमर्यादया व्यंजनया वा प्रतीतस्य प्रकृते धर्मिण्यारोप्यमाणस्य जारासाधारणधर्मत्वेन प्रकृतधर्मिणि जारत्वव्यंजकता सुवचेत्यपास्तम् । किं चैवं सति वाच्यार्थबोधोत्तरं तद्व्यंग्यप्रतीतिः । सापि न केवलव्यवहारमात्रज्ञानात् । अपि तु तादृशनायकनायिकासंबंधविशिष्टव्यवहारज्ञानात् । एवं च वाच्यार्थबोधकालिकचमत्कारस्यापह्नोतुमशक्यत्वेनालंकारत्वस्य दुरपह्नवत्वात् । विपरीतनायकत्वव्यंजनस्य समासोक्त्यंतर्भावं वदतो ध्वनित्वस्य दुर्वारत्वाच्च । तद्व्यंग्यस्याधिकचमत्कारकारित्वेन प्रधानत्वात् । न च श्लिष्टशब्दोपस्थापितयोर्वृत्तांतयोः परस्परमभेदेनान्वये मानाभावः । सहृदयहृदयस्यैव प्रमाणत्वात् । अत एव 'आगत्य संप्रति वियोगविसंष्ठुलांगीम्' इत्यत्रार्थशक्तिमूलो नायकनायिकावृत्तांतो वाच्यरविकमलिनीवृत्तांताध्यारोपेणैव स्थित इति प्रदीपकृतः । प्राचीनानुभवमपलप्यापि यदि एकत्र द्वयमिति रीत्या प्रस्तुताप्रस्तुतवृत्तांतयोर्विशेष्यैणैवान्वयः स्वीक्रियते, एवमपि वाच्यार्थबोधकाले प्रस्तुते धर्मिणि नाप्रस्तुतजारत्वारोपं प्रत्याशा । तथाहि । यद्यप्यनयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्यैणैव साक्षादन्वयात्समप्राधान्यमस्तीति स्वीक्रियते, तथाप्यप्रस्तुतवृत्तांतान्वयानुरोधान्न प्रस्तुतेऽप्रस्तुतरूपसमारोपः । प्रस्तुतेऽप्रस्तुतवृत्तांतारोपेणैव सिद्धेः । अप्रस्तुतरूपसमारोपेऽपि प्रस्तुतवृत्तांतान्वयायोग्यतायास्तदवस्थत्वाच्च । नन्वेवं सति विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिति प्राचीनलक्षणाऽसंगतिः । अप्रस्तुतधर्मिव्यंजनस्य त्वयानपेक्षणादिति चेत् न । स्वरूपतोऽप्रस्तुतवृत्तांतारोपस्य न चमत्कारित्वम् । किं तु अप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्यैव तस्य आरोपः । अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन चुंबनादिना

प्रभाः–रिमृगीदृशाम् ॥' अत्र कुचविलेखनकचग्रहादिविशेषणानां शब्दश्लेषं विना स्वत एव साधारण्यान्नायकवृत्तान्तस्फूर्तिरिति समासोक्तिः । औपम्यगर्भविशेषणाद्यथा—'दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी । केशपाशालिवृन्देन सुवेषा हरिणेक्षणा ॥' अत्र नायिकाविशेषणत्वस्य दन्तप्रभाः पुष्पाणीवेत्याद्युपमितसमासेन सिद्धौ दन्तप्रभासदृशैः पुष्पैरिति समासान्तराश्रयणेन ललनावृत्तान्तस्य समासोक्तिः । सारूप्याद्यथा—'पुरा यत्र स्रोतः–' इत्युत्तररामचरितनाटके प्रसङ्गात्कालान्तरे पुनर्दण्डकं गत-

उ०ः—ऐन्द्री चंद्र इत्येतद्गतस्त्रीलिंगपुल्लिंगसहकृतेन तत्संबंधिनि कामुकादौ अभिव्यक्ते पुनस्तदीयत्वानुसंधानात्। विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्याऽऽक्षेपणात्। अप्रस्तुतस्येत्यस्याप्रस्तुतव्यवहारस्येत्यर्थो वा। एतेन वदनचुंबनस्य पुत्रादिसाधारण्यात्कथं कामुकाभिव्यंजकत्वम्। किं च 'अहर्मुखं चुंबति भानुबिंबम्' इत्यत्रापि नायकाद्यभिव्यक्त्यापत्तिरित्यपास्तम्। यत्तु चंद्रऐंद्रीपदगतलिंगाभ्यामभिव्यक्तनायकयोः स्वव्यंजकपदोपस्थापिताभ्यां भेदेनैवान्वय उचितः। समानपदोपात्तत्वप्रत्यासत्तेरिति। तन्न। एवं हि वदता व्यवहारावच्छेदकत्वं तयोः स्वीक्रियते न वा। आद्ये एकस्यार्थस्योभयत्रान्वयोऽव्युत्पत्तिग्रस्तः। अंत्ये रसाननुगुणत्वम्। यदपि ऐंद्र्यादौ नायिकात्वाभाने केवलं व्यवहारावच्छेदकत्वमात्रस्वीकारे बाधः। नायिकात्वानालीढकेवलैंद्रीमुखचुंबनरूपस्य व्यवहारस्य नायकासंबंधित्वात्। न हि दिकूतादात्म्यं विना नायिकायाः पृथङ्मुखं विशेषयितुं सामर्थ्यमस्तीति। तदपि न। मुखशब्दश्लेषसामर्थ्येनैंद्रीमुखमित्यस्यैंद्र्यंशमोषेण केवलमुखचुंबनस्योपस्थितेः। तदेतदुक्तं कुवलयानंदे—'श्लेषादिमहिम्ना स्वरूपतः समर्पितेन वदनचुंबनादिना' इति। न ह्यैंद्रीशब्दार्थेन दिग्रूपेण वदनरूपमुखपदार्थस्यान्वयो वक्तुं शक्यः सहृदयैः। नन्वेतादृशकुसृष्टिकल्पनापेक्षया विशेषणसाम्यमहिम्ना प्रतीतोऽप्रकृतवाक्यार्थः स्त्रीलिंगपुल्लिंगाभ्यामभिव्यक्तनायकाद्यभिन्नचंद्रादिघटितप्रकृतवाक्यार्थे स्वावयवतादात्म्यापन्नतदवयवोऽवतिष्ठते इत्येव कल्पयितुं युक्तम्। एवं च नायिकाऽभिन्नेंद्रदिशासंबंधिवदनाभिन्नप्रारंभकर्मकचुंबनरूपसंबंधाश्रयो नायकाभिन्नश्चंद्र इति बोध इति चेन्न। एवं हि ऐंद्र्यां नायिकाभेदप्रतीतौ मुखचुंबनादौ वदनचुंबनाद्यभेदप्रतीतावपि वदनचुंबने साक्षान्नायिकासंबंधाप्रतीत्या रसोद्बोधानापत्तेः। न च

प्रभाः—वतो रामस्येयमुक्तिः। अत्र वनसारूप्यात्कुटुम्बिषु धनसंतानादिसमृध्यसमृद्धिविपर्यासं प्राप्तस्य ग्रामनगरादेर्वृत्तान्तस्य प्रतीतेः समासोक्तिः। इयं चाप्पय्यदीक्षितैरेवोक्ता नान्यैरिति संक्षेपः। अस्यां च समासोक्तौ प्रकृतवृत्तान्तोऽभिधयैव प्रतीयते अप्रस्तुतवृत्तान्तस्तु व्यञ्जनया। प्रकरणेनाभिधाया नियमनात्। तस्य च ताटस्थ्येन प्रतीतावसंबद्धार्थकत्वप्रसङ्गाच्चमत्कारानुपपत्तेश्च। प्रकृते समारोपो न त्वप्रकृतनायकादेः प्रकृते राजादावारोपः। प्रमाणाभावात्। आरोपद्वयकल्पनागौरवाच्चेति प्राञ्चः।

प्रदीप :—चोपलक्षणम् । औपम्यगर्भादीनामपि संभवात् । यथा 'विलिखति कुचौ' इत्यादाविति प्राचीनः पन्थाः । अत्र नव्याः—परोक्तिरिति परशब्देन सामान्यतः प्रकृतमप्रकृतं वा विवक्षितम् । तेन यत्राप्राकरणिकविशेषणसामर्थ्यात्प्राकरणिकमुच्यते तदपि संगृह्यते । तत्रापि वैचित्र्याविशेषात् अन्यत्रानन्तर्भावाच्च । यथा 'संप्राप्ते सकलाङ्ग'—

उ० :—व्यंजनया तत्प्रतीतिरस्त्येव, यस्मिन् यदभेदः तत्संबंधिनि तत्संबंध्यभेद इति न्यायेन वा मानसी तत्प्रतीतिस्तत एव चमत्कार इति वाच्यम्। तदपेक्षया साक्षाच्चमत्कारोपपादकवाच्यार्थबोधव्युत्पादनस्यैवौचित्यात् । ननु व्यंजनयाऽप्रकृतार्थबोधः । शक्तेः प्रकरणादिना नियंत्रणात् । ततो व्यंजनामाहात्म्यादेव प्रकृतवाक्यार्थतादात्म्येनावतिष्ठत इति चेत् । व्यांजनिकोऽप्रकृतार्थबोधो नायिकाद्यविशेषितो विशेषितो वा । नाद्यः । रसाननुगुणत्वात् । अंत्ये स्वपदोपस्थाप्यलिंगाभ्यां नायिकाद्यभेदबोधो व्यर्थोऽसंभवी च । नायिकाविशेषणकव्यवहारबोधनेन कृतार्थत्वात् । अपि च तथा सति जारकर्तृकसानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयोगाश्रयो जाराभिन्नश्चंद्र इति बोधकदर्थनमेव स्यात् । तस्माद्व्यंजनया शक्त्या वोपस्थिताप्रस्तुतवृत्तांतेन व्यंजनयोपस्थितनायिकादिसंबंधित्वेन गृहीतेनाभेदमापन्नप्रस्तुतवृत्तांतारोपः प्रकृतविशेष्ये नव्यमते श्लेषस्थलेऽप्रकृतोपस्थितेः शक्त्यैव सत्त्वेन तन्मते शक्त्यैवाप्रकृतार्थोपस्थितिः, प्राचां तु व्यंजनयेत्येतावान्विशेषः । एवं च वाच्यार्थबोधोत्तरं यदि चंद्रादौ नायकत्वादिप्रतीतिरपि सहृदयानुभवसाक्षिकी तदास्त्वित्युपपादितमेव प्राक् । अत एव समासोक्तौ साधारणविशेषणबलादेवोपमानप्रतीतौ तदुपादानवैयर्थ्यमिति शेषे वक्ष्यति प्रकाशकृत् । अनेन तत्सादृश्यप्रतीतिर्व्यंजनया न तु तदभेदप्रतीतिरिति लभ्यते । प्रस्तुतप्राचीवृत्तांते आरोप्यमाणाप्रस्तुतखंडितनायिकाविशेषवृत्तांतसमर्थनाय तस्यावश्यकत्वाच्च । एवं च सानुरागपरनायिकामुखचुंबनाभिन्न-

प्रभा :—अप्रस्तुतस्य नायिकादेर्वृत्तान्तविशेषणत्वमवश्यं वाच्यम् । केवलवृत्तान्तस्य चारुत्वाभावात् । एवं चावश्यं व्यञ्जनयोपस्थितस्याभेदेन प्रकृतविशेषणत्वमेव युक्तं न तु वृत्तान्ते भेदेन । एवमप्रकृतवृत्तान्तस्यापि प्रकृतवृत्तान्त एव भेदेनारोप इति युक्तम् । वृत्तान्तद्वयस्यैकत्र द्वयमिति रीत्या बोधस्याननुभवपराहतत्वात् । तस्मादप्रकृतवृत्तान्ताभिन्नतयाध्यवसितः प्रकृतवृत्तान्तः स्वविशेष्ये तद्विशेष्याभिन्नतयावगते भासत

(२५) निदर्शना।

अभवन् वस्तुसंबन्ध उपमापरिकल्पकः ॥ ११ ॥

निदर्शनं दृष्टान्तकरणम् । उदाहरणम्—

---

10. NIDARŚANĀ.

'Nidarśanā' consists in a connection between objects, which is unlikely and (hence) tends to produce an idea of similarity (between them).

Gloss:—Nidarśanā i. e. giving an illustration (accounts for the name.) To illustrate:—

प्रदीपः—इत्यादि। अत्र ह्यप्रकृतस्य भृङ्गस्य विशेषणसामर्थ्यात्प्रकृतस्यासत्पुरुषस्य प्रतीतिरित्याहुः। तन्न युक्तम्। अप्रस्तुतप्रशंसयैव तत्संग्रहात्। 'येनास्यभ्युदितेन' इतिवत्। वृत्तौ चाप्रस्तुतप्रशंसाप्रकरणे तत्र समासोक्तिपदं श्लिष्टविशेषणत्वमात्रपरम्। **निदर्शनेति**।

उ०:—प्राचीप्रारंभसंयोगाश्रयश्चंद्र इत्येव बोधः। समासोक्तिर्गुणीभूतव्यंग्येति व्यवहारस्तु प्रकृतव्यवहारेऽप्रकृतव्यवहाराभेदस्य व्यंजनया प्रतीतेर्निर्बाध एवेति दिक्। **औपम्यगर्भादीनामिति**। आदिना साधारणविशेषणसङ्ग्रहः। 'अन्धेन पातभीत्या संचरता मया विषमविषयेषु। दृढमिह मया गृहीता हिमगिरिशृंगादुपागता गंगा ॥' अत्र गिरिशृंगप्रभववेणुयष्टिव्यवहाराभिन्नव्यवहारवती गंगेति प्रतीयते। **इति समासोक्तिः**। **निदर्शनेति**। अभवन् प्रतीतिविषयतामलभमानः वस्तुनोर्वाक्यार्थयोः पदार्थयोर्वा संबन्धोऽन्वयः। अत एव प्रतीतिपर्यवसानाभावादस्य दृष्टांततो भेदः। परस्परनिरपेक्षयोर्वाक्यार्थयोर्दृष्टांतालंकारः, इयं पुनः सापेक्षयोरिति भेद इत्यन्ये। तर्हि वाक्यमसंगतं स्यादत आह। **उपमापरिकल्पक इति**। औपम्यमाक्षिप्य पर्यवस्यतीत्यर्थः। **क्वेति**। (रघुकाव्ये प्रथमसर्गे स्वाहंकारं परिहर्तुं कालिदासस्योक्तिः।) उडुपं चर्मावनद्धवंशपात्रम्। मोहात् दुस्तरं सागरमुडुपेन तितीर्षुरस्मीत्यर्थः। अत्र स्वमतिसूर्यप्रभववंशयोरत्यंताननुरूपत्वं बोध्यते। तदनंतरमुडुपकरणकसागरतरणेच्छायाः अप्रकृतायाः कथनेन तादृशमतिकरणकवर्णनेच्छायाः पूर्वार्धत आक्षेपः। तयोश्च परस्परासंब-

---

प्रभा:—इति तु नव्याः। एवं च प्रकृतोदाहरणे नायकीयबाहुस्पर्शलाभप्रयुक्तोल्लासवती जयलक्ष्मीरित्याद्यपक्षे बोधः। द्वितीये तु राजनायकबाहुस्पर्शलाभप्रयुक्तोल्लासवती जयलक्ष्मीनायिकेतीति संक्षेपः। अत्र च बाहुस्पर्शेति साधारणं विशेषणं उल्लास इवि

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥ ४४ ॥ (रघुवंश. १.२.)

अत्र, उडुपेन सागरतरणमिव मन्मत्या सूर्यवंशवर्णनमित्युपमायां पर्यवस्यति ।

What a far cry it is from the sun-born race to my intelligence of petty sweep! I have, out of delusion, set about crossing the sea, hard to cross, in a canoe!

Here, there eventually results an idea of similarity, viz. that the description of the solar race with the help of my intellect would be tantamount to crossing the sea in a canoe.

प्रदीपः—यथाश्रुतमात्रेणासंभवी वस्तुसंबन्धो यत्रोपमां कल्पयित्वा पर्यवस्यति सैका निदर्शना । दृष्टान्तकरणात्मकनिदर्शनरूपत्वात् । सा च द्विधा—अवान्तरवाक्यभेदे तदभेदे च । तयोराद्या यथा—**क्व सूर्येति** । अत्राहं सागरं तितीर्षुरस्मीत्यस्यासंबद्धार्थकतया उडुपेन सागरतरणवन्मदीयमत्या सूर्यवंशवर्णनमसंभावितमित्युपमायाः कल्पनम् ।

उ०ः—न्धस्य स्पष्टत्वादौपम्यमादाय पर्यवसानम् । तत्फलितमाह—**उडुपेन सागरतरणवदिति । कल्पनम्** व्यंजनम् । प्रतीयमानाभेदरक्षणायेति भावः । एवं चात्राऽऽर्थी निदर्शना । 'त्वत्पादनखरत्नानि यो रंजयति यावकैः । इन्दुं चन्दनलेपेन पांडुरीकुरुते हि सः ॥' इत्यादौ तु शाब्दी बोध्या । वाक्यार्थगा चोभयत्रापि । एवं 'त्वत्पादनखरत्नानां यदलक्तकमार्जनम् । इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः ॥' इत्यत्राप्येवैत्र । न चेदं वाक्यार्थरूपकम् । लोकप्रसिद्धोपमानत्वोपमेयत्ववतोरभेदस्यैव रूपकत्वात् । किं च तत्र सादृश्यलक्षणामूलाऽभेदप्रतीतिः । इह तु प्रतीयमानाभेदानुपपत्त्या तत्त्वकल्पनेति भेदात् । 'नितरां निर्गते नीरे सेतुमेषा चिकीर्षति' इत्यादौ किंचिद्दाक्षिण्यसमागततत्कालोपेक्षितप्रतिनिवृत्तनायिकान्तरासक्तनायकानयनार्थं सखीं प्रेषयितुकामां नायिकामुद्दिश्य सख्या वचनेऽपि आर्थी निदर्शनैव । एतेनात्र ललितालंकारः वर्णनीयवाक्यार्थमनुक्त्वैव वर्ण्ये धर्मिणि तत्स्वरूपस्य कस्यचिदप्रस्तु-

---

प्रभाः—श्लिष्ट इति ज्ञेयम् । विशेषणसामर्थ्यान्निन्दागमकविशेषणसामर्थ्यात् । **समासोक्तिपदमिति** । तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः श्लेषः समासोक्तिः सादृश्यं चेति ग्रन्थे वक्ष्यमाणमित्यर्थः । इति समासोक्तिः ॥ **वस्तुसंबन्ध इति ।** वस्तुनोः पूर्वार्धापरार्धयोरित्यर्थः । संबन्धोऽन्वयः । अत्रोदाहरणयोः प्रथमे उडुपेन सागरतरणरूप-

यथा वा—

उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम् ।
वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥ ४५ ॥ (—)

(शिशुपालवध ४.२०.)

अत्र, कथमन्यस्य लीलामन्यो वहतीति तत्सदृशीमित्युपमायां पर्यवसानम् ।

Or as in,—

With their upward rays stretched out like ropes, when the sun rises (on it), and the moon sets, the mountain *assumes the grace* of a huge elephant decked (परिवारित) with two bells dangling (down the two sides). (45)

How could the grace belonging to one be assumed by another ? Therefore, it must be (only) similar to that of the other.–Thus there results eventually (an idea of) similarity here.

प्रदीप :–अन्त्या यथा–**उदयतीति**। अत्रान्यलीलोद्वहनस्यान्येनासंभवाद्वारणेन्द्रलीलासदृशीं लीलामित्युपमायां पर्यवसानम् । एवं च 'पूर्वोदाहरणे वाक्यार्थ उपमाक्षेपकः इह तु पदार्थमात्रम्' इति व्याख्यानमनादेयम् । अत्रापि लीलापदार्थमात्रस्यानाक्षेपकत्वात् । एषा मालारूपापि दृश्यते ।

उ० :–तवाक्यार्थस्य वर्णनरूपः इति अपास्तम् । नहि प्रस्तुताप्रस्तुतवृत्तांतयोः शब्दोपात्तयोरेव निदर्शनेत्यत्र मानमस्ति । न चैवमतिशयोक्तिविषयस्याप्यार्थरूपकेणापहारः स्यादिति वाच्यम् । विषयतावच्छेदकरूपेण भाते विषये विषयितावच्छेदकावच्छिन्नविषय्यभेदस्य रूपकशरीरस्य विषयितावच्छेदकरूपेण भासमानविषयात्मकादतिशयोक्तिस्वरूपाद्विलक्षणत्वेन तयोरैक्यासंभवात् । न च निदर्शनाविषये व्यंग्योपमयैवास्तु चमत्कार इति वाच्यम् । अत्राभेदप्रतीतिकृतचमत्कारस्यैव सत्त्वात् । कल्पितौपम्यमूलिकया पर्यवसन्नया तयैव चमत्कार इत्याशयात् । तदुक्तम् 'उपजीव्यत्वेन भेदात्' इति । **उदयतीति** । माघे चतुर्थसर्गे रैवतकनाम्नः पर्वतस्य वर्णनम् । वित-

---

प्रभा :–मुपमानमप्रसिद्धं द्वितीये तु वारणेन्द्रलीलारूपं तत्प्रसिद्धमित्यपि भेदो द्रष्टव्यः । **लीलापदार्थमात्रस्येति** । किं तु तद्वहनरूपवाक्यार्थस्येत्यर्थः । क्रिययैवेत्येव-

दोर्भ्यां तितीर्षति तरङ्गवतीभुजंग-
मादातुमिच्छति करे हरिणाङ्कबिम्बम्।
मेरुं लिलङ्घयिषति ध्रुवमेष देव
यस्ते गुणान्गदितुमुद्यममादधाति ॥ ४६ ॥ (—)

इत्यादौ मालारूपाऽप्येषा द्रष्टव्या।

(२६) स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा।

क्रिययैव स्वस्वरूप—स्वकारणयोः संबन्धो यदवगम्यते, सा अपरा निदर्शना। यथा—

He sets about crossing beyond the sea with the help of his arms; he aspires to catch the orb of the moon in his hand; he, in fact, seeks to stride O King, beyond the Meru,–whosoever makes an endeavour to describe your virtues! (46)

In instances like these, one could come across it (i. e. Nidarśanā) in the Mālā-form too.

While that is the other (variety of Nidarśanā) in which there is an intimation, by an action itself, of the connection between itself and its cause.

Gloss:—That is the other variety of Nidarśanā, in which the connection between itself and its cause is made to be intimated by the action itself.

To illustrate:—

प्रदीपः–यथा—**दोर्भ्यामिति** । **स्वस्वेति** । यत्र क्रिययैव स्वस्य स्वहेतोश्चान्वयो हेतुहेतुमद्भावरूपः ख्याप्यते साऽपरा निदर्शना । यथा—**उन्नतमिति** । अत्र पतेत्पदप्रतिपाद्यस्य पातस्य कार्यस्य लाघवे सत्युन्नतपदप्राप्तिरूपस्य कारणस्य च तथासंबन्धः पततिपदप्रतिपाद्यया पातक्रियया प्रतिपाद्यते । तथा

उ०:–ताः विस्तीर्णाः ऊर्ध्वाः रश्मय एव रज्जवो यस्य। इदं अहिमरुचौ इत्यस्य हिमधाम्नि इत्यस्य च विशेषणम् । अहिमरुचिः सूर्यः । हिमधामा चंद्रः । विलंबिघण्टाद्वयेन परिवारितो यो वारणेन्द्रस्तस्य लीलाऽभिन्नां लीलामित्यन्वयः । श्लेषेण लीलापदेन लीलाद्वयोपस्थितेः । (पुष्पिताग्रा छन्दः ।) श्लेषाश्रयणे बीजं दर्शयति—**अत्रान्येति** । अन्यलीलातादात्म्यस्यान्यलीलायामसंभवाच्चेत्यपि बोध्यम् । न चेद्दृशस्थलेऽन्वयानुपपत्त्या लीलापदस्य तत्सदृशलीलायां लक्षणैव स्यादिति वाच्यम् । आरोपेणाप्यन्व-

उन्नतं पदमवाप्य यो लघुर्हेलयैव स पतेदिति ब्रुवन् ।
शैलशेखरगतो दृषत्कणश्चारुमारुतधुतः पतत्यधः ॥४७॥ (—)

अत्र पातक्रियया पतनस्य, लाघवे सति उन्नतपदप्राप्तिरूपस्य च संबन्धः ख्याप्यते ॥

"Whosoever is petty would, on attaining a position of eminence, topple down but easily"–thus announcing does the particle of stone, that has got on the peak of a mountain, drop down when tilted (even) by a gentle breeze. (47)

Here the action of falling is made to communicate the relation between a fall and (its cause) viz. the attainment, when there is pettiness (in the party holding it,) of a position of eminence.

प्रदीप : – च लाघवे सत्युन्नतपदप्राप्तिः पाते हेतुर्यथा दृषत्कणस्येति दृष्टान्तपर्यवसानान्नि-

---

उ० : – योपपत्तेः । वस्तुमाहात्म्यादेव त्वस्याः सादृश्यव्यंजकत्वम् । तदाह— **उपमायां पर्यवसानमिति ।** अत्रोपमानोपमेयधर्मयोरभेदप्रतिपत्तिः । अत इयमेव पदार्थनिदर्शनेत्युच्यतेऽन्यैः । तत्र पदार्थनिदर्शनात्वे कस्यचिदुक्तिं खंडयति–**एवं चेति ।** समस्तत्वेनाक्षेपकस्यापि पदत्वादिदं चिंत्यम् । **दोर्भ्यामिति ।** (राजानं प्रति कस्यचिदुक्तिः । दोर्भ्याम् बाहुभ्याम् ।) तरंगवतीभुजंगः समुद्रः । हरिणांकश्चंद्रः । (गदितुम् वक्तुम् । उद्यमम् उद्योगम् । आदधाति करोति । वसन्ततिलका छन्दः ।) अत्रैकस्य गुणगणनोद्यमस्य बहून्युपमानानीति माला । **स्वस्य** । कार्यस्य । **ख्याप्यते** । परान्प्रति बोध्यते । **उन्नतमिति** । उन्नतं उत्कृष्टं ऊर्ध्वस्थानं च । लघुरल्पमतिः अपकृष्टगुरुत्ववांश्च । पतनं पदभ्रंशः, अधःसंयोगहेतुक्रिया च । (दृषत्कणः पाषाणकणः ।) चारुमारुतो मंदवातः न तु झंझावातः । हेलया पातोपपादकमिदम् । (रथोद्धता छन्दः ।) **तथासंबंधः** । कार्यकारणभावरूपः । इयं संभवद्वस्तुसंबंधनिबंधनेत्युच्यते । एतच्च क्रिययैवेत्येवकारेण दर्शितम् । अन्ये तु 'स्वहेत्वन्वयस्य' इत्युपलक्षणं स्वक्रियया किंचिदर्थबोधनस्य । एवं च 'चूडामणिपदे धत्ते यो

प्रभा : – कारेण शब्दव्यवच्छेदः । ब्रुवन्पततीति पातक्रियाया एव हेतुहेतुमद्भावगमकत्वस्योक्तेः । तच्च दृष्टान्तविधयैवेत्याह—**तथा चेति** । इति निदर्शनाप्रकरणम् ।

(२७) अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ॥ १२ ॥

अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽप्रस्तुतप्रशंसा ।

(२८) कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति ।
तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा ॥ १३ ॥

तदन्यस्य कारणादेः । क्रमेणोदाहरणानि—

---

11. APRASTUTA-PRAŚANSĀ.

What is called 'Aprastuta-praśansā' is literally so (i. e. statement of the thing not under consideration), on the basis of the thing under consideration.

Gloss:—The suggestion of the matter under consideration by stating the matter not under consideration, constitutes 'Aprastuta-praśansā'.

The matter under consideration being (1) the effect, or (2) the cause, or (3) a general fact, or (4) a particular one, a statement of the other (correlate); and the statement (5) of an equal, the matter under consideration being its equal: these would be the five varieties (of it).

Gloss:—Of the other i. e. of the cause etc. Instances in order:—

प्रदीप :– दर्शनात्वमिति । **अप्रस्तुतेति** । अप्रस्तुतस्य प्रशंसा वर्णनम् । सैव अप्रस्तुतप्रशंसैवेत्यर्थः । प्रस्तुताश्रया प्रकृतप्रतिपत्तिहेतुः । एतच्चालंकारत्वबीजमतिप्रसक्तमिति निवारयति । अप्राकरणिकेन प्राकरणिकाक्षेपोऽप्रस्तुतप्रशंसा प्राकरणिकेनाप्राकरणिकाक्षेपः समासोक्तिरिति विवेकः । तां विभजते—**कार्ये इति** । सेत्यनुवर्तते । कार्यादिपञ्चके प्रस्तुते तदन्यस्य कारणादिपञ्चकस्याप्रस्तुतस्य वर्णनमिति सा पञ्चधेत्यर्थः । तत्र कार्ये प्रस्तुते कारणस्य वर्णनं

उ० :–देवं रविमागतम् । सतां कार्याऽऽतिथेयीति बोधयन् गृहमेधिनः ॥' इत्यादावप्येषैवेत्याहुः । **इति निदर्शना** । **अप्रस्तुतस्य** । अप्रकृतस्य । **अप्रस्तुतप्रशंसैवेति** । तत्पदवाच्यैवेत्यर्थः । **एतच्चेति** । अप्रस्तुतप्रशंसनमात्रं समासोक्तावतिप्रसक्तमिति तद्वारणाय प्रस्तुताश्रयेत्युक्तमित्यर्थः । तदेवोपपादयति—**अप्राकरणिकेनेति** । प्रस्तुतव्यंजनं प्रस्तुताप्रस्तुतयोरसंबंधे सति नेति तत्संबंधदर्शनमुखेन

प्रभा :–**अप्रस्तुतप्रशंसेति** । अप्रस्तुतप्रशंसापदवाच्यैवेत्यर्थः । **एतच्चेति** । अन्यवृत्तान्तस्यान्यवृत्तान्ताक्षेपकत्वरूपमित्यर्थः । **अतिप्रसक्तमिति** । समासोक्तावपि सत्त्वादित्यर्थः । आक्षेपेणैवेत्येवकारेणाभिधान्यवच्छेदः । ननु प्रकरणसहायस्य योगस्य

यातः किं न मिलन्ति सुन्दरि पुनश्चिन्ता त्वया मत्कृते
नो कार्या नितरां कृशासि कथयत्येवं सबाष्पे मयि ।
लज्जामन्थरतारकेण निपतत्पीताश्रुणा चक्षुषा
दृष्ट्वा मां हसितेन भाविमरणोत्साहस्तया सूचितः ॥ ४८ ॥

(अमरुशतक. १०.)

अत्र-प्रस्थानात्किमिति निवृत्तोऽसीति कार्ये पृष्टे कारणमभिहितम् ।

राजन्राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते ।
इत्थं नाथ शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवलभावेकैकमाभाषते ॥ ४९ ॥

(Cited in सरस्वतीकण्ठाभरण. ४.)

"Do they never meet again, O lovely lady, who go out? You need have no anxiety on my score! You are considerably reduced!"–with these words, as I, in tears, was addressing her, she glanced at me with an eye, the pupil whereof was dull with bashfulness, and which absorbed the tears as they issued forth, and suggested her eagerness for a death that was impending. (48)

Here, the cause is stated, when the basis of the enquiry–What made you cancel your journey–was the effect.

"O king, the princess does not give me lessons; the queens too keep mum! Feed me, O hunchback! Why are not the prince and (his) companions yet taking their food?"–thus addresses, in the mansion of your foe, O lord, the parrot set free from the cage by the passers-by, each one (i. e. the king etc.) individually, looking at them as drawn in the picture on the deserted terrace. (49)

प्रदीपः–यथा—**याता इति** । अत्र प्रस्थानात्किं निवृत्तोऽसीति कार्ये पृष्टे कारणस्य प्रियाया भाविमरणोत्साहस्य वचनम् । किंशब्दः प्रश्नार्थ इति न कारणप्रस्तावः । कारण-प्रस्तावे कार्यवचनं यथा—**राजन्निति** । अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः प्रपलाय्य गता इति शत्रुपलायने कारणे प्रस्तुते तस्य भाषणविशेषरूपं कार्यमुक्तम् ।

उ०ः–तां विभजते। **कार्येत्यादि। याता इति।** (अमरुशतके 'प्रस्थाना-न्निवृत्तोऽसि किम्' इति मित्रेण पृष्टस्य गमननिवृत्तिहेतुं स्वप्रियावृत्तान्तं कथयतः कस्यचिदुक्तिः । याताः गताः ।) न मिलन्ति नायांति । या कृता सा कृतैव पुनर्न कार्येत्याह–पुनरिति । (मत्कृते मदर्थम् ।) नैव चिंता कृतेत्यपलापे

अत्र प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गताः — इति कारणे प्रस्तुते कार्यमुक्तम्।

एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं वारिणो
यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि।
अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनैः
कुत्रोड्डीय गतो ममेत्यनुदिनं निद्राति नान्तःशुचा ॥५०॥ (भल्लटशतक. ९४.)

Here, while the matter under consideration is the cause; viz. Your enemies took to their heels at once as they got to know that you were about to start on an expedition, the effect is stated.

Is it too much that that blockhead took him at his word (तस्य मुखात्) and thought a drop of water, on the leaf of a lotus-plant, a pearl? Hear something more than this! When, owing to the light movement of the finger-tips, it vanished as it was being gently picked up, he, wondering, "Where might that (pearl) of mine have gone flying?",–has not been having sleep, day after day, with grief at his heart! (50)

प्रदीपः—सामान्ये प्रस्तुते विशेषवचनं यथा—**एतदिति**। अत्र जडानामस्थल एव ममत्वसंभावना भवतीति सामान्ये प्रस्तुते पुरुषविशेषस्य स ममत्वविशेषोऽभिहितः। विशेषे

उ०:—तत्कार्यमाह। नितरामिति। गमनानिच्छाज्ञानेन या लज्जा तया मंथरा निष्क्रिया तारका यत्र। लज्जया कस्याप्यनवलोकनात्। धारारूपमश्रु। पीताश्रुणेति पाठे निपतदेव पीतं संवृतं अश्रु यत्रेत्यर्थः। चक्षुष्येकवचनं लज्जया सम्मुखदर्शनविच्छेदाय। हसितेन। मद्गमनेऽप्येतत्प्राणाः स्थास्यंतीति एवं प्रतारयतीति विस्मयप्रयुक्तेन। (शार्दूलविक्रीडितं छन्दः।) **कार्ये**। निवृत्तिरूपे। अत्रेदमेव प्रस्तुतम्। वर्णनीयत्वात्। अत्राप्रस्तुतेन मरणेनाऽऽक्षिप्ताया गमननिवृत्तेरनुरागोत्कर्षकत्वेनैतस्या अलंकारत्वम्। अत एवोत्तरेण प्रश्नोन्नयनेऽपि नोत्तरालंकारः। तस्य चमत्कारजनकत्वाभावात्। अन्ये द्वयोः समावेशमिच्छंति। **राजन्निति**। (राजानं प्रति कवेरुक्तिः। कुब्जे इति भोजिकायाः सम्बोधनम्।) कुमाराश्च तत्सचिवाश्च तैः। एषां भोजनसमये शुकस्यापि भोजनलाभात्। (शून्यायाम्। निर्जनायाम्। वलभौ उपरिगृहे सौधे। भित्तौ इति वाऽर्थः। शार्दूलविक्रीडितं छन्दः।) **कार्यमुक्तमिति**। तेन च कारणं व्यज्यते इत्यर्थः।

अत्रास्थाने जडानां ममत्वसंभावना भवतीति सामान्ये प्रस्तुते विशेषः कथितः।

सुहृद्वधूबाष्पजलप्रमार्जनं
करोति वैरप्रतियातनेन यः।
स एव पूज्यः स पुमान्स नीतिमान्
सुजीवितं तस्य स भाजनं श्रियः ॥ ५१ ॥ (—)

अत्र 'कृष्णं निहत्य नरकासुरवधूनां यदि दुःखं प्रशमयसि, तत् त्वमेव श्लाघ्यः'—इति विशेषे प्रकृते सामान्यमुदितम्।

Here, when the matter under consideration was the general fact, "The dull-witted cherish an idea of attachment towards things unworthy," the particular one is stated.

Whosoever wipes out the tears of the wives of his allies, by avenging the hostile acts, is alone adorable; he alone is manly; he alone is versed in statecraft; his is an exalted life; he is the sanctum of glory ! (51)

Here, the matter under consideration being a particular fact,– "If you put an end to the grief of the consorts of the demon Naraka by killing Kṛṣṇa, then you alone are praiseworthy,"–the general one is stated.

प्रदीप:–प्रस्तुते सामान्यवचनं यथा—**सुहृदिति**। अत्र श्रीकृष्णं निहत्य नरकासुरवधूनां दुःखं यदि शमयसि तदा त्वमेव श्लाध्य इति विशेषे प्रस्तुते सामान्यमुक्तम्। तुल्ये

उ०:–अत्र व्यंग्याद्वाच्यस्याधिकचमत्कारकारित्वेन न ध्वनित्वव्यपदेशः। किंत्वलंकारव्यवहार एवेति बोध्यम्। एवमग्रेऽपि। **एतत्तस्येति**। (भल्लटकविकृते भल्लटशतके कस्यचिन्मूर्खस्य वृत्तान्तं कुतश्चिदाकर्ण्य विस्मयेन भाषमाणं कंचित्प्रति कस्यचिदुक्तिः।) मुखात्प्रतारकस्य कस्यचिन्मुखादपगतं शृण्वन् स जडः यन्मुक्तामणिरित्यमंस्त एतत्तस्य कियत्। यतोऽस्मादप्यधिकं किंचिज्जडत्वबोधकमस्ति। तदाह—अंगुल्यग्रेति। शनैरादीयमानेऽपि अंगुल्यग्रस्य लघुक्रिययाऽल्पचालनेन प्रविलयिनि अंगुलावेव लग्ने इत्यर्थः। (शृणु अन्यत् इति वा पदच्छेदः। अस्मादपि अन्यत् अधिकं शृणु इत्यर्थः। शार्दूलविक्रीडितं छन्दः।) **ममत्वविशेष इति**। भ्रमविशेष इत्यपि बोध्यम्। **सुहृदिति**। जलेति बाहुल्यसूचकम्। वैरप्रतियातनं कृतपीडेषु पीडादानम्। विष्णुना नरकासुरे हते कश्चन तन्मन्त्री नरकासुरसुहृदं (शाल्वं) प्रतीदमाह। (वंशस्थं वृत्तम्।)

तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः—श्लेषः, समासोक्तिः, सादृश्यमात्रं वा तुल्यात् तुल्यस्य ह्याक्षेपे हेतुः । क्रमेणोदाहरणम्—

पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायाद्यदि प्रणयने नमहानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक्प्रकटिता पुरुषोत्तमेन ॥ ५२ ॥ (भल्लटशतक. ७९.)

An equal being the matter under consideration, when its equal happens to be stated, there are possible three varieties: since, Śleṣa, Samāsokti, or mere similarity could be the basis for one equal suggesting another. Instances, in due order:—

Even if he has to lapse from the male sex (by Śleṣa, from manliness), even if he has to sink into the lower world (by Śleṣa, into poverty), even if in begging he has to become a dwarf (by Śleṣa, mean), he should still uplift the world (by Śleṣa, everyone). This policy (दिक्) has been brought into evidence by the ineffable (by Śleṣa, any), Viṣṇu (by Śleṣa, pre-eminent person). (*52*)

प्रदीपः—प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः । विशेषणविशेष्यवाचिनां सर्वेषामपि श्लिष्टत्वस्य, विशेषणमात्रवाचिनो वा श्लिष्टत्वस्य, श्लेषाभावेऽपि सादृश्यमात्रस्यैव वा प्रकृताक्षेपहेतुत्वात् । आद्यो यथा—**पुंस्त्वादिति** । अत्र पुंस्त्वादित्यादिविशेषणानां पुरुषोत्तमेनेति विशेष्यस्य च श्लेषात्सत्पुरुषप्रतिपत्तिः । न च श्लेष एवायम् ।

उ० :—श्लिष्टत्वस्येति । प्रकाशे श्लेषसमासोक्तिपदे श्लिष्टशब्दश्लिष्टविशेषणपरे । अप्रकृतात् प्रकृताक्षेपे तयोर्भावात् । द्वयोः प्रकृतत्वेऽप्रकृतत्वे वा श्लेषस्य, प्रकृतेऽप्रकृतव्यवहारारोपे च समासोक्तेः स्वीकारादिति भावः । **पुंस्त्वादिति** । (भल्लटकविकृते भल्लटशतके ७९ पद्यमेतत् ।) पुंस्त्वं पौरुषं पुंव्यंजनं च । नारीभूय अमृतहरणात् । अधः संपद्भ्रंशः पातालं च । वराहावतारे पातालं गत्वा पृथिव्युद्धरणात् । प्रणयने याचने । नमहान् महत्त्वरहितोऽल्प इत्यर्थः । बलिप्रार्थने वामनत्वप्राप्त्या जगद्रक्षणात् । विश्वस्योद्धरणं विपद्विनाशनेन रक्षणम् । दिक् प्रकारः । पुरुषोत्तमः पुरुषश्रेष्ठः श्रीकृष्णश्च । (पुरुषश्रेष्ठपक्षे पुंस्त्वात्प्रचलनं पुरुषार्थहानिः । अधोयानं स्वपदभ्रंशः । अमहत्त्वं गौरवहानिः । विश्वं सर्वजनमित्यर्थ इत्युदाहरणचन्द्रिका । वस-

येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते
युज्येत प्रतिकर्तुमेव न पुनस्तस्यैव पादग्रहः ।
क्षीणेनैतदनुष्ठितं यदि ततः किं लज्जसे नो मना-
गस्त्वेवं जडधामता तु भवतो यद्व्योम्नि विस्फूर्जसे ॥ ५३ ॥ (—)

In regard to the Sun, who, as soon as he rose (by Śleṣa, prospered), sent you into obscurity (by Śleṣa, poverty), O Moon, it would have been proper for you to retaliate and not to absorb his rays (by Śleṣa, to cling to the feet). If (you plead) you did this when you had grown lean (by Śleṣa, impoverished), are you not a bit ashamed? Let that pass. That you shine in the sky (by Śleṣa, parade yourself in a high position) betrays your trait of being cool-lustred (by Śleṣa, of being the abode of stupidity)! (53)

प्रदीप :– 'अवयवशक्तेः समुदायशक्तिर्बलीयसी' इति न्यायात्प्राग्विष्णूपस्थितौ सत्पुरुषस्याऽऽक्षेपेणैवोपस्थितेः । श्लेषसत्त्वेऽप्यप्रस्तुतस्य प्रथमोपस्थित्यैवाप्रस्तुतप्रशंसात्वात् । द्वितीयो यथा—**येनेति** । अत्र विशेष्यवाचि चन्द्रपदं न श्लिष्टम् । तृतीयो यथा—

उ० :–न्ततिलका छन्दः।) **सत्पुरुषेति** । अप्रकृतस्य श्रीकृष्णस्य प्रतीतौ जातायां पश्चात् प्रकृतेत्यादिः । **न च श्लेष एवेति** । विशेषणविशेष्ययोरुभयोरपि श्लिष्टत्वादिति भावः । **अवयवशक्तेरिति** । न च प्रकरणसत्त्वे योग एव बलवान् । विश्वोद्धरणरूपपदार्थसामर्थ्यरूपलिंगस्य विष्णावपि सत्त्वात् । एतेन श्लेषमूलो ध्वनिरित्यपास्तम् । ये तु श्लेषस्थले उभयोरप्यर्थयोः क्रमेण शक्त्यैव प्रतिपादनमिच्छंति, तन्मते कथमत्राप्रस्तुतप्रशंसा, अप्रस्तुतेन प्रस्तुतस्यान्व्यंग्यत्वादत आह—**श्लेषसत्त्वेऽपीति** । अप्रस्तुतप्रतीत्युत्तरं तन्मूलिका तन्मूलमूलिका वा यत्र प्रस्तुतावगतिस्तत्राप्रस्तुतप्रशंसेति । एकशब्दवत्त्वसाधर्म्यात्परं 'तुल्ये तुल्यस्य' इत्युदाहरणतेति बोध्यम् । **येनासीति** । क्षीणधनः कश्चित् उपजीवनार्थमपकारिणं सधनमनुसरन् केनचिदुपालभ्यते । येनाभ्युदितेन क्लांतिं गमितोऽसीति संबंधः । उदितेनैव, न त्वपकृतेनापि । क्लांतिस्तेजोहीनता ग्लानिश्च । प्रतिकर्तुं प्रत्यपकर्तुम् । पादः पदं रश्मिश्च । क्षीणेन धनहीनेन कलाहीनेन च । मनागीषदपि किं न लज्जसे इत्यर्थः ।

प्रभा :–प्राबल्यादाक्षेपानुपयोग इत्यत आह–**श्लेषसत्त्वेऽपीति** । तथा चोभयत्राभिधाव्यापारसत्त्वेऽपि रूढ्यर्थस्याप्रस्तुतस्यापि प्रथमावगतिमात्रेणाप्रस्तुतप्रशंसालंकारत्व-

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन दुरर्णवेन ।
क्षारीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च ॥ ५४ ॥ (भट्टेन्दुराज or शुक्रकवि ?)

What possibly could the vile Ocean have gained by appropriating the water from the mouths of rivers all around? It was turned saline, frittered away in submarine fire, and locked up in the abyss of the bowels of the nether world! (54)

प्रदीप :– आदायेति । अत्र श्लेषाभावेऽपि सादृश्यमात्रेणासत्पुरुषाक्षेपः । यथा वा मम—

कौटिल्यं नयने निवारयतरां शीघ्रां गतिं शीलय
व्यक्तार्थां कुरु भारतीं विहसितेऽप्यौद्धत्यमायोजय ।
कुग्रामप्रमदाविलासरसिकः कांतस्त्वयाऽऽसादितो
नायं नन्दिनि नागरीजनसमाचारैः समाकृष्यते ॥

उ० : – अस्त्वेवं लज्जाशून्यत्वमप्यस्तु । जडधामता हिमाधारता मूढता च । विस्फूर्जसे सगर्वमुदेषि । अमायां सूर्येण सह संगत्य ततस्तेजोग्रहणं चंद्रस्येत्यागमसिद्धं पादग्रहणम् । (शार्दूलविक्रीडितं छन्दः ।) अत्र श्लिष्टविशेषणमात्रमाहात्म्येन प्रस्तुतसधननिर्धनवृत्तान्ताक्षेपः । **आदायेति** । (शुकस्य कवेः पद्यमिदमिति शार्ङ्गधरपद्धतौ स्पष्टम् ।) मुखं वदनं नदीसंगमस्थानं च । (अर्जितम् संपादितम् । दुरर्णवेन दुष्टेन समुद्रेण । वडवादहने वडवानले । पातालमेव कुक्षिकुहरं तस्मिन् । वसन्ततिलका छन्दः ।) अत्र ग्रासकल्पं परधनमपहृत्य विफलव्ययकर्तरि दुरीश्वरे प्रकृते तत्सदृशस्याप्रकृतस्यार्णवस्य कथनम् । **कौटिल्यमिति** । (नायिकां प्रति सख्या उक्तिः । 'नन्दिनि' इति नायिकायाः सम्बोधनम् । कौटिल्यम् वक्रताम् । निवारयतराम् अतिशयेन निवारय । शीलय अभ्यस । अभ्यासं विना स्वाभाविकमन्दगमनस्यानिवर्तनात् । भारतीम् वाचम् । विहसिते मधुरस्वरसहितहासे । नागरीजनानां समाचाराः व्यवहाराः नेत्रकौटिल्य–मन्दगमन–अस्पष्टार्थभाषण–अनौद्धत्यरूपाः तैः । न समाकृष्यते न

प्रभा : – मित्यर्थः । वस्तुतस्त्वत्राप्रकृतदृष्टान्तेनाप्रकृतावबोधनं मुख्यं कवेस्तात्पर्यविषयः । श्लेषस्तु तदुपयोगितया गुण इति प्रधानेनैव व्यपदेशो युक्त इति ज्ञेयम् । **कौटिल्य-**

इयं च क्वचित् वाच्ये प्रतीयमानार्थानध्यारोपेणैव भवति । यथा—

अब्धेरम्भःस्थगितभुवनाभोगपातालकुक्षेः
पोतोपाया इह हि बहवो लङ्घनेऽपि क्षमन्ते ।
आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं
को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥ ५५ ॥ (—)

And this (figure), in some cases, becomes plausible without having to super-impose the suggested sense on the expressed one. To illustrate:—

Verily, numerous persons here are able, by means of boats, even to cross beyond the ocean, that has, with water, spanned the expanse of the earth and the bowels of the nether world. If (आहो), by a turn of fate, it somehow becomes empty, who dare even so much as look at the abysmal hollow! (55)

प्रदीपः—इयं च त्रिधा—क्वचिद्वाच्यार्थे प्रतीयमानार्थानध्यारोपमात्रेण । क्वचित्प्रतीयमानार्थाध्यारोपेण । क्वचित्त्वंशभेदेन तदध्यारोपानारोपाभ्याम् । तत्राद्या यथा—**अब्धेरिति** ।

उ०:—वशीक्रियते । शार्दूलविक्रीडितं छन्दः ।) अत्र दुष्प्रभुसत्कविवृत्तान्ताक्षेपः । **अब्धेरिति** । अर्णोऽभः । अंभ इत्येव क्वचित्पाठः । तेन स्थगितस्तिरस्कृतो भुवनस्य भूमेराभोगः विस्तारः पातालकुक्षिस्तन्मध्यं च येन । सर्वपृथिव्या अब्धिप्रतिबंधेनाग्रहणात् तिरस्कारः । जलैर्व्यापनात्पातालकुक्षेरपि सः । पोतोपायाः समुद्रवणिजः । पोतोऽब्धियानम् । क्रमन्ते उत्सहंते । आहो इत्यव्ययं यद्यर्थे । (रिक्तः जलशून्यः ।) अवटः खातः । कुहरं तस्यैव गंभीरभागः । कल्पः समर्थः । (मन्दाक्रान्ता छन्दः ।) अत्रोपमर्दनशीलस्य दुष्प्रभोः पूर्णतैव वरम्, न रिक्तता, अत्यन्तोपमर्दनापत्तेरिति व्यंग्यं गुणीभूतमेव । अत्र समुद्रेऽपीति पाठः । ध्वनित्वं तु नात्र । इहात्यन्ताप्रस्तुतस्य तत्त्वादेव वर्णनमनुचितमिति तत्रापर्यवसानात्तेन स्वस्योचितत्वसिद्धये व्यंग्यार्थस्य बलादाकृष्टत्वेन

प्रभाः—**मिति** । नन्दिनीति सख्या नायिकायाः संबोधनम् । निवारणप्रयत्नातिशयबोधनाय तरामिति । शीलयाभ्यस । अभ्यासं विना नैसर्गिकमन्दगतेर्निवर्तनासंभवात् । स्पष्टार्थां कुरु । वदेत्यर्थः । यत्नातिशयसूचनाय कुर्वित्युक्तम् । अत्र हेतुरुत्तरार्धम् । समाचारा व्यवहाराः । समाकृष्यते वशीक्रियते । अत्रैव दृष्टान्तेन मूर्खप्रभुसंगतः कविरुपदि-

क्वचिदध्यारोपेणैव। यथा—

कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं
वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते।
वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते
न च्छायापि परोपकारकरणे मार्गस्थितस्यापि मे ॥ ५६ ॥

(Cited in ध्वन्यालोक. ३.)

Sometimes it becomes plausible only with super-imposition. To illustrate:—

"Hullo! Who are you?"–"I tell: Know me to be a tree on the burial-ground."–"You seem to speak in despair?"–"Judged aright!"–"What for?"–"Here I tell: To the left of this place, there is the banian tree. To it resort, heart and soul, the travelling folk; while not even my shade, although I stand on the road, can be of use to others!" (56)

प्रदीप:–अत्रापुरुषेऽप्येतेऽर्था अबाधिता एवेति नेह प्रतीयमानार्थाध्यारोपः। द्वितीया यथा—**कस्त्वमिति**। अत्र वाच्यशाखोटके संबोध्यत्वोचारयितृत्वा-

---

उ०:–वाच्यसिध्यंगत्वात्। **कस्त्वमिति**। शाखोटकः भूतावासवृक्षः। कस्त्वं भोः इति वृक्षं प्रति प्रश्नः। कथयामीत्यादि तदुत्तरम्। वैराग्यादिवेति पुनः प्रश्नः। साधु विदितमित्युत्तरम्। पुनः प्रश्नः कस्मादिति। इदं वैराग्यम्। वामेन वामभागेन वामाचारेण युक्तश्च। सर्वात्मना छायारोहणशयनादिना। न च्छायेति। भूतावासत्वेन शाखोटकच्छायानाश्रयणम्। (शार्दूलविक्रीडितं छन्दः।) प्रतीयमानोऽत्र प्रकृतासाधुपुरुषः। न चात्र रूपकम्। प्रकृतेऽप्रकृतारोपे एव तत्स्वीकारात्। एतेन शाखोटकवटपदाभ्यां साध्वसाधुपुरुषौ निगीर्याध्यवसितावित्यतिशयोक्तिरित्यपास्तम्। तत्रारोप्यस्यैव प्राधान्येन संबोध्यत्वाद्यनन्वयतादवस्थ्याच्च। विद्यमानाया अप्यतिशयोक्तेरेतदंगत्वाच्च। अत्र सधनः पूज्योऽधनो निन्द्य इति प्रस्तुतव्यंजनम्। नन्वत्राऽप्रस्तुतव्यवहारेण प्रस्तुतव्यवहारस्य निगरणमेवास्तु। किमनया। तात्पर्यानुपपत्तेरपि लक्षणाबीजत्वात्। बोध्यसंबन्धश्च लक्षणा। वाच्यव्यवहाराभेदेन च प्रस्तुतव्यवहारप्रत्यय इति चेन्न। वाच्यार्थताटस्थ्येनैव व्यंग्यप्रतीतेरत्र सहृदयसम्मतत्वात्। शक्यसंब-

---

प्रभा:–ध्यते। **अत्र पुरुषेऽपीति**। अबाधिताविति शेषः। प्रतीयमानस्य गम्यमानस्यार्थस्य

क्वचिदंशेष्वध्यारोपेण। यथा—

सोऽपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं
दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा।
सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसा-
वन्तःशून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः ॥ ५७ ॥

(भल्लटशतक. १८.)

Sometimes it becomes plausible by super-imposition in parts. To illustrate:—

That unprecedented phenomenon of the inversion of the tongue (by Śleṣa, of perverseness of speech), that unsteadiness of ears (by Śleṣa, the flippancy of ears), that sight which in intoxication has become unmindful of the track, whether his own or that of others, (by Śleṣa, of the distinction between allies and aliens),—or rather, what use dilating upon it? You have forgotten it all, O bee! for, what sort of whim (ग्रह) it is on your part, O brother, that even now you resort to the elephant, when his trunk is hollow inside (by Śleṣa, when his hand is empty inside)? (57)

प्रदीप:—दिकमनुपपन्नमिति प्रतीयमानाध्यारोपः। तृतीया यथा—**सोऽपूर्व इति**। अत्र हस्तिनो रसनाविपर्यासः शून्यकरत्वं मदश्च वाच्यस्य भ्रमरस्य सेवनाभावहेतुत्वेन वाच्यानि, न तद्धेतवः। मदस्तु प्रत्युत सेवने हेतुरिति तदंशे प्रतीयमानपुरुषाध्यारोपापेक्षा।

उ०:—धस्यैव लक्षणात्वाच्च। **सोऽपूर्व इति**। (भल्लटकविकृते भल्लटशतके १८ पद्यमिदम्।) रसनाविपर्ययो वचनाऽस्थैर्यं विपरीताग्रत्वं च। उपकंठं तद्रसनाग्रमिति प्रसिद्धेः। कर्णचापलं परवंचनप्रतार्यत्वं अनवरतकर्णचापलं च। मदो गर्वः दानजलं च। स्वपरदिक् आप्तानाप्तविभागः। एतत्सर्वं किं विस्मृतवान्। यत् यत इत्यर्थः। निश्चितवानसीति युक्तः पाठः। यत्सेव्यते एष इत्यन्वयः। वारणोऽनुगतवारको हस्ती च। अंतःशून्यकरो निर्धनो मांसादिशून्यमध्यशुंडादंडश्च। (शार्दूलविक्रीडितं छन्दः।) **मदश्चेति**। चेन विस्मृतस्वपरदिक्त्वम्। एवं च रसनाविपर्ययादौ वचनास्थैर्यादिकमारोप्य भ्रमरे प्रपन्नसेवकत्वमारोप्य वारणे निवारकप्रभुत्वमारोप्य वाक्यार्थोपपत्तिरिति भावः। **कर्णेति**। एवं चैतदंशे

प्रभा:—पुरुषविशेषस्य नाध्यारोप इत्यर्थः। **वाच्यानीति**। 'नपुंसकमनपुंसकेन' इत्येकशेषः। इत्यप्रस्तुतप्रशंसाप्रकरणम् ॥ ११ ॥ समेनेति समभिव्याहारात्प्रकृतपदेनो-

अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्य असेवने न हेतुः, कर्णचापलं तु हेतुः, मदः प्रत्युत सेवने निमित्तम् ।

(२९) निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥ १४ ॥

Here the inversion of the tongue and the possession of a hollow trunk are no reason why the bee should *not* resort (to the elephant). The unsteadiness of ears, however, does constitute a reason. Intoxication is, on the contrary, a reason why the bee *should* resort (to the elephant).

12. ATIŚAYOKTI.

(1) Where there is the supersession of the matter under consideration on its being eclipsed by the other, (2) where the matter under consideration is stated to be other (than its ordinary prototype), (3) where there is a conceit (as a sequel to an alternative) introduced by a word with the sense of 'if,' (4) and where there occurs perversion of

---

प्रदीपः—कर्णचापलं तु भ्रमरस्यासेवने हेतुरेवेति तदंशे नाध्यारोप इति। **निगीर्येति ।** प्रकृतस्योपमेयस्य समेनोपमानेन निगीर्याध्यवसानं द्रढीयसी बुद्धिः सैकाऽतिशयोक्तिः । यच्च तदेव वस्त्वन्यत्वेन विविक्ताकारवस्त्वन्तरत्वेनाध्यवसीयते सा द्वितीया । यच्च

उ० :—भ्रमरपदं द्विरेफपरमेवेति भावः । ऐकरूप्यायैकवाक्यत्वाय वा तदंशेऽप्यारोप इत्यन्ये । अत्र श्लिष्टशब्दरूपसाधारणधर्मनिबंधनं सादृश्यम् । अत्रेदं बोध्यम् । अप्रस्तुतपदेन मुख्यतात्पर्यविषयीभूतार्थातिरिक्तोऽर्थो ग्राह्यः । एतेन 'किं भृंग सत्यां मालत्यां केतक्या कंटकेद्धया' इत्यत्र प्रियतमेन साकमुद्याने विहरंती काचित् भृंगं प्रत्येवमाहेति प्रस्तुतेन प्रस्तुतांतरद्योतने प्रस्तुतांकुरनामा भिन्नोऽलंकार इत्यपास्तम् । मदुक्तरीत्याऽस्या एव संभवात् । यदा मुख्यतात्पर्यविषयः प्रस्तुतश्च नायिकानायकवृत्तांततदुत्कर्षकतया गुणीभूतव्यंग्यस्तदाऽत्र सादृश्यमूला समासोक्तिरेवेति केचित् । अन्ये तु अप्रस्तुतेन प्रशंसेत्यपि अप्रस्तुतप्रशंसाशब्दार्थः । एवं च वाच्येन व्यक्तेन वा अप्रस्तुतेन वाच्यं व्यक्तं वा प्रस्तुतं यत्र सादृश्याद्यन्यतमप्रकारेण प्रशस्यते उत्कृष्यते इत्यर्थादत्रापीयमेवेत्याहुरिति दिक् । **इत्यप्रस्तुतप्रशंसा । द्रढीयसीति ।** स्वासाधारणधर्मेणानुपादानादना-

---

प्रभा :—पमेयं व्याचष्टे—**उपमेयस्येति ।** उपमानेन निगीर्य पृथगनिर्दिश्याध्यवसानं स्वरूपेण

कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयाऽतिशयोक्तिः सा

उपमानेनान्तर्निगीर्णस्योपमेयस्य यदध्यवसानं सैका । यथा—

कमलमनम्भसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥ ५८ ॥

(Cited in सरस्वतीकण्ठाभरण. ४.)

---

the sequence of the cause and the effect–that should be regarded as 'Atiśayokti.'

That is one variety where there is the supersession of the Upameya which is swallowed up by the Upamāna. To illustrate:—

A lotus growing in a region without water, again two blue lotuses growing on (that) lotus, these on a golden creeper, and that too, tender and lovely – what an array of freaks it is ! (58)

प्रदीप : – चेच्छब्देन यदिशब्देन वा यद्यर्थोक्तौ कल्पनमर्थादसंभविनोऽर्थस्य सा तृतीया । यश्च कारणकार्ययोः प्रसिद्धस्य पौर्वापर्यस्य विपर्ययो वैपरीत्यं कारणस्य शीघ्रकारिताप्रतीतये सा चतुर्थीति चतस्रोऽतिशयोक्तयः । तत्राद्या यथा—**कमलमिति** । अत्र मुखादि

उ० : – हार्याऽभेदधीरित्यर्थः । गौणसाध्यवसानमूलेयम् । **तदेवेति** । एवकारेण धर्मिभेदाभावः सूचितः । **अन्यत्वेनेति** । तच्चान्यादिशब्दैः । **विविक्ताकारम्** । अतिशयिताकारम् । **कमलमिति** । (प्रियां दृष्ट्वा तत्सखीं प्रति नायकस्योक्तिः ।) कमलं कांतावक्त्रम् । अनम्भसि निर्जलदेशे । कुवलये नीलोत्पले नेत्ररूपे । तानि, कुवलये द्वे कमलं च । कनकलतिका कांतातनुः । (सुकुमारा मृद्वी चासौ सुभगा सुंदरी । आर्या छन्दः ।) अत्र प्रकरणलभ्यनायिकावक्त्रादीनां कमलादितादात्म्येनाध्यवसानान्मुखादेरतिशयः । अत्रोपमानतादात्म्यमुपमेये । अत्र केचित् । 'प्रकृतस्य परेण' इत्येव प्रकाशे पाठदर्शनात् तत्र च सामान्यतो निर्देशात् शुद्धसाध्यवसानलक्षणया धर्मधर्मिणोरेकत्वाध्यवसायेऽप्येषा । 'समेन' इति पाठेऽपि तदुपलक्षणम् । यथा 'कर्णलंबितकदंबमंजरीकेशरारुणकपोलमंडलम् । निर्मलं निगमवागगोचरं नीलिमानमवलोकयामहे ॥' इत्यत्र नीलिमपदस्य तदाश्रये शुद्धसाध्यवसानलक्षणया नीलिमाऽभेदप्रतीतिः । एवं

प्रभा : – निश्चयः । स च द्रढीयसीत्यनेनोक्तः । **अर्थादिति** । कल्पनपदसामर्थ्यादित्यर्थः ।

अत्र मुखादि कमलादिरूपतयाऽध्यवसितम् ।

यच्च तदेवान्यत्वेनाध्यवसीयते, सा अपरा यथा—

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ ।
सामा सामण्णपआवइणो रेह च्चिअ ण होई ॥ ५९ ॥ (—)

Here, the face etc. have been superseded by the idea of their being the lotus etc. in form.

And that is another variety where the object itself comes to be determined as being different (from its ordinary prototype).

Of a *different* sort is (her) delicacy; likewise of a *different* sort altogether is the ineffable shade of her body (वर्तन). That beauty (श्यामा), again, could not at all be the make (रेखा) of a lay creator! (59)

प्रदीपः–कमलादित्वेनाध्यवसितम् । यथा वा मम—

कलशे परममहत्त्वं तिमिरस्तोमस्य सोमसहवासः ।
वियति च शैवलवल्ली शिव शिव कुसुमेषुसर्गसौभाग्यम् ॥

द्वितीया यथा—**अण्णमिति** । स्पष्टम् ।

उ०ः–हेतुफलयोरभेदाध्यवसायेऽप्येषा । यथा 'वित्रासनं समरसीमनि शात्रवाणामाजीवनं विबुधपर्षदि कोविदानाम् । संमोहनं सुरतसंसदि कामिनीनां रूपं तदीयमवलोकयतोऽद्भुतं मे ॥' इत्यादौ वित्रासनादिपदस्य तद्धेतौ शुद्धसाध्यवसाना । एतेन 'हेतोर्हेतुमता सार्धमभेदो हेतुरुच्यते' इति हेत्वलंकारोयं पृथगित्यपास्तमित्याहुः । अत्र भेदेऽभेदः । अत्र कमलादिपदानां मुखत्वं लक्ष्यतावच्छेदकम् । तेन रूपेण प्रथमतो बोधे तद्धर्मावच्छिन्ने कमलाभेदप्रत्ययो व्यंजनया । बाधबुद्धेश्च न व्यांजनिके प्रतिबंधकत्वमित्यनाहार्या धीरत्रेति केचित् । आह्लादकत्वेनैव मुखं लक्ष्यं, शेषं प्राग्वत्, इत्यपरे । अत्र पक्षे तद्धर्मावच्छिन्ने कमलाभेदबाधस्यैवाभावादनाहार्यत्वं स्पष्टमेव । अन्ये तु शक्यतावच्छेदकरूपेणैव मुखादिभानं वदंति । तन्मतेऽभेदप्रधानातिशयोक्तिरित्यस्य उपमानतावच्छेदकस्यैव भेदाभावरूपतया निर्वाहः । एतदेव चात्र मते निगरणम्

प्रभाः–तेन आयुरेवेदमित्यादौ नातिशयोक्तिरित्याशयः । **कलश इति** । अत्र कलशत्वेन स्तनयोरध्यवसानं, तिमिरसंघत्वेन केशपाशस्य, आकाशत्वेन मध्यस्य, वल्लीत्वेन रोमावल्या इति ज्ञेयम् । **अण्णं इति** । 'अन्यत्सौकुमार्यमन्यैव कापि वर्तनच्छाया ।

उ० :—यत्त्ववाचकपदेन शक्यतावच्छेदकरूपेणैवास्य बोधनम्। सादृश्यातिशयमहिम्ना च बाधबुद्धेः स्थगनादेतन्मतेऽप्यनाहार्यैव धीरिति दिक्। (**कलशे इति।** कलशे स्तने। तिमिरस्तोमस्य केशसंघातस्य। सोमसहवासः मुखसहवासः। वियति मध्यदेशे। शैवलवल्ली रोमावली। कुसुमेषुः मदनः। गीतिश्छन्दः।) **अण्णमिति।** अन्यत्सौकुमार्यमन्यैव च काऽपि वर्तनच्छाया। श्यामा सामान्यप्रजापते रेखैव च न भवति॥ सुकुमारशब्दस्य लडहादेशः। वर्तते जीवतीति वर्तनं शरीरम्। छाया कांतिः। श्यामा शीतोष्णकाले उष्णशीता। (शीतकाले भवेदुष्णा ग्रीष्मे च सुखशीतला। सर्वावयवशोभाढ्या सा श्यामा परिकीर्तिता॥) सामान्यप्रजापतेः सर्वसाधारणप्रजापतेः। रेखा निर्मितिः। (आर्या जघनविपुला।) अत्रान्यदेव सौकुमार्यमित्युक्त्याऽस्याः सौंदर्ये सौंदर्यांतरादतिशयः प्रतीयते। अत्राभेदे भेदः। अत्रेदं बोध्यम्। 'प्रस्तुतस्य यदन्यत्वम्' इत्यस्य प्रस्तुतस्य अन्यवस्तुत्वेनाध्यवसाय इत्यप्यर्थः। यथा 'तस्याः सखे नियतमिंदुसुधामृणालज्योत्स्नादि कारणमभून्मदनश्च वेधाः' इत्यत्र प्रकृतनायिकासंबंधिकारणस्य निर्मातुश्च विविक्ताकारवस्त्वंतररूपमृणालादित्वेनाध्यवसानम्। 'अस्याः सर्गविधौ' इत्यादौ तु नैवम्। निश्चयाभावात्। यथा वा 'प्रत्यंभो नवपुंडरीकमुकुलश्रेणी प्रतिक्ष्माधरं पूर्णेंदोरुदयः प्रतिक्षितिरुहं मल्लीप्रसूनोत्करः। किंचान्यत्कथयामि वीर जगतीरालिंपति त्वद्यशोविस्तारे प्रतिदेशमेव दिविषत्स्रोतस्वतीनिर्झरः॥' अत्रैकैव कीर्तिस्तत्तत्स्थाने योग्यतावशात्तेन तेन रूपेणाध्यवसिता। यथा वा 'स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालःशत्रुभिरैक्षि सः' इति। अत्र निमित्तभेदात्तत्तद्रूपेणाध्यवसायः। स च कविनिबद्धकर्तृक इत्यन्यत्। 'गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने' इत्यत्रापीयमेव। अत्र श्लेषसंकीर्णेयमित्यन्यत्। एतेनेदृशेषु विषयेषु उल्लेखालंकारोऽयमतिरिक्त इति केषांचिदुक्तिः परास्ता। 'गजत्रातेति वृद्धाभिः श्रीकांत इति यौवतैः। यथास्थितश्च बालाभिर्दृष्टः शौरिः स-

---

प्रभा :—श्यामा सामान्यप्रजापते रेखैव न भवति॥' वर्तनं गमनोपवेशनभाषणादिव्यवहारः। छाया शोभा। सामान्यः सर्वजनसाधारणः। रेखा चित्रलेखनजातिरिव मनुष्यनिर्माणजातिः। मालतीनाम काचिन्नायिका। इत्यतिशयोक्तिप्रकरणम्॥ १२॥

'यद्यर्थस्य' यदिशब्देन चेच्छब्देन वा उक्तौ यत् कल्पनम् (अर्थात् असंभविनोऽर्थस्य), सा तृतीया। यथा—

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥ ६० ॥ (—)

That is the third variety where there is a conceit–of an improbable event, of course,–as a sequel to an alternative introduced by a word meaning "If". To illustrate:—

If on the full-moon night, the form of the moon were to be spotless, *then* would her face suffer the indignity of being (its) like. (60)

प्रदीपः– तृतीया यथा—**राकायामिति**।

उ० :– कौतुकम् ॥' इत्यत्र तु नायमलंकारः। अध्यवसानाभावात्। न चैवं कोऽत्रालंकारः। न कोपि। किंतु तेषां तथाज्ञानानि भगवद्विषयकभावे उद्दीपनानीति बोध्यम्। न ह्युद्दीपनसंसारः सर्वोऽप्यलंकारेष्वेवेति नियमोऽस्ति। एवम् 'अकृशं कुचयोः कृशं वलग्ने' इति पद्येऽपि बोध्यम्। **राकायामिति**। (अमृतांशोः चन्द्रस्य। साम्यं सादृश्यमेव पराभवः। निरुपमस्योपमानसंभव एव पराभवः।) पूर्वार्धे पूर्णेन्दौ कलंकाभावस्यासंबंधे संबंधः कल्पितः। उत्तरार्धे साम्यसंबंधसंभवेऽपि तदसंबंधः पराभवपदेन सूचितः। एवं चासंबंधे संबंध इति द्विविधेयम्। यद्यर्थोक्ताविस्युपलक्षणमुक्तप्रकारद्वयस्य। एवं च 'सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलम्' इत्यत्राप्यसंबंधे संबंधरूपा इयमेव। यत्त्वत्र 'स्पृशंतीवेंदुमंडलम्' इति कृते उत्प्रेक्षाप्रतीतेरिवाभावे गम्योत्प्रेक्षैवोचिता। अन्यथा 'त्वत्कीर्तिर्भ्रमणश्रांता विवेश स्वर्गनिम्नगाम्' इति त्वदुक्तेऽपि गम्योत्प्रेक्षा न स्यात् इति तन्न। नूनं मुखं चंद्र इत्यादौ नूनंपदाभावे गम्योत्प्रेक्षाया आपत्तेः। रूपकस्यानापत्तेश्च। त्वत्कीर्तिरित्यत्र बहुदूरगमने स्वर्गगमने वा स्वर्गंगाप्रवेशतादात्म्योत्प्रेक्षायाः कीर्तौ स्वर्गंगाप्रवेशकर्तृत्वोत्प्रेक्षाया अनंगीकारे भ्रमणश्रांतत्वरूपविशेषणवैयर्थ्यवत्प्रकृते उत्प्रेक्षासाधकाभावाच्च। स्वर्गसंबंधित्वरूपानुपात्तधर्मनिमित्तेयम्। अंत्ये स्वर्गगमनरूपानुपात्तधर्मनिमित्तेति दिक्। राकायामित्युदाहरणे व्यतिरेकालंकारगर्भेयं एवं 'लावण्यद्रविणव्ययो न गणितः क्लेशो महानर्जितः स्वच्छंदं चरतो जनस्य हृदये चिंताज्वरो निर्मितः। एषापि स्वगुणानुरूपरमणाभावा-

कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तौ चतुर्थी । यथा—

हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन ।
चरमं रमणीवल्लभ लोचनविषयं त्वया भजता ॥ ६१ ॥ (कुट्टनीमत. ९६.)

(३०) प्रतिवस्तूपमा तु सा ॥ १५ ॥
सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।

That is the fourth variety where, in order to express the quickness of action of the cause, the effect is stated as (taking place) *prior* to the cause.

To illustrate:—

First it was by Cupid that the heart of Mālatī was possessed; later by you, O beloved of the lovely lady, as you came within her ken! (61)

13. PRATIVASTŪPAMĀ.

While that is 'Prativastūpamā' where one and the same common attribute is present, in two forms, in two sentences.

प्रदीपः–चतुर्थी यथा—**हृदयमिति । प्रतिवस्तूपमेति ।** एकस्य सामान्यस्य साधारणधर्मस्य वाक्यद्वये उपमानोपमेयवाक्ययोर्यत्र द्विरवस्थितिः । अर्थाच्छब्दभेदेन ।

उ०ः–द्राकी हता कोऽर्थश्चेतसि वेधसा विनिहितस्तन्वीमिमां तन्वता' इत्यत्रापि 'एषापि स्वगुणानुरूपरमणाभावात्' इत्यत्रासंबंधे संबंधस्तन्वीलावण्यप्रकर्षप्रतिपादनार्थ उक्तः । **चतुर्थी** । कार्यकारणयोः पौर्वापर्यविपर्ययरूपा । विपर्ययः कार्यस्य प्राथम्येन सहभावेन च । तत्राद्यमाह । **हृदयमिति** । (दामोदरगुप्तकृते कुट्टनीमते ९६ पद्यमिदम् ।) कुसुमान्येव चापो बाणाश्च यस्य तेन मदनेन मालत्याः मालतीनाम्न्या नायिकायाः हृदयम् आदौ पूर्वं अधिष्ठितम् । चरमं पश्चात् । लोचनविषयं नेत्रगोचरताम् । भजता प्राप्नुवता । दृष्टेनेति यावत् । त्वया आक्रांतम् । (आर्या छन्दः ।) अत्र कारणस्य कांताधिष्ठानस्य शीघ्रकारित्वं वक्तुं कार्यस्य कंदर्पाधिष्ठानस्य प्रथममुक्तिः । अंत्यं यथा—'सममेव समाक्रांतं द्वयं द्विरदगामिना । तेन सिंहासनं पित्र्यं मण्डलं च महीभृताम् ॥' इत्यत्र सममेव न तु पूर्वापरभावेनेति प्रतीतेः । सिंहासनाक्रमणं कारणम् । महीभृन्मण्डलाक्रमणं कार्यम् । **इत्यतिशयोक्तिः । एकस्येति** । तेन निदर्शनादृष्टांतयोर्व्युदासः । तत्र बिंब-

---

प्रभाः–**अभिन्नस्येति** । कथितस्येत्यर्थः । प्रतिवस्तु प्रतिवाक्यार्थमुपमा साधारणधर्मो

साधारणो धर्मः उपमेयवाक्ये उपमानवाक्ये च (कथितपदत्वस्य दुष्टतयाऽभिहितत्वात्) शब्दभेदेन यत् उपादीयते, सा (वस्तुनो वाक्यार्थस्योपमानत्वात्) प्रतिवस्तूपमा । यथा—

Gloss:—Where the common property is stated, in the sentence embodying the Upameya and the one embodying the Upamāna, *in diflerent words*, owing to a repeated word having been declared defective, that is 'Prativastūpamā,' so called because therein the Vastu i. e. the sense of one sentence becomes the Upamāna (in relation to that of the other). To illustrate:—

प्रदीपः—अभिन्नस्य पदस्य दुष्टत्वात् । सा प्रतिवस्तूपमा । वस्तुनो वाक्यार्थस्योपमानत्वात् । अत्र 'द्विः' 'द्वये' इत्यनेकोपलक्षके । मालानुरोधात् । सा च द्विधा—अमालारूपा

उ०ः—प्रतिबिंबभावेन निर्देशेनैकत्वविरहात् । **अवस्थितिः** । उपादानम् । प्रतिवस्तु प्रतिवाक्यार्थमुपमा समानधर्मोऽस्यामिति व्युत्पत्तेः । तदाह—**वस्तुन इति** । एवं चोपमेयत्वमपि वाक्यार्थस्येति ध्वनितम् । न च 'दिवि स्थितो भानुरिव भूस्थस्त्वं भ्राजसे नृप' इति वाक्यार्थोपमायामतिव्याप्तिरिति वाच्यम् । वस्तुप्रतिवस्तुभावापन्नसाधारणधर्मकं वाक्यार्थयोर्गम्यमौपम्यमित्यस्य विवक्षितत्वात् । तत्र तु इवशब्देन वाच्यमेवेत्यदोषात् । 'निर्मलं वदनं कांते विमलं कमलं मम' इत्यादावतिप्रसंगवारणाय वाक्यार्थयोरिति । अत एव 'आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतम् । भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहम् ॥' इति स्मरणालंकारेऽपि नातिव्याप्तिः । पद्मसदृशमाननमित्येव तत्र प्रतीतेः । 'आपद्गतः खलु महाशयचक्रवर्ती विस्तारयत्यकृतपूर्वमुदारभावम् । कालागुरुर्दहनमध्यगतः समंताल्लोकोत्तरं परिमलं प्रकटीकरोति ॥' इत्यत्रापद्गतत्वदहनमध्यगतत्वयोर्बिंबप्रतिबिंबभावेऽपि उपमानोपमेयवृत्तिधर्मो वस्तुप्रतिवस्तुभावापन्न एव । दृष्टांते तु साक्षात्तद्वृत्तिधर्मांशेऽपि बिंबप्रतिबिंबभाव इति ततो विशेषः । एकस्यैव धर्मस्य पृथक्शब्दाभ्यामुपादानं वस्तुप्रतिवस्तुभावः । **देवीति** । राजानं प्रति देवीसख्या

प्रभाः—यत्रेति व्युत्पत्तेः । वाक्यद्वय इत्यस्याभिप्रायमाह—**वस्तुन इति** । वाक्यार्थो हि वाक्यार्थं प्रत्येवोपमानम् । अतो वाक्यद्वये समानधर्मोक्तिरित्यर्थः । **अत्रेति** । परिवारः पदमाश्रयो यस्य यथेष्टविनियोगयोग्यत्वस्य तत् । एवं परिभोगो भूषणादिविनियोगस्तद्योग्यमित्यर्थैकत्वमित्यर्थः । अथवानौचित्यस्यैकस्य धर्मस्योपादानादुदाहरणत्वमिति

देवीभावं गमिता परिवारपदं कथं भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम् ॥ ६२ ॥

(Cited in वामन's सूत्रवृत्ति. ४. ३.)

Raised to the status of a queen, how could she hold the position of an attendant? A jewel with the likeness of a deity carved in it does not indeed deserve to be trifled with (परिभोग ?). (62)

प्रदीपः—मालारूपा च । तत्राद्या यथा—**देवीति** । अत्र परिवारपदत्वपरिभोगयोग्यत्वयोरनर्थान्तरत्वादुदाहरणत्वमित्येके । 'कथं भजति' 'न खलु' इत्यनयोरेकार्थतया तथात्वमित्यपरे । अन्त्या यथा **यदीति** । अत्र किमद्भुतमित्यादिभिरद्भुताभावस्य वाक्य-

उ०ः—उक्तिः । देवीभावम् देवीत्वम् । देवी कृताभिषेका । (गमिता प्रापिता ।) परिवारपदमसाधारणकलत्रपदम् । परिभोगो भूषाद्यर्थमुपादानम् । दैवतेति । स्वर्णादिघटितप्रतिमेत्यर्थः । (आर्या छन्दः ।) **इत्येके इति** । अत्रारुचिस्तु तयोर्वाक्यार्थगतसादृश्यरूपत्वाभावः । **एकार्थतयेति** । अनौचित्यरूपैकार्थतयेत्यर्थः । एवं च दैवतरूपांकितरत्नस्य भोगयोग्यत्वं यथानुचितं तथा देव्याः परिवारपदयोग्यत्वमनुचितमित्यौपम्ये पर्यवसानम् । ननु यथा 'पर्वत एतद्वह्निमान् एतद्धूमात्' इत्यत्र महानसस्य दृष्टांतताऽनुचिता । एवम् 'एषा परिवारपदत्वायोग्या देवीत्वात्' इत्यत्र दैवतरूपांकितरत्नस्य दृष्टांतताऽनुचितेति चेन्न । तेन तद्वृत्तिसामान्यधर्मावच्छिन्नयोर्व्याप्तिसिद्धौ 'यत्सामान्ययोर्व्याप्तिरतद्विशेषयोः' इति न्यायेनोक्तविशेषनियमसिद्धेरदोषात् । नियमविशेषरहितकेवलार्थमात्रस्य प्रकृतत्वे तु अप्रकृतवाक्यार्थनिरूपितमौपम्यमात्रं गम्यम् । यथा 'भैरभ्रे भासते चंद्रो भुवि भाति भवान्बुधैः' इति दिक् । वैधर्म्येणाप्येषा दृश्यते । 'वंशभवो गुणवानपि संगविशेषेण पूज्यते पुरुषः । न हि तुंबीफलविकलो वीणादंडः प्रयाति महिमानम् ॥' इत्यादौ । यद्यपि अत्र पुरुषः पूज्यत्व-

प्रभाः—मतान्तरमाह—**कथमिति** । एवं च भिन्नशब्दोपात्तैकधर्मके वाक्यार्थयोरार्थिकमौपम्यं प्रतिवस्तूपमेति लक्षणं बोध्यम् । अत्र च दृष्टान्तालंकारे व्याप्तिवारणायाद्यं विशेषणम् । 'दिवि भाति यथा भानुस्तथा त्वं भ्राजसे भुवि' इति वाच्यवाक्यार्थोपमावारणायार्थमिति । 'आननं मृगशावाक्ष्या वीक्ष्य लोलालकावृतम् । भ्रमद्भ्रमरसंभारं स्मरामि सरसीरुहम् ॥' इत्यादौ स्मरणालंकारवारणाय वाक्यार्थेत्युक्तमिति संक्षेपः ।

यदि दहत्यनलोऽत्र किमद्भुतं यदि च गौरवमद्रिषु किं ततः ।
लवणमम्बु सदैव महोदधेः प्रकृतिरेव सतामविषादिता ॥ ६३ ॥(—)

इत्यादिका मालाप्रतिवस्तूपमा द्रष्टव्या । एवमन्यत्राप्यनुसर्तव्यम् ॥

(३१) दृष्टांतः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ॥ १६ ॥

एतेषां साधारणधर्मादीनाम्, दृष्टोऽन्तः (निश्चयो) यत्र स दृष्टांतः ।

Prativastūpamā in a Mālā-form may be found in instances like:—

If fire burns, what is there to be surprised at ? What of it, if again, hugeness is found in mountains ? The water of the great ocean is ever saline. Freedom from despondency is but the nature of the good. (63)

Similarly could the figure be traced elsewhere also.

14. DṚṢṬĀNTA.

Whereas 'Dṛṣṭānta' consists in the reflection of all of these.

Gloss :—Of these, i. e. of the Common Property etc. Dṛṣṭānta is where the Anta i. e. decision is in sight.

प्रदीप :—चतुष्टयेऽप्युपादानान्मालात्वम् । चतुर्थवाक्यं चोपमेयवाचि । **दृष्टान्त इति** । एतेषामुपमानोपमेयसाधर्म्याणां सर्वेषां प्रतिबिम्बनं दृष्टान्तः । दृष्टोऽन्तो निश्चय उपमानिर्वाहकोऽत्रालंकारे इति व्युत्पत्तेः । स च द्विधा—साधर्म्यवैधर्म्यरूपाभ्याम् । तत्र साधर्म्येण

उ० :—वान्संगविशेषवत्त्वादित्यर्थे तुंबीफलवैकल्यप्रयुक्तमहिमाभावविशिष्टो वीणादंडो न दृष्टांतस्तथाप्यनेन दृष्टांतेन संगविशेषाभावप्रयोज्यपूज्यत्वाभाववानिति तद्व्यतिरेक आक्षिप्यते । तत्र पूर्वोक्तरीत्या एकविशेषेऽपरविशेषस्य दृष्टांतत्वाभावात्तद्वृत्तिसामान्यावच्छिन्नव्यतिरेक आक्षिप्यते । सिद्धे च तस्मिन्नुपात्तविपरीतदृष्टांतेन तादृशसामान्यान्वयनियमसिद्धौ यत्सामान्ययोरिति न्यायात्तादृशविशेषावच्छिन्नकाव्योक्तान्वयनियमसिद्धिः । एवं च तुंबीफलराहित्यवद्वीणादंडसदृशः संगविशेषाभाववान्पुरुष इति बोधः । तुंबीफलवद्वीणादंडसदृशः संगविशेषवान्पुरुष इति च बोधः । **यदीति** । किमद्भुतं स्वाभाविकत्वान्नाद्भुतमित्यर्थः । किं ततः, सदैवेत्यनयोरप्येवम् । सतामविषादिता (विषादराहित्यं) प्रकृतिरेव । स्वभाव एव नाश्चर्यमित्यर्थः । (द्रुतविलंबितं

प्रभा :—इति प्रतिवस्तूपमाप्रकरणम् ॥ १३ ॥ **प्रतिबिम्बनमिति** । बिम्बप्रतिबिम्बभावेनावस्थानमित्यर्थः । प्रतिवस्तूपमातो भेदकमाह—**अत्रेति** । यथा निर्वाति विकस-

त्वयि दृष्ट एव तस्या निर्वाति मनो मनोभवज्वलितम् ।
आलोके हि हिमांशोर्विकसति कुसुमं कुमुद्धत्याः ॥ ६४ ॥

(Cited in रुद्रट's काव्यालंकार. ८.९५.)

एष साधर्म्येण । वैधर्म्येण तु—

तवाहवे साहसकर्मशर्मणः करं कृपाणान्तिकमानिनीषतः ।
भटाः परेषां विशरारुतामगुर्दधत्यवाते स्थिरतां हि पांसवः ॥६५॥(—)

No sooner are you seen, than her mind that is aflame with love cools down. Verily, at the sight of the moon does the flower of the lotus-plant expand. (64)

This, on the basis of similarity. As for the one based on dissimilarity:—

When you, who in battle take delight in acts of daring, intended to bring your hand near the sword, the warriors of the enemies fell into a rout. For, particles of dust remain steady (only) in the absence of wind. (65)

प्रदीपः–यथा—**त्वयीति** । अत्र साधर्म्यस्यापि प्रतिबिम्ब एवेति प्रतिवस्तूपमाभेदः । वैधर्म्येण यथा—**तवेति** । वैधर्म्यविपर्यये साधर्म्यपर्यवसानमिति दृष्टान्तालंकारत्वम् ।

उ०ः–वृत्तम् ।) **इति प्रतिवस्तूपमा । प्रतिबिंबनम्** । बिंबप्रतिबिंबभावः । न त्वेकत्वमित्यर्थः । अत एव प्रतिवस्तूपमातो भेदः । न चात्रोपमा । यथेवादिशब्दाभावात् । नाप्यर्थांतरन्यासः । सामान्यविशेषभावाभावात् । दृष्टांतपदयोगमाह—**दृष्ट इति** । गृहीतप्रामाण्यक इत्यर्थः । **निश्चयः** । दार्ष्टांतिकवाक्यार्थनिश्चयः । दृष्टांतवाक्यार्थे गृहीतसहचारेण दार्ष्टांतिकार्थप्रामाण्यनिश्चयात् । **त्वयीति** । (नायिकासख्याः नायकं प्रत्युक्तिः ।) दृष्ट एव दृष्टमात्रे । तस्याः मालविकायाः (?) । (निर्वाति उच्छ्वसिति । प्रसन्नं भवति । आर्या छन्दः ।) अत्र पद्ये त्वयीत्यत्र सप्तमीनिर्देशाद्धिमांशो-

---

प्रभाः–तीति निर्वाणविकसनयोर्भेदेऽपि सादृश्याद्बिम्बप्रतिबिम्बरूपता । प्रतिवस्तूपमायां तु शुद्धसमानधर्म एवेति भेदः । न च यथा हिमांशोरालोके कुमुदं विकसति तथा त्वयि दृष्टे तस्या मनः प्रसीदतीत्युपमां विना पूर्वोत्तरार्धयोरसंबन्धान्निदर्शनात्वमाशङ्कनीयम् । निदर्शनायां समानधर्मानुपादानेनासंभवमात्रप्रयुक्तत्वादुपमाकल्पनायां इह तु बिम्बप्रतिबिम्बभावापन्नधर्मवशेनेति भेदात् । **विपर्यय इति** । वाते तु नेति

(३२) सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥ १७ ॥

प्राकरणिकाप्राकरणिकानाम् (अर्थात्) उपमानोपमेयानाम्, धर्मः—

15. DĪPAKA.

That is 'Dīpaka' (1) where there is the presentment *once and once only* of the property of what in essence are the matter under consideration and matter not under consideration; (2) and where the same (i. e. presentment once) takes place in the case of a word standing in (identical) case-relation to many actions.

Gloss :—Where there is stated only once the property like action, of the matter on hand and of that not on hand,–i. e. of course, of the

प्रदीपः–सकृदिति । प्रकृताप्रकृतात्मनामर्थादुपमानोपमेयभूतानां धर्मिणां धर्मस्य क्रियादेः सकृद्वृत्तिरेकवारमेवोपादानं यत्तदेकम् । एकस्थस्यैव सर्ववाक्यदीपकत्वेन प्रदीप-

उ०ः–रित्यत्र षष्ठीनिर्देशाच्च मनोभवज्वलितप्रतिनिर्देशस्य रविकिरणज्वलितत्व-स्यानुक्त्या न्यूनत्वाच्चासंष्ठुलमिदं पद्यम् । अत्र नृपचंद्रयोर्नायिकाकुमुद्व-त्योर्मनःकुसुमयोर्मनोभवज्वलितसूर्यकरज्वलितयोः निर्वाणप्रकाशयोश्च बिंब-प्रतिबिंबभावः । कुमुद्वत्याः कुसुमस्य हिमांशुदर्शने विकास इव तस्या मनस-स्त्वद्दर्शने उच्छ्वास इति प्रतीयमानोपमायां मनःकुसुमयोर्बिंबप्रतिबिंबभावापन्नयोः साधारणधर्मत्वम् । अत्र नृपदर्शनमनोभवज्वलितप्रकाशयोः कार्यकारणभाव-निश्चयो 'यद्यदन्वयानुविधायि तत्तज्जन्यम्' इति व्याप्त्या दृष्टांतगृहीत-सहचारनिश्चयप्रयुक्तया भवतीत्यर्थसंगतिः । न च हिमांशोरालोके यथा कुमुद्वतीकुसुमं विकसति तथा त्वयि दृष्टे तस्या मनो हृष्यतीति उपमां विना पूर्वोत्तरार्धयोरसंबंधान्निदर्शनासंकरः । तत्र साधारणधर्मानुपन्यासात् । अत्र वाक्यार्थयोः स्वस्वार्थे निरपेक्षत्वात् । निदर्शनायां तत्रापि सापेक्षत्वाच्च । **वैधर्म्येण** । विपर्यये साधर्म्यपर्यवसायिना । **तवेति** । आहवे युद्धे । साहस-कर्मणः सकाशात् शर्म यस्य । (कृपाणः खड्गः । भटाः योद्धारः ।) विशरारुताम्

प्रभाः–विपर्यय इत्यर्थः । इति दृष्टान्तप्रकरणम् ॥ १४ ॥ **अर्थादिति** । प्रकृताप्रकृतध-र्मैक्ये प्रकृतिसामर्थ्यादित्यर्थः । **प्रदीपसाम्यादिति** । तथा च दीप इवेतीवार्थे

क्रियादिः, एकवारमेव यत् उपादीयते, तत् (एकस्थस्यैव समस्तवाक्यदीपनात्) दीपकम् । यथा—

किवणाणँ धणं णाआणँ फणमणी केसराइँ सीहाणं ।
कुलबालिआणँ त्थणआ कुत्तो छिप्पन्ति अमुआण ॥ ६६ ॥ (—)

कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिर्दीपकम् । यथा—

Upamāna and the Upameya,–therere sults 'Dīpaka,' so called because (the property) standing in one place illuminates the whole sentence.

To illustrate:—

The wealth of misers, the jewel in the hood of cobras, the mane of lions, the breasts of maidens of (good) family,—how can they be touched unless they (i. e. the possessors) are dead ? (66)

That is again Dīpaka when there is presentment once of a word in a particular case-relation to many actions. To illustrate :—

प्रदीपः–साम्यात् । कारकस्य च बह्वीषु क्रियासु सकृद्वृत्तिरेव द्वितीयं दीपकम् । इतिशब्दः प्रकारे । तेनोक्तप्रकारद्वयवद्दीपकमित्यर्थः । आद्यं यथा—**किवणाणमिति** । अत्र छिप्पन्तीति सकृदुपात्तम् । कुलपालिकानां स्तना उपमेयाः । अन्त्यं यथा—**स्विद्यतीति** । अत्र वधूरिति

उ०ः– झटिति नश्वरताम् । (अगुः प्रापुः । अवाते निर्वातदेशे । पांसवः रजांसि । वंशस्थं वृत्तम् ।) **वैधर्म्यविपर्यये** । वाते तु न तथेत्येवंरूपे । अत्राऽऽहवव्रातसंबंधिभंगुरत्वास्थिरत्वयोरुपमानोपमेयभाव इति दिक् । **इति दृष्टांतः । अर्थादिति** । प्रकृताप्रकृतयोः सजातीयधर्मसंबंधस्योपमायां पर्यवसानात् । सा च व्यंग्यैव वाचकविरहात् । व्यंग्याया अप्यस्या वाच्योपकारकत्वात् गुणीभूतव्यंग्यत्वमेव । न तु ध्वनित्वम् । अतोऽत्र नोपमाशंका । **क्रियादेरिति** । आदिना गुणादिसंग्रहः । **एकस्थस्येति** । एकत्र तिष्ठति तस्येत्यर्थः । **साम्यादिति** । दीप इव दीपकम् । संज्ञायां कन् । प्रकृताप्रकृतप्रकाशकत्वेन च सादृश्यम् । **किवणाणमिति** 'कृपणानां धनं नागानां फणमणिः केशराश्च सिंहानाम् । कुलपालिकानां च स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥' (कुलपालिकानाम् कुलवधूनाम् । अमृतानाम् । सचेतनानाम् । एतत् कृप-

---

प्रभाः– कन् । सैवेति व्याचष्टे—**सकृद्वृत्तिरेवेति** । **किवणाणँ इति** । 'कृपणानां धनं नागानां फणामणिः केसराणि सिंहानाम् । कुलपालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥' स्पर्शाक्षमत्वं धर्मः सकृदुपात्त उपमाकल्पकः । चन्द्र इव मुखं मनोज्ञ-

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक्।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥ ६७ ॥ (—)

(३३) मालादीपकमाद्यं चेद्यथोत्तरगुणावहम् ।

पूर्वेण पूर्वेण वस्तुना उत्तरमुत्तरं चेदुपक्रियते, तत् मालादीपकम्। यथा—

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते ।
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ॥

The newly-married bride, while in bed, perspires, whimpers, rolls about, turns away, winks, looks obliquely, exults inwardly and (lastly) wishes to kiss. (67)

16. MĀLĀ-DĪPAKA.

If each preceding thing makes a contribution (गुणावह) to each succeeding one, it is 'Mālā-Dīpaka.'

Gloss:—That is 'Mālā-Dīpaka' if each succeeding thing is served by each preceding one. To illustrate:—

When you arriving on the arena of the battle strung the bow, O king, hear what different things were at once got by what others:

प्रदीपः – कारकस्य सकृद्वृत्तिः । **मालेति** । गुणावहमुपकारकम् । यथा—**संग्रामेति** ।

उ०ः – णानामित्यादिभिरन्वेति। गाथा मुखविपुला।) **उपमेया इति**। प्रकृतत्वात्। अन्येषां तूपमानत्वम्। अत्र तत्तदुपमानैः प्रत्येकमौपम्यप्रतीतिः। अत्र क्रिया साधारणधर्मः। गुणो यथा। 'श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपंक्तिभिः। भुवश्च सुकुमाराभिर्नवशाद्वलपंक्तिभिः ॥' इति। यत्तु 'वर्षत्यंबुदमालेयं वर्षत्येषा च शर्वरी। उन्मीलन्ति कदंबानि स्फुटन्ति कुटजोद्गमाः ॥ माद्यंति चातकास्तृप्ता माद्यन्ति च शिखावलाः।' इत्यादावावृत्तिदीपकम्। क्वचिच्छब्दस्यार्थस्योभयोर्वा आवृत्तेरिति। तन्न। धर्मस्य सकृदुपादानाभावात्। प्रकृताप्रकृतोभयावृत्तित्वाच्च। एषु च वा-

---

प्रभाः – मित्यादावुपमावारणायोपमाकल्पकत्वं धर्मविशेषणं बोध्यम् । **स्विद्यतीति** । स्वेदः सात्विको भावः। कू (क) णत्यालिङ्गनोद्यते प्रिये मृदुशब्दविशेषं करोति। वेल्लत्यङ्गं संकोचयति। विवलति परिवृत्य शेते। निमिषति मृषा नेत्रे मुद्रयति। इच्छति न तु करोतीत्यर्थः। अत्र यद्यपि सर्वक्रियाणां प्रकृतत्वमेव न वा तासामुपमानोपमेयत्वावगमः। तदभ्युपगमे वा तुल्ययोगितैवोचिता न तु दीपकं तथाप्येतद्भिन्नमेव पूर्वस्मादीपकाद्विवक्षितम् । उभयानुगतमन्यतरत्वं चैकं लक्षणमिति तात्पर्यम् । केचित्तु—

उ०ः–चकलुसोपमैवेत्याहुः प्रकाशानुसारिणः। **अंत्यम्**। बह्वीषु क्रियासु कारकस्य सकृद्वृत्तिरित्येतत्। 'कारकस्य क्रियासु' इत्युक्त्या क्रिया तिङंतादिवाच्याऽसत्त्वभूता गृह्यते। असत्त्वभूतायाश्चोपमानत्वाभावः सन्सूत्रे भाष्ये 'न वै तिङन्तेनोपमानमस्ति' इति ग्रंथेन प्रतिपादित इति। अत्रोपमानोपमेयभावाप्रतीतिः, पूर्वस्मिंस्तु तत्प्रतीतिरिति भेदः। एककर्तृकत्वादिधर्मकृतसादृश्यस्याचमत्कारित्वाच्च। इदं च प्रकृतानामेव अप्रकृतानामेव प्रकृताप्रकृतानां च। अनेकचमत्कारिक्रियावैशिष्ट्येन वर्ण्यकारकोत्कर्षकतया चमत्कारित्वेनास्यालंकारत्वम्। एतेन दीपके सर्वत्रौपम्यस्य गम्यत्वादस्य दीपकत्वं चिंत्यम्। स्विद्यतीत्युदाहरणे क्रियाणां सादृश्यावगतावपि सर्वासां प्रकृतत्वात्कारकतुल्ययोगितात्वमेवोचितमिति च परास्तम्। तुल्ययोगिता त्वौपम्यगर्भैवेति वक्ष्यते। **स्विद्यतीति**। स्वेदः सात्विको भावः। दयिते परिरम्भोद्यते कूणति मृदुशब्दं करोति। ततोऽप्यनिवर्तिनि वेल्लति संकोचमालंबते। विचलति परिवृत्त्य शेते। निमिषति मृषा नेत्रे मुद्रयति। अंतः नवोढात्वेन बहिरप्रकाशात्। चुंबितुमिच्छति न तु चुंबति। (गीतिश्छन्दः।) **अत्र वधूरिति**। शयने इत्यपि बोध्यम्। **यथोत्तरेति**। अस्य वीप्सितत्वादाद्यमित्यत्रापि वीप्सा बोध्या। **संग्रामेति**। खण्डप्रशस्तौ पद्यमिदम्। संग्रामरूपांगणगतेन। निर्भयसंचरणीयत्वेनांगणता। चापे समारोपिते ज्याविशिष्टे कृते इत्यर्थः। (शार्दूलविक्रीडितं छन्दः)। अभवन्मतयोगदोषपरिहाराय संप्राप्ते इत्यादि पाठांतरकल्पनम्। आसादितमिति नपुंसकानपुंसकयोरेकशेषः एकवत्त्वं च। अत्र कोदंडेनारिशिरः प्रापयता शरा उपक्रियंते, शरैरपि

प्रभाः–प्रकृताप्रकृतानां सकृद्धर्मोक्तिर्दीपकमित्येव लक्षणम्। क्रियाणां प्रकृताप्रकृतानां यत्रैककारकान्वयस्तत्राप्येतल्लक्षणान्तर्गतत्वमेव। यथा—'वसु दातुं यशो धातुं विधातुमरिमर्दनम्। त्रातुं च मादृशान् राजन्नतीव निपुणो भवान्॥' अत्र वसुदानस्वत्राणरूपयोः प्रकृतयोः क्रिययोररिमर्दनयशआधानयोश्चाप्रकृतयोरेकस्य नृपरूपकारकस्यान्वय इति पूर्वलक्षणाक्रान्तत्वेन दीपकान्तरमङ्गीकर्तव्यम्। स्विद्यतीत्यादौ सर्वक्रियाणां प्रकृतत्वे तु तुल्ययोगितेत्याहुः। **सङ्ग्रामेति**। संप्राप्त इत्यादिपाठान्तरकल्पनं सप्तमोक्तदोषवारणाय। अत्र कोदण्डस्य प्रक्षेपणाख्यशरोपकारहेतुत्वं शराणां चारिशिरसो भूमण्डलप्राप्तिरूपोपकारहेतुत्वं शिरसश्चोत्तमस्वामिलाभरूपभूमण्डलोपकारहेतुत्वं भूमण्डलेन कीर्तिमासादयता नृपोपकारकरणं नृपेण च कीर्तेर्लो-

कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥ ६८॥ (—)
(Cited in सरस्वतीकण्ठाभरण. १.)

(३४) नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ॥ १८ ॥

नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा । क्रमेणोदाहरणम्—

by the bow, the arrows; by the arrows, the head of the foe; by it (i. e. head) too, the globe of earth; by that (i. e. globe of earth), yourself; by yourself again, incomparable fame; and by fame, the three worlds. (68)

17. TULYAYOGITĀ.

While the property, (stated) once, of specific things, is what constitutes 'Tulyayogitā.'

Gloss:—Specific i. e. only such as are under consideration, or only such as are not so. Instances in order:—

प्रदीपः – स्पष्टम् । मालोपमादीनां बहूपमानसंबन्धान्नापरो विशेष इति न ते लक्षिताः । इदं तु पृथग्लक्षितम् । उत्तरोत्तरमुपकार्योपकारकतया परस्परसंसर्गेण मालाभावमापन्नानां सकृद्धर्मनिर्देशरूपत्वेनाधिकविशेषानुप्रवेशादिति । **नियतानामिति** । नियतानां प्राकरणिकानामेव अप्राकरणिकानामेव वा । धर्म इत्यनन्तरं 'यदुपादीयते' इति शेषः । सकृत्पदो-

उ०ः – भूमंडलं प्रापयद्भिररिशिरः, शिरसाऽपि सन्नायकं त्वां लंभयता भूमंडलं, भूमंडलेन च कीर्तिमासादयता नृपतिः, नृपेणाऽपि त्रैलोक्यं व्यापयता कीर्तिः, इति पूर्वपूर्वेभ्यः परस्य परस्योपकारः । एकस्या आसादनक्रियायाः संबंधाद्दीपकता । अत्र शरादीनामरिशिरःप्रभृतीनां च सादृश्यमपि व्यंग्यम् । **इति दीपकम् । प्राकरणिकानामेवेति** । एवं च प्राकरणिकाप्राकरणिकोभयावृत्तित्वे सति औपम्याक्षेपकत्वं लक्षणम् । सत्यंतेन दीपकव्युदासः । न चाक्षेपलभ्यसाम्ये व्यतिरेकभेदेऽतिव्याप्तिः । तत्रोपमेयाधिक्यकृत एव चमत्कारः न तु साम्यप्रतीतिकृत इति विशेषात् । उपमेयानाधिक्येन विशेषणान्न दोष इत्यन्ये । औपम्यं चात्र गम्यम् । तत्प्रयोजकसमानधर्मोपादानात् । वाचकाभावाच्च । धर्मवाचकपदैस्त-

प्रभाः – कत्रयव्यापनाख्योपकारजन(न) मित्यवगन्तव्यम् । इति दीपकप्रकरणम् ॥ १५ ॥ **नियतानामिति** । प्राकरणिकाप्राकरणिकोभयावृत्तिधर्मस्य सकृदनेकान्वयित्वं तुल्ययोगिनेत्यर्थः । प्रतिस्वं प्रत्येकम् । यथा मुखं विकसितस्मितमित्यादौ ।

पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥ ६९ ॥ (—)
कुमुदकमलनीलनीरजालिर्ललितविलासजुषोर्दृशोः पुरः का ।
अमृतममृतरश्मिरम्बुजन्म प्रतिहतमेकपदे तवाननस्य ॥ ७० ॥ (—)

(३८) उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।

अन्यस्योपमेयस्य व्यतिरेक आधिक्यम् ।

Your pale, lean face, your passionate heart, and your sluggish body, very much betray, O friend, the chronic (क्षेत्रिय) disease inside the heart. (69).

Of what worth is a row of lotuses, white, red and blue, *vis-a-vis* your eyes possessing graceful charms? The nectar, the moon, and the lotus, *vis-a-vis* your face, get beaten at once. (70)

18. VYATIREKA.

Where there is the transcendence above the Upamāna of the other, the figure too is named as such ('Vyatireka' i. e. transcendence).

Gloss:—Of the other, i. e. of the Upameya. Vyatireka i. e. transcendence.

प्रदीपः–पादानाद्यत्र प्रतिस्वं भिन्ना धर्मा एकस्यैव वा सर्वत्रोपादानं तत्र नातिप्रसङ्गः । तत्र प्राकरणिकानामेव यथा—**पांडुविति ।** अत्र प्रकृतानां विरहिणीवदनादीनामेव धर्मत्वेनाऽऽवेदनाख्यो धर्म उपात्तः । न तूपमानरोगधर्मतया । अप्राकरणिकानामेव यथा—**कुमुदेति ।** अत्र कामिन्या वर्णनीयत्वादप्राकरणिकानां कुमुदादीनामेव धर्मतया पूर्वार्धे कापदव्यङ्ग्योऽधिक्षेप उत्तरार्धे प्रतिहतत्वं चोपात्तम् । **उपमानादिति ।** अन्यस्योप-

---

उ०:–त्तद्रूपेण धर्मभानेऽपि सादृश्यत्वरूपेणाभानात् । **पांडुविति ।** क्षामं कृशं सरसं सानुरागमन्नरससहितं च । अत एव अलसं बाह्यक्रियायामक्षमम् । नितान्तमित्यतिशयार्थकं सर्वान्वयि । क्षेत्रियो देहान्तरे चिकित्स्यो देहपर्यन्तस्थायीति फलति । (आर्या छन्दः ।) **प्रकृतानामिति ।** विरहानुभावत्वेनेत्यर्थः । **वदनादीनाम् ।** पांडुत्वादिविशिष्टानाम् । **न तूपमानरोगेति ।** उपमानरोगज-

---

प्रभा:–**एकस्यैव वेति ।** यथा—'दधि मधुरं मधु मधुरं द्राक्षा मधुरा सुधापि मधुरैव । तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम् ॥' इत्यादावित्यर्थः । रसः शृङ्गारोऽन्नरसश्च । क्षेत्रियोऽचिकित्स्यो राजयक्ष्माख्यः । **न तूपमानेति ।** विप्रलम्भेऽपि (उप)-मानभूतरोगधर्मतयेत्यर्थः । इति तुल्ययोगिताप्रकरणम् ॥ १६ ॥

क्षीणः क्षीणोऽपि शशी भूयो भूयो विवर्धते नित्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥ ७१ ॥

(Cited in रुद्रट's काव्यालंकार. ७.९०.)

After it has waned and waned, the moon still waxes time and again; while youth, once past, never reverts. Have done with it (i. e. pride). Be reconciled, O beautiful lady ! (71)

प्रदीपः–मेयस्य । व्यतिरेको विशेषेणातिरेक आधिक्यम् । स एव । व्यतिरेक एव । कश्चित्तु—"यत्रोपमेयादुपमानस्य उपमानादुपमेयस्य वा आधिक्यं स व्यतिरेक इति

उ०ः–पांडुतादीत्यर्थः । 'अत्रावेदनक्रियया विरहरोगयोरौपम्यप्रतीतिः । वर्ण्यनायिकासंबंधित्वेन विरहरोगयोः प्राकरणिकत्वम् । अचिकित्स्यत्वरूपं क्षेत्रियत्वं साधारणो धर्मः' इत्यन्ये । अत्र क्रियारूपधर्मैक्यम् । **कुमुदेति** । (कान्तां प्रति कस्यचिदुक्तिः ।) प्रसादे कुमुदसाम्यम् । माने (रक्त) कमलसाम्यम् । प्रकृतदशायां नीलनीरजसाम्यम् । ललितो मनोहरः । विलासः कटाक्षः । प्रतिहतं निर्जितम् । एकपदे युगपत् । आननस्येत्यस्य 'अग्रे' इति शेषः । (पुष्पिताग्रा छन्दः ।) अधिक्षिप्तत्वेन प्रतिहतत्वेन च तेषां परस्परं साम्यप्रतीतिः । अत्र साम्यप्रतीतावपि तावन्मात्रकृतो न चमत्कारः । किं त्वेकधर्मान्वयकृतोपि । अतो गम्योपमया न निर्वाहः । 'जगाल मानो हृदयादमुष्या विलोचनाभ्यामिव वारिधाराः' इत्यत्र न तुल्ययोगिता । सादृश्यप्रतीत्यैव चमत्कारात् । 'चंद्र इव सुंदरं मुखम्' इत्यत्र च न दीपकम् । एवं 'प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया' इत्यत्रापीयमेव । प्रदीयते पराभूतिरिति शब्दस्य श्लेषमूलकाभेदाध्यवसायेनाभिन्नीकृततदर्थस्य वा धर्मस्यैक्यात् । तादृशधर्मेण तयोः साम्यप्रतीतौ हिताहितविषयतुल्यकर्तृत्वरूपं व्यंग्यं वाच्यराजोत्कर्षकतया गुणीभूतं प्रतीयते इत्यन्यत् । नैतावताऽस्य तुल्ययोगितांतरत्वं वक्तुं युक्तम् । 'लोकपालो यमः पाशी श्रीदः शक्रो भवानपि' इत्यत्र तु उक्तं दीपकमेवेति दिक् । **इति तुल्ययोगिता । आधिक्यम्** । गुणविशेषकृत उत्कर्षः । **स एवेति** । योगेनैव लक्षणलाभात् स व्यतिरेकनामालंकार

प्रभाः–**विशेषेणेति** । तेन मुखमिव चन्द्र इति प्रतीपे उपमानीकरणप्रयुक्तस्याधिक्यस्य गम्यत्वे विशेषतस्तद्बोधकशब्दाभावान्नातिव्याप्तिः । **स एवेति** । न तूपमेयादुपमा-

इत्यादावुपमानस्योपमेयादाधिक्यमिति यत् केनचिदुक्तम्, तदयुक्तम्। अत्र यौवनगताऽस्थैर्याधिक्यं हि विवक्षितम्।

(३६) हेत्वोरुक्तावनुक्तीनां त्रये, साम्ये निवेदिते ॥ १९ ॥
शब्दार्थाभ्यामथाक्षिप्ते, श्लिष्टे तद्वत् त्रिरष्ट तत्।

In cases like this, some have asserted that there is the transcendence of the Upamāna above the Upameya. That is improper. Since here what is intended to be driven at is the transcendence in the matter of the instability of youth.

It (i. e. the figure) is possible in varieties numbering thrice eight (i. e. 24) : 1. when the two reasons are stated; 2–4. in three cases of non-statement;–the similarity being conveyed (I) by Expression or (II) by Implication, or (III) being suggested; ($4 \times 3 = 12$); likewise when it (i. e. similarity is based on Paronomasia ($4 \times 3 = 12$). ($12 + 12 = 24$).

प्रदीपः – लक्षणम्। कथमन्यथा—**क्षीण** इत्यादिसंग्रहः। अत्र ह्युपमानभूतस्य शशिन उत्कर्षः। क्षैण्येऽपि पुनर्वृद्धेः” इत्याह। तन्न युक्तम्। अस्थैर्ये हि तस्योपमानता। तदाधिक्यं चोपमेये यौवन एवात्र विवक्षितम्। तस्मादुपमानस्योत्कर्षे व्यतिरेक इति रिक्तं वचः। एवं विभ-

---

उ०ः – इत्यर्थः। उपमानादित्युक्तेः ‘कुमुदादतिरिच्यते मुखम्’ इत्यादौ नायमलंकारः। (**क्षीण इति**। विरम। ‘अभिमानात्’ इति शेषः। अभिमानं त्यजेत्यर्थः। प्रसीद। प्रसन्ना भव। अनिवर्ति न प्रत्यावर्तते। यातम् गतम्। आर्या छन्दः।) **पुनर्वृद्धेरिति**। यौवनं तु न तथेति उपमेयस्य न्यूनतेत्यर्थः। **अस्थैर्ये हीति**। अयं भावः। न ह्यत्र चंद्रयौवनयोः सादृश्यम्। किं तु तत्क्षययोः। तत्र चंद्रक्षयस्य वृद्धिबाध्यतया न्यूनत्वम्। यौवनक्षयस्य त्वबाध्यतयाधिक्यम्। मानप्रसादनानुगुणतया प्रकृतवाक्यार्थानुगुणत्वात् इति। अस्थैर्यं क्षयः। एवं ह्यत्र वाक्यार्थः—चंद्रो हि पुनःपुनरागमनेन लोके सुलभोऽतो न तादृशमाहात्म्यशाली। इदं पुनर्यौवनमपुनरागमेनातिदुर्लभमिति मानादिभिरंतरायैर्विदग्धया भवत्या मुधा गमयितुं न सांप्रतमिति। अन्यथा ‘किमिति अस्य कदर्यस्य यौवनस्य कृते मया मानाद्विरंस्यते यातु नाम यौवनम्’ इति

प्रभाः–नस्य व्यतिरेकोऽपीत्यर्थः। एतदेव दूषयितुमुपन्यस्यति—**कश्चित्त्विति**। **अत्रानुपादानेति**। श्लेषस्थलेऽनुपादानत्रयमित्यर्थः। साम्यस्य श्रौतत्वे आर्थत्वे आक्षि-

व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तम्, उपमानगतमपकर्षकारणम्, तयोर्द्वयोरुक्तिः, एकतरस्य द्वयोर्वा अनुक्तिरित्यनुक्तित्रयम्, एतद्भेदचतुष्टयमुपमानोपमेयभावे शब्देन प्रतिपादिते; आर्थेन च क्रमेणोक्ताश्चत्वार एव भेदाः, आक्षिप्ते चौपम्ये तावन्त एव; एवं द्वादश। एते श्लेषेऽपि भवन्तीति चतुर्विंशतिभेदाः। क्रमेणोदाहरणम्—

Gloss:—The reason of transcendence, i. e. (a) the cause of the superiority of the Upameya; & (b) the cause of the inferiority of the Upamāna: (1) the statement of them both; Three cases of non-statement viz. (1–2) non-statement of either or (3) of both. These four varieties when the Upamāna–Upameya relation is conveyed by Expression. (5–8) By the process of Implication of similarity the same four varieties afore–mentioned. (9–12) And when the similarity, is suggested as many varieties. Thus twelve. (12–24) These become possible with Paronomasia also. Hence *twenty-four* varieties in all Instances in order:—

प्रदीपः–जते–**हेत्वोरिति**। व्यतिरेकस्य द्वौ हेतू। उपमेयगतमुत्कर्षनिमित्तमुपमानगतमपकर्षनिमित्तं च; तयोर्द्वयोरप्युपादानमित्येकः प्रकारः। अनुपादाने तु त्रयो भेदाः। प्रथमस्यैव द्वितीयस्यैव उभयोरपि वा हेत्वोरनुपादानात्। तदेवं चत्वारो भेदाः। ते च प्रत्येकं त्रिधा। साधर्म्यस्य क्वचिदिवादिना शब्दशक्तेः प्रतिपादनात्। क्वचित्तुल्यादिशब्देनार्थशक्त्या। क्वचिदुभयाभावेऽप्याक्षेपेणेति द्वादश भेदाः। ते च प्रत्येकमश्लिष्टे श्लिष्टे च शब्दे इति चतुर्विंशतिभेदः स इत्यर्थः। तत्राश्लिष्टभेदेषु हेत्वोरुक्तौ शाब्दे साम्ये यथा—

उ०:–प्रतिकूलेनार्थेन प्रकृतार्थस्यापुष्टतापत्तेः। प्रियहितकारिण्या दूत्या हीदं वचनम्। एतेन 'रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायांति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि। कांतापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः॥' इत्यत्रोपमेयन्यूनतापर्यवसायी व्यतिरेक इत्यपास्तम्। सशोकत्वेन तद्गम्यचेतनत्वसहृदयत्वादिभिर्गुणाधिक्यस्यैव सत्त्वात्। न च न्यूनत्वपदेनापकर्षो विवक्षितः। स च शोकस्य स्वरूपेणापकृष्टत्वादस्त्येव। वाच्यार्थबोधकालिकोत्कर्षापकर्षयोरेव तदलंकाररूपत्वादिति वाच्यम्। प्रकृतवाक्यार्थानुगुणधर्मवत्त्वस्यैवात्राधिक्यपदार्थत्वात्। 'परमचेतनत्वमेव सम्यक् न पुनः प्रियावियोगादिजन्यशोकास्पदं चैतन्यादि' इति पर्यवसानेन तस्य प्रकृतवाक्यार्थभूतविरहानुगुणत्वात्। अत एव प्रियावियोगा-

असिमात्रसहायस्य प्रभूतारिपराभवे ।
अन्यतुच्छजनस्येव न स्मयोऽस्य महाधृतेः ॥ ७२ ॥ (—)

अत्रैव तुच्छेति महाधृतेरित्यनयोः पर्यायेण युगपद्वाऽनुपादानेऽन्यत् भेदत्रयम् । एवमन्येष्वपि द्रष्टव्यम् । अत्र इवशब्दस्य सद्भावाच्छाब्दमौपम्यम् ।

असिमात्रसहायोऽपि प्रभूतारिपराभवे ।
नैवान्यतुच्छजनवत्सगर्वोऽयं महाधृतिः ॥ ७३ ॥ (—)

In the event of the defeat of a host of enemies, hauteur does not affect this (king) of supreme courage, whose sole helper is his sword, as it does other lay persons. (72)

In this very instance, three more varieties become possible, according as 'Tuccha' and 'Mahā–dhṛteh' are dropped, each one in turn or both simultaneously. The same holds good in other instances (i. e. of implied or suggested or paronomastic similarity) also. Here the similarity is expressed owing to the presence of the word 'Iva.'

Though, the sword be his sole helper, he, in the event of the defeat of a host of enemies is not affected by pride like other lay men, possessed of great courage as he is. (73)

प्रदीप : – असीति । अत्रोपमाने तुच्छत्वमुपमेये महाधृतित्वं च हेतू । इवशब्दसत्त्वाच्च शाब्दमौपम्यम् । अत्रैव तुच्छत्वमात्रस्य महाधृतित्वमात्रस्य वा द्वयोरपि वा क्रमेणानुपादाने हेत्वनुपादानभेदत्रयेऽपि शाब्दौपम्यभेदत्रयं द्रष्टव्यम् । हेतुद्वयोपादान एवाऽऽर्थसाम्ये यथा— **असिमात्रसहायोऽपीति ।**

उ० : – यद्यपि तुल्यमित्यर्थकमावयोः सर्वं तुल्यमिति वाक्यं चरितार्थम् । एतेनोपमालंकारदूरीकरणमेवात्र चमत्कारि । रसाद्यनुकूलतया कुतश्चिदंगात् भूषणापसरणमिव रसानुसारेण क्वचिदलंकारवियोगोऽपि शोभावह इति ध्वनिकृदुक्तमपास्तम् । एवं 'हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूत्यपथः सितीकृतः' (नैषधकाव्ये नवमसर्गे १२३ पद्यम्) इत्यत्र नलमहीपतेः स्वनिंदया लब्धनिर्वेदातिशयरूपप्रकृतवाक्यार्थे दूत्यगतन्यूनताया एवानुगुणत्वेनाधिक्यरूपत्वात् । एवं 'न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः । तथापि जितमेवासीदमुना भुवनत्रयम् ॥' इत्यादावपि कठोरतीक्ष्णास्त्ररहितस्य भुवनत्रयजये

अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम् ।

इयं सुनयना दासीकृततामरसश्रिया ।
आननेनाकलङ्केन जयतीन्दुं कलङ्किनम् ॥ ७४ ॥ (—)

Here the affix 'Vat' is used in the sense of 'Tulya'. Hence the similarity is implied.

This lady possessing lovely eyes excels, with her spotless face that has vanquished (lit. enslaved) the beauty of the red lotus, the spotted moon. (74)

प्रदीपः—अत्र तुल्यार्थे वतिरित्यार्थमौपम्यम् । अत्र पूर्ववदनुपादानभेदत्रयं द्रष्टव्यम् । हेत्वोरुक्तावेवाक्षिप्ते साम्ये यथा—**इयमिति** । अत्राकलङ्कित्वकलङ्कित्वे हेतू समुपात्तौ । इवादीनां तुल्यादीनां वाऽभावादाक्षिप्तमौपम्यम् । अत्रैव हेत्वनुपादाने भेदत्रयं पूर्ववत् द्रष्टव्यम् । न चाक्षिप्तभेद उपमायां शङ्कनीयः । जयत्यादिशब्दस्यावश्यकतया व्यतिरेकेण

उ० :—उत्कर्षातिशयप्राप्त्याऽभावरूपविशेषणस्याप्याधिक्यमात्रसंपादकत्वान्न दोष इत्यलम् । **असीति** । (असिरेव सहायो यस्य । प्रभूताः येऽरयः तेषां पराभवे सति । स्मयः गर्वः ।) मात्रेण सहायांतरव्यवच्छेदः । स्मयाभावोऽत्रोत्कर्षपर्यवसायितयाधिक्यरूपः । अत्र प्रतीयमानमपि सादृश्यं गुणांतरकृतस्वनिषेधोत्थापितेनोत्कर्षेण तिरस्कृतमिति तत्तिरस्कारकतयाऽस्य चमत्कारातिशयजनकत्वम् । तिरस्कार्यतयौपम्यगर्भत्वव्यवहारोऽत्रेति बोध्यम् । आधिक्यवर्णनाभावे सादृश्यं पर्यवस्यतीत्येतावता तद्गर्भत्वव्यवहारात् । एतेनैकगुणपुरस्कारेण सादृश्यनिषेधे गुणांतरेण सादृश्यप्रत्ययस्य दुर्वारत्वादुपमागर्भत्वमस्येत्यपास्तम् । किं चान्यधर्मेण प्रसिद्धसादृश्यस्यैवेदृशाधिक्यप्रतिपादनद्वाराऽभावस्यापकर्षस्य वा प्रतिपादनम् । स चाविशेषात्सर्वधर्मप्रयुक्त एवेति तदप्ररोहात् । 'कथं तुलयामः कलयाऽपि पंकजम्' इत्यादौ सर्वथैव सादृश्यनिषेधाच्च । 'देवदत्तेन सदृशो यज्ञदत्तः किं तु धनमस्याधिकम्' इत्यादौ उत्कटविद्यादित्वेन प्रसिद्धदेवदत्तेन विद्यादिकृतसादृश्यं प्रतीयमानमप्यपकृष्टमिति दिक् । **क्रमेणेति** । 'नूनमन्यजनस्येव' इति 'न स्मयोऽस्य महीपतेः' इति च पाठे इत्यर्थः । **आक्षिप्ते इति** । व्यंग्ये इत्यर्थः । (इयमिति ।) दासीकृता पद्मश्रीर्येन तेनाकलंकेनाननेनेत्यन्वयः । **अत्रैवेति** । 'आननेन मनोज्ञेन' इति 'जयत्यमृतदीधितिम्' इति च पाठे

अत्रेवादि-तुल्यादि-पदविरहे आक्षिप्तैवोपमा ।

जितेन्द्रियतया सम्यग्विद्यावृद्धनिषेविणः ।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥ ७५ ॥ (—)

अत्रेवार्थे वतिः । गुणशब्दः श्लिष्टः । शाब्दमौपम्यम् ।

अखण्डमण्डलः श्रीमान्पश्यैष पृथिवीपतिः ।
न निशाकरवज्जातु कलावैकल्यमागतः ॥ ७६ ॥ (—)

अत्र तुल्यार्थे वतिः, कलाशब्दः श्लिष्टः ।

Here, the Upamā is of course suggested in the absence of words such as 'Iva' or 'Tulya.'

The virtues (by Śleṣa, fibres) of this (king), who earnestly serves those advanced in learning owing to his having subdued the senses, and whose excellences are too profound, are not perishable like those (i. e. fibres) of the lotus. (75)

Here 'Vat' is used in the sense of 'Iva'. The word 'Guṇa' is paronomastic. The similarity is 'Expressed.'

Behold! This glorious king, the circle of whose allies is undisrupted (by Śleṣa, with the full orb), has never suffered a depletion of arts (by Śleṣa, digits) like the moon. (76)

Here 'Vat' is used in the sense of 'Tulya'. The word 'Kalā' is paronomastic.

प्रदीपः–विषयापहारात् । अथ श्लिष्टभेदेषु हेत्वोरुक्तौ शाब्दमौपम्यं यथा–**जितेन्द्रियेति** । अत्र श्लिष्टो गुणशब्दः । तदर्थस्यातिगाढत्वभङ्गुरत्वे च हेतू समुपात्ते । इवार्थे वतिरिति शाब्दमौपम्यम् । अत्रैव पूर्ववदनुपादाने भेदत्रयं द्रष्टव्यम् । तत्रैवाऽऽर्थे साम्ये यथा–**अखण्डेति** । अत्र कलाशब्दः श्लिष्टः । कलावैकल्यतदभावौ हेतू शब्दोपात्तौ । तुल्या-

---

उ०ः–इत्यर्थः । **जितेति** । विद्यावृद्धाः पंडिताः । विद्या च वृद्धाश्चेति वा । अतिगाढो विरोधिसहस्रैरप्यनुच्छेद्यः गुणो धैर्यादिर्यस्य । (भङ्गुराः नश्वराः।) गुणाः पंडितत्वादयस्तंतवश्च । **पूर्ववदिति** । 'सत्कर्मनिरतस्यास्य' इति 'न तामरसवद्गुणाः' इति च पाठे इत्यर्थः । **अखंडेति** । मंडलं राजचक्रं बिंबं च, श्रीः संपत्तिः शोभा च, कला कौशलं चंद्रषोडशांशश्च । जातु कदापि । **कलावैकल्येति** । अखंडमंडलत्वकलावैकल्ये हेतू इत्यन्ये । **चिंत्यमिति** । कलावैकल्यतदभावयोर्हेतुत्वेन तदनुपादाने श्लेषः किमाश्रयः स्यात् । हेतुभूतधर्मवाचकस्य तदाश्रयवाचकस्य वा श्लिष्टत्वे श्लिष्टभेद इति भावः । 'बहुलारिगतोऽप्येष श्रीमानुद्गतविक्रमः ।

मालाप्रतिवस्तूपमावत् मालाव्यतिरेकोऽपि संभवति, तस्यापि भेदा एवमूह्याः, दिङ्मात्रं चोदाहियते, यथा—

हरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः ।
रविवन्न चातिदुःसहकरतापितभूः कदाचिदसि ॥ ७७ ॥ (—)

अत्र तुल्यार्थे वतिः । विषमादयश्च शब्दाः श्लिष्टाः ।

नित्योदितप्रतापेन त्रियामामीलितप्रभः ।
भास्वताऽनेन भूपेन भास्वानेष विनिर्जितः ॥ ७८ ॥ (—)

अत्र ह्याक्षिप्तैवोपमा । भास्वतेति श्लिष्टः । यथा वा—

Vyatireka, like Prativastūpamā, is possible also in the Malā-form. Its varieties too could be imagined likewise. It is illustrated only in a broad outline. For instance:—

Your outlook (by Śleṣa, eyes) is not unjust (by Śleṣa, odd in number) like Hara's; nor have you, O mighty lord! like Hari, spurned the mighty Law (by Śleṣa, the demon Vṛṣa); nor have you, like the sun, ever oppressed the earth with extremely unbearable taxation (by Śleṣa, rays). (77)

Here 'Vat' is used in the sense of 'Tulya.' and the words 'Viṣama' etc. are used paronomastically.

The sun there, whose light is rolled up at night, is outstripped by this glorious king whose prowess is ever on the rise. (78)

For, here the Upamā is suggested. The word 'Bhāsvat is used paronomastically. Or as in

---

प्रदीपः—र्थे वतिरित्यार्थमौपम्यम् । अत्रानुपादानत्रयं चिन्त्यम् । अयमेव मालारूपो यथा—**हरवदिति** । पूर्ववत् । तत्रैवाक्षिप्ते साम्ये यथा—**नित्योदितेति** । अत्र भास्वतेति प्रतापेति च श्लिष्टं पूर्वार्धोपात्तं हेतुद्वयम् । इवादेस्तुल्यादिशब्दानां चाभावादाक्षिप्तैवोपमा । अत्रैव पूर्ववदनुपादाने भेदत्रयं द्रष्टव्यम् । निर्जितजयत्यादिशब्दाभा—

उ०:—न निशाकरवज्जातु दृश्यतां वसुधाधिपः ॥' इति पाठेन बहुलशब्दे श्लेषसत्त्वात् अखंडमंडलत्वकलावैकल्ययोर्हेत्वोरनुपादानेऽपि संभवत्येवानुपादानत्रयम् । बहुलः कृष्णपक्षः विपुलश्चेत्यन्ये । **हरवदिति** । वैषम्यं त्रित्वं पारुष्यं च । विधूतः कंपितः । वृषो वृषासुरः बलीवर्दश्च धर्मश्च । सत्यभामापरिणयने कृष्णेन सप्तवृषास्कंदनात् । करः किरणः राजभागश्च । तापिता उद्वेजिता दाहं प्रापिता च । भूर्धरणिस्तत्स्थलोकश्च । (आर्या छंदः ।) अत्र विषमदृ-

स्वच्छात्मतागुणसमुल्लसितेन्दुबिम्बं
बिम्बप्रभाधरमकृत्रिमहृद्यगन्धम् ।
यूनामतीव पिबतां रजनीषु यत्र
तृष्णां जहार मधु नाननमङ्गनानाम् ॥ ७९ ॥ (—)

When (in spring), in the nights, wine–not the face(s) of women–would quench the thirst of youths drinking hard (the wine, and the faces by way of kissing): the wine and faces, in which the orb of the moon seemed to flash in virtue of their being clear by nature, which breathed alike unartificial and charming aroma, and of which wine possessed the bright hue (प्रभा) of the Bimba, and the face(s) possessed lower lips with the same hue! (79)

प्रदीप : – वेऽपि श्लिष्टविशेषणेनौपम्याक्षेपादप्ययं भेदः संभवति । यथा–**स्वच्छात्मतेति** ।

उ० : – ष्टित्वमपकर्षहेतुरुपात्तः । समदृष्टित्वमुत्कर्षहेतुर्नोक्तः । बहूपमानापेक्षया आधिक्यवर्णनान्मालाऽत्रेति बोध्यम् । **नित्येति** । प्रतापः पराक्रमः प्रकृष्टतापश्च । भास्वता कांतिमता रविणा च । त्रियामा रात्रिः । **अक्षिक्षैवेति** । विनिर्जित-पदाक्षिप्तैवेत्यर्थः । **द्रष्टव्यमिति** । 'समरासक्तमनसा' इति 'पंकजा-वलिनंदनः' इति च पाठे इत्यर्थः । अत्रेदं चिंत्यम् । उपात्तवैधर्म्यांशे श्लेषेणैव व्यतिरेकस्य श्लेषमूलकत्वमुचितम् । न तु यत्र कुत्रापि श्लेषेणेति कृतभेदत्रयं चिंत्यमेव । न च यत्र द्विजसुरालयमातरिश्वादिशब्दवेद्येषूपमानोपमेयेषु स्वश-ब्दोपात्त एव श्लेषो व्यतिरेकोत्थापकस्तत्रैतदुदाहरणं सूपपादम् । तत्र स्वशब्द-वेद्यस्यैव वैधर्म्यस्य संभवादिति । **स्वच्छेति** । स्वच्छात्मत्वं निर्मलत्वमेव गुणस्तेन समुल्लसितं प्रतिबिंबितमिंदुबिंबं यत्र । मुखेऽपि कपोले चंद्रप्रतिबिंबात् । मधुपक्षेऽ-प्येवमेव । यद्वा समुल्लसितेंदुबिंबमिति रूपकम् । मुखपक्षे समुल्लसितत्वं पूर्णत्वम् । यद्वा स्वच्छात्मता चिक्कणता सैव उत्कर्षकत्वेन गुणः । बिंबप्रभोऽधरो यत्रेति मुखपक्षे । मधुपक्षे बिंबप्रभां धरति तत् । (बिम्बप्रभायाः धरं धारकम् ।) जीर्णमधुनो रक्तत्वात् । अकृत्रिमो मुखवासनादिकं विना गंधांतरयोगं विना च हृद्यो गंधो यस्य । अतीव अतिशयेन । यूनां मधु तृष्णां पानेच्छां जहार नाननम् । अधरपानेच्छाया अनिवृत्तेरित्यन्वयः । (वसन्ततिलका छन्दः ।) अंगनानामाननं मधुसदृशं हृद्यगंधादिमत्त्वादित्येवं श्लिष्ट-

अत्रेवादीनां तुल्यादीनां च पदानामभावेऽपि श्लिष्टविशेषणैराक्षिप्तैवोपमा प्रतीयते । एवंजातीयकाः श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादानेऽन्येऽपि भेदाः संभवन्ति, तेऽपि अनयैव दिशा द्रष्टव्याः ।

Here, even in the absence of words like 'Iva' and 'Tulya,' there comes to be conveyed an Upamā, of course one that is suggested by the paronomastic adjectives. Even other varieties of this type become possible, if a word that could be used paronomastically (in two senses) happens to be used separately. They also might be conceived likewise.

प्रदीपः—स्पष्टम् । श्लिष्टोक्तियोग्यपदस्य पृथगुपादानेऽप्येवंजातीयका भेदाः संभवन्ति, तेऽनयैव दिशा द्रष्टव्याः ।

उ०ः—विशेषणैरौपम्याक्षेपेऽपि तृष्णां जहार नाननमित्यतो वैलक्षण्यात् व्यतिरेक इति बोध्यम् । अत्र सर्वलोकलभ्यत्वपुण्यैकलभ्यत्वरूपौ तृष्णाहरणाहरणरूपोत्कर्षापकर्षहेतू नोक्तौ । उक्तेषूदाहरणेषु अयमस्मादधिक इति व्यतिरेकाकारो गम्य एव । 'इंदोः पद्माच्चाधिकं मे प्रियाया वदनं मतम् । विलासैर्हृद्यगंधैश्च' इत्यादौ तु वाच्य एव । अयमेवानुभवपर्यवसायीत्युच्यते । 'प्रियाया वदनेनेदं पंकजं सदृशं न हि । विलासैः शोभमानत्वाद्विकासित्वाद्विधूदये ॥' इति पद्ये प्रतीपालंकारतिरस्कारको व्यतिरेकः । 'निष्कलंक निरातंक चतुःषष्टिकलाधर । सदापूर्ण महीप त्वं चंद्रोऽसीति मृषा वचः ॥' इत्यत्र रूपकतिरस्कारकोऽयम् । 'दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य । कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥' इति पद्ये केवलपदस्वारस्येन अनयोः केवलं आकारवत्पदवाच्यत्वतदभाववत्पदवाच्यत्वाभ्यां आकृतेश्च भेदः, गुणैस्तु साम्यमेव । दृढतरेत्यादिविशेषणसाम्यादितरगुणैश्चेति प्रतीतेर्गम्योपमैवालंकारो न त्वयम् । आधिक्यस्याचमत्कारित्वात् । कृपणस्योपमेयत्वे तद्गतत्वाभावाच्च । औपम्यातिर-

प्रभाः—मत्वे सत्त्वे सति श्लेषे कथमुभयानुपादानम् । वैधर्म्यानुक्तौ श्लेषस्य निरालम्बनत्वापत्तेरित्याशयः । **पृथगुपादानेऽपीति** । उपमानोपमेययोर्विशेषणत्वेन पृथगुपादानेऽपीत्यर्थः । यथा—'अमृतममृतं कः संदेहो मधून्यपि नान्यथा मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् । सकृदपि पुनर्मध्यस्थः सन्रसान्तरविज्जनो वदतु यदिहान्यत्स्वादु स्यात्प्रियादशनच्छदात् ॥' इत्यादौ । अत्र द्वितीयोऽमृतशब्दोऽतिमधुरार्थः । नान्यथा किं त्वतिमधुराणि । अत्रोपमानभूतेष्वमृतादिषूपमेये चाधरेऽतिमधुरत्वं

(३७) निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ॥ २० ॥
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकार्यस्य अशक्यवक्तव्यत्वमतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो (निषेध इव) यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः । क्रमेणोदाहरणम्—

ए एहि किंपि कीएवि कएण णिक्किव भणामि अलमह वा ।
अविआरिअकज्जारम्भआरिणी मरउ ण भणिस्सं ॥ ८० ॥ (—)

---

19. ĀKṢEPA.

Where, with a view to driving at a particular feature of the matter that needs to be stated, an exception is taken to a thing yet to be spoken or already spoken, there results the figure Ākṣepa which (thus) is regarded to be of *two* kinds.

Gloss:–Where in order to hint at the particular feature–viz. either that it is difficult to describe it, or that it is too obvious,– of the matter intended to be stated, which since it is relevant cannot be held back, an exception (an exception in appearance) comes to be taken to it, there takes place 'Ākṣepa,' which is of two kinds according as it relates to the matter about to be spoken or already spoken. Instances in order :—

Come along, O ruthless one, I speak something on behalf of some lady. Or have done with it! Let her die who sets about doing things recklessly. I would not speak! (80)

प्रदीपः–निषेध इति । वक्तुमिष्टस्य प्राकरणिकत्वाद्वचनार्हस्य यो निषेधः स आक्षेपः । निषेधो निषेध इवेत्यर्थः । शब्दगत्या निषेधेऽप्यर्थगत्या विधेरेव प्रतिपत्तेः । तत्प्रयोजनमाह–विशेषाभिधित्सयेति । वक्ष्यमाणविषयेऽशक्यवक्तव्यत्वमुक्तविषयेऽतिप्रसिद्धत्वं चेति विशेषः । विभजते–**वक्ष्यमाणेति** । तत्र वक्ष्यमाणविषयो यथा—**ए**

उ० : – स्काराभावाच्चेति दिक् । **इति व्यतिरेकः** । **वक्तुमिष्टस्येति** । अस्य व्याख्या वचनार्हस्येति । अवचनानर्हस्येति वा पाठः । **निषेधः** । अभिधाननिषेधः । अनपेक्षिताभिधाननिषेधस्य 'न पद्मं मुखमेवैतत्' इत्यादेश्च वारणाय षष्ठ्यंततृतीयांते । **निषेध इवेति** । अभिधाननिषेधेऽप्यभिधेयानिषेधात् विशेषप्राप्त्यर्थमेवाभिधानस्यापि निषेधादिति भावः । **अर्थगत्येति** । तस्य प्रकृतत्वादेवाभिधातुं पतितस्य क्रियमाणो निषेधो बाधितः सन्नाभासत्वे पर्यवस्यन् विधेराक्षेपक इति भावः । केचित्तु व-

ज्योत्स्ना मौक्तिकदाम चन्दनरसः शीतांशुकान्तद्रवः
कर्पूरं कदली मृणालवलयान्यम्भोजिनीपल्लवाः ।
अन्तर्मानसमास्त्वया प्रभवता तस्याः स्फुलिङ्गोत्कर-
व्यापाराय भवन्ति हन्त किमनेनोक्तेन न ब्रूमहे ॥ ८१ ॥ (—)

The moon-light, the pearl-necklace, the sandal–paste, the molten moon–stone, the camphor, the plantain tree, the coils of lotus fibres, the leaves of the lotus–plant,–Ah ! these tend, due to you who dominate her mind from within, to produce the action of a heap of fiery sparks ! Alas ! What use talking about it ? We forbear speaking ! (81)

प्रदीपः–एहीति । अत्र विरहजनितदुर्दशातिशयो वक्ष्यमाणो निषिद्धः । उक्तविषयो

उ०ः–क्तुमित्युपलक्षणम् । करिष्यमाणस्यापि निषेधः आक्षेपः । 'तां सुंदरीं वर्णयितुं न मे वाणी प्रवर्तते' इत्यत्र करिष्यमाणवाणीप्रवृत्तेर्निषेधो वर्णनीयस्या-निर्वाच्यतां व्यनक्तीत्याहुः । (**ए एहीति** ।) 'ए एहि किमपि कस्या अपि कृते निष्कृप भणामि अलमथ वा । अविचारितकार्यारंभकारिणी म्रियतां, न भणिष्यामि ॥' किमपि तत्पीडातिशयरूपम् । ए इति सामर्ष संबोधनम् । अलमथवेति पूर्वाक्षेपे । अविचारितेत्यादि तु त्वत्प्रेम्णः स्थैर्यास्थैर्ये अविचार्यैव प्रवृत्तेत्यर्थकम् । अलमित्यनेनैव निषेधलाभे 'न भणिष्यामि' इति पुनः कथनं खेदातिशयद्योत-तकम् । (आर्या जघनविपुला ।) अत्र नायिकासंतापातिशयोऽवश्यं वक्तुमिष्टः, न चासौ विशिष्य वक्तुं शक्य इति व्यंजयितुं निषिद्धः । नायकं प्रति दूत्युक्तिः । एवमग्रेऽपि । **ज्योत्स्नेति** । (ज्योत्स्ना चंद्रिका । मौक्तिकदाम मुक्ताहारः ।) शीतांशुकांतद्रवः चंद्रकांतमणिजलम् । आः इति खेदे । अंतर्मानसम् मानस-मध्ये । प्रभवता दाहकरणसमर्थेन । प्रवसतेति वा पाठः । त्वया करणभूतेन । अ-तो दुःसमाधानत्वम् । प्रभवतेति पाठे प्रभोरनभियोज्यत्वम् । (स्फुलिंगोत्करः

प्रभाः–पृथगुपात्तम् । प्रियादशनच्छदादन्यत्स्वादु स्यादिति भङ्ग्या तस्यातिस्वादुत्वप्रत्य-यात् । इति व्यतिरेकप्रकरणम् ॥ १७ ॥ **निषेध इवेति** । निषेधाभास इत्यर्थः । **ए एहीति** । 'अये एहि किमपि कस्या अपि कृते निष्कृप भणाम्यलमथवा । अविचा-रितकार्यारम्भकारिणी म्रियतां न भणिष्ये ॥' निषेधाभासवद्विध्याभासोऽप्यलंकारो-ऽन्यैरुक्तः । यथा—'गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥' इत्यादौ । इत्याक्षेपप्रकरणम् ॥ १८ ॥

(३८) क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना ॥ २१ ॥

हेतुरूपक्रियायाः निषेधेऽपि तत्फलप्रकाशनं विभावना । यथा—

20. VIBHĀVANĀ.

Where the Effect is in evidence even when the cause (क्रिया) is denied, the figure resulting is 'Vibhāvanā.'

Gloss :—Even when action which constitutes the cause is denied, if there is the manifestation of the effect of the same, the figure is 'Vibhāvanā.' To illustrate :—

प्रदीपः – यथा—**ज्योत्स्नेति । क्रियाया इति ।** वैयाकरणमते क्रियैव हेतुरिति क्रियेत्युक्तम् । वस्तुतस्तु कारणप्रतिषेधे कार्यवचनं विभावना । न च विरोधः । स्वाभाविकत्वस्य

उ० : – अग्निकणसमूहः तस्य व्यापारः दाहोत्पादनम् । तदर्थम् । शार्दूलविक्रीडितं छन्दः ।) अत्र वियोगिनीनां ज्योत्स्नादि स्फुलिंगायते इत्यत्रातिप्रसिद्धत्वं विशेषं व्यंजयितुं ज्योत्स्नादीन्युक्त्वा तत्कथनं प्रतिषिद्धम् । अत्र व्यंग्येनाशक्यवक्तव्यत्वादिना व्यंजकं वाच्यमेव चारुत्वमावहतीति गुणीभूतव्यंग्यता । यत्तु वामनेन 'उपमेये सति किमुपमानेनेत्येवमुपमानाक्षेप आक्षेपः' इत्युक्तम् । तत्तु वक्ष्यमाणप्रतीपरूपतया गतार्थम् । **इत्याक्षेपः । कारणेति ।** प्रसिद्धकारणेत्यर्थः । सूत्रे क्रियतेऽनेनेति व्युत्पत्त्या क्रियाशब्दः कारणपर इति भावः । एवं च कारणव्यतिरेकसामानाधिकरण्येन प्रतीयमाना कार्योत्पत्तिर्विभावनेत्यर्थः । 'न कठोरं न वा तीक्ष्णम्' इत्यादावपि कठोरत्वादिविशिष्टायुधस्य जयहेतोरभावेऽपि कार्यकथनाद्विभावनैव । अतिशयोक्तिस्तु तदंगम् । कारणतावच्छेदकावच्छिन्नकारणव्यतिरेकस्य विवक्षितत्वात् । ननु कारणाभावे कार्योत्पत्तौ स्फुरितस्य विरोधस्य प्रसिद्धातिरिक्तेन कारणेन परिहाराद्विरोधाभास एवायमिति

प्रभा : – **क्रियैवेति ।** द्रव्यगुणादेरप्यनभिव्यक्तस्याहेतुत्वादभिव्यक्तरूपक्रियायाः सर्वत्रापेक्षेति । क्रियैव हेतुरित्याशयः । आत्मादेरपि हेतुत्वादाह—**वस्तुतस्त्विति ।** तथा च क्रियतेऽनेनेति व्युत्पत्त्या क्रियाशब्द उक्त इति भावः । स्वाभाविकत्वस्य स्वभावविशेषजन्यत्वस्य । कुसुमितेत्यादौ सौकुमार्यातिशयरूपस्वभावजन्यत्वविभावनम् । 'पुष्पोद्गमैराभरणप्रयोगं प्रारेभिरे वामदृशां युवानः । ततो विना कार्मुककर्मसिद्धिं पुष्पायुधस्याभवदस्त्रमोक्षः ॥' इत्यादौ कारणान्तरं पुष्पाभरणमनुरागोद्दीपकं

कुसुमितलताभिरहताऽप्यधत्त रुजमलिकुलैरदष्टाऽपि ।
परिवर्तते स्म नलिनीलहरीभिरलोलिताऽप्यघूर्णत सा ॥ ८२ ॥ (—)

She suffered distress at (the sight of) creepers in blossom though unsmitten by them; she writhed (परिवर्तते स्म) at (the sight of) swarms of bees though unstung by them; she reeled at (the sight of) the waves that passed over lotus-plants though not tossed by them (i. e. waves)! (82)

प्रदीप : – कारणान्तरस्य वा विभावनात् । उदाहरणम्— **कुसुमितेति** ।

उ० : – चेन्न । समबलयोः परस्परविरोधे तत्स्वीकारात् । इह तु कारणविरहेण कार्यमेव बाध्यत्वेन गम्यते । न तु तेन कारणविरह इति विशेषात् । **कुसुमितेति** । (नायिकायाः विरहावस्थावर्णनम् ।) लताहननं विरहिण्या रोगहेतुः । सा नलिनीति रूपकम् । भ्रमरदंशः परिवर्तनहेतुः । तरंगसंबंधो घूर्णनहेतुः । नलिनीयुक्ततरंगैरिति वार्थः । ('नलिनी' इति नायिकानाम वा । अहता अताडिता । परिवर्तते परावृत्य वर्तते । अलोलिता अचालिता । गीतिश्छन्दः ।) अत्र विरहरूपहेत्वंतरजनितानां रुजादीनां अन्यत्वेऽप्येकत्वाध्यवसायो विभावनामूलम् । स च प्रकृतेऽनाहार्यः । 'निरुपादानसंभारमभित्तावेव तन्वते । जगच्चित्रं नमस्तस्मै कलाश्लाध्याय शूलिने ॥' इत्यत्राहार्यो रूपककृतः । सर्वथा कार्यांशेऽभेदबुद्धिर्विभावनाजीवितम् । सा च क्वचिदतिशयोक्त्या क्वचिद्रूपकेणेत्यन्यत् । 'अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम्' इत्यत्र स्वाभाविकत्वेन परिहारः । अत्र कारणव्यतिरेकः प्रतिबंधकसत्ताया अप्युपलक्षणम् । तेन 'सातपत्रं दहत्याशु प्रतापतपनस्तव' इत्यत्राप्येषा । अत्रापि स्वभावमादाय विरोधपरिहारः । प्रतिबंधकाभावस्यापि कारणत्ववादिनां तु यथाश्रुतमेव सम्यक् । परं तु कारणव्यतिरेकप्रतीतिरार्थीति बोध्यम् । 'शंखाद्वीणानिनादोऽयमुदेति महदद्भुतम्' इत्यत्र वीणां विनेति प्रतीतेरार्थी कारणाभावप्रतीतिरस्त्येव । अत्र शङ्खत्वेन कान्ताकंठस्तंत्रीनिनादत्वेन तद्गीतं चाध्यवसितम् । 'शीतांशुकिरणास्तन्वीं हन्त संतापयन्ति ताम्' इत्यत्रापि दाहकारणतावच्छेदकधर्मावच्छिन्नाभावप्रतीतिरार्थ्यस्त्येव । विरहकालिकदाहकारणतावच्छेदकत्वं शीतांशुत्वेऽपीति विभावनाद्विरोधपरिहारः । वस्तुतः 'शंखाद्वीणानिनादोऽयम्' इत्याद्युदाहरणानि विरोधस्यैव । परस्परबाध्यत्वावगमात् । 'यशः पयोधिरभवत्करकल्पतरोस्तव'

(३९) विशेषोक्तिरखण्डेषु कारणेषु फलावचः ।

मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिः । अनुक्तनिमित्ता, उक्तनिमित्ता, अचिंत्यनिमित्ता च । क्रमेणोदाहरणम्—

निद्रानिवृत्तावुदिते द्युरत्ने सखीजने द्वारपदं पराप्ते ।
श्लथीकृताश्लेषरसे भुजंगे चचाल नालिङ्गनतोऽङ्गना सा ॥ ८३ ॥ (—)

---

21. VIŚEṢOKTI.

'Viśeṣokti' occurs where the Effect is not presented, (even) when the Causes are intact.

Gloss:—'Viśeṣokti' consists in the non-presentment of the Effect even when the Causes have come together. It can be (1) one where the reason is not stated; (2) one where the reason is stated; and (3) one where the reason is inscrutable. Instances in order:—

(Even) when sleep was over, the sun had risen, the circle of friends had arrived at the doorway and the lover had relaxed his ardour for embrace, that woman budged not from the embrace! (83)

प्रदीपः–विशेषोक्तिरिति—अखण्डेषु मिलितेषु प्रसिद्धकारणेषूक्तेषु कार्याभाववचनं विशेषोक्तिः । अत्राप्यप्रसिद्धे कार्याभावहेतौ पर्यवसानाद्विरोधाभावः । सा च त्रिधा–अनुक्तनिमित्ता उक्तनिमित्ता अचिन्त्यनिमित्ता च । तत्राद्या यथा—**निद्रेति** ।

उः० – इत्यत्रापि विरोधाभास एव । परस्परं विरोधावगतेः । एतेन 'कार्यात्कारणजन्माऽपि विभावना' इत्यपास्तम् । कारणान्तरं विभावयतीत्यन्वर्थभावेन तस्य विभावनात्वाभावात् । एवं 'निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात् । अदर्शि संगोप्य कदाऽप्यवीक्षितो रहस्यमस्याः स महन्महीपतिः ॥' इत्यत्रापि एषा । अक्षियुगात् हृदोऽपि संगोप्य अत एव महत् रहस्यं यथा स्यात्तथा स नृपतिर्निद्रयाऽदर्शि । निमीलितत्वेनाक्षिसन्निकर्षराहित्येन गोपनम् । बाह्येंद्रियसहकृतान्मनसश्च तद्बाह्येंद्रिय-

---

प्रभाः–बोध्यम् । इति विभावनाप्रकरणम् ॥ १९ ॥ केचिदिहोक्तानुक्तनिमित्तभेदद्वयमाहुस्तन्मते उदाहृतपद्येऽनुक्तनिमित्तता द्वितीयोदाहरणे तूक्तनिमित्ततेति द्रष्टव्यम् । अचि-

कर्पूर इव दग्धोऽपि शक्तिमान्यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥ ८४ ॥ (बालरामायण. ३. ११.)

Salutation to Cupid who though burnt down, continues, like camphor, to be potent in each and every man. (84)

प्रदीप:—अत्रानुरागातिशयो निमित्तं चलनाभावे । स च विशिष्य वक्तुं शक्यत्वेऽपि नोक्त इत्यनुक्तनिमित्तेयम् । उक्तनिमित्ता यथा—**कर्पूर इति** । अत्र 'कर्पूरो दाहमात्रे उपमानं न तु शक्तिमत्त्वेऽपि' इति भास्करः । शक्तिमत्त्वे इति परमार्थः । ईषद्दग्धस्य तस्य सौरभाद्यतिशयात् ।

उ०:—व्यापाररहितात्ततोऽङ्गोपने पर्यवस्यति । 'सविशेषणे हि' इति न्यायात् । कालांतरीणदर्शनजनितस्मरणसहकृतमनसोपनीतभानं स्यादत आह—कदाप्यवीक्षित इति । एवं च योगजधर्मवददृष्टविशेषाद्विनैवोपनयं नलत्वेन भानमभिमतम् । 'अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम्' इत्युक्तेः । अत्र दृशिधातोर्ज्ञानसामान्ये लक्षणया तत्र दर्शनाभेदलाभात् कारणाभावे कार्यलाभेन विभावना । कुसुमितेत्युदाहरणेऽनुक्तनिमित्ता एषा । उक्तनिमित्ताऽप्येषा । यथा 'यदवधि विलासभवनं यौवनमुदियाय चंद्रवदनायाः । दहनं विनैव तदवधि यूनां हृदयानि दह्यन्ते ॥' अत्रोपात्ते यौवने दाहहेतुत्वं पर्यवस्यतीति दिक् । **इति विभावना । विशेषोक्तिरिति** । विशेषं कंचित्प्रतिपादयितुमुक्तिरित्यर्थः । **निद्रेति** । द्युरत्नं सूर्यः । (परास्ते प्राप्ते सति । भुजंगे उपपतौ । श्लथीकृतः शिथिलीकृतः आश्लेषरसः आलिङ्गनरसो येन तादृशे सति । उपजातिश्छन्दः ।) कारणसत्त्वे कुतः कार्यानुत्पत्तिरित्येवमत्र विरोधः । कार्यानुत्पत्तेः कारणसमवधानबाध्यत्वात् । अत्र निमित्तं व्यंग्यमपि न चार्विति गुणीभूतव्यंग्यता । **कर्पूर इवेति** । (बालरामायणे तृतीयाङ्के पद्यमेतत् । अवार्यं अकुण्ठितं वीर्यं यस्य तस्मै । मकरकेतवे मदनाय ।) अत्र 'शरीरदाहः शक्तिध्वंसे कारणम् । सत्यपि तदनुत्पत्तिकथनम् । (**भ्रूभ्या-**

प्रभा:—न्त्यनिमित्ततो वैलक्षण्यमाह-**स च विशिष्येति । दाहमात्र इति** । यथा कर्पूरं निरवशेषं दह्यते तथेत्येतावन्मात्रं विवक्षितं न तु तस्य शक्तिमत्त्वम् । अप्रसिद्धेरित्यर्थः । भ्रूभ्यां भ्रूस्वरूपेण भवता । घनश्चासौ सारो दृढस्तत्ता कर्पूरता च ।

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरताऽपि तनुं यस्य शंभुना न हृतं बलम् ॥ ८५ ॥

(Cited in भामह 's काव्यालंकार. ३. २४.)

All alone, that flower-weaponed Cupid conquers the three worlds: who, though deprived of his body by Śambhu, could not be (yet) deprived of his strength. (85)

प्रदीप :—'भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः ।
निजां यदप्लोषदशामपेक्ष्य संप्रत्यनेनाधिकवीर्यताऽऽर्जि ॥'

इत्यादि नैषधदर्शनात् । अत्रावार्यवीर्यत्वं शक्तिमत्त्वे कार्याभावरूपे हेतुरुक्तः । अचिन्त्य-निमित्ता यथा—**स एक इति** । अत्र तनुहरणेऽपि बलाहरणस्य हेतुर्विशिष्य वक्तुं न

उ० :—मिति । नैषधीयकाव्ये सप्तमे सर्गे २५ पद्यम्। 'मनोभूचापेन मदन-बाणेन प्रियायाः दमयन्त्याः भ्रूभ्यां भ्रूयुगुलेन भवता भ्रूत्वं गच्छता सता घनो दृढो सारो मज्जा यस्य तद्भावः अतिदृढत्वं च आपे प्रापे। यदैव च भ्रूत्वं तदैव दृढत्वमिति चकारार्थः । पुष्पत्वदशायां निःसारस्यापि धनुषो भैमीभ्रूत्वदशायां ससारत्वं जातमित्यर्थः । कथं ससारत्वमित्यत आह—यद्यस्मात् निजां स्वीयां अप्लोषदशां अदाहावस्थां अपेक्ष्य संप्रति दग्धस्य भैमीभ्रूभवनसमयेऽनेन धनुषा अधिकवीर्यता अतिशयितपराक्रमत्वं आर्जि अर्जितम् । अदग्धपुष्परूपचापापेक्षया दग्धस्य श्यामीभवत्केसरशेषस्य भैमीभ्रूभवतस्तस्यैव चापस्य जगद्वशीकरणे अधिकसामर्थ्यदर्शनादेवमनुमीयते इति भावः । घनत्वं सारत्वं दृढत्वं श्रेष्ठत्वं च प्रापे इति वा । अथ च घनसारभावः कर्पूरत्वं च । यतः कर्पूरोऽपि निजांगदाहात् स्वीयपक्वावस्थामपेक्ष्यादाहावस्थायामधिकवीर्यतामतिशयितं सौगन्ध्यं शीतलत्वं चार्जयति' इति नैषधीयप्रकाशे स्पष्टम् ।) **स इति ।**

प्रभा :—अप्लोषदशामदहदाशाम्। संप्रति दग्धदशायाम्। अत्राचिन्त्यत्वचिन्त्यत्वयोरनुक्तनिमित्तस्यैव भेदरूपत्वाद्भेदद्वयमेव प्राचीनैर्नवीनैश्च कैश्चिदुक्तं तदयुक्तम् । अनुक्तनिमित्तायां निद्रेत्यादौ चिन्त्यस्य निमित्तस्यानुरागातिशयत्वेन विशिष्य ज्ञानमचिन्त्यत्वमिति द्रष्टव्यम् । तद्यथा-'ण हु रूवं ण अ ऋद्धी णेअ कुलं ण अ गुणा ण विण्णाणम् । एमे अ तह वि कस्स वि कोवि जणो वल्लहो होइ ॥' 'न खलु रूपं न च ऋद्धिर्नैव कुलं न च गुणा न विज्ञानम् । एवमेव तथापि कस्यचित्कोऽपि जनो वल्लभो भवति ॥' इति संस्कृतम् । अत्र रूपाद्यभावेऽपि वल्लभत्वस्य निमित्तमचि-

(४०) यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः ॥ २२ ॥

यथा—

एकस्त्रिधा वससि चेतसि चित्रमत्र
देव द्विषां च विदुषां च मृगीदृशां च ।
तापं च संमदरसं च रतिं च पुष्णन्
शौर्योष्मणा च विनयेन च लीलया च ॥ ८६ ॥ (—)

---

22. YATHĀ-SAṄKHYA.

'Yathā-saṅkhya' consists in the connection, in the (same) order, of things standing in a (particular) order.

Gloss :—To illustrate :—

Here lies the wonder, O king, that one as you are, you abide trebly in the heart of the enemies, the learned and the doe-eyed ones, nourishing distress, a feeling (रस) of joy, and love, by the heat of your valour, by culture, and by grace. (86)

प्रदीपः—शक्यत इत्यचिन्त्यनिमित्तेयम् । **यथासंख्यमिति** । यथा—**एक इति** ।

उ०ः—एकोऽसहायः । कुसुमेत्यनेनायुधस्य निःसारता । **न शक्यत इति** । शास्त्रैकगम्यत्वादिति भावः । यद्यप्यनुक्तत्वाविशेषादेषाऽप्यनुक्तनिमित्तैव तथापि प्रकरणादिना ज्ञातस्य निमित्तस्यावचनेऽनुक्तनिमित्ता । अज्ञातस्यावचने एषेति भेदः । यत्तु "एकगुणहानिकल्पनया साम्यदार्ढ्ये विशेषोक्तिः । यथा 'द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम्'" इति । तन्न । अत्र द्यूते राज्यस्य तादात्म्येनारोपेण रूपकसत्त्वात् । तत्र सिंहासनरहिते द्यूते सिंहासनसहित-राज्यतादात्म्यं कथं सिध्येदिति आरोपोन्मूलकयुक्तिनिरासायारोप्यमाणरा-ज्येऽपि सिंहासनराहित्यं कल्प्यते इति दृढारोपरूपकमिदम् । एवं गुणाधिक्य-कल्पनायामप्येतदेव । यथा 'धर्मो वपुष्मान् भुवि कार्तवीर्यः' इत्यादाविति दिक् । **इति विशेषोक्तिः । क्रमेण** । उपदेशक्रमेण । पूर्वस्य पूर्वेण मध्यस्य मध्येनांत्यस्यांत्येनेत्येवमित्यर्थः । अन्वयिसमसंख्यपदार्थज्ञानस्य यथासं—

प्रभाः—न्त्यमित्यूह्यम् । इति विशेषोक्तिप्रकरणम् ॥ २० ॥ **यथासंख्यमिति** । अकलित-तपस्तेजोवीर्यप्रथिम्नीत्यादाविवात्रापि क्रमप्रक्रमभङ्गदोषात्तदभावरूपं यथासंख्यं नामा-

(४१) सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥ २३ ॥

साधर्म्येण वैधर्म्येण वा सामान्यं विशेषेण यत् समर्थ्यते, विशेषो वा सामान्येन, सोऽर्थान्तरन्यासः। क्रमेणोदाहरणम्—

निजदोषावृतमनसामतिसुन्दरमेव भाति विपरीतम्।
पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम्॥ ८७॥ (—)

---

23. ARTHĀNTARANYĀSA.

Where a general fact or a particular one is corroborated, one by the other, the figure (that results) is 'Arthāntaranyāsa,' based on similarity or its opposite.

Gloss:—On the basis of similarity or dissimilarity, when a general fact is corroborated by a particular one, or *vice versa*, the resulting figure is 'Arthāntaranyāsa.' Instances in order:—

To those whose minds are obsessed by their own defects, the extremely beautiful itself appears otherwise. One affected by (disturbed) bile finds the conch to be yellow, though it is white like the moon. (87)

प्रदीपः—स्पष्टम् । **सामान्यमिति** । सामान्यं यद्विशेषेण समर्थ्यते विशेषो वा सामान्येन सोऽर्थान्तरन्यासः । द्वयोरपि प्रत्येकं समर्थनहेतुः साधर्म्यं वैधर्म्यं चेति चतुःप्रका-

---

उ० :—ख्यान्वयबोध्यत्वं कार्यतावच्छेदकम्। यद्यपि कविप्रतिभानिर्मितत्वस्यालंकारताजीवातोर्लेशतोऽप्यभावादस्य नालंकारत्वम् तथापि एकत्र पद्ये बहूनां क्रमान्वये वैचित्र्याद्लंकारत्वेनोक्तः । (**एक इति** । राजानं प्रत्युक्तिः । हे देव राजन् एकः त्वम् द्विषाम् शत्रूणाम्, विदुषाम् पंडितानाम्, मृगीदृशाम् स्त्रीणां च चेतसि त्रिधा प्रकारत्रयेण वससि । अत्र एतद्विषये चित्रम् आश्चर्यम्। शौर्योष्मणा प्रतापाग्निना, विनयेन नम्रतया, लीलया विलासेन च क्रमेण तापम् सन्तापम्, सम्मदरसम् आनन्दरसम्, रतिं प्रीतिं च पुष्णन् सन् इत्यर्थः । वसन्ततिलका छन्दः ।) **इति यथासंख्यम्। सामान्यमिति ।** अनुपपद्यमानतया संभाव्यमानस्यार्थस्योपपादनार्थं यदर्थांतरं

प्रभाः—लंकार इति नव्याः। इति यथासंख्यालंकारप्रकरणम् ॥ २१ ॥ **विशेषो वा सामान्येनेति ।** दृष्टान्तप्रतिवस्तूपमयोस्तु विशेषेण विशेषस्य समर्थनमिति ततो भेदः।

सुसितवसनालंकारायां कदाचन कौमुदी-
महसि सुदृशि स्वैरं यान्त्यां गतोऽस्तमभूद्विधुः ।
तदनु भवतः कीर्तिः केनाप्यगीयत, येन सा
प्रियगृहमगान्मुक्ताशंका, क्व नासि शुभप्रदः ॥ ८८ ॥ (—)

गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते ।
असंजातकिणस्कन्धः सुखं स्वपिति गौर्गलिः ॥ ८९ ॥

(Cited in सरस्वतीकण्ठाभरण. ४.)

अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम् ।
त एव धन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताः ॥९०॥(—)

When once, she with lovely eyes, and wearing garments and ornaments extremely white, was going wantonly in the splendour of the moon-light, the moon set. Thereupon, your glory happened to be sung by someone, in consequence of which, she could reach the beloved's home, free from fear. Where have you not been a giver of blessings ? (88)

It is only through the vileness of excellences that the yoke-bearer is placed at the yoke. The unruly bull dozes off at ease, without so much as sustaining a bruise on the nape of the neck ! (89)

Alas ! My (long) life is very much to blame since I have to report an unpleasant thing like this ! They alone are blessed who died without having to witness, in this world, the defeat of their ally ! (90)

प्रदीप :–रोऽयमित्यर्थः। तत्र विशेषेण सामान्यसमर्थनं साधर्म्येण यथा—**निजेति**। सामान्येन विशेषसमर्थनं साधर्म्येण यथा—'**सुसितवसना**'-इत्यादि। विशेषेण सामान्यसमर्थनं वैधर्म्येण यथा—**गुणानामिति**। अत्र धुर्य इत्यादि साधारण्यात्सामान्यम्। गौर्ग-

---

उ० :–न्यस्यते सोऽर्थान्तरन्यासः। दृष्टान्ते तु सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यते इति ततो भेदः। साक्षाद्व्याप्त्यादेरनभिधानादनुमानतो भेदः। कविनिबद्धप्रमात्रन्तरनिष्ठानुमितेरेवानुमानालंकारविषयत्वाच्च । **निजदोषेति** । सुंदरमेव सुंदरमपि । (पित्तेन उपहतः व्याप्तः । शशिवत् शुभ्रम् । आर्या छन्दः ।) अत्र निजदोषेत्यादि सामान्यं शंखपीतिम्ना विशेषेण समर्थितम्। यद्यपि दोषेण भ्रमो भवतीत्यर्थे पामरस्याऽपि नानुपपत्तिसंभावना तथाप्याहार्या सा बोध्या। **सुसितेति**। राजानं प्रति कव्युक्तिः। कदाचन एकदा शुभ्र-

---

प्रभा :–काव्यलिङ्गे तु न सामान्यविशेषभाव इति तन्निरासः। इत्यर्थान्तरन्यासप्रकरणम् ॥२२॥

(४२) विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः।

24. VIRODHA.

The figure is 'Virodha,' when there is a presentment (of things) as conflicting, although there is no (real) conflict between them.

प्रदीप :– लिरिति विशेषः । वैधर्म्य च स्फुटम् । वैधर्म्येण विशेषस्य सामान्येन समर्थनं यथा—**अहो इति** । सामान्यविशेषभावः उपपादनीयः । **विरोध इति** ।

उ० :– वस्त्रालंकारायां कौमुदीमहसि स्वैरं यान्त्यामस्तं विधुर्गतः। ततो भवत्कीर्तेर्गाने कौमुदीवदेव प्रकाशे जाते सा मुक्ताशंका पतिगृहमगादित्यन्वयः । अतस्त्वं क्व शुभप्रदो नासि । सर्वत्रैव तथेत्यर्थः । मूर्तत्वं धवलतागुणाश्रयत्वम् । (हरिणी छन्दः ।) सुसितेत्यादिनाऽभिहितो विशेषः क्व नासीत्यादिना सामान्येन समर्थितः। **गुणानामिति ।** गुणरूपदोषादेव धुर्यः श्रेष्ठः धुरि कार्यभारे नियुज्यते । असंजातव्रणः स्कंधो यस्य । य आसंजितं युगं बलात्पातयति स गौर्गलिः । **अहो इति ।** (आपन्नं) सुहृदं प्रति (तदवस्थोचितम्) अप्रियं वदतः (खेदातिशयात् स्वजीवितं निन्दतः कस्यचित्) उक्तिः । ते इत्यनेन सामान्यतो मत्पदार्थस्यापि ग्रहणात्सामान्यत्वम् । (सुहृदः मित्रस्य । वंशस्थं वृत्तम् ।) ते धन्या इति सामान्येनाहमधन्य इति वैधर्म्यद्वारा स्वायुरपराधरूपो विशेषः समर्थ्यते । अत्र हि यत् यतः इत्यादेः प्रतिपादकस्याभावे समर्थ्यसमर्थकभाव आर्थः । तत्सत्त्वे शाब्दः । ननु 'उपकारमेव तनुते विपद्गतः सद्गुणो नितराम् । मूर्छां गतो मृतो वा निदर्शनं पारदोऽत्र रसः॥' इत्यत्र कोऽलंकार इति चेदयमेव । निदर्शनशब्दस्य समर्थकपरत्वात् । उपमाऽत्रालंकार इति कश्चित् । एतेनोदाहरणालंकारोऽयमतिरिक्त इत्यपास्तम् । कारणेन कार्यस्य कार्येण कारणस्य वा समर्थनं तु काव्यलिंगस्य विषय इति बोध्यम् । समर्थ्यसमर्थकयोः सामान्यविशेषभावसंबंधेऽयं, तदितरसंबंधे काव्यलिंगमित्युपगमात् । 'अनंतरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् । एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ॥' इत्यत्र द्वयोरप्यर्थान्तरन्यासयोः संसृष्ट्यादि बोध्यम् । एतेन 'यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः । यथानंतेति' इति विकस्वरालंकारोऽयं पृथगित्यपास्तम् । **इत्यर्थांतर-**

वस्तुवृत्तेनाविरोधेऽपि विरुद्धयोरिव यदभिधानं स विरोधः।
(४३) जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः ॥ २४ ॥
क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश।

क्रमेणोदाहरणम्—

अभिनवनलिनीकिसलयमृणालवलयादि दवदहनराशिः।
सुभग कुरङ्गदृशोऽस्या विधिवशतस्त्वद्वियोगपविपाते ॥ ९१ ॥ (—)

Gloss:—Where, although there is in fact no conflict (between them) there is a presentment of two things as seemingly conflicting, the figure is 'Virodha.'

A Genus may be in conflict with the four, Genus etc. An Attribute with the three. An Action with the two. And a Substance with (another) Substance only: thus they could be *ten* varieties.

Instances in order:—

Gloss:—Fresh leaves of the lotus-plant, coils of lotus-fibres etc. become (like) a volume of conflagration, to this deer-eyed one when, O blessed one! on her falls the bolt of separation from you, by force of fate. (91)

प्रदीपः—वस्तुगत्या विरोधाभावेऽपि यद् द्वयोर्विरुद्धयोरिवाभिधानं स विरोधः। एनं विभजते—**जातिरिति**। जात्याद्यैरिति जातिगुणक्रियाद्रव्यैः। त्रिभिरिति गुणक्रियाद्रव्यैः। द्वाभ्यामिति क्रियाद्रव्याभ्याम्। यद्यपि गुणानामपि जात्या विरोधः संभवत्येव तथापि जातेर्गुणविरोध एव प्रविष्टत्वाद्गुणस्त्रिभिरित्युक्तम्। एवं क्रिया द्वाभ्यामित्यपि द्रष्टव्यम्।

उ०:—न्यासः। **विरुद्धयोरिति**। विरोधप्रतिभाप्रयोजकरूपेण यदभिधानमित्यर्थः। यथाश्रुतशब्दोपस्थितिमहिम्ना विरोधज्ञानेऽपि शब्दस्यान्यत्र तात्पर्यान्न विरोध इत्ययं विरोधाभास इत्युच्यते। विरोधश्चैकाधिकरणसंबद्धत्वेन प्रसिद्धयोरर्थयोर्भासमानैकाधिकरणासंबद्धत्वम्। एकाधिकरणासंबद्धत्वेन प्रसिद्धयोरेकाधिकरणसंबद्धत्वेन प्रतिपादनं वा। स च बाधबुद्ध्यनभिभूतो दोषस्य विषयः। तदभिभूतोऽलंकारस्येति बोध्यम्। **क्रियेति**। क्रियाशब्देनाऽत्र धातुवाच्योऽर्थः। **अभिनवेति**। दवदहनो दवाग्निः। विधिवशातः

प्रभा:—वस्तुगत्या विरोधस्य दोषत्वादविरोधेऽपीत्युक्तम्। तद्व्याचष्टे—**वस्तुगत्येति**। **अभिनवेति**। ननु जात्योर्द्रव्ययोश्च न विरोधालंकारो भवितुमर्हति रूपकाक्रान्तत्वात्। अन्यथा मुखं चन्द्र इत्यादावपि विरोधालंकारप्रसङ्गात्। न च

**गिरयोऽप्यनुन्नतियुजो मरुदप्यचलोऽब्धयोऽप्यगम्भीराः ।
विश्वंभराऽप्यतिलघुर्नरनाथ तवान्तिके नियतम् ॥ ९२ ॥ (—)**

Even mountains (appear to) possess no height, even the wind (seems to be) motionless, even the oceans (appear) shallow, (and) even the earth (seems) extremely petty beside you, O king, to be sure. (92)

प्रदीप :—तदयमर्थः—जातिनिरूपितो भेदश्चतुर्धा । गुणनिरूपितस्तु पूर्वभेदभिन्नस्त्रिधा । एवमग्रेऽपि । तत्र जात्या जातेर्विरोधो यथा—**अभिनवेति** । अत्र नलिनीत्वकिसलयत्वादिजातीनां दहनत्वजात्या विरोधः । वियोगातिशयेन गौणत्वात्तदाभासता । एवमग्रेऽप्यूह्यम् । जातेर्गुणेन

उ० :—दैववशात् । त्वद्वियोग एव पविः वज्रम् । (गीतिश्छन्दः ।) **गौणत्वादिति** । वियोगजन्यसंतापातिशायके लाक्षणिकत्वादित्यर्थः । नन्वेवमत्रारोपमूलं रूपकमेव । न विरोधः । अन्यथा मुखं चंद्र इत्यत्रापि विरोध एव स्यादिति चेन्न । अत्र विरोधोत्थापनार्थमभेदस्य विवक्षितत्वेऽपि तस्यान्यार्थमुपादानेनाचमत्कारित्वात् । विरहिण्यवस्थायामत्यद्भुतत्वस्याऽत्र प्रतिपिपादयिषितत्वेन तदनुगुणतयांतर्गर्भितोऽप्यर्थो विरोध एव चमत्कारितया समुल्लसतीति तस्यैवालंकारत्वात् । मुखं चंद्र इत्यादौ तु चंद्रनिष्ठाह्लादकत्वादिसकलगुणानां मुखे प्रतिपत्त्यर्थं चंद्राभेद एव चमत्कारी न तु सन्नपि विरोधः । विवक्षितार्थाननुगुणत्वात् । इति रूपकमेव न तु विरोधोऽलंकारः । यदि तु विरहिण्यवस्थाया अत्यद्भुतत्वं न विवक्षितमप्यर्थश्च न गर्भीकृतः किं तु पीडाजनकत्वाद्यतिशयमात्रं तदाऽत्र रूपकमेव । यदि वा नगरविशेषस्थितेरत्यद्भुतत्वविवक्षयाऽप्यर्थगर्भीकरणेन च 'यत्र नारीणां मुखं चंद्रः' इत्युच्यते तदा तत्र विरोध एवेति दिक् ।

प्रभा :—निरवकाशं रूपकं गुणादौ सावकाशस्य विरोधस्य बाधकमिति वाच्यम् । तथा सति मृणालवलयादिदवदहनराशिरित्यादाविष्टस्य विरोधालंकारस्यासिद्धिप्रसङ्गादिति चेत्, अद्धा । परं तु यत्र यस्य चमत्कारे प्राधान्यं स तत्रालंकार इत्युच्यते । एवं च मुखं चन्द्र इत्यादौ विद्यमानोऽपि विरोधो न चमत्कारितया विवक्षितः अपि तु चन्द्राभेद एवेति रूपकमेव । दवदहनराशिरित्यादौ तु विरहिण्याद्यवस्थाया अद्भुतत्वविवक्षावशाद्विरोध एवेति व्यवस्था । न च रूपके विरोधाविवक्षायामपि विरोधे स्वानुगुण्येनाभेदस्य विवक्षितत्वाद्रूपकापत्तिरिति शङ्क्यम् । विरोधविवक्षाविरहवैशिष्ट्यस्य रूपकलक्षणे निवेशेनादोषात् । अभेदस्य विरोधाङ्गत्वेन प्राधान्येन विरोधस्यैव व्यपदेशौचित्याद्वा । एवं च मुखं चन्द्र इत्यादावपि विरोधविवक्षायां स एवालंकार

येषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च।
तेषां संगरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥ ९३ ॥ (—)

What a wonder! with volumes of dust is being accomplished by you, O king, the toilette of kings, whose minds are intent upon an encounter in battles, and growing ardent to hug whose necks, your sword, sharp (by Śleṣa : cruel) as it is, becomes red (by Śleṣa : sanguine) and attains a certain clamminess (by Śleṣa : affection). (93)

प्रदीपः—यथा—**गिरय इति।** अत्र गिरित्वादिजातीनामनुन्नतत्वादिगुणैर्विरोधः वर्णनीयातिशयविवक्षया तु परिहारः। विश्वंभरेति तु न जात्युदाहरणम्। जातेः क्रियया यथा—**येषामिति।** अत्र धाराधरत्वजातेरनुरागस्नेहपराप्तिक्रियाभ्यां विरोधः। लौहित्यचैक्कण्यार्थकत्वादविरोधः। एवमग्रेऽप्यविरोध उह्यः। तीक्ष्णत्वस्यानुरागेण विरोध इत्यपव्या-

उ०:—**गिरय इति।** नञल्पार्थे। तेनाल्पोन्नतियुजः अल्पवेगः अल्पगंभीरा इत्यर्थः। वायौ मंदवेगत्वाद्युक्तया वर्णनीये तदतिशयप्रतीतेः। अतिलघुत्वम् अपकृष्टगुरुत्वम्। (आर्या छन्दः।) **वर्णनीयातिशयेति।** वर्णनीयौन्नत्याद्यतिशयेत्यर्थः। अत्राद्ये शुद्धः द्वितीये श्लेषमूलः। एवमग्रेऽप्यूह्यम्। **येषामिति।** कंठपरिग्रहप्रणयिताम् आलिंगनप्रेमवत्ताम्। (धाराधरः खड्गः।) तीक्ष्णः दारुणः। अनुरज्यते रक्तवर्णः प्रीतिमांश्च। स्नेहश्चिक्कणता सौहार्दं च। संगरसंगो युद्धप्राप्तिः (तत्र सक्तं मनो येषां तेषाम्)। प्रसाधनमलंकरणम्। (निर्वर्त्यते क्रियते इति कौतुकम्। शार्दूलविक्रीडितं छन्दः) **लौहित्येति।** रुधिरसंपर्ककृतेत्यर्थः। **अनुदाहरणत्वेति।** तीक्ष्णत्वस्य जातित्वाभावादिति भावः।

प्रभा:—इत्यवधेयम्। **गिरय इति।** अनुन्नतिरल्पोच्चता। अचलत्वमल्पवेगत्वम्। अगम्भीरा अल्पगम्भीराः। नञो ह्यल्पार्थत्वात्। तथा चोक्तम्—'तत्सादृश्यं तदल्पत्वं तदन्यत्वं विरोधिता। अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः॥' इति। तत्सादृश्यम्—अब्राह्मण इति। तदल्पत्वम्—अनुदरा कन्येति। तदन्यत्वम्—अघटः पट इति। विरोधित्वम्—असुरा इति। अप्राशस्त्यम्—अप्रशस्तो ब्राह्मणोऽब्राह्मण इति। अभावः—भूतले घटो नास्तीति। तेन जातिगुणविरोधोदाहरणत्वसंगतिरित्याहुः। वस्तुतस्त्वभावस्यापि जातिक्रियाद्रव्यातिरिक्तत्वेन गुणान्तर्भाव एवेति ग्रन्थकृद्वक्ष्यति। अतिलघुत्वमपकृष्टगुरुत्वम्। तस्य च विश्वंभराद्रव्येण विरोधः। प्रकृते

सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम्।
अवसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम्॥ ९४॥ (—)

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः॥९५॥ (—)

पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम्।
परुषमपि सुजनवाक्यं मलयजरसवत्प्रमोदयति॥ ९६॥ (—)

Even that *Janārdana* who, to be sure, creates, protects and retracts this world but easily, (became) a *fish*, as the occasion demanded it; it is miraculous! (94)

When you are there, O king, the hands of the wives of the Brāhmaṇas, which (hands) being ever pressed against the pestles in the course of the performance of diverse household duties had grown *hard*, become *tender* like the lotus. (95)

The words of the villain, howsoever *tender*, make the mind of those who have an insight into truth, *burn acutely*. The words of the good person, howsoever *harsh*, *soothe* it like the sandal-paste. (96)

प्रदीपः—ख्यानम्। अनुदाहरणत्वप्रसङ्गात्। जातेर्द्रव्येण यथा—**सृजतीति**। अत्र शफरत्वजातेर्जनार्दनेन द्रव्येण विरोधः। गुणस्य गुणेन यथा—**सततमिति**। कठिनत्वसुकुमारत्वयोर्विरोधः। गुणस्य क्रियया यथा—**पेलवमिति**। अत्र पेलवत्वपरुषत्वयोर्गुणयोर्दाहप्रमोदक्रियाभ्यां विरोधः। यथा वा मद्भ्रातुः श्रीहर्षस्य—

सर्वतः पुरत एव दृश्यते पात्रतां न पुनरेति चक्षुषोः।
हृद्गतोऽपि भुजयोर्न भाजनं कोऽयमालि वनमालिनः क्रमः॥

अत्र दर्शनगमनक्रिययोर्गमनाभावभुजभाजनत्वाभावाभ्याम्। उक्तत्रयातिरिक्तस्यैव गुणशब्देन विवक्षणात्। 'गिरयः—' इत्यादि तथैवोदाहृतम्। गुणस्य द्रव्येण यथा—

उ०:—तीक्ष्णस्यापि क्वचिदनुरागदर्शनाच्चेत्यपि बोध्यम्। (**सृजतीति**। हेलयैव लीलयैव। अवसरवशतः कालगतेः। शफरः मत्स्यो जातः इदं चित्रम्। आर्या छन्दः।) **अत्र शफरत्वेति**। लीलया सर्वसंभवात् मत्स्यशरीरपरिग्रहस्यागमसिद्धत्वादविरोधः। **द्रव्येणेति**। आत्मपरत्वाज्जनार्दनपदस्य द्रव्यपरत्वम्। (**सततमिति**। मुसलेषु आसक्ताः। बहुतरं यत् गृहकर्म गृहव्यापारः तस्य

प्रभा:—तु तस्य नोदाहरणत्वम्। व्यक्त्यभेदेन विश्वंभरात्वस्य जातित्वाभावादित्याह—**विश्वंभरेति**। **अनुदाहरणत्वेति**। तीक्ष्णत्वस्य जातित्वाभावादिति भावः। जनार्दनस्य मत्स्यशरीरपरिग्रह आगमसिद्ध इति विरोधः। शराभिघाततैक्ष्णातिशय-

क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ यन्मार्गणाऽनर्गलशातपाते ।
अभून्नवाम्भोजदलाऽभिजातः स भार्गवः सत्यमपूर्वसर्गः ॥९७॥ (—)

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥९८॥ (मालतीमाधव १.३३.)

That descendant of Bhṛgu (viz. परशुराम)–at the unstemmed and sharp charge of whose arrows, the mount Krauñcha, solid as it was with massive rocks, became soft like a fresh lotus–petal–creates, in truth, things without a precedent! (97)

Some inscrutable feeling that transcends measure, which could not be described by any word, which has never again repeated itself in the sphere of experience, and which is bewildering owing to the great infatuation deepened by the lapse of discernment, chills (me) from inside and causes worry! (98)

प्रदीपः—**क्रौञ्चेति** । अत्राम्भोजदलाभिजातत्वस्य गुणस्य क्रौञ्चाद्रिणा द्रव्येण विरोधः । क्रियायाः क्रियया यथा—**परिच्छेदेति** । अत्र जडयति च तापं च

उ० :—करणेन संपादनेन कठिणाः द्विजपत्नीनां कराः भवति दातरि सति सरोजवत् सुकुमारा जाताः । गीतिश्छन्दः ।) **विरोध इति** । भवद्दानवशात् गृहव्यापारनिवृत्त्या तत्परिहारः । **पेशलमिति** । पेशलम् कोमलम् । सतत्त्वं तत्त्वमिति च पर्यायः । मलयरसश्चंदनद्रवः । (आर्या छन्दः ।) **विरोध इति** । पेशलपरुषपदयोः सुश्रवत्वदुःश्रवत्वार्थकतया दहतिपदस्य संतापार्थकतया च तत्परिहारः । **सर्वत इति** । दृश्यते । शास्त्रतो ज्ञायते इत्यर्थः । **क्रौंचेति** । अतिमहद्भिः पाषाणैर्दृढोऽपि यस्य (भार्गवस्य) बाणानामनर्गलं अप्रतिबंधं शातवत् वज्रवत्पाते सति नवपद्मपत्रकोमल इत्यर्थः । (भार्गवः परशुरामः । अपूर्वः सर्गः रचना यस्य । यत्कर्तृकः यत्कर्मको वा । उपजातिश्छन्दः ।) **विरोध इति** । भार्गवमहिम्नाऽभिजातपदस्य सुखवेध्यत्वपरतया परिहारः । यद्यपि

प्रभा :—विदलनस्यौपचारिकत्वेन नवाम्भोजदलसौकुमार्यस्य विवक्षितत्वात्परिहार्यः । जडीकरणतापक्रिययोः कालभेदेन वा क्रियाया जलनिधिना विरोधस्तपःप्रभावत्वातिशयेन

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥ ९९ ॥ (भल्लटशतक. १०८)

With our minds unsettled by thirst (of water and jewels), we had recourse to the ocean, thinking "This is the sole abode of waters; this the mine of jewels." Who could foresee that the sage would in a moment quaff it off, held in the cavity of his folded hands, with its sharks and crocodiles in agony ? (99)

प्रदीपः – कुरुत इति क्रिययोर्विरोधः । क्रियाया द्रव्येण यथा—**अयमिति** । अत्र पानक्रियायाः कर्मीभूतेन जलनिधिना विरोधः । यद्यपि जलनिधीनां बहुत्वेन न द्रव्यविरोधोदाहरणत्वमुचितं तथाप्येकलवणाम्बुधिपरतया समर्थनीयम् । द्रव्यस्य

उ०ः – कुमारः क्रौंचदारण इति कोशात्स्कंदे तत्त्वं प्रसिद्धम्। तथाऽपि स्कन्दसाहाय्यार्थं भार्गवोऽपि तत्कृतवानिति पुराणे प्रसिद्धम् । **परिच्छेदेति** । मालतीमाधवे मकरन्दं प्रति माधवस्य स्वावस्थाकथनमेतत् । परिच्छेद इयत्ता तमतीतस्तद्रहित इत्यर्थः । सकलानां सामान्यविशेषशक्तलाक्षणिकव्यांजनिकानां वचनानामविषयः । तैर्निर्वक्तुमशक्य इति भावः । पुनरन्यदा कालान्तरे अस्मिन् जन्मनि अनुभवपथं तद्विषयत्वं यो न प्राप्त इत्यर्थः । विवेकप्रध्वंसादिति । विवेको दोषगुणविभागः । प्रशब्देन समूलोन्मूलनलक्षणः प्रकर्षस्तेन मोहप्रकर्षस्तेन च रागातिशयस्तेन च विप्रलम्भातिशयो व्यंग्यः । तद्धेतुकां उपचितिं वृद्धिं प्राप्तो यो महामोहः सकलविषयाणामज्ञानं विपरीतज्ञानं वा यत्र तादृशश्चासौ गहनश्च दुर्लंघ्य इत्यर्थः । ईदृशः कोऽप्यनिर्वचनीयः विकारः अन्तः अन्तःकरणं जडयति विषयग्राहिवृत्तिविषये स्तब्धं करोतीत्यर्थः । (शिखरिणी छन्दः ।) **विरोध इति** । अत्र विरहवैचित्र्येण कालभेदात्तत्परिहारः । **अयमिति** । (भल्लटकविकृते भल्लटशतके पद्यम् । अयं जलनिधिः समुद्रः वारां जलानां निलयः स्थानम् । तृष्णया तरलितं आक्रान्तं मनो येषां तैरस्माभिः ।) स्वीयकरचुलुकगर्त्तगतं । कोटरो गर्त्तः । (ताम्यन्तः ग्लायन्तः तिमयः मत्स्याः मकराश्च यत्र

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक त्वयि तटजुषि शंकरचूडापगाऽपि कालिन्दी ॥ १०० ॥ (—)

(४४) स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ॥ २९ ॥

स्वयोस्तदेकाश्रययोः । रूपं वर्णः संस्थानं च । उदाहरणम्—

In consequence of its contact with the river formed by the flow of the liquid ichor of (your) intoxicated elephants, even the river on the crown of Śaṅkara (i. e. the Ganges) becomes, O crestmark of Earth, the Jumna, when you encamp on its (i. e. of the Ganges) bank. (100) !

25. SVABHĀVOKTI.

As for Svabhāvokti, it consists in the description of the action or form peculiar to the child etc.

Gloss:—स्व i. e. those (action and form) that are found solely in them (i.e. child etc.). Form i.e. Complexion and Posture. To illustrate:—

प्रदीप :–द्रव्येण यथा—**समदेति** । अत्र गङ्गायमुनयोर्विरोधः । **स्वभावोक्तिरिति** । स्वत्वं च स्वमात्राश्रितत्वम् । न तु स्वाश्रितत्वमात्रम् । अतो न साधारणधर्मवर्णनेऽ-

---

उ० :–तादृशम् । शिखरिणी छन्दः ।) **विरोध इति** । अगस्त्यतपःप्रभावातिशयेन परिहारः । **न द्रव्येति** । किं तु जातीत्यर्थः । एतेन 'असंभवोऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनम्' इत्यसंभवाऽलंकारोऽत्रेति परास्तम् । तदुक्तेर्विरोधपरिपोषकत्वात् । **समदेति** । मत्तगजमदजलप्रवाहनदीसंबंधात् । शिवस्य जूटं जटासमूहस्तत्संबंधिनी आपगा गंगा । कालिंदी यमुना । (गीतिश्छन्दः ।) **विरोध इति** । कालिंदीपदस्य श्यामाभामात्रपरत्वात्परिहारः । **इति विरोधः** । **स्वमात्रेति** । डिम्भादेरित्यनेनैव संबंधावगतेः स्वशब्दोऽन्ययोगव्यवच्छेदक इति भावः । **रूपशब्देनेति** । अजहत्स्वार्थलक्षणयेति भावः । अत्र चमत्कृतिहेतुत्वं अलंकारसामान्यलक्षणप्राप्तम् । तेन 'पश्य चायं बलीवर्दो घासमत्ति मुखेन तु' इत्यादेर्निरासः । साधारणस्वभाववर्णनस्य स्फुटत्वान्नालंकारत्वम् । असाधार-

---

प्रभा :–परिह्रियते । एवं कालिन्दीपदस्य श्यामत्वेनौपचारिकतया विरोधपरिहार इति दिक् । इति विरोधप्रकरणम् ॥ २३ ॥ वर्णस्वभावोक्तिः प्रथममरुणच्छाय इत्यादौ बोध्या ।

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाऽङ्गमुच्चै-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ॥१०१॥
(हर्षचरित. ३)

(४९) व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा ।

व्याजेन व्याजरूपा वा स्तुतिः । क्रमेणोदाहरणम्—

His sleep over, the horse, stretching out his hind legs, drawing out his body that appears extensive owing to the arch of the spine, with (his) neck bent, pressing (his) mouth against the bosom, tossing his mane smudged with dust, with his nostrils and lips ceaselessly moving in his craving for a mouthful of fodder, and neighing gently, scratches the ground with the hoof! (101)

26. VYĀJASTUTI.

'Vyājastuti' is what is censure or praise on the face of it, but whose upshot is otherwise.

Gloss:—(The figure is so called because therein is found) either praise in disguise or pretended praise. Instances in order:—

प्रदीप :– तिव्याप्तिः । रूपशब्देन वर्णः संस्थानं चोच्यते । उदाहरणम्— **पश्चादिति** । अत्राऽश्वमात्रगतयोः क्रियासंस्थानयोर्वर्णनम् । **व्याजस्तुतिरिति** । मुखे निन्दावगतौ यत्स्तुतौ पर्यवसानं स्तुतेर्वा मुखेऽवगमो निन्दायां पर्यवसानं तद्व्याजस्तुतिपदवाच्यमित्यर्थः । कथमुभयोरनेनाभिधानमिति चेत्, आद्यस्य व्याजेन

उ० :– णस्तु लोकसिद्धोऽपि प्रतिभामात्रवेद्यत्वादलौकिकवद्भातीत्यलंकारः। डिम्भ शिशुः । आदिना युवतिमुग्धकातरतिर्यग्भ्रांतहीनपात्रादिसंग्रहः । एनामेव 'जातिः' इति केचिद्व्यवहरन्ति । **पश्चादिति** । पश्चादंघ्री पश्चिमपादौ प्रसार्य त्रिकं पृष्ठवंशः तस्य नम्रतया विस्तृतमङ्गं उच्चैरतिशयेन द्राघयित्वा दीर्घं कृत्वा आभुग्नकंठो वक्रग्रीवः उरसि मुखं संयोज्य सटा ग्रीवाकेशाः तान् विधूय कंपयित्वा तृणग्रासवांछया अनवरतं निरंतरं चलन्तौ प्रोथतुण्डावोष्ठाधरौ ओष्ठाग्रे वा यस्य (क्ष्मां भूमिम् । विलिखति उत्किरति । स्रग्धरा छन्दः ।) **अत्रेति** । पश्चादि-

प्रभा :– पश्चादित्युदाहरणेऽङ्घ्रिप्रसारणादिक्रियाप्रयुक्तं संस्थानं बोध्यम् । इति स्वभावोक्तिः ॥ २४ ॥ **रूढिरिति** । एतद्व्याचष्टे—**पर्यवसानमिति** । इति व्याजस्तुतिः ॥ २५ ॥

हित्वा त्वामुपरोधवन्ध्यमनसां मन्ये न मौलिः परो
लज्जावर्जनमन्तरेण न रमामन्यत्र संदृश्यते ।
यस्त्यागं तनुषेतरां मुखशतैरेत्याश्रितायाः श्रियः
प्राप्य त्यागकृतावमाननमपि त्वय्येव यस्याः स्थितिः ॥ १०२ ॥ (—)
हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहायकं यन्मरो ॥ १०३ ॥ (—)

(Cited in पुञ्जराज's टीका on वाक्यपदीय २·२४९.)

Excepting yourself none else, I believe, is the foremost of those whose minds are void of complaisance: in none else but Ramā (i. e. लक्ष्मी) is found shamelessness (so flagrant). Since, you resolutely renounce Wealth that takes your shelter, coming to you through hundreds of openings; and since she (Wealth) abides only in you, even after having suffered the rebuff occasioned by renunciation! (102)

O ocean, that have easily surpassed the Buddha, where is the need for prolixity of words? There is none else that has, like you, taken the vow to bestow favour on others! Since you, out of compassion, render help to the Desert in shouldering the burden of infamy fallen to (its) lot, owing to (its) being averse to do an obligation to the thirsty traveller! (103)

प्रदीप:–स्तुतिरिति ग्रहणात्, अन्त्यस्य तु व्याजरूपा स्तुतिरिति । तत्राद्या यथा— **हित्वेति** । स्पष्टम् । अन्त्या यथा—**हे इति** । अत्रोपकारवैमुख्ये पर्यवसानम् ।

उ०:–त्यादिना संस्थानस्य, घासग्रासेत्यादिना क्रियाया इत्यर्थः । **इति स्वभावोक्तिः । रूढिः** । पर्यवसानम् । **अन्यथा** । स्तुतौ निंदायां वा । मुखे इत्यनेन पर्यवसानाभावं वदन् बाधितत्वममिप्रैति । अत एव नास्या ध्वनित्वम् । तत्र हि निर्बाधेन वाच्येन व्यंजनयाऽर्थांतरावगतिः । न चैवं प्रकृते । बाधेन लक्षणाप्रसरात् । उपकृतं बहु नामेत्यादिवत् इति बोध्यम् । **हित्वेति** । अनुरोधहीनमनसां मूर्धन्यस्त्वदपरो न । लज्जाशून्यत्वं च लक्ष्मीं विना नान्यत्र । उभयत्र हेतुमाह—य इति । मुखशतैः युद्धादिप्रकारशतैः । (शार्दूलविक्रीडितं छन्दः ।) राज्ञ आश्रितत्यागरूपनिंदाव्याजेन महादातृत्वेऽपि लक्ष्मीवत्त्वाभिधानात्स्तुतिः । **हे इति** । हेलया लीलया जिता बोधिसत्वा बौद्धा येन । अतिकारुणि-

(४६) सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ॥२६॥

एकार्थाऽभिधायकमपि सहार्थबलात् यत् उभयस्यावगमकं सा सहोक्तिः । यथा—

सह दिअहणिसाहिं दीहरा सासदण्डा
सह मणिवलएहिं वाप्पधारा गलन्ति ।
तुह सुहअ विओए तीअ उव्विग्गिरीए
सह अ तणुलदाए दुब्बला जीविदासा ॥ १०४॥ (कर्पूरमञ्जरी. २.१.)

---

27. SAHOKTI.

That is 'Sahokti' where one (expression), on the strength of a word signifying 'together with,' conveys two senses.

Gloss :—That is 'Sahokti' where an expression, though expressing one sense, becomes the conveyer of two, on the strength of a word meaning 'together with.'

To illustrate :—

The heavy sighs grew long *along with* the days and nights; streams of tears slipped down *along with* the jewelled bracelets; and the hope of life grew feeble *along with* the creeper-like body of that lady who got depressed at (her) separation from you, O blessed one! (104)

प्रदीपः–सेति । शब्दशक्त्या एकार्थाभिधायकं पदं यत्सहार्थान्वयबलादनेकार्थाभिधायकं सा सहोक्तिः । 'चैत्रमैत्रौ गच्छतः' इत्यादौ तु शब्दशक्त्यैवोभयाभिधानम् ।

उ० :–कानामपि जेतरित्यर्थः । परहिताधाने परहितकरणे । (शार्दूलविक्रीडितं छन्दः ।) मरुदेशेन एकाकिना निर्जलत्वात् तृषितपांथोपकाराभावजन्याऽयशोभारो गृहीतः । त्वयाऽपि क्षारजलत्वात् तं भारं गृह्णता तस्य साहायकेनोपकारः कृत इति स्तुत्या तृषितपांथाऽनुपकारेण निंदायां पर्यवसानम् । न चात्राऽप्रस्तुतप्रशंसैवास्तु । स्तुतिनिन्दात्मकतया विच्छित्तिविशेषात् । कार्यकारणभावादिसंबन्धाभावाच्च । शुद्धव्यंजनाविषयत्वाभावाच्च । ननु स्तुत्या निन्दायाः कथमलंकारत्वम्, वाच्यानुत्कर्षकत्वात् इति चेन्न । बीभत्सहास्यान्यतर-

---

प्रभा :–शब्दशक्त्येति । विशेषणपदस्य समानविभक्तिकनामार्थान्वयबोधकत्वसामर्थ्येन क्रियापदस्य च प्रथमान्तोपस्थाप्यान्वयबोधकत्वसामर्थ्येन चेत्यर्थः ।

श्वासदण्डादिगतं दीर्घत्वादि शाब्दम्, दिवस-निशादिगतं तु सहार्थसामर्थ्यात्प्रतिपद्यते।

The attribute of being long etc. is *expressed* in so far as it pertains to the heavy sighs etc. As relating to the days and nights etc., however, it is conveyed on the strength of (the word) with the sense of 'together with.'

प्रदीपः— यथा—**सहेति**। अत्र दीर्घत्वादीनां श्वासादिभिरन्वयः साक्षादेव शाब्दः, दिवसादिभिस्तु सहान्वयबलात्।

उ०ः—रसालंबनत्वान्निद्यस्य तद्रसानुकूलोत्कर्षकत्वस्य सत्त्वात् इत्याहुः। अन्यस्तुत्याऽन्यस्तुतेरन्यनिन्दयाऽन्यनिंदाया अन्यनिन्दयाऽन्यस्तुतेर्गम्यत्वेऽप्येषा। स्तुतिपदेन बोधनस्य बोधनात्। निन्दादीनां व्यङ्ग्यत्वेऽप्यलंकारत्वमप्रस्तुतप्रशंसावद्बोध्यम्। **इति व्याजस्तुतिः**। **एकार्थाभिधायकम्**। एकान्वय्यर्थाभिधायकम्। **अनेकेति**। अनेकान्वय्यर्थाभिधायकमित्यर्थः। अत्र सहशब्दार्थः साहित्यम् एकजातीयैककालिकक्रियाद्यन्वयित्वसमनियतम्। 'पुत्रेण सहागतः' इत्यत्र पुत्रप्रतियोगिकसाहित्यवानागत इति शाब्दबोधः। तेन पुत्रवृत्त्यागमनसमानकालिकसमानदेशागमनवान् पितेति मानसो बोधः। तत्र तृतीयान्तस्य विशेषणतया गुणत्वम्। प्रथमान्तस्य विशेष्यतया प्रधानत्वम्। एवं च प्रथमांते आगमनस्य शाब्दोऽन्वयः। तृतीयांते तु सहार्थसामर्थ्यादार्थः। एवं च यत्र गुणप्रधानभावावच्छिन्नयोः शाब्दार्थमर्यादया एकधर्मसंबंधस्तत्रायमलंकारः। समुच्चये तूभयत्र प्राधान्यं,

प्रभाः—**एकार्थेति**। उक्तैकार्थान्वयगमकमित्यर्थः। **सहार्थेति**। समानकालीनैकधर्मवत्त्वरूपसाहित्यान्वयबलादित्यर्थः। **अनेकार्थेति**। अनेकार्थोचितस्वार्थबोधकमित्यर्थः। एतच्चोदाहरणे स्पष्टीकरिष्यते। **सहेति**। 'सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः सह मणिवलयैर्बाष्पधारा गलन्ति। तव सुभग वियोगे तस्या उद्वेगशीलायाः सह च तनुलतया दुर्बला जीविताशा॥' अत्र यथा 'पुत्रेण सहागतः पिता' इत्यत्र पुत्रवृत्तिधर्मसमानकालीनधर्मवान्पिता। आगत इत्यागमनस्य पितर्येव शाब्दोऽन्वयः। पुत्रे तु सहार्थसाहित्यबलादागमनबोधः। आगमनरूपधर्मस्यैवागतपदसमभिव्याहारेण धर्मत्वेन बोधात्। (विरोधात्)। एवमिहापि श्वासदण्डेषु दीर्घत्वान्वयः शाब्दः विशेषतो

(४७) विनोक्तिः सा विनाऽन्येन यत्रान्यः सन्न नेतरः ।

क्वचिदशोभनः, क्वचिच्छोभनः । क्रमेणोदाहरणम्—

अरुचिर्निशया विना शशी शशिना साऽपि विना महत्तमः ।
उभयेन विना मनोभवस्फुरितं नैव चकास्ति कामिनोः ॥ १०५ ॥ (—)

---

28. VINOKTI.

That is 'Vinokti' where *without* one thing another ceases to be good or ceases to be its contrary (i. e. non-good).

Gloss:—(The thing becomes) in some cases, bad; in some, good. Instances in order:—

In the absence of the Night, the Moon becomes void of splendour; likewise, in the absence of the Moon, it (i. e. Night) becomes one patch of (महत्) of darkness. In the absence of both, the spark of love on the part of lovers does not flash at all! (105)

प्रदीपः – विनोक्तिरिति। सन्न शोभनो न, नेतरो नाशोभन इत्यर्थः। तेन केनचिद्विना कस्यचिदशोभनत्वं शोभनत्वं वा प्रतिपाद्यते सा विनोक्तिः। तत्राशोभनत्वं यथा–**अरुचिरिति।** शोभनत्वं यथा—**मृगेति।** अत्र मृगलोचनया दुष्टसुहृद्विशेषेण च विना नरेन्द्रसूनोर्विचित्र-व्यवहारप्रगल्भत्वचन्द्रसुन्दराशयत्वरूपं शोभनत्वमुक्तम्। **परिवृत्तिरिति।** परिवृत्तिरिति

उ०ः – शाब्द एव चैकान्वय इति ततो भेदः। 'चैत्रमैत्रौ सह गच्छतः' इत्यादावपि तथैवेति नायमलंकारः। हृद्यत्वं चालंकारसामान्यलक्षणप्राप्तम्। तेन 'अनेन सार्द्धं विहरांबुराशेः' इत्यादौ नेयम्। हृद्यत्वं चास्याः श्लेषभित्तिकाभेदाध्यवसानात्मकेन केवलाभेदाध्यवसानात्मकेन वाऽतिशयेनानुप्राणने भवतीति बोध्यम्। (**सहेति।**) 'सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः सह मणिवलयैर्बाष्पधारा गलन्ति। तव सुभग वियोगे तस्या उद्विग्नायाः सह च तनुलतया दुर्बला जीविताशा।' (कर्पूरमंजर्यां द्वितीयजवनिकांतरे नायिकाया विरहावस्थावर्णनम्।) दंडाकाराः श्वासाः श्वासदण्डाः। बाप्पो नेत्रांबु। अत्र दिवसनिशादौ दीर्घत्वं दुःखदायित्वादौपचारिकम्। इयं धर्मयोरभेदाध्यवसायमूला। **इति सहोक्तिः।** **विनोक्तिरिति।** अत्रापि विनाशब्दार्थ एव विवक्षितः। तेन नञ्-निर्-वि-

---

प्रभाः – दिवसनिशादौ साहित्यप्रतीत्या आर्थं इति लक्षणसंगतिः। दीर्घादिपदं तु दिवसादीनामपि धर्मत्वेन दीर्घत्वादिबोधे तात्पर्यग्राहकतया हेतुरिति बोध्यम्। इति सहोक्तिप्रकरणम्॥२६॥

मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः ।
अमृतद्युतिसुन्दराशयोऽयं सुहृदा तेन विना नरेन्द्रसूनुः ॥१०६॥ (—)

(४८) परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः ॥ २७ ॥

When *apart from* the deer-eyed one, this son of the king becomes bright with the flash of (his) genius for diverse affairs. He comes to possess a heart as lovely as the moon, *in the absence of* that friend! (106)

29. PARIVṚTTI.

'Parivṛtti' is an exchange that may take place of objects for (others) equal or unequal (to them).

प्रदीपः – लक्ष्यालंकारनिर्देशः। पूर्वाचार्याणां तथैवोद्देशदर्शनात्। अतो न लक्ष्यलक्षणसंदेहः। समासमैरिति विभागः । विनिमयो हि केनचिद्वस्तुना दत्तेन कस्यचिदादानम् । तच्च क्वचित्समेन समस्य। क्वचिदसमेनासमस्य। अन्त्यमपि द्विधा—क्वचिन्न्यूनेनोत्तमस्य, क्वचि-

---

उ० : – अंतरेण-ऋते-रहित-विकलेत्यादिप्रयोगेऽपि इयमेव । **अरुचिरिति ।** (अपरवक्त्रं छन्दः।) न चात्र शशिसहितैव निशा रमणीयेति सहोक्तिध्वनिरेव युक्तः। तत्कृतस्यैव चमत्कारस्य सत्त्वादिति वाच्यम् । वाच्यार्थकृतस्य चमत्कारस्यानपलपनीयत्वात् । **मृगेति ।** (विचित्रेषु व्यवहारेषु प्रतिभा झटिति स्फूर्तिः तस्याः प्रभया प्रकाशेन प्रगल्भः चतुरः । अमृतद्युतिः चन्द्रः तद्वत् सुन्दरः स्वच्छः आशयः अन्तःकरणं यस्य।) य एव राजपुत्रः स्त्रीमोहितः कृत्यविकलः स एव तया विनाऽतिव्यवहाराभिज्ञः । य एव दुष्टसुहृदालिंगितो विषमहृदयः स एव तेन विनाऽतिसदयहृदय इत्यर्थः । (मालभारिणी छन्दः।) **इति वि-**

प्रभाः – विनोक्तिरित्यादि स्पष्टम्। इति विनोक्तिप्रकरणम् ॥ २७ ॥ **न्यूनेनोत्तमस्येति ।** न्यूनेन दत्तेनोत्तमस्यादानमित्यर्थः । एवमुत्तमेन दत्तेन न्यूनस्योपादानमित्यर्थो ज्ञेयः । अत्र समेन समस्येत्यस्यानुपादेयत्वेन समत्वविवक्षायां चतुर्थोऽपि भेदः कैश्चिदुदाहृतः । यथा—'अस्थिमालामयीं दत्त्वा मुण्डमालामयीं तनुम् । गृह्णतां त्वत्पुरस्थानां को लाभः स्मरशासन ॥' इति । एवं दानाद्यभावेऽपि धर्मिधर्मभावव्यत्यासे वा विपर्ययाख्योऽलंकार उक्तः । यथा—'काचो मणिर्मणिः काचो येषां तेऽन्ये हि देहिनः । सन्ति ते सुधियो येषां काचः काचो मणिर्मणिः ॥' अत्र काचस्य धर्मित्वं मणेर्धर्मत्वमुक्त्वा अनन्तरं मणेर्धर्मित्वं काचस्य धर्मत्वमुक्तमिति धर्मभावविपर्यासः । धर्मस्यासौ यथा—'यस्य न सविधे दयिता'—

परिवृत्तिरलंकारः। उदाहरणम्—

लतानामेतासामुदितकुसुमानां मरुदयं
मतं लास्यं दत्वा श्रयति भृशमामोदमसमम्।
लतास्त्वध्वन्यानामहह दृशमादाय सहसा
ददत्याधिव्याधिभ्रमिरुदितमोहव्यतिकरम् ॥ १०७ ॥ (—)

अत्र प्रथमेऽर्धे समेन समस्य, द्वितीये उत्तमेन न्यूनस्य।

नानाविधप्रहरणैर्नृप संप्रहारे
स्वीकृत्य दारुणनिनादवतः प्रहारान्।

'Parivṛtti' is (the name of) the figure. To illustrate:—

Bestowing graceful movements that are highly prized on those Creepers in blossom, this Wind accepts (from them) often unequalled fragrance; the Creepers, on the contrary, receiving at once the glance of the passers-by, give (in return) a blend of anguish, disease, delusion, sobs and swoons! (107)

Here in the first half, there is an exchange of an equal for another equal; in the second half, of the superior for the inferior.

The host of haughty hostile warriors, having received, in the encounter, blows of terrific din, with a variety of weapons, made

---

प्रदीपः—दुत्तमेन न्यूनस्येति त्रिविधेयमित्यर्थः। समासमत्वं चोपादेयत्वानुपादेयत्वाभ्याम्। तत्राद्यद्वयं यथा—**लतानामिति**। अत्र प्रथमार्धे लास्येनोपादेयतया समस्यामोदस्य,

---

उ०:—**नोक्तिः। कस्यचिदादानमिति**। परकीयस्य कस्यचिदादानमित्यर्थः। विनिमयपदस्य तत्रैव शक्तेः। एवमादाय दानमपि सा। दानादानव्यवहारः कविकल्पित एव न वास्तवस्तत्रालंकारत्वाभावात्। तेन 'क्रीणन्ति यत्र मुक्ताभिर्बदराण्यपि बालिकाः' इत्यत्र नेयम्। परकीयस्येत्युक्तेः 'किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम्' इत्यत्र नेयम्। विनिमयाभावात्। **लतानामिति**। (अयं मरुद्वायुर्लतानाम् असमं अनुपमं आमोदं परिमलं श्रयतीत्यन्वयः। मतं मनोरमं लास्यं नृत्यं दत्वा। अर्थात्

प्रभा:—इति पद्ये। अत्र हि पूर्वार्धे तुहिनदीधितौ दवदहनत्वमुत्तरार्धे तु दवदहने तुहिनदीधितित्वमिति विपर्यासः। न तु धर्मधर्मिविपर्यासः। तस्य यथास्थिततत्वेनैव विवक्ष-

दृप्तारिवीरविसरेण वसुंधरेयं
निर्विप्रलम्भपरिरम्भविधिर्वितीर्णा ॥ १०८ ॥ (—)

अत्र न्यूनेनोत्तमस्य ।

(४९) प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः ।
तद्भाविकम्

भूताश्च भाविनश्चेति द्वन्द्वः । भावः कवेरभिप्रायोऽत्रास्तीति भाविकम् । उदाहरणम्—

---

over to you, O king, this Earth, whose act of embracing (you) was not to be intercepted by a separation (from you)! (108)

Here is an exchange of the inferior for the superior.

30. BHĀVIKA.

That is 'Bhāvika' where objects, past or future, come to be visualised as though they were present.

Gloss:—भूतभाविनः is a Dvandva compound to be dissolved as भूताश्च भाविनश्च (past and future). It is called 'Bhāvika,' since therein is present the Bhāva i. e. vision (?) of the poet. To illustrate:—

प्रदीपः–द्वितीयार्धे उपादेयतया उत्तमया दृशा आधिव्याधीनामतादृशतया न्यूनानां विनिमयः । अन्त्या यथा—**नानेति** । अत्रोत्तमया वसुंधरया न्यूनानां प्रहाराणां विनिमयः । **प्रत्यक्षा इति** । भूतभाविन इति द्वन्द्वः न कर्मधारय इत्यविरोधः । भूता भा-

---

उ०ः–लताभ्यः । अध्वन्यानां पांथानाम् । अहह इति खेदे । आधिः मनःपीडा, व्याधिः कायपीडा, भ्रमिः दिग्भ्रमणदर्शको विकारः, रुदितम् रोदनम्, मोहो निश्चेष्टता, एषां व्यतिकरं समूहम् ।) मरुत्संबंधेन लतानां लास्यदर्शनात् लतादर्शनेन च पथिकानामाध्यादिदर्शनाद्दातृत्वं कविकल्पितम् । (शिखरिणी छन्दः ।) **नानेति** । दृप्तारिवीरसमूहेन हे नृप युद्धे त्वच्छस्त्रप्रहारान्स्वीकृत्य तुभ्यं विरहशून्याऽऽलिंगनवती वसुमती वितीर्णेत्यर्थः । (वसन्ततिलका छन्दः ।) **इति परिवृत्तिः । प्रत्यक्षतयेति ।** अलौकिकप्रत्यक्षविषया अपि लौकिकप्रत्यक्षविषयतयेत्यर्थः । अभिप्रायो लौकिकप्रत्यक्षविषयत्वेन प्रतिपादनेच्छा । न

प्रभाः–णात् । दयितविरहोपाधिना परस्परधर्मविपर्यासस्यैव च विवक्षणादित्यवधेयम् । इति परिवृत्तिप्रकरणम् ॥ २८ ॥ **अविरोध इति** । भूतानां भाविकस्याप्रतीतेरित्यर्थः ।

आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसंभारां साक्षात्कुर्वे तवाकृतिम् ॥ १०९ ॥ (—)

अत्र आद्ये भूतस्य, द्वितीये भाविनो दर्शनम् ।

(५०) काव्यलिङ्गं हेतोर्वाक्यपदार्थता ॥ २८ ॥

I see (your) eyes as they were (इति) when the collyrium *was* in them; directly do I visualise your figure (as it would be) with the set of ornaments that *will be* there. (109)

31. KĀVYALIṄGA.

'Kāvyaliṅga' occurs where the reason assumes the form of the sense of a sentence or a word.

प्रदीप: – विनो भावा यत्प्रत्यक्षा इव क्रियन्ते प्रत्यक्षतयाऽभिधीयन्ते तद्भाविकम् । भावः कवेरभिप्रायो निश्चयादिप्रतीतिविषयकोऽत्रास्तीति व्युत्पत्तेरित्यर्थः । उदाहरणम्—**आसीदिति** । अत्र पूर्वार्धे भूतस्याञ्जनस्य उत्तरार्धे भाविनो भूषणसंभारस्य प्रत्यक्षतयाऽभिधानम् ।

उ०: – चेयं भ्रांतिः । भूतभावित्वेनैव निर्देशात् । अंजनाद्यसत्त्वेऽपि तत्कृतशोभाद्यभिप्रायेण तथाप्रयोगाच्च । न चैवं स्वभावोक्तिः । तत्र वस्तुधर्मो वैचित्र्याधायकः । इह तु कवेस्तन्निबद्धस्य वाऽभिप्राय इति विशेषात् । **आसीदिति** । अत्र यदंजनं दत्तमासीत् इति तद्युक्ते लोचने पश्यामीत्यर्थः । भाविभूषणैः संभ्रियते सा । तद्युक्तामित्यर्थः । (भाविभूषणानां संभारः समूहो यत्र तादृशीम् इति वा) यथाश्रुते आसीदिति पश्यामीत्याद्यन्वये भूतादेर्लौकिकसाक्षात्कारविषयत्वं नोपपादितं स्यात् । अत्रांजनभूषणादिकं विनाऽपि स्वरूपवैलक्षण्येनैव शोभातिशयात्तेषां वैयर्थ्यं ध्वन्यते । क्वचिद्भूतत्वादिनिर्देशं विनाप्येष दृश्यते । 'अहं विलोकयेऽद्यापि युध्यंतेऽत्र सुरासुराः' इत्यादौ । अत्रेदं चिंत्यम् । असंबंधे संबंधरूपातिशयोक्त्यैव गतार्थोऽयम् । प्रत्यक्षासंबंधेऽपि तत्संबंधवर्णनात् । भूतादिवस्त्वसंबंधेऽपि तत्संबंधवर्णनाच्चेति । साऽनुप्राणिकाऽत्रेति कश्चित् । **इति**

प्रभा: – **निश्चयादीति** । अञ्जनादेः पूर्वकालीनसत्तानिश्चयसूचनेऽभिप्राय इत्यर्थः । आदिनाञ्जनादिकं विनापि तत्कृतशोभासत्त्वादिकं गृह्यते । इति भाविकप्रकरणम् ॥ २९ ॥

वाक्यार्थता यथा—

वपुःप्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्।
नमन्मुक्तः संप्रत्यहमतनुरग्रेऽप्यनतिभाक्
महेश क्षन्तव्यं तदिदमपराधद्वयमपि ॥ ११० ॥ (—)

Gloss:—In the form of the sense of a sentence as in:—

That, in all probability, I never saluted you, O enemy of Pura (i. e. Śiva), in any of my former births was inferred (by me) from the manifestation of (my) body. Now, saluting (you) and (thereby) becoming emancipated, when I become bodiless, I shall fail to salute you, also in time to come. O great lord! pardon *both these lapses* (on my part)! (110)

प्रदीपः–काव्यलिङ्गमिति। अत्र विवक्षितविवेकेन हेतुवचनं काव्यलिङ्गमिति लक्षणम्। वाक्यपदार्थतेति विभागः। वाक्यार्थता पदार्थता चेत्यर्थः। तत्र वाक्यार्थता यथा—**वपुरिति**। अत्र पुरा क्वचिदपि नाहं भवन्तं प्रणतवान् अग्रेऽप्यहमनतिभा-

---

उ०ः–भाविकम्। हेतोरिति। स्वतोऽनुपपद्यमानार्थोपपादकहेतोर्वचनमित्यर्थः। **पदार्थतेति**। पदमप्येकनेकं चेति बोध्यम्। व्याप्त्याद्यनिर्देशान्नानुमानसंकरः। श्रोतुर्यल्लिंगकानुमितिबुबोधयिषया कवेर्व्याप्त्यादिविशिष्टहेतुबोधककाव्यनिर्माणं तल्लिंगमनुमानविषयः। काव्यलिंगजानुमितिस्तु न कविना श्रोतुर्बुबोधयिषिता किं तु श्रोतर्युत्पिपादयिषितेति भेद इत्यन्ये। **वपुरिति**। क्वचित्कस्मिन्नपि जन्मनि। (पुरा प्रायः भवन्तं अहं न प्रणतवान्। इदं वपुषः प्रादुर्भावाद-नुमितम्।) त्वन्नतौ शरीरोत्पत्तेरभावात्। (संप्रति नमन्मुक्तः अतनुः शरीर-शून्यः अहं अग्रेऽपि अनतिभाक् नतिरहितः। इदं अपराधद्वयं क्षंतव्यम्। शिखरिणी छन्दः।) अग्रेऽप्यनतौ अतनुत्वमेकपदार्थो हेतुः। अतनुत्वे च नमन्मुक्त इत्यनेकपदार्थो हेतुः। **अनमनमपराधे इति**। यद्यप्यनमनमेवापराधस्तयोश्च न हेतुहेतुमद्भावस्तथापि तदिदमित्यस्य सर्वनाम्नां बुद्धिस्थपरामर्शकत्वात् दुरितविशेषरूपमित्यर्थः। क्षंतव्यमित्यस्य च लक्षणया नाशनीयमित्यर्थ इत्यदोषः। **प्रणयीति**। (मालतीमाधवे पंचमांके) मालतीवधोद्यतम-

---

प्रभाः–अनमनमपराध इति। अपराधोऽत्र दुरितं विवक्षितम्। तत्रानमनस्य हेतुत्वम्। अपराधस्य क्षमणं च तत्फलानुत्पादनं तन्नाशनं वेति नानुपपत्तिः। तदिति चानम-

अनेपकदार्थता यथा—

प्रणयिसखीसलीलपरिहासरसाधिगतै—
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥१११॥ (मालतीमाधव. ५·३१.)

एकपदार्थता यथा—

भस्मोद्धूलन भद्रमस्तु भवते रुद्राक्षमाले शुभं
हा सोपानपरम्परां गिरिसुताकान्तालयालंकृतिम्।
अद्याराधनतोषितेन विभुना युष्मत्सपर्यासुखा-
लोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे ॥ ११२ ॥ (—)

In the form of the sense of words more than one, as in:—

Let this arm alight unawares, like the staff of Yama, on your head, when you are hurling your weapon, with the intent of killing, against that figure there, which gets distressed even with the flicks of the tender शिरीष blossoms, sustained, thanks to the fancy for sportive merriment on the part of (her) loving friends! (111)

In the form of the sense of one word as in:—

Farewell to thee, O Smearing-of-ashes! O Rosary of Rudrākṣas, good-bye! Alas! how I feel for the flight of steps, the ornament of the temple of Śiva, the beloved of Pārvatī! This day, we are being plunged by Śiva, pleased with the worship, in the great *delusion* called Emancipation, that puts an end to the light (आलोक) of pleasure derived from treating you (viz. भस्मोद्धूलन etc.) with esteem! (112)

प्रदीप:—गित्यवान्तरवाक्ययोरर्थोऽनमनमपराधे हेतुः। अनेकपदार्थता यथा—**प्रणयीति**। अत्र शस्त्रोपक्षेपो भुजपाते हेतुः। न चायं वाक्यार्थः। 'शस्त्रमुपक्षिपतः' इत्येतावन्मात्रस्यावाक्यार्थत्वात्। तत्र वपुषि वधाय शस्त्रमुपक्षिपत इत्यस्यापि न वाक्यत्वम्। विशेषणत्वादिति

उ०:—घोरघण्टं प्रति माधवस्येयमुक्तिः। प्रियसख्याः सलीलो यो हास्यरसस्तेन प्राप्तैः। ललितम् मनोहरम्। (तत्र वपुषि वधाय शस्त्रं उपक्षिपतः तव शिरसि एषः भुजः अकांडे अकाले यमदंड इव पततु इत्यन्वयः। नर्कुटकं छन्दः।) **अवाक्यार्थत्वादिति**। विशेषणीभूतार्थोपस्थापकत्वेन विशेष्यसाकांक्षत्वादिति भावः।

प्रभा:—नद्वयजन्यं दुरितद्वयपरामर्शकम्। न त्वनमनद्वयस्य। हेतुत्वस्य शाब्दत्वेऽलंकारत्वस्यानिष्टत्वात्। **विशेषणत्वादिति**। तत्रेति षष्ठ्यन्तार्थे विशेषणत्वादित्यर्थः।

एषु अपराधद्वये पूर्वापरजन्मनोरनमनम्, भुजपाते शस्त्रोपक्षेपः, महामोहे सुखालोकोच्छेदित्वं च यथाक्रममुक्तरूपो हेतुः ।

In these instances, (1) in the matter of the two lapses, the failure to salute in the former and later births, (2) in the matter of the alighting of the arm, the hurling of the weapon, and (3) in the matter of the great delusion, the characteristic of putting an end to the light of pleasure, are respectively the reason of the nature specified (in the definition).

प्रदीपः—तदर्थस्यापि हेतुत्वे न वाक्यार्थस्य हेतुत्वमिति । एकपदार्थता यथा —**भस्मेति**। अत्र महामोहत्वे सुखालोकोच्छेदिता हेतुः । तच्च समासादेकपदार्थ एव । अर्थान्तरन्यासे तटस्थतयोपनिबद्धस्य हेतुत्वे पर्यवसानम्, इह तु साक्षादेव हेतुविभक्त्यादिना हेतुतयोपनिबद्ध

उ०:—भस्मेति। शिवप्रसादेन जाततत्त्वज्ञानस्येयमुक्तिः। हा सोपानपरंपराम्। तस्याः शोच्यतेत्यर्थः। तत्संस्कारकर्त्रभावात्। (गिरिसुताकांतस्य शिवस्य आलयः प्रासादः तस्य अलंकृतिम् अलंकारभूताम् । युष्माकं भस्मोद्धूलनादीनां या सपर्या पूजा तत्सुखस्य आलोकः प्रकाशः तदुच्छेदके तन्नाशके मोक्षसंज्ञके महामोहे निधीयामहे । 'वयम्' इति शेषः । शार्दूलविक्रीडितं छन्दः ।) **तटस्थतयेति**। परस्परमनन्वितत्वेनेत्यर्थः। **पर्यवसानमिति**। सामान्याद्यर्थस्योक्तस्य प्रामाण्यग्रहहेतुत्वमित्यर्थः। **इह तु साक्षादेवेति**। तत्तत्पदार्थनिरूपितहेतुतयोपनिबद्ध इत्यर्थः। हेतुविभक्त्यादिनेति क्वाचित्कोऽपपाठः। गम्यमानहेतुत्वकस्यैव हेतोः सुंदरत्वेन प्राचीनैः काव्यलिंगाभ्युपगमात्। अत एव वपुःप्रादुर्भावादनुमितमित्यंशे नायमलंकार इत्याहुः। सामान्यविशेषभावसंबंधानालिंगितत्वेन ततो भेद इत्यन्ये। केचित्तु निर्हेतुरूप-

---

प्रभा:—अर्थान्तरन्यास इति। अत्रेदं विचार्यम्—काव्यलिङ्गेऽपि सुखालोकोच्छेदितेत्युक्तोदाहरणेऽन्यत्र च बहुशो हेतुविभक्तितच्छब्दादिहेतुवाचकपदाभावात्कथं काव्यलिङ्गता । अर्थान्तरन्यासे निजदोषावृतमनसामित्यादावतिसुन्दरस्य विपरीतत्वेन भाने तादृशजनवृत्तित्वेन साक्षात्पित्तोपहतत्वं हेतुर्नोच्यते किंतु शङ्खपीततादर्शनगतत्वेनेति ताटस्थ्यम् । काव्यलिङ्गे तु मोक्षरूपे पक्षे साक्षादेव सुखालोकोच्छेदित्वमुच्यते इति भेद इत्युच्यते । तथापि हेतुविभक्त्यादिनेत्यसंगतमेव । उक्तोदाहरणे तदभावात् । प्रत्युत पञ्चम्या हेत्वभिधाने 'अलमतिचपलत्वात्' 'प्रजानां विनयाधानात्' इत्यादौ काव्य-

(८१) पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः ।

वाच्यवाचकभावव्यतिरिक्तेनावगमनव्यापारेण यत् प्रतिपादनम्, तत् (पर्यायेण भङ्गयन्तरेण कथनात्) पर्यायोक्तम् । उदाहरणम्—

यं प्रेक्ष्य चिररूढाऽपि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ॥ ११३ ॥ (हयग्रीववध ?)

---

32. PARYĀYOKTA.

'Paryāyokta' is that statement which is without the Expressed–Expresser relation.

Gloss:—The statement by the process of suggestion which is distinct from the Expressed–Expresser relation is called 'Paryāyokta;' since it is based on a statement by Paryāya, i. e. a different mode.

To illustrate:—

At whose sight, was given up by Ichor and Pride their fancy to abide (respectively) in the face of Airāvaṇa and the mind of Hari (i. e. Indra). (113)

प्रदीपः—इति ततो भेदः । **पर्यायोक्तमिति** । वाच्यवाचकभावभिन्नेनावगमनव्यापारेणार्थाद्वाच्यस्यैव यदभिधानं तत्पर्यायोक्तम् । पर्यायेण भङ्गयन्तरेणाभिधानात् । ध्वनेस्तु न वाच्य एवार्थो विषय इति ततो भेदः । उदाहरणम्—**यमिति** । अत्रैक एवार्थ ऐरावतशक्रौ मदमानविमुक्तौ जाताविति व्यञ्जनया मदमानाभ्यां तयोरधिकरणयोर्निवासप्रीतिरुज्झितेत्यभिधया च प्रतिपाद्यते । तेन च यदेवोच्यते तदेव व्यङ्ग्यम् । न चैवं प्रतिपन्नस्यैव प्रति-

---

उ०:—दोषाभावः काव्यलिंगम् । हेतुहेतुमद्भावस्य वस्तुसिद्धत्वेन कविप्रतिभानिर्वर्त्यत्वाभावात् । तत्प्रयुक्तचमत्काराभावेनास्यालंकारताया दुरुपपादत्वाच्च । श्लेषादिसंमिश्रणेऽपि तत्कृत एव चमत्कारो नैतत्कृत इत्याहुः । **इति काव्यलिंगम्** । **पर्यायोक्तमिति** । **वचः** । प्रतिपादनम् । अवगमनव्यापारो व्यंजना । भंग्यंतरं प्रकारभेदः । तेन न पौनरुक्त्यम् । **ध्वनेस्त्विति** । व्यंग्यस्यागूढ-

---

प्रभा:—लिङ्गस्यानिष्टत्वात् । तस्मात्साक्षात्परम्परया वा यत्र कारकहेतुरर्थतोऽवगम्यते तत्काव्यलिङ्गम् । उक्तार्थदृढप्रत्ययाय यत्रार्थान्तरन्यसनं तत्रार्थान्तरन्यासः । किंचिदर्थज्ञापकतया हेतुकथनमनुमानमित्येव व्यवस्था युक्ता । तथा हि काव्यलिङ्गोदाहरणे ध्वनमनस्यापराधे कारकहेतुत्वमेव । तथा भुजपाते शस्त्रोपक्षेपस्य, मुक्तेर्मोदरूपत्वे आलोकोच्छेदस्यापि कारणत्वं योगक्षेमसाधारणं विवक्षितम् । एवं निजदोषेत्यादे

अत्र ऐरावणशक्रौ मदमानमुक्तौ जाताविति व्यङ्ग्यमपि शब्देनोच्यते, तेन यदेवोच्यते तदेव व्यङ्ग्यम्, यथा तु व्यङ्ग्यं न तथोच्यते; यथा गवि शुक्ले चलति दृष्टे, 'गौः शुक्लश्चलति'—इति विकल्पः, यदेव दृष्टं तदेव

Here, the idea that ऐरावण and शक्र (i. e. इन्द्र) got purged of ichor and pride, though suggested, is yet expressed by words. Consequently, whatever is expressed, is itself suggested; but it is not expressed in the way in which it is suggested. To illustrate: On the sight of a bull, white

प्रदीपः—पत्तिरफलेति किं व्यापारद्वयेनेति वाच्यम्। यतो यथा व्यङ्ग्यं तथा नोच्यते। प्रकारयोर्भेदात्। एकरूप एव वस्तुनि प्रकारभेद एव कथं स्यादिति चेत्, यथा शुक्ले गवि चलति

उ०:—त्वादिति भावः। (**यमिति**) यं रावणम्। हरेः इंद्रस्य। **एक एवार्थ इति**। विमोचननिवासप्रीतित्यागयोरेकत्र पर्यवसानादिति भावः। **तेन चेति**। तथा च लक्षणसंगतिः। पौनरुक्त्यं शंकते। **न चेति**। **यथेति**। येन प्रकारेण व्यंग्यं तेन रूपेण शब्देन नोच्यत इत्यर्थः। एकस्यैव प्रकारभेदेन वाच्यत्वव्यंग्यत्वयोरविरोधः। यथा यावककुसुंभजपाकुसुमादिरूपाणां रक्तत्वादिना वाच्यत्वेऽपि तत्तद्वैजात्यरूपेण प्रत्यक्षत्वमेव न वाच्यत्वं तथेहापीति भावः। **न पुनर्यथेति**। निर्विकल्पके शुक्लतदाश्रयगोत्वतदाश्रयचलनतदाश्रया विशकलिता भासंते, सविकल्पके तु संसृष्टतयेत्यर्थः। निर्विकल्पकस्य विशिष्टधीहेतुत्वादिति भावः। **भिन्नत्वेति**। भेदोऽतद्व्यावृत्तिस्तच्छून्यत्वेन संसर्गराहित्येन च निर्विकल्पकविषयता। भेदोऽतद्व्यावृत्तिः परनये। तस्याः सविकल्पके विशेषणत्वं बाह्या मन्यंते। अन्यमते **संसृष्टत्वेति**। प्रकारशब्दो विषयमात्रपरः। एवं च यथा निर्विकल्पकस्य विशिष्टविज्ञानहेतुत्वात्ततो वैलक्षण्यं तथा निवासप्रीतित्यागरूपवाच्यज्ञानस्य मदमुक्तत्वरूपव्यंग्यज्ञानहेतुत्वाद्वैलक्षण्यमिति भावः। यद्वा निर्विकल्पके किंचित्त्वेन वस्तु भासते, सविकल्पके तु तत्त-

प्रभाः—दोषस्य भ्रमं प्रति कारकहेतुत्वोक्तेः पूर्वार्धे काव्यलिङ्गम्। तस्य तु दृढप्रत्ययार्थमुत्तरार्धे विशेषसहचारोपन्यासः। न तु विशेषरूपोऽर्थः। सामान्यार्थे कारकहेतुरिति न काव्यलिङ्गतेति। अनुमाने तु ज्ञापकहेतूपन्यासः। अस्मादिदं गम्यत इति। तेन यत्र ज्ञापकहेतुनानुमितिः कवितात्पर्यविषया तत्रानुमानालंकार इति दिक्। इति काव्यलिङ्गम् ॥ ३० ॥ **अर्थादिति**। पर्यायोक्तपदसामर्थ्यादित्यर्थः। **यथा निर्विक-**

विकल्पयति, न तु यथा दृष्टं तथा। यतोऽभिन्नाऽसंसृष्टत्वेन दृष्टम्, भेदसंसर्गाभ्यां विकल्पयति।

and moving, we get the determinate idea, "There moves the white bull;" there one cognises determinately the same object as was sighted, but not in the way in which it was sighted. Since, one cognises determinately by way of exclusion or association what was seen as non-excluded or non-associated.

प्रदीपः–निर्विकल्पकसविकल्पकयोः एक एव ह्यर्थस्ताभ्यां विषयीक्रियते। न पुनर्यथा निर्विकल्पकविषयस्तथैव सविकल्पकेनाऽपि विषयीक्रियते। भिन्नत्वसंसृष्टत्वाविषयकं निर्वि-

उ०:–न्नामरूपजात्यादिप्रकारेणेति 'न पुनर्यथा' इत्यादेरर्थः। इदमेव भिन्नत्वाविषयकत्वादीति बोध्यम्। अत्र व्यंग्यमगूढं वाच्यादचारु चेति न ध्वनित्वम्। 'नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ' इत्यत्रापि भगवान् वासुदेवो राहुशिरश्छेदकारित्वरूपेण स्वासाधारणधर्मेण व्यंग्यस्ततोऽपि चारुतरेण राहुवधूकुचवैयर्थ्यकारित्वेन रूपान्तरेणाभिहितः। केनचिद्रूपेण व्यंजनया लभ्यस्यार्थस्य ततोऽपि चारुतरेण रूपेण यत्र वाच्यतेति लक्षणतात्पर्यात्। यद्यपि भगवतः पूर्वप्रक्रान्तत्वाद्यच्छब्देनाभिधानाच्च न व्यंग्यत्वम्, तथापि व्यंग्यतावच्छेदकरूपेण वाच्यत्वाभावाद्व्यङ्ग्यत्वमेव। एवं च प्रकारभेदाद्व्यङ्ग्यस्यैवाभिधाविषयत्वं युक्तम्। न च प्राप्ताप्राप्तविवेकन्यायेन धर्मांशे एव व्यंग्यत्वं न धर्म्यंशे इति वाच्यम्। धर्मिणः स्वरूपतोऽवाच्यत्वात्। यदि धर्मी स्वरूपतः कस्यचिद्वाच्यः स्यात्स्यादपि तथा। औपाधिकभेदेन घटाकाशादिषु भेदप्रतीतिवत् तत्तद्धर्मरूपोपाधिभेदेन धर्मिणोऽपि भेदेन धर्मिणोऽपि व्यंग्यत्वाच्च। एतेन 'व्यंग्यस्य प्रकारान्तरेणाभिधानासंभवात् कार्यमुखेन कारणाभिधानं पर्यायोक्तम्। उदाहरणे राहुवधूकुचनैष्फल्यरूपेण कार्येण राहुशिरश्छेदः कारणरूपो गम्यते' इत्यलंकारसर्वस्वोक्तमपास्तम्। प्रकाशोदाहरणविरोधाच्च। यत्तु 'पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम्। शुकं भो-

प्रभाः–**ल्पकविषय इति।** निर्विकल्पकविषयो यथा केवलस्तथा सविकल्पकेन न विषयीक्रियत इत्यर्थः। तथा चैकप्रकारत्वाभावेऽयं दृष्टान्त इति ज्ञेयम्। भिन्नप्रकारत्वे तु निर्विकल्पके प्रकाराभावादसंगतिः स्यादिति। अत एव निर्विकल्पकसविकल्पक-

(९२) उदात्तं वस्तुनः संपत्

संपत् समृद्धियोगः । यथा—

मुक्ताः केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः
प्रातः प्राङ्गणसीम्नि मन्थरचलद्बालाङ्घ्रिलाक्षारुणाः ।
दूराद्दाडिमबीजशङ्कितधियः कर्षन्ति केलीशुकाः
यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्यागलीलायितम् ॥ ११४ ॥ (—)

---

33 A. UDĀTTA.

'Udātta' consists in the abundance of a thing.

Gloss:—Sampat means 'possession of superabundance'.

To illustrate:—

It is the play of the generosity of King Bhoja that, in the mansions of the learned, the parrots meant for amusement pick up the pearls, from a distance, suspecting in their minds that they are pomegranate-seeds: pearls that had slipped down the necklaces, the threads of which had given way in the course of dalliance (केलि), and which (pearls) on being swept off by brooms got tinged red in the morning with the lac-dye on the feet of the maidens as they trudged along the border of the front court-yard! (114)

प्रदीपः–कल्पकं, भिन्नत्वसंसृष्टत्वप्रकारकं तु सविकल्पकमिति । **उदात्तमिति** । संपत्समृद्धियोगः । न तु तस्यैवातिशयः । उदाहरणम्—**मुक्ता इति** । अत्र विद्वद्भवनस्य

उ०:–जयितुं यामि युवाभ्यामास्यतामिह ॥ अत्र नायिकां नायकेन संगमय्य शुकभोजनव्याजेन निर्गच्छन्त्या सख्या तत्स्वाच्छन्द्यरूपेष्टसाधनं पर्यायोक्तम्' इति। तत्तु ध्वनिमर्यादां नातिशेते इति दिक् । एवं च 'अनायि देशः कतमस्त्वयाऽद्य वसन्तमुक्तस्य दशां वनस्य' (नैषधेऽष्टमसर्गे २५ पद्यम्) इत्यत्रापि अयमेव । 'अयं देशोऽलंकर्तव्यः' इत्यादौ चेत्यलम् । **इति पर्यायोक्तम्** । **उदात्तमिति** । महतां चोपलक्षणमिति वक्ष्यमाणतया नपुंसकानपुंसकयोरेकशेषः । **वस्तुनः** । धनशौर्यौदार्यादेः । एतेन 'शौर्यादेस्तदुक्तौ अत्युक्तिनामा पृथगलंकारः' इत्यपास्तम् । अत्रासंबंधे संबंधातिशयोक्तिरनुप्राणिका । **मुक्ता इति** । (केलौ क्रीडायां विसूत्राः

प्रभा:–प्रकारभावमेवाह—**भिन्नत्वेति** । भिन्नत्वं विशेषणगम्या अतद्व्यावृत्तिः । वृत्तौ चाभिन्नासंसृष्टत्वेनेत्यकारप्रश्लेषो बोध्यः । केचित्तु निर्विकल्पकेऽपि यत्किंचिदिदमिति किंचि-

(५३) **महतां चोपलक्षणम् ॥ २९ ॥**

उपलक्षणमङ्गभावः, अर्थादुपलक्षणीयेऽर्थे । उदाहरणम्—

तदिदमरण्यं यस्मिन्दशरथवचनाऽनुपालनव्यसनी ।
निवसन्बाहुसहायश्चकार रक्षःक्षयं रामः ॥ ११५ ॥ (—)

न चात्र वीरो रसः । तस्येहाङ्गत्वात् ।

---

33 B. UDĀTTA.

And it consists in the subservience of the great.

Gloss:—उपलक्षण i. e. Subservience; of course to the thing which is to be described. To illustrate:—

This is the same forest dwelling in which Rāma who courted distress for upholding the word of Das'aratha exterminated the demons, with the arm for his helper. (115)

It should not be urged that here the Heroic Sentiment (is prominent); since it is, in this case, subservient.

प्रदीपः—मुक्तादिधनसमृद्धियोगः । **महतामिति** । महतां यदुपलक्षणमङ्गभावः अर्थाद्वर्णनीये, तदप्युदात्तमित्यर्थः । उदाहरणम्—**तदिदमिति** । अत्रैतादृशो महान्रामो दण्डकाया वर्णनीयाया अङ्गम् । नन्वत्र रामगत उत्साहातिशय एव चमत्कारनिदानं, तस्य प्रधानत्वाद्विच्छित्त्यन्तराभावाच्च किंविषयोऽयमलंकारव्यपदेश इति

उ०:—छिन्नसूत्राः ये हाराः तेभ्यः गलिताः।) बाला षोडशवर्षा। (त्यागलीला दानलीला सेव आचरितमित्यर्थः। शार्दूलविक्रीडितं छन्दः।) **समृद्धियोग इति**। तेन वर्णनीयनृपतेः समृद्ध्यतिशयः। 'सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलम्' इत्यादौ पौरसमृद्धिर्व्यंग्येति व्यंग्योऽयम्। **वर्णनीये इति**। अंगिनीत्यर्थः। **तदिदमिति**। पुष्पकविमानस्थस्य लक्ष्मणस्यांगदं प्रतीयमुक्तिः। (आर्या छन्दः।) महत्त्वं च रामस्य दशरथाज्ञावशात्साम्राज्यत्यागपूर्वकवनवासात् बाहुमात्रसाहाय्येन सकलरक्षःक्षयकरणाच्च। अत्र दंडकारण्यस्याऽङ्गित्वम्, रामस्यांगत्वम्। ईदृशो रामो यत्र स्थित इत्यरण्यस्याधिक्यम्। **उत्साहातिशय एवेति**। वीरप्रधानस्य रामस्य बाहुसहायत्वेन तदतिशयप्रतीतेः रक्षःक्षयस्यानु-

---

प्रभा:—त्वेन वस्तु भासत इति यथाश्रुतोपपत्तिमाहुः। इति पर्यायोक्तप्रकरणम् ॥ ३१ ॥ **न तु तस्यैवेति**। बदरामलकाम्रदाडिमानामित्यादौ पर्यायालंकारभेदेऽतिप्रसङ्गादिति भावः। उपलक्षणमिति भावप्रधानमित्याशयेनाह—**अङ्गभाव इति**। वर्णनीयाया

(५४) तत्सिद्धिहेतावेकस्मिन्यत्रान्यत्तत्करं भवेत्।
समुच्चयोऽसौ

तस्य (प्रस्तुतस्य कार्यस्य) एकस्मिन् साधके स्थिते साधकान्तराणि यत्र संभवन्ति, स समुच्चयः। उदाहरणम्—

दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽत्युत्सुकं
गाढं प्रेम नवं वयोऽतिकठिनाः प्राणाः कुलं निर्मलम्।

34 A. SAMUCCAYA.

That is 'Samuccaya' where one cause capable of achieving that (thing) being present, another achieving the same, presents itself.

Gloss:—Where one circumstance, capable of bringing about that i. e. the effect under consideration, being present, other circumstances capable of achieving it present themselves, the figure is 'Samuccaya.' To illustrate:—

Irresistible are Cupid's arrows; the beloved is away; the mind most uneasy; the passion vehement; the age in its prime; the life very tenacious; the family untainted; the feminine nature opposed to

प्रदीप:–वाच्यम्। नह्यत्र वीरो रसः प्रधानम्। तस्येहाङ्गत्वात्। **तत्सिद्धीति**। तत्सिद्धिहेतौ तस्य प्रस्तुतस्य कार्यस्य साधके। समाधावतुल्यकक्षयोः कारणयोरुपादानमत्र तु तुल्यकक्षयोरिति विशेषः। उदाहरणम्–**दुर्वारा इति**। अत्र स्मरमार्गणा एव

उ०:–भावस्य प्रतीतेश्च ध्वनित्वं स्यादिति भावः। **अंगत्वादिति**। अंगोत्कर्षकत्वादित्यर्थः। अंगांगस्य चाप्राधान्यान्न ध्वनित्वमिति भावः। रामविषयकरतिभावस्याप्यपरिपुष्टत्वान्न भावध्वनित्वम्। **इत्युदात्तम्। इति विशेष इति**। समाधौ हि एकेन कार्ये निष्पाद्यमानेऽन्येनाकस्मादापतता सौकर्यादिरूपातिशयसंपादनम्। (अत्र तु) एककार्यसंपत्तौ सर्वेषां खलेकपोतन्यायेन पातः, कार्यस्य च न कोऽप्यतिशय इति भावः। काव्यलिंगे हेतुत्वमात्रं विवक्षितं न तु हेतूनां गुणप्रधानभावस्यैकत्वानेकत्वस्य वा चिन्ता। अत्र तु एकस्यैव तत्कार्यकारित्वेऽन्येषां साहाय्यमात्रमिति ततो विशेषः। **दुर्वारा इति** (मयूरसूनोः शंकुकर्णस्य पद्यमिति शार्ङ्गधरपद्धतौ स्पष्टम्।) स्वं प्रति विधिं प्रति वा काचिद्वदति। (स्मरस्य मदनस्य मार्गणाः बाणाः।) दुरे प्रवासात्। गाढं अतिशयितम्।

प्रभा:–इति तस्याः प्राधान्यसूचनायोक्तम्। इत्युदात्तप्रकरणम्॥ ३१॥ **समाधाविति**। 'समाधिः सुकरं कार्यं कारणान्तरयोगतः' इति लक्षणात्समुच्चीयमानमपि कारणा-

स्त्रीत्वं धैर्यविरोधि मन्मथसुहृत्कालः कृतान्तोऽक्षमो
नो सख्यश्चतुराः कथं नु विरहः सोढव्य इत्थं शठः ॥ ११६ ॥
(मयूरसूनोः शंकुकर्णस्य ?)

अत्र विरहासहत्वं स्मरमार्गणा एव कुर्वन्ति, तदुपरि प्रियतमदूरस्थित्यादि उपात्तम् । एष एव समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्यवस्यतीति न पृथक् लक्ष्यते । तथाहि—

कुलममलिनं भद्रा मूर्तिर्मतिः श्रुतशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्येते भावा अमीभिरयं जनो
व्रजति सुतरां दर्पं राजंस्त एव तवाङ्कुशाः ॥ ११७ ॥ (—)

---

equanimity; the season friendly to love; Death relentless; the friends not at all tactful. How indeed could such roguish separation be borne! (116).

Here, the arrows of Cupid by themselves render the separation intolerable. Over and above that are stated (as being present) the stay of the beloved in the distance etc. This very Samuccaya may take place with the combination of circumstances that are (1) good, or (2) bad, or (3) good and bad; hence it has not been defined separately (for the different combinations). To illustrate:—

A spotless family, a winning figure, an intellect equipped with learning, enough strength of the arm, vast wealth, unimpaired sovereignty: these things are naturally enviable; on the score of these, man here gets a good deal affected by conceit. But they themselves are as goads to you, O king! (117).

प्रदीपः– विरहासहत्वं कुर्वन्ति ततोऽधिकं प्रियतमदूरस्थित्याद्युपात्तम् । एष एवोक्तलक्षणः समुच्चयः सद्योगेऽसद्योगे सदसद्योगे च पर्यवस्यतीति यत्केनचित्ते पृथग्लक्षितास्तदयुक्तम् । तथाहि—**कुलमिति**। अत्र कुलादीनां समीचीनानामेव

उ०ः– कुलनैर्मल्यात्स्वाच्छंद्याभावः। न चैवं धैर्यमेव कार्यमत आह–स्त्रीत्वमिति। मन्मथसुहृत् । विरहिणीपीडकत्वात् । कालः वसंतः । अक्षमः मारणे । झटिति नाशाकर्तृत्वात् । अचतुराः नायकादिघटनाऽसमर्थाः । शठः पीडादायीति विरहविशेषणम् । शठेति विधिसंबोधनं वा । (शार्दूलविक्रीडितं छन्दः ।) **पृथगिति**। सद्योगसमुच्चयत्वादिनेत्यर्थः । **कुलमिति** । निर्मलं कुलम् । सुंदरता । वेदादि-

---

प्रभाः–न्तरं सौकुमार्यमात्रोपयोगि न त्वितरकारणतुल्यकक्षमित्यर्थः । चिन्त्यत्वे

अत्र सतां योगः । उक्तोदाहरणे त्वसतां योगः ।

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ११८ ॥

(भर्तृहरि, नीतिशतक. ५६.)

अत्र शशिनि धूसरे शल्ये शल्यांतराणीति शोभनाऽशोभनयोगः ।

Herein there is the combination of good things; in the instance already cited, however, there is the combination of bad ones.

The moon that becomes obscure by day, the passionate woman whose youth is lost, the lake destitute of lotuses, the mouth, void of syllables, of one of graceful form, the master given to (amassing) wealth, the virtuous person ever in distress, (and) the villain in the royal courtyard–these are the seven thorns (rankling) in my mind! (118)

Here, when the thorn of the moon getting obscure is there, other thorns present themselves, thereby giving rise to a combination of the good and bad.

प्रदीपः–योगः । दुर्वारा इत्याद्युक्तोदाहरणे स्मरमार्गणादीनामसमीचीनानाम् । **शशीति** । अत्र सदसतोर्योगः । दुर्जननस्यासत्त्वात् शश्यादीनां सत्त्वात् । एतच्चिन्त्यम् । पूर्वं दूरस्थित्यादिविशेषणेन, धूसरत्वादिनाऽत्राप्यसम्यक्त्वमिति । समुच्चयान्तरमाह—**स**

उ०:–ज्ञानम् । अतिशयितं बलम् । लक्ष्मीवृद्धिः । अकुंठं प्रभुत्वम् । (प्रकृत्या सुभगाः सुन्दराः भावाः पदार्थाः ।) दर्पोऽहंकारोऽपथप्रवर्तकः । अंकुशास्तत्प्रतिबंधकाः । (हरिणी छन्दः ।) कुलादीनां प्रकृतिसुभगत्वेन समीचीनत्वम् । अत्र निर्मलकुले दर्पतदभावहेतौ सत्येव भद्रमूर्त्यादिकमपि तत्त्वेनोपात्तम् । एवं स्मरमार्गणादिनां विरहिणीदुःखदत्वादसमीचीनत्वम् । **शशीति** । (भर्तृहरिकृते नीतिशतके पद्यम् । स्वाकृतेः शोभनाकृतेः । दुर्गतः दरिद्रः । शल्यानि बाणाग्राणि । पृथ्वी वृत्तम् ।) शशी स्वरूपेण सन्नपि दिवसधूसरत्वेनासन् । एवम-

---

प्रभा:–हेतुमाह—**पूर्वमिति** । दुर्वारा इत्युदाहरण इत्यर्थः । विशेषणेनासम्यक्त्वमित्यन्वयः । तत्रापि हि प्रियतमस्य सत्त्वमेव दूरस्थितिविशेषणेन परमसत्त्वम् । इहापि स्वतःसुन्दरस्य शशिनो दिवसधूसरत्वेनेत्यसद्योग एवेत्यर्थः । आदिपदेन गलितयौवनत्वादिपरिग्रहः । वस्तुतस्त्वत्र सदसद्योगपदे न द्वन्द्वः किं तु कर्मधारयः । संश्चासावसंश्च सदसन्नि-

(८९) स त्वन्यो युगपद्या गुणक्रियाः ॥ ३० ॥

गुणौ च क्रिये च गुणक्रिये च गुणक्रियाः । क्रमेणोदाहरणम्—

विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलं च ।
प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥ ११९ ॥ (—)

---

34 B. SAMUCCAYA.

While it is another (variety of it) where Attributes and Actions are (described as being) simultaneous.

Gloss:—Attribute and Actions may be two attributes, two actions, or one attribute and one action. Instances in order:—

No sooner did this army of yours that had annihilated the entire host of the enemies become *bright* all at once than those faces of the miscreants turned *gloomy*! (119)

प्रदीप :– त्वन्य इति। अत्र गुणाः क्रियाश्चेति विग्रहे संख्याविशेषस्याविवक्षणात् विशेषविवक्षाविरहेण च सजातीयवद्विजातीयस्यापि यौगपद्यस्य लाभात् गुणौ च क्रिये च गुणक्रिये च युगपद्भवतः, स त्रिरूपः समुच्चयः । तत्र गुणयोर्यौगपद्यं यथा—**विदलितेति ।**

उ० : – ग्रेऽपि। एवमत्र सदसतां शश्यादीनां योगः। **अत्र सदसतोर्योगः दुर्जनस्यासत्त्वात् शश्यादीनां सत्त्वादिति ।** इदं चिंत्यम् । एवं हि सहचरभिन्नता स्यात् । सर्वत्र विशेष्यस्य शोभनत्वं विशेषणस्याशोभनत्वं च प्रक्रांतमिति भग्नप्रक्रमता वा स्यात् । तस्मान्नृपांगणमसद्युतमिति पाठो युक्तः । सदसदिति च कर्मधारयो युक्तः । अत्रैकैकमपि मानसशल्यभूतज्ञानजनने हेतुस्तत्रान्यदपि षट्कमुपात्तमिति लक्षणसमन्वयः । **पूर्वमिति ।** प्रियतमः शोभनोऽपि दूरस्थत्वदोषेणाशुभ इत्यर्थः । चिंताबीजं तु एकस्य तथात्वेऽपि मार्गणवयोवसंतानां केवलानामपि विरहिणीदुःखदानां सत्त्वमिति असद्योगोदाहरणमेव तदिति । उक्तोदाहरणेषु सतां योगस्यासतां योगस्य सदसद्योगस्य वा युक्तत्व-

---

प्रभाः –(दि) ति । तादृशानामनेकेषामेककार्यजनने समुच्चय इत्यर्थः । एवमपि दुर्वाराः शशीत्यनयोः यथं भेद इति चेत्, इत्थम्—दुर्वारा इत्यत्र विरहासहिष्णुतया प्रियतमादीनां सतामप्यसत्त्वेन विवक्षा । इह तु शोभनस्य सतो धूसरत्वादिना अशोभनत्वमपीति विवक्षा । अत एव पूर्वं कथं (नु) सोढव्य इत्युपसंहारो दुष्टत्वाभिप्रायेण । अत्र तु मनसि सप्त शल्यानीत्युपसंहृतं सुन्दरत्वेनान्तःप्रविष्टानामपि व्यथा-

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुःसहो मे ।
नववारिधरोदयादहोभिर्भवितव्यं च निरातपत्वरम्यैः ॥ १२० ॥
(विक्रमोर्वशीय. ४·३.)

कलुषं च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः ।
पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥ १२१ ॥ (—)

'धुनोति चासिं तनुते च कीर्तिम्'—इत्यादेः, 'कृपाणपाणिश्च भवान् रणक्षितौ, ससाधुवादाश्च सुराः सुरालये'—इत्यादेश्च दर्शनात्, 'व्यधिकरणे'—इति 'एकस्मिन् देशे'—इति च न वाच्यम् ।

Here has befallen me all of a sudden this extremely intolerable separation from that beloved at a time when the days are to become pleasant on account of their being free from heat, thanks to the advent of fresh clouds ! (120)

As soon as your eye whose grace is like that of a white lotus, fell on the enemy suddenly becoming grim, there also fell apparently on their person the oblique glances of Miseries, O pre-eminent king !

It should not be urged (that the figure takes place, only if the simultaneous attributes etc, abide) in the different abodes, or only if they abide in the same abode, as one comes across instances (to the contrary), like " He brandishes the sword and extends his fame," and " You are armed with the sword on the battlefield when the gods acclaim you in heaven."

प्रदीप :—अत्र विमलत्वमलिनत्वयोः । क्रिययोर्यथा—**अयमिति** । अत्रोपगतो भवितव्यं चेति क्रिययोः । गुणक्रिययोर्यथा—**कलुषमिति** । अत्र कलुषत्वपतनयोर्गुणक्रिययोः । अत्र कश्चिद्वैयधिकरण्य एव समुच्चय इत्याह । तन्न युक्तम् । 'धुनोति चासिं तनुते च

उ० :—स्यायुक्तत्वस्य वाऽप्रतीतेर्न समस्य विषमस्य वाऽलंकारस्यात्र प्रसंग इति दिक् । **विशेषविवक्षाविरहेणेति** । गुणत्वक्रियात्वरूपविशेषेत्यर्थः । केचित्तु गुणौ च क्रिये च गुणक्रियाः, गुणश्च क्रिया च गुणक्रिये, तयोरेकशेषेण वक्ष्यमाणार्थलाभ इत्याहुः । **युगपदिति** क्रमव्यावृत्त्यर्थम् । (**विदलितेति** । विदलितं नाशितं सकलानां अरीणां कुलं येन तत् । बलम् सैन्यम् । प्रकृष्टाः खलाः

प्रभा :—हेतुत्वादित्यनवद्यम् । ननु गुणक्रिया इति बहुवचनाद्गुणाः क्रियाश्चेति विग्रहे बहूनां गुणानां यौगपद्यमेव लभ्यते । एवं बह्वीनां क्रियाणामेव तल्लभ्यते । न तु द्वयोर्गुणयोर्द्वयोश्च क्रिययोस्तथा द्वयोर्गुणक्रिययोरतस्तल्लाभोपायमाह—**अत्रेति** । सत्यम् ।

(८६) एकं क्रमेणानेकस्मिन्पर्यायः

एकं वस्तु क्रमेणानेकस्मिन् भवति क्रियते वा, स पर्यायः।

क्रमेणोदाहरणम्—

नन्वाश्रयस्थितिरियं तव कालकूट
केनोत्तरोत्तरविशिष्टपदोपदिष्टा।

35A. PARYĀYA.

When one happens to be in many, in turn, the figure is 'Paryāya.'

Gloss:—When one object, in turn, abides or is made to abide in different places, the figure is 'Paryāya.'

Instances in order:—

O Virulent Poison, who indeed taught you this manner of staying in abodes, in which the successive positions are more and more exalted?

प्रदीप:—कीर्तिम्' इत्यादौ सामानाधिकरण्येऽपि दर्शनात्। केचित्तु सामानाधिकरण्य एवाय-मित्याहुस्तदपि न सम्यक्। 'कृपाणपाणिश्च भवान्रणक्षितौ ससाधुवादाश्च सुराः सुरालये' इत्यादौ वैयधिकरण्येऽपि तद्दर्शनात्। **एकमिति**। एकत्वेन विवक्षितं वस्तु यत्र क्रमेणानेकस्मिन्भवति क्रियते वा स एकः पर्यायः। अत्र क्रमेणेति समुच्चयव्यावर्तनाय। प्रयोजकानिर्देशतन्निर्देशौ भवतिकरोत्यर्थौ। न तु स्वाभाविकत्वास्वाभाविकत्वे। वृषलक्ष्मणः कण्ठे कालकूटवासस्या-स्वाभाविकत्वेन भवतीत्यत्रानुदाहरणत्वापत्तेः।

उ०:—दुष्टाः। आर्या छन्दः।) **अत्रेति**। तयोराश्रयभेदेन चाभ्यां समुच्चय इत्यर्थः। (**अयमिति**। विक्रमोर्वशीये चतुर्थाङ्के पुरूरवस उक्तिः।) एकपदे अकस्मात्। (प्रियया उर्वश्या। उपनतः प्राप्तः। निरातपत्वेन आतपराहित्येन रम्यैः। भवितव्यम् भूतम्। मालभारिणी छन्दः।) **अत्रेति**। अत्राप्याश्रयभेदः। (**कलुषमिति**। स्वभावतः सितपंकेरुहसोदरा श्वेतकमलतुल्या श्रीः यस्य तादृशं चक्षुः अहितेषु शत्रुषु विषये अकस्मात् कलुषं क्रोधात् रक्तं च। मालभारिणी छन्दः।) **वैयधिकरण्ये एवेति**।) आश्रयभेद एवेत्यर्थः। **इति समुच्चयः**। **समुच्चयेति**। वक्ष्यमाणविशेषालंकारद्वितीयभेदवारणाय चेत्यपि बोध्यम्। तत्र यौगपद्यसत्त्वादिति भावः। **नन्विति**। (भल्लटकविकृते भल्लटशतके पद्यम्।) आश्रयस्थितिः आश्रयणरीतिः। विशिष्टपदा विशिष्टाधिकरणा।

प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ
कण्ठेऽधुना वससि वाचि पुनः खलानाम् ॥ १२२ ॥ (भल्लटशतक. ४.)

यथा वा—

बिम्बोष्ठ एव रागस्ते तन्वि पूर्वमदृश्यत ।
अधुना हृदयेऽप्येष मृगशावाक्षि लक्ष्यते ॥ १२३ ॥

(नवसाहसांकचरित ६.६०.)

First, you dwelt in the heart of the Ocean; then in the throat of the bull–signed Śiva; and now you abide in the speech of the wicked! (122)

Or as in

O slim lady, formerly the Rāga (red hue) was to be seen only in your Bimba-like lips. Now it (Rāga, i. e. passion) is noticed, O fawn-eyed one, even in the heart! (123)

प्रदीपः–तत्राद्यो यथा—**नन्विति**। अत्र कालकूटस्य वस्तुत एकस्यानेकत्र वासे प्रयोजकं किंचिदपि नोक्तम् । न केवलमयं वास्तविक एकत्वे, किं त्वारोपितेऽपि । यथा—**बिंबोष्ठ एवेति**।

उ० :–(वसन्ततिलका छन्दः ।) अत्राधारभेदाद्भिन्न आधेय एकत्वेनाध्यवसितः । ***श्रोणीति**। श्रोणीभागादीनां प्राथमिकाधारत्वमार्थम् । सेवते इत्यनेन मध्ये पूर्वमतनुतासत्ता बोधिता । एवमग्रेऽपि । अत एव विनिमयः संगच्छते । तनुता कार्श्यम् । तरलगतयः चंचलगतयः चंचलदर्शनं च । कुचसचिवताम् सद्वितीयताम् । धत्ते इत्यनेन तस्मिन्प्रागद्वितीयता या स्थिता सा वक्त्रेण गृहीतेति बोधितम् । मुखेऽद्वितीयत्वं निरुपमत्वम्, वक्षसि द्वितीयराहित्यम्, तयोश्चाभेदाध्यवसायः । कुचसचिववक्षस्त्वेनैव मुखस्य निरुपमत्वम् । अत्र तनुत्वत्यागादिना तत्तदुत्कर्षो व्यंजनया बोध्यते । **बिंबोष्ठ एवेति**। न चैकसंबंधनाशोत्तरमपरसंबंधे सत्येव लोके पर्यायप्रसिद्धेः कथमिदमुदाहरणमिति वाच्यम् । एकमनेकस्मिन्क्रमेणेत्येव लक्षणात् । शब्दसाम्यमात्रेण लौकिका-

---

*अयमपि श्लोकः काव्यप्रकाशस्थ इति क्वचित् पठ्यते–"श्रोणीभागस्त्यजति तनुतां सेवते मध्यभागः पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम् । धत्ते वक्षः कुचसचिवतामद्वितीयं च वक्त्रम् तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥"

रागस्य वस्तुतो भेदेऽप्येकतयाऽध्यवसितत्वादेकत्वमविरुद्धम् ।

तं ताण सिरिसहोअररअणाहरणम्मि हिअअमेक्करसं ।
बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण ॥ १२४ ॥ (—)

(आनन्दवर्धन's विषमबाणलीला.)

Though, as a matter of fact, the Rāga (abiding in the two things) is distinct, still, in so for as it is conceived to be identical, its identity is not incongruous.

That heart of theirs (i. e. demons), solely absorbed in Viṣṇu. (lit. whose ornament is the jewel कौस्तुभ that sprang from the same source as Lakṣmī) was riveted by the flower-arrowed Cupid, on the Bimba-like lower lips of beloveds! (124)

प्रदीपः–अत्र प्रयोजकानिर्देशः स्फुट एव । रागपदार्थस्य त्वोष्ठे लौहित्यात्मकतया हृदये तु स्नेहात्मकत्वेन भेदेऽप्येकत्वस्याध्यवसानान्नैकत्वविवक्षाविरोधः । द्वितीयो यथा—

उ०ः–र्थाविवक्षणात् । एतेनात्र वर्धमानालंकारः पृथगिति अपास्तम् । (**तं ताणेति ।**) 'तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् । बिंबाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥' श्रीसहोदरं रत्नं कौस्तुभस्तदाभरणे हरौ । एकरसं तत्परम् । कामेन प्रियाबिंबाधरचुंबनाद्यासक्तं कृतमित्यर्थः । केचित्तु यदसुराणां हृदयं विजिगीषाज्वलनजाज्वल्यमानं श्रीसहोदररत्नानामासमंतात् हरणे तत्परमासीत्, तत्सुकुमारतरोपकरणेनाऽपि कामेन प्रियाबिंबाधरे निवेशितं सकलरत्नसारतुल्यो बिंबाधर इति तेषामभिमानोत्पत्तेः । एवं च व्यंग्योपमाऽत्रेत्याहुः । तन्मतेऽपि हरणस्य वैषयिकाधारत्वात्पर्यायाक्षतिरेव । (गाथा छन्दः ।) अत्राऽपि क्रमेणेति

प्रभाः–बहुत्वविवक्षायामुक्तदोषः स्यात् । न चेह संख्याविशेषविवक्षा । एवं सजातीययौगपद्यस्यापि । एवं च गुणयोः क्रिययोश्च यौगपद्यस्येव गुणक्रिययोर्यौगपद्यस्यापि लाभादुक्तार्थलाभो निरवद्य इत्यर्थः । अन्ये तु गुणाश्च क्रियाश्चेति द्वन्द्वे बहूनामेव समुच्चयः स्यादतो गुणौ च क्रिये चेति द्वन्द्वोत्तरं गुणक्रियाश्च गुणक्रिये चेति गुणक्रिया इत्येकशेषाद्द्वयोर्द्वयोरेव समुच्चय इति त्रिविधः समुच्चयोऽयमित्याहुः । एतन्मते द्विवचनान्तेनोत्सर्गतः समासाभावात्तत्कल्पनक्लेशः । द्वयोरेव समुच्चय इत्यप्ययुक्तम् । 'प्रादुर्भवति पयोदे कज्जलमलिनं बभूव नभः । रक्तं च पथिकहृदयं कपोलपाली मृगीदृशः पाण्डुः ॥' इत्यादौ बहूनामपि गुणानां समुच्चयस्येष्टत्वात् । तथा—'उदितं मण्डलमिन्दो रुदितं सद्यो वियोगिवर्गेण । मुदितं च सकलललनाचूडामणिशासनेन

(५७) अन्यस्ततोऽन्यथा ।

अनेकमेकस्मिन् क्रमेण भवति क्रियते वा, सोऽन्यः । क्रमेणोदाहरणम्—

मधुरिमरुचिरं वचः खलानाममृतमहो प्रथमं पृथु व्यनक्ति ।
अथ कथयति मोहहेतुमन्तर्गतमिव हालहलं विषं तदेव ॥१२५॥ (—)
तद्गेहं नतभित्ति मन्दिरमिदं लब्धावकाशं दिवः
सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः ।

---

35 B. PARYĀYA

The other (variety of it) is the reverse of it.

Gloss:—That is the other (variety of पर्याय) where things more than one abide or are made to abide, in turn, in one and the same place.

Instances in order :—

Pleasing on account of (their) sweetness, Oh ! the words of the wicked first hold out plenty of nectar ! Later, they themselves intimate the virulent poison, that was as though hiding in them, a source of stupefaction ! (125)

Where there was that house with drooping walls, there this mansion (now) invades the region of the sky ! Where there was that milch—

प्रदीपः—**तं ताणेति** । अत्र 'कुसुमबाणेन' इति प्रयोजकनिर्देशः । **अन्य इति** । अनेकमेकस्मिन्क्रमेण यद्भवति क्रियते वा, सोऽन्यः पर्याय इत्यर्थः । पूर्ववद्व्याख्येयम् । तत्र भवत्यर्थे यथा—**मधुरिमेति** । अत्रैकस्मिन्खलवचसि क्रमेणामृतव्यञ्जने विषकथने च न प्रयोजकनिर्देशः । करोत्यर्थे यथा—**तद्गेहमिति** ।

उ०:—समुच्चयवारणाय । (**मधुरिमेति** ।) मधुरिम्णा रुचिरम् । अथ (विचारानंतरम्) मोहहेतुं तदेवांतर्गतं विषं कथयतीवेत्यन्वयः । (पुष्पिताग्रा छन्दः । **तद्गेहमिति** ।) नतभित्ति खर्वम् । दिवः स्वर्गाल्लब्धावकाशम् । मं-

---

प्रभा:—मदनेन ॥' इत्यादौ बह्वीनां क्रियाणां समुच्चयस्यासंग्रहप्रसङ्गात् । अतः स यथोक्त एव प्रकारः समीचीन इति संक्षेपः । इति समुच्चयप्रकरणम् ॥ ३३ ॥ मतान्तरनिरासायाह—**प्रयोजकेति** । **तं इति** । 'तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् । बिम्बाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥' इति संस्कृतम् । तेषामिति । दैत्यानामित्यर्थः । **पूर्ववदिति** । भवति क्रियत इत्येतदित्यर्थः । इति पर्यायप्रक-

स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषिताम्
आश्चर्यं दिवसैर्द्विजोऽयमियतीं भूमिं समारोपितः ॥ १२६ ॥
(Cited in ध्वन्यालोक. ३.)

अत्र एकस्यैव हानोपादानयोरविवक्षितत्वात् न परिवृत्तिः ।

(५८) अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः ॥ ३१ ॥

पक्षधर्माऽन्वयव्यतिरेकित्वेन त्रिरूपो हेतुः साधनम्, धर्मिणि अयोग-व्यवच्छेदो व्यापकस्य साध्यम् । यथा—

---

cow grown old, there roar these cloud-like rows of elephants! Where there was that low thud of pestles, there (is heard) this sweet music of damsels! O wonder! This Brahman has been lifted to such a position *by days!* (126)

Here the figure is not Parivṛtti since it is not intended to convey the giving and receiving by one and the same person.

36. ANUMĀNA.

That is said to be 'Anumāna' where we have the statement of the deduction and the means thereto.

Gloss:—The means to deduction is a reason that is threefold, in so far as it (1) must be the attribute of the particular case, (2) must be present in a positive case, (3) and must be absent from a negative case. The deduction consists in the denial of absence of the more extensive in the object qualified (by the means to deduction).

प्रदीप :–अत्रैकस्मिन्द्विजे तद्गेहतन्मन्दिरयोरनेकैः दिवसैरिति प्रयोजकनिर्देशः । न चेयं परिवृत्तिः हानोपादानयोरविवक्षितत्वात् । **अनुमानमिति** । पक्षे संबन्धः, सपक्षवृत्तित्वं, विपक्षावृत्तित्वं चेति रूपत्रयवान्हेतुः साधनम् । व्यापकत्वाभिमतस्य पक्षेऽयोगव्यवच्छदो व्यापकसंबंधपर्यवसन्नः साध्यम् । तदुभयवचनमनुमानालंकारः । यथा—

उ० :–दिरं राजयोग्यं गृहम् । (जरती जीर्णा । घनाभाः । घनतुल्याः । घटा-श्रेणयः । कलम् मधुरस्वरम् ।) दिवसैर्न तु मासैर्वर्षैर्वा । (भूमिम् । अवस्थाम् । समारोपितः प्रापितः इत्याश्चर्यम् । शार्दूलविक्रीडितं छन्दः ।) **हानम्** । स्वीयः वस्तुसमर्पणम् । **उपादानम्** । परकीयवस्तुग्रहणम् । **इति पर्यायः । साधनमिति** ।

प्रभा :–रणम् ॥ ३४ ॥ **पक्षे संबन्ध इति** । पक्षधर्मतेत्यर्थः । सपक्षवृत्तित्वेनान्यथा

यत्रैता लहरीचलाचलदृशो व्यापारयन्ति भ्रुवं
यत्तत्रैव पतन्ति संततममी मर्मस्पृशो मार्गणाः ।

Since these arrows piercing the vitals fall there only where these (women), whose eyes are extremely unsteady like waves, employ their eyebrow, therfore, Cupid, whose thrilling hand is set on the arrows that

प्रदीपः—**यत्रेति ।** अत्र पूर्वार्धे साधनस्य उत्तरार्धे साध्यस्य वचनम् । प्रयोगश्चैवम्—एताश्चक्रीकृतचापं सदा पुरोधावदञ्चितशरत्वादिविशिष्टमनोभवाः संततनिपतन्मर्मभेदिबाणकलसद्भ्रूव्यापारकस्थानत्वादिति । नन्वत्र पूर्वं साधनवत्साध्यस्यापि वचनं संभवति । यथा—

उ०ः—एतद्रूपत्रयविशिष्टो हेतुः साधनपदेनोच्यते इत्यर्थः । **व्यापकत्वाभिमतस्येति ।** अस्य 'यस्य' इत्यादिः । **साध्यमिति ।** अस्य 'तत्' इत्यादिः । **व्यापकसंबंधः ।** व्यापकास्तित्वम् । **तदुभयेति ।** 'कविप्रतिभोल्लिखित' इत्यादिः । (**यत्रेति ।**) चलाचलाः अतिचंचलाः । चलांचलेति पाठे चंचलप्रांतचक्षुष इत्यर्थः । व्यापारयन्ति वक्रीकुर्वन्ति । यत्र पुंसि । (मर्मस्पृशः मर्मभेदिनः । चक्रीकृतः कर्षणेन वर्तुलीकृतः चापो यस्मिन्कर्मणि तथा । अंचिते धनुषि योजिते शरे बाणे प्रेंखन् चलन् करः यस्य । शासनं आज्ञा तस्य धरः ।) अग्रतः । पुरः । (शार्दूलविक्रीडितं छन्दः ।) अत्र पूर्वार्धे संततनिपतन्मर्मभेदिबाणकलसद्भ्रूव्यापारकस्थानकत्वं साधनं पक्षवृत्तित्वेनोक्तम् । परार्धे साध्यम् । यत्तद्भ्यां व्याप्तिः सूचिता । तत्र वस्तुतो व्याप्त्यसत्त्वेऽपि कविप्रौढोक्त्या तथाभिधानम् । अत्रानुमानमित्यत्र भावे ल्युट् । तेन जायमानाऽनुमितिरत्रालंकारः । सा च मन्ये शंकेऽवैमि जाने इत्यादिवाचकोपादाने वाच्या । यत्र लिंगलिंगिनोः सत्त्वं तत्र तेषामनुमितिबोधकत्वात् । यत्र सादृश्यादिनिमित्तसद्भावस्तत्रोत्प्रेक्षाबोधकत्वम् । वक्ति कथयति इत्यादिलक्षणपदोपादाने लक्ष्या । उभयानुपादाने साध्यसाधनाभ्यां तदाक्षेपे प्रतियमानेति बोध्यम् । **न-**

प्रभा ः—व्याप्तिप्रदर्शनं विपक्षवृत्तित्वेन व्यभिचारविरहप्रदर्शनम् । अयोगव्यवच्छेदोऽवश्यं संबन्धः । व्याप्यस्य व्यापकं विनानुपपत्तेः । एतच्च हेतूत्प्रेक्षाव्यावृत्त्यर्थमुक्तम् । तत्र योगस्याप्यनुत्कटतया भानादिति । एता इति स्त्रियः पक्षभूता निर्दिष्टाः । चक्रीकृतचापं यथा स्यात्तथा सदा पुरो धावन्नञ्चिते धनुषि योजिते शरे प्रेङ्खन् चपलः करो यस्य सः । क्रोधनः क्रोधशीलः । शासनमाज्ञा तद्धारको मनोभवो यासां तथाभूता इति साध्यम् । सततं निपतन्तो मर्मभेदिनो बाणा यत्र तादृशं लसद्भ्रूव्यापारो

तच्चक्रीकृतचापमञ्चितशरप्रेङ्खत्करः क्रोधनो
धावत्यग्रत एव शासनधरः सत्यं सदासां स्मरः ॥ १२७ ॥ (—)

साध्यसाधनयोः पौर्वापर्यविकल्पे न किंचिद्वैचित्र्यमिति न तथा दर्शितम् ।

are fixed and who is in fury, must be ever running straight ahead of them, obedient to their order, with the bow bent, to be sure! (127)

Since there is no charm in altering the sequence between the deduction and the means thereto, it has not been accordingly set forth.

प्रदीपः–'मधु तिष्ठति वाचि योषिताम्' इत्यादि। तत्कथं सामान्यत एतदुक्तं न तु विशेषत इति चेत्, साध्यस्य पूर्वभागे तादृश्यवैचित्र्याभावादिति। **विशेषणैरिति**। साकूतैः

उ०ः–**न्विति**। एवं चानया रीत्याऽनुमानस्य द्वैविध्यं वक्तुमुचितमिति भावः। **मध्विति**। 'हृदि हालाहलमेव केवलम्। अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते॥' इति पादत्रयम्। **तादृशेति**। कार्यकारणयोर्वैपरीत्ये झटिति कार्यकारित्वप्रतीतिरूपवैचित्र्यवदिह तथाभावाभावात् न विशिष्योक्तमिति भावः। यत्तु केनचिदर्थेनोक्तेन तुल्यकारणत्वादर्थांतरस्यापादनमर्थापत्त्यलंकारः। यथा 'स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम्' 'तवाग्रे यदि दारिद्र्यं स्थितं भूप द्विजन्मनाम्। शनैः सवितुरग्रेऽपि तमः स्थास्यत्यसंशयम्॥' नेयं वाक्यवित्सम्मताऽर्थापत्तिः। आपादकस्यार्थस्यापतितमर्थं विनाऽनुपपत्तेरभावात्। अस्यां चार्थांतरं लोकेऽविद्यमानमपि कविना स्वप्रतिभया कल्पयित्वा यद्यापाद्यते तदाऽलंकारत्वम्। तेन 'उदुम्बरफलानीव ब्रह्माण्डान्यत्ति यः सदा। सर्वगर्वापहः कालस्तस्य के मशका वयम्॥' इत्यादौ नायमलंकार इति। तन्न। आद्योदाहरणेऽनुमानस्य संभवात्। द्वितीये यद्यर्थातिशयोक्तेः सत्त्वात्। सा च द्विविधा। आपाद्यापादकयोरुभयोरपि असंभवित्वेन कविकल्प्यतया आपाद्यमानस्यैवेत्यस्यापि सुवचत्वात्। 'निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि।

प्रभाः–यत्र तादृशं स्थानं युवजनरूपं यासां तत्त्वादिति हेतुः। स्वस्थाननियतनिपतन्मर्मभेदिबाणकलसद्भ्रूव्यापाराश्रयत्वादिति यावत्। तत्रैवेत्यनेन बाणनिपतनस्य भ्रूव्यापारस्थाननियतत्वोक्तेः। अत एव शासनधर इत्युक्तम्। **यथेति**। 'मधु तिष्ठति वाचि योषितां हृदि हालाहलमेव केवलम्। अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते॥' इति पद्यम्। **विशेषत इति**। उक्तप्रकारद्वयवत्तयेत्यर्थः। इत्यनुमान-

(५९) विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ।

अर्थाद्विशेष्यस्य । उदाहरणम्—

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १२८ ॥

(किरातार्जुनीय १. १९.)

---

37. PARIKARA.

That is 'Parikara' where we have a statement with attributes that are pregnant with significance.

Gloss:—(Statement), of course of the thing qualified by the attributes. To illustrate:–

They, of mighty spirit, who cherish their honour as treasure, archers, who have won fame in warfare, who do not enter into conspiracy (संहताः) and are not inclined to discord, long to achieve things pleasing to him, with their lives! (128)

प्रदीप:–साभिप्रायैः । उक्तिः अर्थाद्विशेष्यस्य । उदाहरणम्–**महौजस इति।** अत्र महौजस्त्वादिविशेषणानि परानभिभवनीयत्वाद्यभिप्रायकाणि । न च वाच्यम्— अपुष्टार्थत्वस्य दोषत्वाभिधानादर्थसिद्धं पुष्टार्थत्वमिति दोषाभावत्वमात्रतया कुतोऽलंकारमध्ये पठितोऽयमिति । एकनिष्ठत्वेन बहूनां विशेषणानामुक्तोदाहरणवदुपादाने वैचित्र्यमपि ह्यनुभवसिद्धं, न तु दोषाभावत्वमात्रमिति संप्रदायः । वयं त्वालोचयामः—तादृशैकवि-

---

उ०:–अन्यथा नोपपद्येत पयोधरभरस्थितिः ॥' इत्यर्थापत्तिस्त्वनुमानमेवेति दिक् । **इत्यनुमानम्** । **उक्तिः** परिपुष्टिः । **अर्थाद्विशेष्यस्येति** । विशेषणानां परस्परनिराकांक्षत्वादिति भावः । साभिप्रायत्वं प्रकृतार्थोपपादकचमत्कारिव्यंग्यकत्वम् । **महौजस इति** । (किरातार्जुनीये प्रथमसर्गे युधिष्ठिरं प्रति चारस्योक्तिः ।) तेजस्विनो मानिनः धनैः पूजिताः रणे प्राप्तकीर्तयः न संहताः न परैरुपजप्ताः परस्परमैकमत्यमाप्ता इत्यर्थः । तस्य प्रियाणि प्राणैरपि कर्तुं वाञ्छन्तीत्यन्वयः । (वंशस्थं वृत्तम् ।) **आदीति** । मानभंगभीरुत्वोपक्र-

---

प्रभा:–प्रकरणम् ॥ ३५ ॥ संप्रदायपदसूचितमस्वरसं प्रकाशयन्स्वयं समाधत्ते—**वयं**

यद्यप्यपुष्टार्थस्य दोषताऽभिधानात्तन्निराकरणेन पुष्टार्थस्वीकारः कृतः, तथाऽप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलंकार-मध्ये गणितः ।

Though by pronouncing an irrelevant thing to be a defect, a relevant one comes to be accepted (as a pre-requisite of Poetry), yet when *many* attributes are so stated as applying to one and the same thing, there arises a certain charm. Hence has it been reckoned among Figures.

प्रदीपः – शेषणोपन्यासेऽप्यलंकारत्वमुचितम् । अपुष्टार्थत्वविरहस्य निर्विशेषणतयाऽप्युप-पत्तेरर्थसिद्धत्वाभावाद्वैचित्र्यस्य चानुभवसिद्धत्वात् । यथा—'शुद्धे सद्मनि पल्लविन्युपवने'

उ०ः – तत्वयुद्धोत्सुकत्वकार्यकारणतदेकप्रयोजनापेक्षित्वान्यादिपदार्थाः । तेनायं दुर्जय इति व्यंग्यम् । **बहूनामिति** । विशेषणैरिति बहुत्वं विवक्षितमित्यर्थः । **तादृशैकेति** । 'अयि लावण्यजलाशय तस्या हा हंत मीननयनायाः । दूरस्थे त्वयि किं वा कथयामो विस्तरेणालम् ॥' इत्यादौ । **अनुभवसिद्धत्वादिति** । यथा नित्ये संध्यावंदनादौ दोषाभावस्यांगवैकल्येऽपि सिद्धौ सांगतत्करणं फलातिशयायैव । तथा दोषाभावस्य विशेषणानुपादानेऽपि संभवेन स्वाभिप्रायैकविशेषणनिबंधनश्चमत्कारो दुरपह्नव इति भावः । किंच 'सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः' इत्यादौ यत्र सुधांशुकलितोत्तंस इति विशेषणाभावेऽपि तापहरणसामर्थ्यस्य सामर्थ्यातिशयेनाप्युपपत्तेस्तद्विशेषणानुपादानेऽपि न क्षतिस्तत्र तद्विशेषणोपादानमधिकचमत्कारायैवेति बोध्यम् । अत्र व्यंग्यं च क्वचिद्वाच्यसिद्ध्यंगं क्वचिदपरांगमिति गुणीभूतव्यंग्यमेव । अत्र विशेषणैरित्युपलक्षणं विशेष्यस्यापि । तेन साभिप्राये विशेष्येऽप्ययम् । यथा 'चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः' इत्यत्र । अत्र चतुर्भुज इति विशेष्यं पुरुषार्थचतुष्टयदानसामर्थ्याभिप्रायगर्भम् । बाहुलकलभ्यकर्मल्युडंतकरणल्युडंतविशेषणशब्दयोरेकशेषो वा । उक्तिरित्यस्यार्थकथ-

प्रभाः – **त्विति** । **अनुभवसिद्धत्वाभावादिति** । पुष्टार्थत्वस्येति शेषः । इष्टापत्तिमाशङ्क्याह—**वैचित्र्यस्य चेति** । 'शुद्धे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि क्रीडाद्रौ च सशाद्वले विवलितग्रीवैर्विमुक्ता दृशः ।' इत्यादावित्यर्थः । तथा च दोषाभावरूपस्यापि पुष्टार्थत्वस्य चमत्कृतिविशेषजनकत्वरूपमलंकारत्वमुपधेयसंकरेऽप्युपाधेरसंकरान्निर्बाधमिति भावः । इति परिकरप्रकरणम् ॥ ३६ ॥ **साम्यसंभव**

(६०) व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ॥ ३२ ॥

निगूढमपि वस्तुनो रूपं कथमपि प्रभिन्नं केनापि व्यपदेशेन यदपह्नूयते, सा व्याजोक्तिः । न चैषाऽपह्नुतिः, प्रकृताप्रकृतोभयनिष्ठस्य सा-

---

38. VYĀJOKTI.

'Vyājokti' consists in the concealment, under a pretext, of a thing that has betrayed itself.

Gloss:—When the form of a thing, which though secret is somehow betrayed, comes to be concealed under some pretext, there results the figure 'Vyājokti.' This is not Apahnuti, since here is no likelihood of similarity existing in the matter under consideration and in the matter

---

प्रदीपः–इत्यादौ। **व्याजोक्तिरिति**। उद्भिन्नत्वमस्फुटस्य प्रकाशः। तथा चास्फुटमपि वस्तुस्वरूपं कथंचिद्व्यक्तमथ केनापि यदपह्नूयते सा व्याजोक्तिः । न चेयमपह्नुतिः । प्रकृताप्रकृतयोः साम्ये तत्स्वीकारात् । अत्र तु तदभावात् । न च प्रथमं गूढस्यानन्तरं प्रकाशस्यापह्नव इति सामग्रीभेदादेवापह्नुतिभेद इति वाच्यम् । एवंविधेऽपि विषये साम्यसंभवेऽपह्नुतेरेवोपगमात् । ननु यत्रापह्नवार्थं सादृश्योपक्षेपः सा व्याजोक्तिः, सादृश्यार्थमेव तु यत्रापह्नवोपक्षेपः साऽपह्नुतिरिति चेत्, न । तत्रोभयत्राऽप्यपह्नुतेरेवोपगमात् । यदाहुः—

साम्यायापह्नवो यत्र सा विज्ञेया त्वपह्नुतिः ।
अपह्नवाय सादृश्यं यस्मिन्नेषाऽप्यपह्नुतिः ॥ इति ॥

उ०:–नमित्येवार्थः। एतेन 'साभिप्राये विशेष्ये परिकरांकुरनामा भिन्नोऽलंकारः' इत्यपास्तम्। **इति परिकरः**। **कथंचित्**। लिंगादिना। **केनापि**। कपटेन। **प्रकृताप्रकृतयोरिति**। इदमुपलक्षणम्। तत्रोपमेयनिषेधपूर्वकमुपमानव्यवस्थापनम् । अत्र तु किंचिदनिषिध्यैव निमित्तांतरप्रयुक्तत्वज्ञापनमित्यपि

प्रभा:–**इति**। (कुवलयानन्दे पद्यमिदम्।) यथा 'सीत्कारं शिक्षयति' इत्यादौ गुप्तस्य नायकस्य सीत्कारेत्याद्युक्त्या व्यक्तस्य नहीत्यादिनापह्नवेऽप्यपह्नुतिरेवेत्यर्थः । **नन्विति** । उक्तोदाहरणे साम्यसत्त्वेऽपि तस्याङ्गत्वेनापह्नवप्राधान्याभावाद्व्याजोक्तिरेव अपह्नवप्राधान्ये त्वपह्नुतिरिति व्यवस्थेत्यर्थः । **यदाहुरिति** । उद्भटादिमतानुसारिण इत्यर्थः। **उभयत्रेति**। अपह्नवप्राधान्येऽङ्गत्वे च सति साम्य इत्यर्थः। तथा

न्यस्येहासंभवात्। उदाहरणम्—

शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाऽखिलविधिव्यासङ्गभङ्गाकुलः।
हा शैत्यं तुहिनाचलस्य करयोरित्यूचिवान्सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः॥ १२९॥ (—)

not under consideration. To illustrate:—

May Śiva protect you!—Śiva who was smilingly looked at by the Mountain's harem, the circle of the Mothers and the attendant gods, as he said, "O how cold the hands of the Snowy Mountain!", when he was bewildered at the disruption of the performance (व्यासङ्ग) of the entire ceremony, (he) being upset (विसंष्ठुल) by the horripilation etc. that had sprung due to his clasping the hand of Pārvatī while she was being presented by the Premier of Mountains! (129)

प्रदीपः—उदाहरणम्—**शैलेति**। अत्र पुलकवेपथू सात्त्विकैकरूपतया प्रस्तौ शैत्यकारणतया प्रकाशनादपलपितस्वरूपाविति व्याजोक्तिं प्रकाशयतः। वयं तु—पुलकवेपथुभ्यां सात्त्विकाभ्यां प्रकाशिता गूढावगतिस्तयोः शैत्यकारणताप्रकाशनेनापह्नुतेति व्याजोक्तिरियम्।

उ०:—बोध्यम्। **शैलेंद्रेति**। प्रतिपाद्यमाना दीयमाना। उपगूढं संबंधः। रोमांचादि। आदिना कंपः। विसंष्ठुलो व्यग्रहस्तः। स चासौ अखिलवैवाहिक-क्रियाभंगाकुलः। हा इत्याश्चर्ये। शैलांतःपुरैस्तत्स्त्रीजनैः। मातृमंडलं शच्यादिगणस्तेन, गणा नंद्यादयस्तैश्चेत्यर्थः। (शार्दूलविक्रीडितं छन्दः।) **अत्रेति**। पार्वतीकरस्पर्शजन्यरोमांचादेः शैलेंद्रस्पर्शजन्यत्वप्रतिपादनादिति भावः। **सात्त्विकाभ्याम्**। रतिभावानुभावाभ्याम्। **गूढा च रतिः**। पार्वतीविषया। **शैत्येति**। शैलेंद्रशैत्येत्यर्थः। गोपनपदेन गोपकव्यापारमात्रं, न तूक्तिरेव। तेन 'आयांतमालोक्य हरिं प्रतोल्यामाल्याः पुरस्तादनुरागमेका। रोमांचकंपादि-भिरुच्यमानं भामा जुगूह प्रणमंत्यथैनम्॥' इत्यादावप्ययमेव। अत्र व्यंग्यस्य गुणीभूतत्वे एवायमलंकारः। तेन 'सखि पश्य गृहारामपरागैरस्मि धूसरा' इत्यादौ ध्वनित्वमेव। एतेन 'गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते। वृषापेहि

प्रभाः—च सीत्कारमित्यादावप्यपह्नुतिरेव। प्रकृताप्रकृतसाम्याभावे तु व्याजोक्तिरिति व्यवस्थेत्यर्थः। तथैवोदाहरति—**शैलेति**। अत्र वृत्तौ शृङ्गारानुभावत्वेनाभिव्य-

अत्र पुलकवेपथू सात्विकरूपतया प्रसृतौ शैत्यकारणतया प्रकाशितत्वादपलपितस्वरूपौ व्याजोक्तिं प्रयोजयतः ।

(६१) किंचित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते ।
ताद्दगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥ ३३ ॥

प्रमाणान्तरावगतमपि वस्तु शब्देन प्रतिपादितं (प्रयोजनान्तराभावात्) सद्दशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति, सा भवेत्परिसंख्या ।

Here the horripilation and tremor, though developed as an outcome of inward feelings, were given out as having been occasioned by cold. Thus owing to their (real) nature being concealed they bring about a Vyājokti.

39. PARISAṄKHYĀ.

That is stated to be 'Parisaṅkhyā,' where something stated, whether in response to a query or not, tends to exclude others akin to it.

Gloss:—That is 'Parisaṅkhyā' where a thing tends to exclude similar others, as it, even though understood from other means of knowledge, happens to be stated explicitly, and as there is no other reason (but that

---

प्रदीपः—किंचिदिति। ताद्दक् तुल्यम्। व्यपोहाय व्यवच्छेदाय। यत्किंचित्कथितं सत्स्वतुल्यस्यान्यस्य व्यवच्छेदाय यत्कल्पते सा परिसंख्या मतेति लक्षणम्। अन्यस्य कथनमन्यव्यपोहाय कथं कल्पत इति चेत्। प्रमाणान्तरेणावगतस्यैव वस्तुनः पुनः शब्देन प्रतिपादनस्य

उ०ः—परक्षेत्रादायाति क्षेत्ररक्षकः ॥' इति गूढोक्त्यलंकारः परास्तः। तस्य ध्वनित्वाक्रांतत्वात्। क्वचित् गुणीभूतव्यंग्यत्वात्। अलंकारत्वं तु नोचितम्। उपस्कारकत्वाभावात्। प्रकृते शिवविषयकभावोपस्कारकत्वं स्पष्टमेव। एतेन 'गच्छाम्यच्युत' इत्यादौ विवृतोक्तिर्गुप्ताविष्करणरूपेत्यपास्तम्। गुणीभूतव्यंग्यमात्रत्वात्। वाच्यरसाद्युत्कर्षकत्वाभावाच्च। एतेन 'लोकप्रवादानुकृतिर्लोकोक्तिरिति गण्यते। सहस्व कतिचिन्मासान् मीलयित्वा विलोचने ॥' इत्यपास्तम्। उपस्कारकत्वाभावात्। नन्वत्र कोऽलंकार इति चेन्न कोऽपि। एतेन 'छेकोक्तिर्यत्र लोकोक्तेः स्यादर्थांतरगर्भता। भुजंग एव जानीते भुजंग-

---

प्रभाः—त्वयोः कम्परोमाञ्चयोः शैत्यजन्यत्वप्रतिपादनेनापह्नवो व्याख्यातः। तत्र कम्परोमाञ्चयोः पूर्वगूढत्वाभावादुद्भिन्नेत्यस्यासंगतेः स्वयमुदाहरणं संगमयति—**वयं त्विति।** 'गूढा रतिः' इत्येव पाठः। 'अवगतिः' इति त्वपपाठः। एवं च पूर्वं

अत्र च कथनं प्रश्नपूर्वकं तदन्यथा च परिदृष्टम्, तथा उभयत्र व्यपोह्यमानस्य प्रतीयमानता वाच्यत्वं चेति चत्वारो भेदाः ।

क्रमेणोदाहरणम्—

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयं च करुणा
यदासक्त्या चेतो निरवधिविमुक्त्यै प्रभवति ॥ १३० ॥ (—)

---

of exclusion for its being so stated). Here the statement is found to be either in sequel to a query or otherwise. Likewise, in both cases, the thing excluded may be suggested or expressed. Thus *four* varieties in all.

Instances in order:—

What should men resort to ?–The irreproachable vicinity of the heavenly river (i. e. the Ganges). What should one think of, in solitude ? —The two feet of the wearer of the Kaustubha–jewel (i. e. Viṣṇu). What should one strive for ?–Merit. And what should one wish to have ?–Compassion: by an attachment to which (all), the heart becomes able to win unbounded freedom ! (130)

प्रदीप :–प्रयोजनान्तराभावात् । पृष्टमपृष्टं चेति तु विभागः । कथनं हि किंचित्प्रश्नपूर्वकं किंचिच्चातत्पूर्वकमिति द्वैविध्यमित्यर्थः । ते च द्वे अपि विधे व्यवच्छेद्यस्य प्रतीयमानत्ववाच्य-

---

उ० :–चरणं सखे ॥' इति छेकोक्त्यलंकारोऽपि परास्तः । उपस्कारकत्वाभावात् । क्वचिद्ध्वनित्वं गुणीभूतव्यंग्यत्वं वा न निवारयामः । 'त्वामालिखंती दृष्ट्वाऽन्यं धनुः पौष्पं करेऽलिखत्'–अत्रापि व्याजोक्तिरेव । उक्तिपदस्य व्यापारमात्रपरत्वात् । एतेन 'युक्तिः परातिसंधानं क्रियया मर्मगुप्तये' इति युक्तिनामाऽत्रालंकार इत्यपास्तम् । एवमुत्कर्षहेतौ तद्धेतुत्वकल्पनारूपा प्रौढोक्तिरसंबंधे संबंधरूपाऽतिशयोक्त्या गतार्था । 'संभावनं यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये । यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥' इति संभावनालंकारो यद्यर्थोक्तौ च कल्पनमित्यतिशयोक्त्या गतार्थः । 'किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्याऽर्थांतरकल्पनम् । मिथ्याध्यवसितिर्वेश्यां वशयेत् खस्रजं वहन् ॥' इति मिथ्याध्यवसि-

---

प्रभा :–गूढस्यानुभावाभिव्यक्तस्य रतिभावस्यान्यप्रयुक्तत्वकथनेनापह्नुतिरिति लक्षणसंगतिः । इति व्याजोक्तिप्रकरणम् ॥ ३७ ॥ **परिसंख्येति** । परिशब्दो वर्जनार्थः । संख्या

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥ १३१ ॥ (—)
कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते।
काठिन्यं कुचयुगले तरलत्वं नयनयोर्वसति ॥ १३२ ॥ (—)

What is the greatly enduring ornament in this world ?–Fame, : not a jewel. What is worth doing ?–A pious deed, practised by the venerable ones, : not a sin. Which is the unarrested sight ?–Intellect : not the eye. Who else but yourself knows the distinction between good and evil ? (131)

Curliness (by Śleṣa : crookedness) dwells in the tresses of your hair, the red hue (by Śleṣa: passion) in your sproutlike hands, feet, and lower lip; hardness (by Śleṣa : harshness) in the pair of (your) breasts; tremulousness (by Śleṣa: fickleness) in your eyes ! (132)

प्रदीपः—त्वाभ्यां प्रत्येकं द्विविधे। तत्र प्रश्नपूर्वके कथने व्यवच्छेद्यस्य प्रतीयमानता यथा—**किमिति**। अत्रान्यनदीसविधादि व्यवच्छेद्यं प्रतीयमानम्। तत्रैव वाच्यं व्यवच्छेद्यं यथा—**किं भूषणमिति**। स्पष्टम्। अप्रश्नपूर्वके कथने व्यवच्छेद्यं प्रतीयमानं यथा—**कौटिल्य-**

उ०:—तिरसंबंधे संबंधातिशयोक्त्या गतार्थेति दिक्। **इति व्याजोक्तिः**। **प्रयोजनांतराभावादिति**। अनुवादस्य प्रयोजनसाकांक्षतयाऽन्यव्यावृत्तिरेव प्रयोजनमित्यर्थः। नियमोऽप्यत्र दर्शने उक्तलक्षणाक्रांतत्वात्परिसंख्यैव। **किमिति**। अत्र किमासेव्यमिति प्रश्नः। अनिंद्यं गंगासमीपं नान्यनदीसविधं, नापि कान्तानितंबादि। विष्णोः पादयुगं नान्यदेवस्य, नाप्यंगनादि। पुण्यं न पापं। दया न हिंसादि। (येषु गंगासमीपादिषु आसक्त्या। निरवधिर्या विमुक्तिः सायुज्यरूपा तदर्थं चेतः प्रभवति समर्थं भवति। शिखरिणी छन्दः।) **किं भूषणमिति**। आर्यचरितं शिष्टसेवितम्। (सुकृतं पुण्यकर्म। दोषो व्यभिचारादिः। धिषणा बुद्धिः। अभिमतोत्तरदानादाह—जानातीति। सदसद्विवेकं उत्कृष्टनिकृष्टविभागं त्वदपरः त्वदन्यः कः जानाति न कोऽपीत्यर्थः। वसन्ततिलका छन्दः।) **कौटिल्यमिति**। (कौटिल्यं वक्रता कपटं च। कचनिचये केशसमूहे, न तु हृदये। रागः रक्तिमा प्रीतिश्च। करादिषु, न परपु-

---

प्रभा:—बुद्धिः। तेन वर्जनबुद्धिरित्यन्वर्था संज्ञा। इति परिसंख्याप्रकरणम् ॥ ३८ ॥

भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥ १३३ ॥ (—)

(६२) यथोत्तरं चेत्पूर्वस्य पूर्वस्याऽर्थस्य हेतुता ।
तदा कारणमाला स्यात्

उत्तरमुत्तरं प्रति यथोत्तरम् । उदाहरणम्—

Devotion to Śiva–not to wealth; a *penchant* for scriptures, not for woman, the weapon of Love; (and) concern for fame–not for the body, are observed mostly in the case of the great! (133)

40. KĀRAṆAMĀLĀ.

If each preceding thing becomes the cause of each succeeding one, then there results the 'Kāraṇamālā.'

Gloss:—यथोत्तरं means 'to each succeeding one.' To illustrate:—

प्रदीपः-मिति। अप्रश्नपूर्वक एव कथने व्यवच्छेद्यं वाच्यं यथा—**भक्तिरिति।** श्लेषेणाप्येषा संभवति। यथा–'चित्रेषु वर्णसंकरः,' 'खलसंयोगः शालिषु'इत्यादि। **यथोत्तरमिति।** यथोत्तरमिति वीप्सायां यथाशब्दः। तेनोत्तरोत्तरं प्रतीत्यर्थः। उदाहरणम्—

उ०ः—रुषादिषु। काठिन्यं दार्ढ्यं निर्दयत्वं च। कुचयुगुले, न तु हृदये। तरलत्वं चंचलता अविचार्यकारित्वं च। नयनयोः, न मनसि। आर्या छन्दः।) अत्र कौटिल्यादेरितराधिकरणकत्वं व्यवच्छेद्यं व्यंग्यम्। प्रश्नश्च नास्ति। **भक्तिरिति।** युवतिरूपे कामास्त्रे। (आर्या छन्दः।) अत्र यत्र कविप्रतिभानिर्मिता इतरव्यावृत्तिस्तत्रालंकारता। यथा 'कौटिल्यं कचनिचये' इत्यत्र कौटिल्यादिकं कविप्रतिभया एकीकृतमिति तद्द्वारा तत्प्रतियोगिकवृत्तिस्तन्निर्मितेति बोध्यम्। **इति परिसंख्या। यथोत्तरमिति।** इदमुपलक्षणम्। यथापूर्वं परस्य परस्य कारणत्वे इत्यपि बोध्यम्। यथा 'भवंति नरकाः पापात्पापं दारिद्र्यसंभवम्। दारिद्र्यमप्रदानेन तस्माद्दानपरो भव॥' इति। अत्र कथितपदत्वं न दोषः। प्रत्युत पदांतरेण तस्यार्थस्योक्तौ तत्त्वप्रतिभानाभावाद्विवक्षितार्थासिद्धेः। उपस्थितशब्दस्यापि विशेषणतया भानांगीकारात्।

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि संपदः ॥१३४॥(—)

"हेतुमता सह हेतोरभिधानमभेदतो हेतुः"
(रुद्रट's काव्यालंकार. ७. ८२.)

इति हेत्वलंकारोऽत्र न लक्षितः । आयुर्घृतमित्यादिरूपो ह्येष न भूषणतां कदाचिदर्हति, वैचित्र्याभावात् ।

अविरलकमलविकासः सकलालिमदश्च कोकिलानन्दः ।
रम्योऽयमेति संप्रति लोकोत्कंठाकरः कालः ॥ १३५ ॥ (—)
(Cited in रुद्रट's काव्यालंकार. ७·८३.)

To be of subdued senses constitutes the cause of humility; from humility is derived the height of virtues; by the height of virtues do the subjects grow loyal; verily from loyalty of the people springs wealth. (134)

The figure Hetu, which (by others) is defined as:

"Hetu consists in the statement of the cause as identical with the effect,"

has not been defined (by us). For, it being of the form "Life is ghee" etc. never deserves to be looked upon as an embellishment (of a poem), for want of strikingness.

Here arrives now the pleasant season, the bloom of the thickly grown lotuses, the intoxication of all the bees, the delight of the cuckoos, that gives rise to yearnings on the part of the people! (135)

प्रदीपः—**जितेन्द्रियत्वमिति** । नन्वत्र कार्यकारणभावालंकृतिप्रपञ्चनप्रसङ्गेन हेत्वलंकारोऽपि लक्षणार्हः। उक्तश्चायं भट्टोद्भटेन—'हेतुमता सह हेतोरभिधानमभेदतो हेतुः' इति । तत्किं न लक्षित इति चेत्, आयुर्घृतमित्यादिरूपस्यास्य वैचित्र्याभावेनालंकारत्वस्यैवाभावात् । नन्वेवम्—'**अविरल**' इत्यादौ प्राचां काव्यरूपताऽभिधानं विरुध्येत

उः०—**जितेंद्रियत्वमिति** । (वंशस्थं वृत्तम् ।) अत्र पदे भग्नप्रक्रमत्वं दोषः । जितेंद्रियत्वं विनयस्य कारणमित्युक्ते तत्कस्य कारणमित्युदिताकांक्षा यद्यपि उत्तरवाक्येन निवर्त्यते, तथापि न साक्षात् । एवमग्रेऽपि । अस्याः किमुपस्कारकतयाऽलंकारत्वं कया रीत्या चोपस्कारकत्वमिति चिंत्यम् । उत्तरोत्तरोत्तमवस्तुकारणत्वात्सर्वे एते उपादेया इति ज्ञानं चमत्कारकारणमिति वदंति । **हेतुमतेति** । कार्यकारणभावसंबंधनिबन्धनशुद्धसारोपासाध्यवसानामूलोऽयमिति बोध्यम् । **वैचित्र्याभावेनेति** । कार्यवाचकपदेन कारणाभिधाने वैचित्र्याभावे-

---

प्रभाः—**हेतुमतेति** । हेतुमता कार्येण सहाभेदहेतोरभिधानमित्यन्वयः । इति कारण-

इत्यत्र काव्यरूपतां कोमलानुप्रासमहिम्नैव समाम्नासिषुर्न तु हेत्वलंकारकल्पनयेति पूर्वोक्तं काव्यलिङ्गमेव हेतुः ।

(६३) क्रियया तु परस्परम् ॥ ३४ ॥

वस्तुनोर्जननेऽन्योन्यम्

अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सति अन्योन्यं नामालंकारः ।

उदाहरणम्—

हंसाणं सरेहिँ सिरी सारिज्जइ अह सराण हंसेहिँ ।
अण्णोण्णं विअ एए अप्पाणं णवर गरुअन्ति ॥ १३६ ॥

Here they by tradition acknowledged it to be Poetry, only in virtue of its soft alliteration, and not due to any idea of the figure Hetu. Thus Hetu is the same as the Kāvyaliṅga referred to above.

41. ANYONYA.

Where by an action two things 'produce' each other mutually, the figure is 'Anyonya.'

Gloss:—Where two objects, through the same action, become mutually the cause, one of the other, the figure is 'Anyonya.' To illustrate:—

The beauty of the swans is exalted by the lakes, and that of the akes by the swans. Thus they only make each other sublime. (136)

प्रदीप: – अलंकाराभावादिति चेत्, न। कोमलानुप्रासेनैव तत्संभवात्। तत्किं हेत्वलंकारो नास्त्येव। क एवमाह। कीदृशस्तर्ह्यसाविति चेत्, पूर्वोक्तं काव्यलिङ्गमेवेति। **क्रिययेति**। वस्तुनोः परस्परं जन्यजनकभावोऽसंभवी। तस्य तं प्रत्येव पौर्वापर्ययोर्द्वयोरसंभवादित्यत उक्तं क्रिययेति। एकक्रियाजननद्वारेणेत्यर्थः। अविशिष्टं वस्तु तावदजातकल्पम्। तेन वैशिष्ट्यप्रयोजकक्रियाजनके जनकत्वोपचारः। तथा च मिथस्तादृशैकक्रियाजनकत्वमन्योन्यालंकार इति सारम्। उदाहरणम्—**हंसाणेति**।

उ०: – नेत्यर्थः। **अविरलेति**। (वसंतवर्णनम्। आर्या छन्दः।) अत्र विकासमदानंदपदेषु तद्धेतौ लक्षणा। **कोमलानुप्रासेति**। कामोद्दीपकोऽयं

प्रभा: – मालाप्रकरणम् ॥ ३९ ॥ अविशिष्टं शोभारहितम्। निष्कृष्टं लक्षणमाह—**तथा चेति**। परस्परं वैशिष्ट्यजनकैकक्रियाजनकत्वमित्यर्थः। **हंसाणं इति**। 'हंसानां सरोभिः श्रीः सार्यते (सारीक्रियते)ऽथ सरसां हंसैः। अन्योन्यमेवैते आत्मानं केवलं गुरूकुर्वन्ति ॥' इति। सार्यते प्रसार्यते। उत्कृष्टा क्रियत इति यावत्। इत्यन्योन्यालंकारः ॥४०॥

अत्रोभयेषामपि परस्परं जनकता, मिथः श्रीसारतासंपादनद्वारेण ।

(६४) उत्तरश्रुतिमात्रतः ।

प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ॥ ३५ ॥

असकृद्यदसंभाव्यमुत्तरं स्यात्तदुत्तरम् ।

प्रतिवचनोपलम्भादेव पूर्ववाक्यं यत्र कल्प्यते, तदेकं तावदुत्तरम् ।

उदाहरणम्—

Here both 'produce' each other in so far as they mutually bring about the exaltation of beauty.

42. UTTARA.

(1) Where by merely hearing the reply, the query can be guessed; or (2) where it (i. e. query) being present, there is (made) a reply such as is unexpected, more than once, the figure is 'Uttara.'

Gloss:—Where the earlier remark can be guessed merely by the knowledge of the reply, that is the first variety of 'Uttara.'

To illustrate:—

प्रदीपः—अत्र श्रीसारणेन सरोहंसयोर्मिथोजनकता । **उत्तरेति** । यत्रोत्तरश्रवणमात्रेणानुपात्तमपि प्रश्नवाक्यं परिकल्प्यते तदेकमुत्तरम् । प्रश्ने सति लोकातिक्रान्तगोचरतयाऽसंभाव्यं यदसकृत्प्रतिवचनं तत्पुनरपरम् । अत्र प्रश्नोत्तरयोः सकृदुपादानं न चमत्करोतीत्यसकृदित्युक्तम् । असंभाव्यं तु चमत्कारित्वमिति मान्याः । अप्रसिद्धत्वमिति तु

उ०:—काल इति भंग्यंतरेण प्रतिपादनेन पर्यायोक्तसत्त्वाच्च, प्रागुक्तरीत्याऽतिशयोक्तेः सत्त्वाच्चेत्यपि बोध्यम् । **इति कारणमाला** । **क्रिययेति** । इदं गुणस्याप्युपलक्षणम् । (**हंसाणेति** ।) 'हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः । अन्योन्यमेवैते आत्मानं केवलं गुरूकुर्वंति ।' सार्यते सारीक्रियते । (आर्या छन्दः ।) प्रकृते शोभाविशेषविशिष्टान्हंसान्प्रति सरसां कारणत्वम्, शोभाविशेषविशिष्टसरांसि प्रति हंसानां कारणत्वम्, परस्परशोभाजननद्वारेणैवेति भावः । परस्परक्रियया परस्परमुपकारजननज्ञानकृतोऽत्र चमत्कारः । **इत्यन्योन्यालंकारः** । उत्तरं नाम प्रश्नगम्यजिज्ञासानिवर्तकज्ञानविषयीभूतोऽर्थः । **अत्र प्रश्नेति** । उन्नीतप्रश्ने तु सकृदुत्तरस्यापि चारुत्वमिति भावः । प्रश्नोत्तरयोरन्यतरस्याकूतगर्भत्वे बद्धप्रश्नेऽपि सकृदुपादानेन चमत्कारोऽस्त्येव ।

वाणिअअ हत्थिदन्ता कुत्तो अम्हाण वग्घकित्ती अ ।
जाव लुलिआलअमुही घरम्मि परिसक्कए सोण्हा ॥ १३७॥

(Cited in ध्वन्यालोक. ३.)

हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, ताः मूल्येन प्रयच्छेति क्रेतुर्वचनं अमुना वाक्येन समुन्नीयते । न चैतत् काव्यलिङ्गम् । उत्तरस्य ताद्रूप्यानुपपत्तेः । न हि प्रश्नस्य प्रतिवचनं जनको हेतुः । नापीदमनुमानम् एकधर्मिनिष्ठतया साध्यसाधनयोरनिर्देशादित्यलंकारान्तरमेवोत्तरं साधीयः ।

O tradesman, how can we be in possession of ivory and tiger-skins, so long as there flits about in the house (my) daughter-in-law with the locks dangling on her face ? (137)

"I am in need of ivory and tiger-skins. Give them to me for a price,"—these words of the purchaser can be guessed from this remark. This is not Kāvyaliṅga since the reply cannot be reasonably looked upon as being that. For, the reply could not be looked upon as the *creative cause* of the query. Nor can this be looked upon as Anumāna. Since the deduction and the means thereto are *not stated* as abiding in the same thing. Consequently, Uttara could be better taken as a separate figure.

प्रदीपः—वयम् । तच्च प्रमाणान्तरागोचरविषयत्वात् । अत एव प्रश्नपरिसंख्यातो भेदः । तत्र हि लोकप्रसिद्धविषयस्योत्तरस्य प्रयोजनान्तराभावेनान्यव्यपोहे तात्पर्यम् । अत्र तु निगूढविषयतया वाच्य एव तात्पर्यविश्रामः । तत्राद्यं यथा—**वाणिअएति** । हस्तिदन्तव्याघ्रकृत्तीनामहमर्थी, मूल्येन ताः प्रयच्छेति क्रेतृवचनमनेनोत्तरवाक्येनानुमीयते । सूत्रे च प्रश्नपदं पूर्ववाक्यमात्रपरमिति प्रश्नाभावेऽप्यदोषः । यद्वा हस्तिदन्तव्याघ्र-

---

उ०ः—'किमिति कृशाऽसि कृशोदरि किं तव परकीयवृत्तान्तैः' —अत्र प्रश्नेन प्रतीकारसामर्थ्यं व्यंग्यम् । उत्तरेण स्वस्य पातिव्रत्यं व्यंग्यम् । आकूतागर्भत्वे तु उत्तरमलंकार एव नेत्याहुर्नव्याः । **तात्पर्यमिति** । वाच्यस्य प्रमाणांतरप्राप्तत्वादिति भावः । **वाच्य एवेति** । लोकोत्तरत्वेन चमत्कारिणि वाच्य एव विषमत्वाद्यतिशयप्रतिपादने तात्पर्यादिति भावः । (**वाणिअएति** ।) 'वाणि-

---

प्रभाः—**अत्रेति** । द्वितीयभेद इत्यर्थः । **वाणिएति** । 'वाणिजक हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च । यावल्लुलितालकमुखी गृहे परिसर्पते स्नुषा ॥' इति । उत्तरं कारकहेतुत्वेनाभिमतं ज्ञापकहेतुत्वेन वा । नाद्य इत्याह—**उत्तरस्येति** ।

प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यत् असंभाव्यरूपं प्रतिवचनं स्यात्, तत् अपरमुत्तरम्। अनयोश्च सकृदुपादाने न चारुताप्रतीतिरित्यसकृदित्युक्तम्। उदाहरणम्—

का विसमा देव्वगई किं दुल्लहं जं जणो गुणग्गाही।
किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ॥ १३८॥ (—)

That is the other variety of Uttara, where the reply appears unusual on account of its belonging to the province of the extraordinary. Since there is no charm if the two (i. e. Query and Reply) occur only once each, it is said (in the definition that they should occur) "more than once." To illustrate:—

What is perverse?–The turn of fate. What is it that is worth finding out? –A person who appreciates merit. What is happiness?–A good wife. What is the misfortune?–That the world is wicked! (138)

प्रदीपः–कृत्तयस्तव सन्तीति प्रश्नवाक्यमिहोन्नेयम्। न च वाच्यमिदं काव्यलिङ्गविशेष एव। उत्तरस्य प्रश्न प्रति हेतुत्वाभावात्। उत्तरस्य तदनुत्पादकत्वात्। काव्यलिङ्गस्य तदात्मकत्वात्। तर्हि ज्ञापकतयाऽनुमानमेवेति चेत्, न। एकधर्मिगतत्वेन साध्यसाधननिर्देशो हि तत्। न चात्र तथा। तस्मादलंकारान्तरमेवोत्तरम्। द्वितीयं यथा—**का विसमेति**। अत्र दैवगत्यादेर्वैषम्यादि लोकाप्रसिद्धमेव प्रकाश्यते। 'किमासेव्यं पुंसाम्' इत्यादिप्रश्नपरिसंख्यायामन्यव्यवच्छेदे तात्पर्यम्। अत्र तु वाच्य एवेति ततो भेदः।

उ०:–जक हस्तिदंताः कुतोऽस्माकं व्याघ्रकृत्तयश्च। यावत् लुलितालकमुखी गृहे परिसंक्रामति स्नुषा'। (लुलिताः चंचलाः अलकाः केशा यत्र तादृशं मुखं यस्याः एतादृशी स्नुषा परिसंक्रामति परिभ्रमति। गाथा छन्दः।) अस्यामासक्तो मत्सुतो मृगयां न करोतीत्युत्तरं व्यंग्यम्। (क्रेतारं वणिजं प्रति) वृद्धव्याधोक्तिरियम्। **एकधर्मी**। पक्षः। न च स्नुषागृहनिवासस्य हस्तिदंताद्यभावे निमित्तत्वेन काव्यलिंगमेवास्तु। तत्संभवेऽपि प्रश्नोन्नयनद्वारेणैव चमत्कारादित्याशयः। (**केति**।) 'का विषमा दैवगतिः किं दुर्लभं यज्जनो गुणग्राही। किं सौख्यं सुकलत्रं किं दुःखं यत् खलो लोकः' (गाथा छन्दः।) प्रश्नस्य सकृदुपादाने उत्तरस्यानेकत्वेऽप्ययम्। 'किं स्वर्गादधिकसुखं

प्रभाः–किमतो यद्येवं तत्राह—**काव्येति**। सदात्मकत्वात्कारकरूपहेतुत्वात्। **तस्मादिति**। अर्थादनुमानेऽपि साधननिर्देशादित्यर्थः। **का इति**। 'का विषमा दैव-

प्रश्नपरिसंख्यायामन्यव्यपोहे एव तात्पर्यम्, इह तु वाच्ये एव विश्रान्तिरित्यनयोर्विवेकः।

(६५) कुतोऽपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते ॥३६॥
धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते।

कुतोऽपि आकारादिङ्गिताद्वा। सूक्ष्मस्तीक्ष्णमतिसंवेद्यः। उदाहरणम्—

वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै-
र्दृष्ट्वा भिन्नं कुङ्कुमं काऽपि कण्ठे।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या
स्मित्वा पाणौ खड्गलेखां लिलेख ॥ १३९ ॥ (—)

In a Parisaṅkhyā with query, the purport lies solely in the exclusion of other (things); here, however, there is a consummation of the idea in the expressed sense itself. This is the difference between the two (figures).

43. SŪKṢMA.

Where on being somehow detected, a matter which though subtle comes to be disclosed to another (party), by some sign (धर्म), the figure they call 'Sūkṣma.'

Gloss:—Somehow i. e. from looks or gesture. subtle i. e. such as could be understood by a person of keen intellect. To illustrate:—

Seeing the saffron at the throat (of her friend) washed out by the streams of the drops of perspiration dripping down the face, a certain friend sketched, with a smile, the outline of a sword on her palm, suggesting manly coition on the part of the slim lady! (139)

प्रदीपः—कुतोऽपीति। कुतोऽपीति आकारादिङ्गिताद्वा। सूक्ष्मस्तीक्ष्णमतिसंवेद्यः। तत्र रूपादेरन्यथात्वमाकारः। ततो यथा—**वक्त्रेति**। अत्र कण्ठकुङ्कुमभेदलक्षणेनाकारेण लक्षितं पुरुषायितं सख्या सखीहस्ते खड्गलेखालिखनेन वैदग्ध्यादभिव्यञ्जितम्। पुंसामेव

उ०ः—बंधुसुहृत्पंडितैः समं गोष्ठी। सौराज्यशुद्धवृत्ति सत्काव्यरसामृतं स्वादु॥' इति। एवं प्रश्नोत्तरयोरभिन्नत्वेऽप्ययम्। 'केदारपोषणरता' इत्यादौ। एवं प्रश्नद्वयस्यैकोत्तरत्वादावपि। यथा 'के खेऽटाः किं चलं वयः' इत्यादौ। इत्यु-

प्रभाः—गतिः किं लब्धं यज्जनो गुणग्राही। किं सौख्यं सुकलत्रं किं दुःखं यत्खलो लोकः॥' अत्र पूर्वं सामान्यत उक्तमपि उदाहरणगतत्वेन विशेषतः पुनराह—**अत्रेति**। एवं

अत्र आकृतिमालोक्य कयाऽपि वितर्कितं पुरुषायितम् असिलतालेखनेन वैदग्ध्याद्भिव्यक्तिमुपनीतम् । पुंसामेव कृपाणपाणिता, योग्यत्वात् ॥ यथा वा—

संकेतकालमनसं विटं ज्ञात्वा विदग्धया ।
ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥ १४० ॥

(Cited in ध्वन्यालोक. २.)

अत्र जिज्ञासितः संकेतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ।

Here, the manly coition guessed by some woman on seeing the looks (of her friend) comes to be disclosed intelligently by sketching a sword. It is males who, by their fitness, carry the sword in their hands. Or as in,—

Recognising that the paramour, intimating (his) intent slyly (ईषत्) with his eye, had a mind to know the time of appointment, the astute lady closed the sport-lotus! (140)

Here, the time of appointment that was sought to be known (by the paramour) and was understood (by the maiden), by mere gesture, comes to be gracefully intimated by the maiden by closing the lotus, (thereby) suggesting night-time.

प्रदीपः—पाणौ कृपाणस्य योग्यत्वात् । चेष्टाविशेष इङ्गितम् । तेन यथा— **संकेतेति** । अत्र नेत्रोत्साहरूपेणेङ्गितेन लक्षितः कामिनः संकेतकालाभिलाषः कामिन्या

उ०:—**त्तरम्** । **अन्यथात्वमिति** । यत्नजन्यस्वेदादिनेत्यर्थः । (**वक्त्रेति**) स्यन्दिभिः प्रस्राविभिः । पुरुषायिते श्रमाधिक्यात् स्वेदाधिक्यम् । पुंस्त्वं पुरुषायितत्वम् । (शालिनी छन्दः ।) **लक्षितम्** । सख्या स्वयमुन्नीतम् । **अभिव्यंजितम्** । नायिकायां वयस्यांतरेषु च । अत्र स्वेदलिंगकस्वानुमितिविषयस्य पुरुषायितत्वस्य खड्गलेखादिलिखनेन व्यंजनम् । अत्र विद्यमानमप्यनुमानं सूक्ष्मांगम् । स्ववैदग्ध्यप्रकाशनद्वारा सूक्ष्मस्यैव चमत्कारित्वात् । **संकेतेति** । (संकेतकाले मनो यस्य ।) तज्जिज्ञासुमित्यर्थः । ईषत् नेत्राभ्यां अर्पितं

प्रभा:—च लोकातिक्रान्तगोचरतयेत्यस्य वृत्तिग्रन्थस्य प्रमाणान्तराविषयागोचरतयेत्येवार्थः न तु लोकोत्तरचमत्कारितयेति । प्रश्नपरिसंख्यायामपि तत्सत्त्वेन भेदानुपपत्तेरिति । इत्युत्तरालंकारः ॥ ४१ ॥ **कुङ्कुमेति** । कुङ्कुमेन भेदो मिश्रणम् । इति सूक्ष्मम् ॥ ४२ ॥

(६६) उत्तरोत्तरमुत्कर्षो भवेत्सारः परावधिः ॥ ३७ ॥

परः पर्यन्तभागः अवधिर्यस्य, धाराधिरोहितया तत्रैवोत्कर्षस्य विश्रान्तेः । उदाहरणम्—

राज्ये सारं वसुधा वसुंधरायां पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् ॥ १४१ ॥

(Cited in रुद्रट's काव्यालंकार. ७. ९७.)

---

44. SĀRA.

'Sāra' is exaltation in a continuous gradation, with the highest for its limit.

Gloss :–परावधि is that whose limit is the highest extreme, as exaltation comes to a halt only there rising by gradual ascent. To illustrate:—

The earth is the core of kingship; the capital that of the earth. The palace is the core of the capital; the bed that of the palace; and a lovely lady, the all-in-all of Love, is the core of the bed! (141)

प्रदीपः–निशासूचकेन पद्मसंमीलनेन लीलया प्रकाशितः। **उत्तरोत्तरमिति**। परावधिरिति परः पर्यन्तभागो गद्यस्य पद्यस्य वा अवधिरुत्कर्षसीमा यस्य। तेन पर्यन्तभागो यत्र सर्वोत्कृष्ट इत्यर्थः। धाराधिरोहितया तत्रैवोत्कर्षविश्रान्तेः। उदाहरणम्—**राज्ये इति**।

उ०:–सूचितं आकूतं येन। ईषन्नेत्रार्पिताकूतमिति विटविशेषणम्। अमुं भावालंकारमाह रुद्रटः। नव्योक्तपिहितालंकारोऽप्यत्रैवांतर्भूतः। **इति सूक्ष्मम्**। **धाराधिरोहितयेति**। 'जंबीरश्रियमतिलंघ्य लीलयैव व्यानम्रीकृतकमनीयहेमकुंभौ। नीलाम्भोरुहनयनेऽधुना कुचौ ते स्पर्धेते खलु कनकाचलेन सार्धम्॥' इत्यत्रापि सार एव। एतेनेदृशे विषये वर्धमानालंकारोऽतिरिक्त इत्यपास्तम्। 'मधुरविकसितोत्पलावतंसं शशिकरपल्लवितं च हर्म्यपृष्ठम्। मदनजननविभ्रमा च रामा सुखमिदमर्थवतां विभाति रम्यम्॥' इत्यादौ तु नायम्। काव्यपर्यन्तभागस्य सर्वोत्कृष्टत्वाभावात्। अत्र कथितपदत्वं न दोषः। प्रत्युत तेनैव सर्वनाम्ना वाऽनिर्देशे प्रतीतिस्थगनात्। उत्कर्षः श्लाघ्यगुणानामश्लाघ्यगुणानां च। तत्राद्य उदाहृतः। अंत्यो यथा–तृणाल्लघुतरस्तूलस्तूलादपि च याचकः। वायुना किं न नीतोऽसौ मामयं याचयिष्यति॥ (**राज्ये इति**। अनंगस्य मदनस्य सर्वस्वं सर्वस्वरूपा वरांगना। आर्या छन्दः।) **इति सारः**।

(६७) भिन्नदेशतयाऽत्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र ख्यातिः सा स्यादसंगतिः ॥ ३८ ॥

इह यद्देशं कारणम्, तद्देशमेव कार्यमुत्पद्यमानं दृष्टम्, यथा धूमादि। यत्र तु हेतुफलरूपयोरपि धर्मयोः केनाप्यतिशयेन नानादेशतया युगपदवभासनम्, सा (तयोः स्वभावोत्पन्नपरस्परसंगतित्यागात्) असंगतिः। उदाहरणम्—

45. ASAṄGATI.

That is 'Asaṅgati' where there is the statement of two things (धर्मयोः) which, related as cause and effect, show themselves simultaneously (but) in absolutely different places.

Gloss:—Here, it is found that the effect like smoke takes place only in that abode where the cause abides. Where, however, due to some abnormal feature, two things related as cause and effect present themselves simultaneously in different abodes, the figure is 'Asaṅgati,' so called because there is an abandonment of their mutual association that springs naturally. To illustrate:—

प्रदीपः-भिन्नेति। अत्रात्यन्तमिति देशभेदस्यैवोपकारकं, न तु पृथगपि विवक्षितार्थम्। युगपदिति स्वरूपनिर्वचनम्, न तु व्यावर्तकम्। तेन कार्यकारणभूतयोर्धर्मयोर्यत्र भिन्नदेशतया संप्रतिपादनं सा असंगतिः। हेतुफलयोरग्निधूमाद्योरिव प्रसिद्धायाः समानदेशत्वरूपायाः संगतेः परित्यागात्। तथाप्रतिपादनं च कारणान्तरेभ्यो वैलक्षण्यात्।

उ०ः—स्वरूपनिर्वचनमिति। 'उद्भिन्नमात्रे वयसि दृष्ट्वा प्रियतमाधरम्। भावी लाक्षारसोऽत्रेति कामिनो रज्यते मनः॥' इत्यत्र कालभेदेऽपि असंगतेरिष्टत्वात्। कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तेश्च पृथक् वैचित्र्यकारित्वेन समावेश एव युक्त इति भावः। **प्रसिद्धायाः।** कार्यकारणस्वभावसिद्धायाः। **वैलक्षण्यादिति।** कारणगतं कमप्यतिशयमभिसंधायेत्यर्थः।

प्रभाः—॥ ४२ ॥ सारश्च ॥ ४३ ॥ **अत्रात्यन्तमितीति।** देशभेदस्यात्यन्तिकत्वं चमत्कारोत्कर्षकतयोपकारकत्वेनोक्तमित्यर्थः। **स्वरूपेति।** द्वयोः कथनस्यान्यथा योगादिति भावः। संज्ञाया अन्वर्थतां दर्शयति—**हेतुफलयोरिति।** वृत्तिस्थं केना-

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं।
दन्तक्खअं कवोले वहूएँ वेअणा सवत्तीणं ॥ १४२ ॥ (—)

एषा च विरोधबाधिनी न विरोधः। भिन्नाधारतयैव द्वयोरिह विरोधितायाः प्रतिभासात्। विरोधे तु विरोधित्वम् एकाश्रयनिष्ठमनुक्तमपि पर्यवसितम्। अपवादविषयपरिहारेणोत्सर्गस्य व्यवस्थितेः। तथा चैवं निदर्शितम्।

What the people say, "Who sustains the wound alone suffers the pang," is untrue. The tooth-bite happens to be on the cheek of the (newly-wed) bride; while the co-wives suffer the pangs! (142)

This again is an exception to Virodha, not Virodha itself. Since here the conflict between the two is felt to be due to their being present in *different* abodes. In Virodha, however, the conflict subsists between things abiding in the *same* abode. This, though not specifically stated, follows (as a matter of course). Since the general rule applies to the exclusion of the province of the exception. And therefore has it (i. e. विरोध) been accordingly illustrated.

प्रदीपः—उदाहरणम्—**जस्से इति**। स्पष्टम्। नन्वयं विरोधालंकार एव। हेतुफलयोर्वैयधिकरण्यस्य विरोधरूपत्वादिति चेत्, न। वैयधिकरण्यं ह्यसंगतिः। न च सैव विरोधः। किं तु तद्बोधिका। वैयधिकरण्येन तयोर्विरोधप्रतिभासनात्। नन्वेवमपि प्रतीयमानो विरोध एवालंकारोऽस्तु, न तु तद्बोधिकाऽसंगतिरपि साक्षात्। न च वाच्यं समानाधिकरण एव विरोधो विरोधालंकारनिर्वाहको न तु व्यधिकरणोऽपीति। लक्षणे सामान्यत एव

उ०ः—(**जस्से इति**।) 'यस्यैव व्रणस्तस्यैव वेदना भणति जनस्तदलीकम्। दंतक्षतं कपोले वध्वा वेदना सपत्नीनाम्॥' (गाथा छन्दः।) व्रणक्षतपदयोः प्रक्रमभेदश्चिन्त्यः। **विरोधरूपत्वादिति**। विरोधोऽनुपपत्तिः। सा च सहानवस्थितयोः सहावस्थान इव सहस्थितयोः सहानवस्थानेऽपि तुल्या। तस्याश्च प्ररोहे दोष एवेत्याभासता

प्रभाः—प्यतिशयेनेति व्याचष्टे—**तथेति**। **जस्सेति**। 'यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम्। दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम्॥' अत्र शारीरमानसयोर्वेदनयोरेकत्वाध्यवसायो मूलम्। ननु व्यधिकरणत्वेन नियतयोः सामानाधिकरण्यवत्समानाधिकरणत्वेन नियतयोर्वैयधिकरण्यस्यापि विरुद्धत्वाद्विरुद्धालंकार एवेति शङ्कते—**नन्विति**। असंगतेर्विरोधाद्भेदान्न विरोधरूपतेत्यापाततः समाधत्ते—**वैयधिकरण्यं हीति**। विरोधस्फूर्तिं विना चमत्काराभावात्स एवालंकारः समु-

(९८) समाधिः सुकरं कार्यं कारणान्तरयोगतः।

साधनान्तरोपकृतेन कर्त्रा यद् अक्लेशेन कार्यमारब्धमाधीयते, स समाधिर्नाम। उदाहरणम्—

---

46. SAMĀDHI.

'Samādhi' consists in an effect being rendered easy to accomplish by the occurrence of another cause.

Gloss:—Where by an agent, helped by an additional means, is accomplished, without difficulty, a mission he had embarked upon, there results a figure, 'Samādhi' by name. To illustrate:—

प्रदीपः—विरोधस्योक्तत्वादिति। भैवस्। सामान्येनोक्तस्यापि विशेष एव पर्यवसानात्। अपवादविनिर्मुक्त एव हि देशे उत्सर्गः प्रवर्तते। विरोधालंकारस्य चासंगत्यलंकारोऽपवाद इति व्यधिकरणविरोधस्यापवादाक्रान्ततया तद्भिन्नविरोधे विरोधालंकार इति। अत एव तथैवादाहृतम्। **समाधिरिति**। इष्टात्कारणादन्येन कारणेनोपकृतः कर्ता यदक्लेशेन कार्यं

उ०ः—वाच्या। तथा च विरोधाभास एवेत्यर्थः। **व्यधिकरणविरोधस्येति**। कार्यकारणवैयधिकरण्यप्रयुक्तविरोधस्येत्यर्थः। अत्र येन केनापि प्रकारेण कार्यांशेऽभेदाध्यवसानमनुप्राणकम्। केचित्त लक्षणे कार्यकारणभूतयोरित्युपलक्षणम्। समानाधिकरणत्वेन प्रसिद्धयोर्वैयधिकरण्यनिबंधोऽसंगतिः। 'नेत्रे निरंजने तस्याः शून्यास्तु वयमद्भुतम्' इत्यादौ निरंजनत्वशून्यत्वयोरकार्यहेत्वोरपि शुद्धसमानाधिकरणत्वेन प्रसिद्धयोरसंगतिरित्याहुः। एवमन्यत्र चिकीर्षितस्यान्यत्र करणे अन्यचिकीर्षावता तद्विरुद्धान्यकरणे चेयमेवासंगतिः। विषयताघटितसामानाधिकरण्येन चिकीर्षायाः कार्यमात्रं प्रति हेतुत्वात्। अधिकरणांतर्भावेनापि चिकीर्षायाः हेतुत्वाच्चेत्याहुः। **इत्यसंगतिः**। **इष्टादिति**। एककारणजन्यकार्यस्याकस्मिककारणांतरसमवधानाहितं सौकर्यं समाधिरित्यर्थः।

प्रभाः—चित इति। पुनराशङ्कते—**नन्वेवमपीति**। असंगतिविरोधयोर्भेदेऽपीत्यर्थः। सिद्धान्त्यभिमतां व्यवस्थां प्रमाणाभावेन दूषयितुं शङ्कते—**न चेति**। समानाधिकरण एव एकाधिकरणप्रतीयमान एव। व्यधिकरणः भिन्नाधिकरणः प्रतीयमानः। तथा च सामानाधिकरण्यकृतविरोधभाने विरोधालंकारः। समानाधिकरणयोर्भिन्नाधिकरणत्वनिबन्धनविरोधभाने त्वसंगतिरिति व्यवस्थेत्यर्थः। **व्यधिकरणेति**।

मानमस्या निराकर्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥ १४३ ॥
(Cited in काव्यादर्श. २. २९९.)

(६९) समं योग्यतया योगो यदि संभावितः क्वचित् ॥ ३९ ॥

इदमनयोः श्लाघ्यमिति योग्यतया संबन्धस्य नियतविषयमध्यवसानं चेत्तदा समम् । तत् सद्योगेऽसद्योगे च । उदाहरणम्—

As I was about to fall at her feet in order to dispel her huff, here has luckily appeared the rumble of clouds for obliging me! (143)

47. SAMA.

That is the figure 'Sama' if the combination somewhere comes to be viewed as fitting.

Gloss:—If there be a determination, "This on the part of these two is admirable," in a particular case, as to the connection being fitting, then the figure is 'Sama.' It is possible with a combination of the good, and of the bad. To illustrate:—

प्रदीप :–करोति स समाधिः । सम्यगाधिः समाधिरिति व्युत्पत्तः । उदाहरणम्—**मानमिति** । तयोस्तुल्यकक्षताविरहान्न समुच्चयालंकारान्तर्भावः । **सममिति** । योग्यता आनुरूप्यम् । संभावितः सर्वसम्मतः । तेनेदमनयोः समुचितमिति योग्यतया संबन्धस्य

उ० :–सौकर्यं च कार्यस्यानायासेन सिध्द्या सांगसिध्द्या च बोध्यम् । (**मानमिति** ।) दिष्ट्या भाग्येन । उदीर्णम् उद्गतम् । **तुल्यकक्षताविरहादिति** । घनगर्जितस्याकस्मिकत्वादिति भावः । अत्र कारणांतरयोग इत्युपलक्षणम् । तेनाकस्मादीप्सितार्थलाभस्य वांछितसिद्ध्यर्थयत्नात्तदधिकलाभस्योपायसिद्ध्यर्थयत्नात्साक्षात्फललाभवर्णनस्य च समाधित्वमेव । सौकर्यस्य अनायासेन सिद्ध्यादिरूपस्येवाकस्मिकत्वादिरूपस्यापि ग्रहात् । एतेनेदृशे विषये प्रहर्षणं भिन्नोऽलंकार इत्यपास्तम् । अन्यदीयगुणेनान्यत्र गुणवत्ताबुद्धिरूपः अन्यदोषेणान्यत्र दोषवत्ताबुद्धिरूपो वोल्लासः काव्यलिंगेन गतार्थ इत्याहुः । वक्ष्यमाणसममेवेत्यन्ये । एवं कार्यसहवर्तितया निर्णीतकारणाभावेऽपि कार्यस्य स्थितिरपि सौकर्यम् । 'दीपे निर्वापितेऽप्यासीत्कांचीरत्नैर्महन्महः' इति । एतेनात्र पूर्व-

प्रभा :–व्यधिकरणत्वप्रयुक्तस्येत्यर्थः । तथैव सामानाधिकरण्येनैव । उदाहृतं विरोधालंकार इति शेषः । इत्यसंगतिः ॥ ४४ ॥ **सम्यगाधिरिति** । सम्यगाधानकरणमित्यर्थः ।

धातुः शिल्पातिशयनिकषस्थानमेषा मृगाक्षी
रूपे देवोऽप्ययमनुपमो दत्तपत्रः स्मरस्य ।
जातं दैवात्सदृशमनयोः संगतं यत्तदेत-
च्छृङ्गारस्योपनतमधुना राज्यमेकातपत्रम् ॥ १४४ ॥ (—)

यथा वा—

चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं
जातो दैवादुचितरचनासंविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया
यच्चैतस्याः कवलनकलाकोविदः काकलोकः ॥ १४५ ॥ (—)

This deer-eyed one is the touch-stone of the supremacy of the Creator's skill; this king also is peerless in beauty, to whom Cupid has surrendered his charter. Since a worthy union of these two has luckily taken place, here is at hand the one-umbrella *régime* of Romance! (145)

Or as in

Wonder! Oh wonder! Ah, how mightily wonderful and strange it is that fortunately the Creator has become the dispenser of a fitting arrangement! Since, on the one hand, the abundance of the ripe fruit of the Nimba trees has become worth tasting; and on the other, the crow–world has grown expert in the art of munching it! (146)

प्रदीप :– नियतविषयमध्यवसानं चेत्तदा समं नामालंकारः । योग्यता च प्रकर्षनिकर्षाभ्याम् । तत्र प्रकर्षेण यथा—**धातुरिति** । निकर्षेण यथा—**चित्रमिति** ।

उ० :– रूपं नाम पृथगलंकारः। विकृतेऽपि वस्तुनि पूर्वावस्थाऽनुवृत्तिः पूर्वरूपमितीत्यपास्तम्। **इति समाधिः । योगः** । संयोगादिरूपः कार्यकारणभावश्च । **आनुरूप्यमिति**। तेन सता सतो योगोऽसता चासतो योग इति लब्धम्। तेन सदसतोर्योगे नायम् । अनौचित्यात् । समुच्चये सतोरसतोर्वा कारणयोः समुच्चयः, अत्र त्वकारणयोरपि तयोर्योगस्यौचित्याभिधानमिति विशेषः । **नियतविषयमध्यवसानम्** । निश्चयः । **धातुरिति** । निकषस्थानं परीक्ष्योपलरूपा । (अयं देवो राजा ।) स्मरस्य रूपे दत्तपत्रः कृतपत्रावलंबन इत्यर्थः । (संगतं समागमः । मन्दाक्रान्ता छन्दः ।) **चित्रमिति** । फलस्फीतिः फलसंपत् । (एतस्याः फलसंपदः। कवलनकला भक्षणचातुरी तत्र कोविदः पंडितः। मन्दाक्रान्ता छन्दः ।) कार्यकारणभावसंसर्गस्यानुरूपत्वं कारणात्स्वसमानगुणकार्योत्पत्त्या । यथा 'मंत्रार्पितहविर्दीप्तहुताशनतनूभुवः । शिखास्पर्शेन पांचाल्याः

(७०) क्वचिद्यदतिवैधर्म्यान्न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत् ॥ ४० ॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत्स एष विषमो मतः ॥ ४१ ॥

द्वयोरत्यन्तविलक्षणतया यत् अनुपपद्यमानतयैव योगः प्रतीयते [१], यच्च किंचिदारभमाणः कर्ता क्रियायाः प्रणाशात् न केवलमभीष्टं

---

48. VIṢAMA.

(1) Where due to extreme disparity of nature, the association (between two things) may not attain congruity; (2) where an agent does not attain the fruit of his action, but is confronted by disaster; (3–4) and where the quality and action of the cause are respectively opposed to those of the effect,–that then is held to be the figure 'Viṣama.'

Gloss:–(1) Where the association of two things is felt to be incongruous due to their absolute disparity, (2) where an agent setting about doing something not only fails to attain, due to the frustration of the action, its desired fruit, but might encounter an ominous matter, though unsought for,

---

प्रदीपः–क्वचिदिति। द्वयोरत्यन्तविलक्षणतया यत्क्वचियोगो घटनां नोपैति, किं त्वनुपपद्यमानतयैव प्रतीयते स एको विषमः । यच्च क्वचित्कार्यमारभमाणः कर्ता वलवत्कारणान्तरेण

उ०ः–स्थाने दग्धः सुयोधनः ॥' इति । यादृशगुणकवस्तुसंसर्गस्तादृशगुणोत्पत्त्याऽपि समम् । 'वडवानलकालकूटलक्ष्मीगरलव्यालगणैः सहैधितः । रजनीरमणो भवेन्नृणां न कथं प्राणवियोगकारणम् ॥' ॥ क्वचिदिष्टप्राप्त्यर्थं प्रयुक्तात्कारणात्तत्प्राप्त्या च । यथा–'उच्चैर्गजैरटनमर्थयमान एव त्वामाश्रयन्निह चिरादुषितोऽस्मि राजन् । उच्चाटनं त्वमपि लंभयसे तदेव मामद्य नैव विफला महतां हि सेवा ॥' इत्यत्र । यद्यपि स्तुत्या निंदाऽभिव्यक्तौ तदुपस्कारको विषमोऽप्यत्रास्ति । तथापि वाच्यस्तुतिकक्षायां समालंकारो न वार्यते । लंभयतेर्ण्यंतस्य द्विकर्मत्वम् । न च लोकसिद्धायाः कारणानुरूपकार्योत्पत्तेर्निबंधनं न चारुतावहम् । वस्तुतोऽननुरूपयोरपि कार्यकारणयोः श्लेषादिना धर्मैक्यसंपादनद्वाराऽनुरूपतावर्णने वस्तुतोऽनिष्टस्यापि तेनैवोपायेनेष्टाभेदसंपा-

यत् फलं न लभेत, यावदप्रार्थितमप्यनर्थं विषयमासादयेत् [२], तथा, सत्यपि कार्यस्य कारणरूपानुकारे यत् तयोर्गुणौ क्रिये च परस्पर-विरुद्धतां व्रजतः [३।४], स समविपर्ययात्मा चतूरूपो विषमः। क्रमेणोदाहरणम्—

शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना।
अयं क्व च कुकूलाग्निकर्कशो मदनानलः॥ १४६॥

(नवसाहसांकचरित. १६.२८.)

सिंहिकासुतसंत्रस्तः शशः शीतांशुमाश्रितः।
जग्रसे साश्रयं तत्र तमन्यः सिंहिकासुतः॥ १४७॥ (—)

---

(3) likewise, though, (as a rule), the effect bears resemblance to the nature of the cause, where their qualities and actions become mutually opposed, the figure is 'Viṣama' in four varieties, so called because of its being essentially the reverse of Sama.

Instances in order:—

How wide the gulf between this lady with long eyes, whose limbs are more tender even than the Śirīṣa and this fire of love as tormenting as chaff-fire! (146)

The hare when scared by one son of सिंहिका (lioness) took shelter in the moon. There another son of सिंहिका (राहु) swallowed him up along with his shelter! (147)

प्रदीप:—विष्टम्भात्तत्क्रियाफलं नाप्नोति, प्रत्युतानिष्टं विषयमासादयेत्स द्वितीयः। यच्च क्रियाफललाभेऽपि कार्यकारणयोर्गुणौ क्रिये वा विरुद्धे भवतस्तौ तृतीयचतुर्थौ विषमौ। सर्वत्र समताया विपर्ययात्। तत्र प्रथमो यथा—**शिरीषेति**। द्वितीयो यथा—**सिंहिकेति**। अत्र त्राणरूपफलाभावेऽन्येन ग्रासरूपोऽनर्थः। तृतीयो यथा—

उ०:—दनेनेष्टप्राप्तिवर्णने चारुताया अनुभवसिद्धत्वात्। **इति समम्**। (**शिरीषादिति**।) कुकूलाग्निः करीषाग्निः। कुंभकारपचनाग्निरित्यन्ये। अत्रान्यतर-गुणस्वरूपतिरस्कार्यन्यतरगुणस्वरूपत्वाद्वैषम्यम्। **सिंहिकेति**। राहुमाता सिंही च। (सिंहिकासुतात् सिंहात् संत्रस्तः भीतः। शीतांशुम् चन्द्रम्। अन्यः सिंहिकासुतः राहुः।) अत्रानयोर्योगोऽनुचित इति व्यंग्यम्।

प्रभा:—इति समाधिः॥ ४५॥ **सममिति**। स्पष्टम्। इति समम्॥ ४६॥ **विष्टम्भा-दिति**। प्रतिबन्धादित्यर्थः। कुक्षिशरीरयोरवयवावयविनोर्वैषम्यं पानकर्तृत्वपानकर्मत्व-

सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते ॥ १४८ ॥
(नवसाहसांकचरित. १·६२.)

आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ १४९ ॥
(Cited in रुद्रट's काव्यालंकार. ९·४७.)

Coming into contact with whose hand, in each and every battle, the sword *dark–blue* like the Tamāla leaf immediately gives rise to glory *white* like the autumnal moon, the ornament of the three worlds! (148)

You give this unsubdued *delight*, O lady with eyes resembling lotus-petals. (But) the separation *occasioned by yourself* very much *afflicts* my body. (149)

प्रदीपः–**सद्य इति**। चतुर्थो यथा—**आनन्दमिति** । अत्रानन्ददानशरीरतापक्रिये

उ० :–**सद्यः करेति** । करस्पर्शमात्रेणैव यशो न तु युद्धापेक्षेत्यर्थः । (उपजातिश्छन्दः ।) अत्र जन्यजनकनिष्ठयोः पांडुरनीलाख्यगुणयोर्वैषम्यम् । अत्र श्यामत्वगुणविशिष्टात्कारणात्तद्विरुद्धगुणयुक्तयशस उत्पत्तिः । अभेदाध्यवसानलक्षणेनातिशयेन समवायिकारणरूपतया स्थिते निमित्तकारणे विषयांशमालंब्य भातो विरोधो विषय्यंशविमर्शनान्निवर्तते इति । अत्राभेदाध्यवसायोऽनुप्राणकः । तदुत्थापितविरोधश्च परिपोषकः । इदमेवात्रालंकारत्वबीजम् । द्वितीयभेदे इष्टानवाप्त्यानिष्टाप्ती मिलिते प्रत्येकं च विषमपदार्थश्चकारात् । इष्टं च स्वस्य सुखसाधनप्राप्तिः दुःखसाधननिवृत्तिश्च, परस्य दुःखसाधनप्राप्तिः सुखसाधननिवृत्तिश्चेति चतुर्विधम् । अनिष्टं च स्वस्य दुःखसाधनप्राप्तिः परस्य सुखसाधनप्राप्तिः दुःखसाधननाशश्चेति त्रिविधम् । तत्राद्योदाहरणं सिंहिकेत्युक्तम् । अन्येषां कुवलयानंदादौ द्रष्टव्यम् । **आनंदमिति** । (अमन्दम् अनल्पम् । आर्या छन्दः ।) अत्र नायिकाविरहयोर्जन्यजनकयोरानंदजननतापक्रिययोर्विरोधः । न चात्रासंगतिर्विरोधो वा । विरोधे विरोधिनोः सामानाधिकरण्यस्यासंगतौ कार्यकारणयोर्वैयधिकरण्यस्य चमत्कारप्रयोजकता, अत्र तु कार्यकारण वृत्तिविजातीयक्रियागुणयोगस्य चमत्कारितेति विशेषात् ।

प्रभा :–रूपं पानपदार्थभेदेऽप्यभेदोपचारेण बोध्यम् । इति विषमालंकारप्रकरणम् ॥४७॥

अत्रानन्ददानं शरीरतापेन विरुध्यते । एवम्—

विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥ १५० ॥

(शिशुपालवध. १३. ४०.)

इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् ।

Here the giving of delight is opposed to the affliction of the body. Similarly,

That Kṛṣṇa, however, by the belly of whom resting in the ocean the worlds were taken in at the time of dissolution, was taken in by one of the ladies of the city with one eye that was not fully opened due to the play of passion!

In instances like these also, there should be recognised traits of Viṣama, according to the particular occasion.

प्रदीपः—विरुद्धे । सूत्रे विभाग उपलक्षणपरः । तेन संबन्धिनोरानुरूप्याभावात्मकस्य विषमस्यान्येऽपि भेदा भवन्ति । तत्रावयवावयविनोर्वैषम्ये यथा—**विपुलेनेति ।**

उ०ः—उपलक्षणपर इति । एवमन्यालंकारसूत्रेष्वपि विभागोपलक्षणमिति ध्वनितम् । **भवंतीति** । संबंधिनोर्योगवैषम्यमात्रस्यैव विवक्षितत्वमिति भावः । **विपुलेनेति ।** (माघकाव्ये त्रयोदशसर्गे पद्यम् । सागरे शेते इति सागरशयः तादृशस्य । यस्य श्रीकृष्णस्य । कुक्षिणा उदरेण । युगक्षये प्रलये ।) पपिरे जग्रसिरे । मदविभ्रमापूर्णया चक्षुःकोणमात्रेणैव । पपे । सादरमवलोकनमत्र पानम् । (मंजुभाषिणी छन्दः ।) पानपदार्थयोर्भेदेऽप्यभेदवर्णनादुदाहरणमिदम् । अत्र सागरशयत्वं ससागरसकलभुवनग्रासश्चेत्येकं विषमम् । एवं यस्य कुक्षिरेव सकलभुवनपानसमर्था तस्य संपूर्णस्यावयविनः स्त्रिया एकदृशा पानं चापरं विषमम् । योगवैषम्यादेव चमत्कारान्न विरोधाशंका । एवं कस्यचिद्गुणेन कस्यचिद्दोषवर्णनं, कस्यचिद्दोषेण कस्यचिद्गुणवर्णनमपि विषममेव । एतेनात्रोल्लासोऽतिरिक्त इत्यपास्तम् । एवमिष्यमाणविरुद्धार्थप्राप्तिरपि विषममेव । तादृशेच्छया तादृशलाभयोगस्य विषमत्वात् । एतेनेदृशस्थले विषादनामाऽलंकार इत्यपास्तम् ।

प्रभाः—वर्णनीयेति । वर्णनीयोत्कर्षविवक्षयेत्यर्थः । एतच्च महतीत्यत्रेव तदुर-

(७१) महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥४२॥

आश्रितम् आधेयम्, आश्रयस्तदाधारः, तोयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यत् अधिकतरतां व्रजतः, तदिदं द्विविधं अधिकं नाम । क्रमेणोदाहरणम्—

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ १५१ ॥

(Cited in काव्यादर्श. २·२१९.)

49. ADHIKA.

Where the thing abiding and the abode being great, the abode and the thing abiding respectively, though (really) small, might be (described as) greater, the figure is 'Adhika.'

Gloss:—आश्रित is the thing abiding. आश्रय is its abode. When in the case of both of them, though they are great, respectively the abode and the abiding thing, though small, are described as greater, in order to convey the eminence of the matter on hand, there results 'Adhika' of two varieties. Instances in order:—

How vast, O king, is the bosom of the three worlds, since here can be held the volume of your glory though it is impossible to hold it! (151)

प्रदीप:—एवमन्यत्राप्यूह्यम् । **महतोरिति** । वर्णनीयोत्कर्षापेक्षया यन्महत्याश्रिते विषये तदपेक्षया तनुरप्याश्रयो महीयान्स्यात् महीयस्तया वर्ण्यते, महत्याश्रये वा विषये आधेय एव तथा वर्ण्यते तदुभयमधिकालंकारः । तत्राद्यं यथा—**अहो इति** । अत्राश्रयस्य

उः०—एवमन्यदीयगुणेनान्यत्र गुणाभावस्य अन्यदोषेणान्यत्र दोषाभावस्य वर्णनेऽपि विषमम् । क्वचिद्वक्ष्यमाणोऽतद्गुणो वा । एतेनैवंविधे विषयेऽवज्ञाऽलंकारान्तरमित्यपास्तम् । कारणे सति कार्यानुत्पत्तिरूपविशेषोक्त्यैव गतार्थोऽयमिति तत्त्वम् । उदाहरणम्—'चिरं जलनिधौ मग्नो मैनाको नैति मार्दवम् ।' इत्यादि । एवमिष्टसिध्यर्थमिष्टैषिणा क्रियमाणमिष्टविपरीतयत्नाचरणमपि विषममेव । यथा 'नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम्' । वाच्यप्रतीतिवेलायां योगवैषम्यप्रतीतेः । एतेनात्र विचित्रालंकारः पृथगित्यपास्तम् । इति विषमम् । **वर्णनीयोत्कर्षापेक्षयेति** । वर्णनीयोत्कर्षं बोधयितुमित्यर्थः ।

प्रभा:—पीत्यत्राप्यन्वेति । विषये प्रतिपाद्ये । महत्याश्रये इत्यत्रापि वर्णनीयेत्यादेरन्वयः ।

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः ॥ १५२॥

(शिशुपालवध. १·२३.)

(७२) प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।
या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥ ४३ ॥

The raptures occasioned by the arrival of the sage could not be held in that body of Kṛṣṇa, the enemy of Kaiṭabha who had retracted (in himself) the beings (आत्मनः) at the time of the eon-end (i. e. world-dissolution): the body in which the worlds could rest roomily! (152)

50. PRATYANĪKA.

Where by a party who is not able to counter his opponent is brought about the humiliation of one belonging to him (i. e. opponent) leading to his (i. e. opponent's) exaltation, the figure is 'Pratyanīka.'

प्रदीपः—भुवनत्रितयस्य महत्तया वर्णनम् । द्वितीयं यथा—**युगान्तेति** । अत्राधेयभूताया मुदो महीयस्त्वं विवक्षितम् । **प्रतिपक्षमिति** । अपकारिणमपि विपक्षं साक्षादपकर्तुमक्षमेण केनापि तदीयस्य तिरस्करणं तमेवोत्कर्षयितुं

उ० :—**विषये** । संबंधे । **महत्तया वर्णनमिति** । अत्र मातुमशक्यतया महत्त्वेन विवक्षितस्य यशोराशेराश्रितस्य मानकर्तृत्वेन ततस्तनोरपि भुवनत्रयस्याधिक्यमभिधीयमानं वर्णनीययशोराशिप्रकर्षे विश्राम्यति । **युगांतेति** । (माघकाव्ये प्रथमसर्गे नारदागमने श्रीकृष्णवर्णनम् । युगांतकाले प्रतिसंहृतः आत्मा स्वात्मभूतः प्रपंचो येन तस्य कैटभद्विषः श्रीविष्णोः यस्यां तनौ जगंति भुवनानि सविकाशं सावकाशं आसत उपविशन्ति स्म, तत्र तस्यां तनौ तपोधनस्य नारदस्य अभ्यागमः आगमनं तत्संभवाः तज्जन्याः मुदः प्रीतयः न ममुः न अवकाशं प्रापुः । वंशस्थं वृत्तम् ।) अत्र जगदाश्रयतया महत्त्वेन विवक्षितस्य भगवच्छरीररूपाश्रयस्य मानाभावरूपसंबंधात्ततोऽल्पस्याऽपि तपोधनागमजन्यहर्षस्य वर्णनीयस्याधिक्यं चारुताहेतुः । अत्र महत्त्वशब्देन महत्परिमाणं अतिशयश्च । तेन यत्र सूक्ष्मत्वातिशयवत आधा-

प्रभा:—आधेय एव तनुरपि तथा महीयस्तया वर्ण्यत इत्यर्थः । इत्यधिकप्रकरणम् ॥ ४८ ॥ उत्कर्षयितुमित्यनन्तरं यदिति शेषः । कथं तत्प्रत्यनीकमुच्यते तत्राह—**अनी-**

न्यक्कृतिपरमपि विपक्षं साक्षान्निरसितुमशक्तेन केनापि यत् तमेव प्रतिपक्षमुत्कर्षयितुं तदाश्रितस्य तिरस्करणम्, तत् (अनीकप्रतिनिधितुल्यत्वात्) प्रत्यनीकमभिधीयते। यथाऽनीके अभियोज्ये तत्प्रतिनिधीभूतमपरं मूढतया केनचिदभियुज्यते, तथेह प्रतियोगिनि विजेये तदीयोऽन्यो विजीयते इत्यर्थः। उदाहरणम्—

त्वं विनिर्जितमनोभवरूपः सा च सुन्दर भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां तापयत्यनुशयादिव कामः॥ १५३॥ (—)

Gloss:—Where someone, not able directly to put down his opponent though he (i. e. the opponent) is given to spurning him, humiliates one who has resorted to him (i. e. the opponent), thereby tending to exalt the same opponent, the figure is called 'Pratyanīka' owing to its similarity to a representative of the army. As someone should foolishly attack another that happens to be the representative of the army, when the army itself was to have been attacked, so here when the opponent was to be defeated, someone belonging to him comes to be defeated.

To illustrate:—

You have vanquished the beauty of Cupid and she, O lovely one! is attached to you. Cupid is (therefore) afflicting her with the five arrows all at one time, as if out of spite! (153)

प्रदीप:–यदुच्यते तत्प्रत्यनीकम्। प्रतिनिधितुल्यत्वात्। यथाऽनीकेऽभियोज्येऽशक्तेन तत्प्रतिनिधिभूतः कश्चिन्निगूढमभियुज्यते तथेहापि प्रतियोगिनि विजेयेऽशक्तेन तदीयोऽन्यो विजीयत इत्यर्थः। तदीयत्वं च साक्षात्संबन्धेन परम्परासंबन्धेन चेति द्विविधमेतत्।

उ०:–रादाधेयाद्वा तदन्यतरस्यातिसूक्ष्मत्वं वर्ण्यते तत्राप्ययम्। यथा 'मणिमालोर्मिका तेऽद्य करे जपवटायते'। अत्र मणिमालामयी ऊर्मिका अंगुलीमितत्वादतिसूक्ष्मा, साऽपि विरहिण्याः करे कंकणवत्प्रवेशिता तस्मिन् जपमालावत् लंबते इत्युक्त्या ततोऽपि करस्य विरहकार्श्यादतिसूक्ष्मता दर्शिता। एतेनेदृशे विषयेऽल्पं नाम पृथगलंकार इत्यपास्तम्। यत्राधाराधेययोरन्यतरस्य न्यूनत्वाधिक्ये कविकल्पिते तत्रैवायमलंकारः। **इत्यधिकम्**। **तमेवेति**। प्रतिपक्षमित्यर्थः। तदुत्कर्षकत्वं साक्षात्तन्निरसनासामर्थ्य-

---

प्रभा:–**केति**। प्रत्यनीकशब्देन सैन्यप्रतिनिधिरुच्यते। तत्साम्याच्च प्रकृतार्थे प्रयोग इत्यर्थः। साम्यमेवोपपादयति—**यथेति**। तत्प्रतिनिधिभूतस्तन्मित्रादिः सैन्यभयान्निगूढमभि-

यथा वा—

यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः ।
कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनाऽपि बाधते ॥ १५४ ॥

शिशुपालवध. १४·७८.)

इन्दोरत्र तदीयता संबन्धिमुखसंबन्धात् ।

(७३) समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वाऽपि तन्मीलितमिति स्मृतम् ॥ ४४ ॥

Or as in

Powerless to do any harm to whom (i. e. कृष्ण), Rāhu who has been nursing hostility, due to the mutilation of his body, still harasses the moon whose form is similar to his (कृष्ण's) lovely face! (154)

Here the moon becomes one belonging to him (i. e. the enemy: Kṛṣṇa) owing to her connection with the face that bears relation (of resemblance to the face of Kṛṣṇa).

51. MĪLITA.

Where a thing comes to be concealed by another, due to a similar feature, intrinsic or extrinsic, the figure is 'Mīlita.'

प्रदीपः—तत्राद्यं यथा—**त्वमिति**। अत्र कामिन्याः कामिनश्च साक्षादेव स्वस्वामिभावः संबन्धः। द्वितीयं यथा—**यस्येति**। अत्र यत्पदार्थेन मुखस्यावयवावयविभावः संबन्धस्तेन चन्द्रस्य सादृश्यलक्षण इति परम्परासंबन्धः। **समेनेति**।

उ०:—सूचकत्वेन बोध्यम्। **अनीके**। सैन्ये। **अभियोज्ये**। पीडनीये। **त्वमिति**। (नायकं प्रति नायिकासख्या उक्तिः।) जितकामसौंदर्यः। अनुशयः आक्रोशः। (स्वागता छन्दः।) **यस्येति**। माघकाव्ये चतुर्दशसर्गे पद्यम्।) कायस्य शरीरस्य यो निग्रहः शिरश्छेदस्तेन गृहीतोऽगीकृतो विरोधो येन। यस्य कृष्णस्य। रमणीयकृष्णवक्त्रसदृशाकृतिम्। (रथोद्धता छन्दः।) न च भगवद्वैरानुबंधादिव भगवद्वक्त्रसदृशमिंदुं राहुर्बाधत इति प्रतीतेर्गम्योत्प्रेक्षैवात्रास्तु, आद्ये तु शाब्द्यपि सेति किमनेनालंकारेणेति वाच्यम्। तदपकारासमर्थस्तदीयं पीडयतीति प्रतीत्यैवात्र चमत्कारादित्याहुः। **इति प्रत्यनीकम्। समेनेति**। अस्य व्याख्या निगूहनीयसाधारणेति। स्फुटमुपलभ्यामानस्य कस्यचिद्वस्तुनो लिंगैरतिसा-

सहजं आगन्तुकं वा किमपि साधारणं यत् लक्षणम्, तद्द्वारेण यत् किंचित् केनचित् वस्तुस्थित्यैव बलीयस्तया तिरोधीयते, तत् मीलितमिति द्विधा स्मरन्ति । क्रमेणोदाहरणम्—

अपाङ्गतरले दृशौ मधुकरवक्रवर्णा गिरो
विलासभरमन्थरा गतिरतीव कान्तं मुखम् ।
इति स्फुरितमङ्गके मृगदृशः स्वतो लीलया
तदत्र न मदोदयः कृतपदोऽपि संलक्ष्यते ॥ १५५ ॥ (—)

अत्र दृक्तरलतादिकमङ्गस्य लिङ्गं स्वाभाविकम् साधारणं च मदोदयेन, तत्राप्येतस्य दर्शनात् ।

When through a common feature, intrinsic or extrinsic, something comes to be obscured in fact by another due to the latter being the stronger, that they hold to be 'Mīlita,' which, (accordingly), is of two kinds. Instances in order:—

The eyes have become fickle at the corners; the words consist of syllables sweet and ornate; the gait is heavy with the pressure of amours; the face is lovely in the extreme: thus Grace itself has been active in the person of the deer-eyed one. Consequently, the advent of intoxication though it has secured a footing here is not yet detected! (155)

Here the fickleness of the eye etc. is a feature intrinsic to the body, and it is common to the advent of intoxication, since there also it is to be found.

प्रदीपः—निजं स्वाभाविकं लक्ष्म निगूहनीयसाधारणं चिह्नं तद्द्वारेण केनचिद्वस्तुना बलवत्तया यत्किंचिद्वस्तु वस्तुगत्यैव तिरोधीयते तन्मीलितालंकारः । तच्च द्विधा—लक्ष्मणः क्वचित्स्वाभाविकत्वात्क्वचिदागन्तुकत्वाच्चेत्यर्थः । तत्र स्वाभाविकेन लक्ष्मणा मीलितं यथा —**अपाङ्गेति** । अत्र दृक्तरलतादि अङ्गस्य स्वाभाविकं लिङ्गं, समानं च तिरोधेयेन मदेन ।

उ०:—स्यात् भिन्नत्वेनागृह्यमाणानां वस्त्वंतरलिंगानां स्वकारणाननुमापकत्वं मीलितम् । 'हिमाद्रिं त्वद्यशोमग्नं सुराः शीतेन जानते । इत्यादावपीदमेव । शीतेन तज्ज्ञानेऽपि यशःसाधारणलिंगैः श्वैत्यादिभिस्तदनुमानाभावात् । शीतेन जानत इत्यनेन मीलनस्यैव दार्ढ्यं न त्वन्येनेति प्रतीतेः । एतेनात्रोन्मीलितं पृथगलंकार इत्यपास्तम् । **अपांगेति** । (अपांगः तरलः ययोस्ते, अपांगयोः तरले चंचले इति

प्रभा:—युज्यते । पीड्यत इत्यर्थः । इति प्रत्यनीकप्रकरणम् ॥ ४९ ॥ **वस्तुगत्यैवेति** । एतच्चापह्नुतिसाम्यालंकारव्यावृत्त्यर्थम् । तत्र वस्तुतस्तिरोधानाभावात् । इति मीलित-

ये कंदरासु निवसन्ति सदा हिमाद्रे-
स्त्वत्पातशङ्कितधियो विवशा द्विषस्ते ।
अप्यङ्गमुत्पुलकमुद्वहतां सकम्पं
तेषामहो बत भियां न बुधोऽप्यभिज्ञः ॥ १५६ ॥ (—)

अत्र तु सामर्थ्यादवसितस्य शैत्यस्य आगन्तुकत्वात्तत्प्रभवयोरपि कम्प-पुलकयोस्ताद्रूप्यं समानता च, भयेष्वपि तयोरुपलक्षितत्वात् ।

(७४) स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥ ४९ ॥

Oh! Even the astute person fails to see through the fright of those enemies of yours, though they possess bodies in a state of horripilation and shudder: enemies who being in their minds afraid of your onslaught always dwell in the caves of the Himālaya, quite helpless! (156)

Here the cold that is deteremined (to be the reason of the horripilation and shudder) on the strength (of probability) is extrinsic. Therefore, the horripilation and shudder arising therefrom are also similar in nature. Further they are common, since they are observed even in cases of fright.

52. EKĀVALĪ.

It is Ekāvalī of two varieties where each succeeding thing is established or denied as being an attribute of each preceding one.

प्रदीपः—तत्राऽप्येतदुपलम्भात् । आगन्तुकेन लक्ष्मणा यथा—**ये इति** । अत्र कम्पपुलके अङ्गस्य लिङ्गे, हिमाद्रिकंदरानिवाससामर्थ्याधिगतशीतरूपकारणस्यागन्तुकत्वेन तत्कार्यभूतयोस्तयोरप्यागन्तुकत्वं भयैः समानता च । तेष्वपि तयोरुपलम्भात् । **स्थाप्यते इति** ।

उ० :—वा । मधुराः वक्राः वक्रोक्तिसमर्पकाः वर्णाः यासु । मृगदृशः अंगके कोमलशरीरे लीलया स्वतः स्वभावतः स्फुरितम् । मदोदयः मधुपानजन्यमदस्य उदयः । कृतपदोऽपि कृतस्थानोऽपि । (पृथ्वी छन्दः ।) अत्र स्वाभाविकेन दृक्तारल्यादिना निगूहनीयमदसमानधर्मेण बलवता मदोऽभिभूयते । (**ये इति** । त्वत्पाते त्वदागमने शंकिता धीः येषाम् । विवशाः विह्वलाः । वसंततिलका छन्दः ।) **इति मीलितम् । विशेषणतयेति** । विशेष्यतयेत्यपि बोध्यम् । यथा—'धर्मेण बुद्धिस्तव देव शुद्धा बुद्ध्या निबद्धा सहसैव लक्ष्मीः । लक्ष्म्या च तुष्टा भुवि सर्वलोका

प्रभाः—प्रकरणम् ॥ ५० ॥ **बाहुल्येनेति** । सकृत्तथोक्तौ चमत्काराभावात् । तथा

पूर्वं पूर्वं प्रति यत्रोत्तरोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं निषधो वा संभवति, सा द्विधा बुधैरेकावली भण्यते। क्रमेणोदाहरणम्—

पुराणि यस्यां सवराङ्गनानि वराङ्गना रूपपुरस्कृताङ्ग्यः।
रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य॥ १५७॥

(नवसाहसाङ्कचरित .१.)

Gloss:—Where in relation to each preceding thing, each succeeding thing is repeatedly established or denied as being an attribute (of the former) that figure, in two varieties, is called Ekāvalī by the learned.

Instances in order :—

Where (in Ujjain), the houses (पुर) have in them lovely women; the lovely women have their bodies exalted by beauty; the beauty is such as unfolds exquisite amours; the amours are the missile of Cupid! (157)

प्रदीप:–स्थापनं विधिः। अपोहो निषेधः। यथापूर्वमिति वीप्सायामव्ययीभावः। तेन पूर्वं पूर्वं वस्तु प्रति उत्तरस्य वस्तुनो यत्र विशेषणतया वाहुल्येन विधिः, यत्र वा तथा निषेधः, सा द्विधैकावली। विशेषणतया विधिरित्यस्य विधेर्विशेषणत्वमित्यर्थः। एवं विशेषणतया निषेधोऽपि। कश्चित्तु 'पूर्वकालविशेषणतया स्थितं वस्तु परं विशेष्यं कृत्वा यत्र स्थाप्यतेऽपोह्यते वा सैकावलीति सूत्रार्थः' इत्याह। तत्तु पूर्वं प्रति यथोत्तरस्य वस्तुन इत्यादिप्रकाशविरुद्धम्। तत्र विधौ यथा—**पुराणीति**। अत्र पुराणामङ्गनास्तासामङ्गविशेषणक्रिया-

---

उ०:–लोकैश्च नीता भुवनेषु कीर्तिः॥' इति। अत्रोत्तरोत्तरविशेषणं पूर्वपूर्वं प्रति विशेष्यम्। अत्रैव पूर्वपूर्वैः परस्य परस्योपकारः क्रियमाणो यद्येकरूपस्तदा मालादीपकमुक्तं प्राक्। **स्थापनमिति**। स्थापकत्वं च स्वसंबंधेन विशेष्य-

---

प्रभा:–बाहुल्ये तद्विशेषणतयेति। उत्तरोत्तरस्य विधिः संबन्धबोधनम्। तथा निषेधोऽभावबोधनम्। तत्र विशेषणतयेति तृतीयायाः प्रकारार्थत्वे विशेषणत्वप्रकारेण विधिर्निषेधो वेत्यर्थः स्यात्। न चासौ संभवति। प्रकारत्वे प्रकारेण बोधस्योदाहरणेष्वभावात्। अत उपलक्षणे तृतीयेति विशेषणभूतयोर्विधिनिषेधयोरवगतिरित्याशयः। **कश्चित्त्विति**। परमनन्तरं विशेष्यं कृत्वा यत्र स्थाप्यते अर्थाद्विशेषणेन स्वधर्मविशिष्टमुपपाद्यत इत्यर्थः। अथवा अपोह्यते स्वव्यतिरेकेण विशेष्यतावच्छेदकनिषेधवुद्धिविषयीक्रियत इत्यर्थः। अत्रोदाहरणम्—'स पण्डितो यः स्वहितार्थदर्शी हितं न तद्यत्र परानपक्रिया। परे च ते ये श्रितसाधुभावाः सा साधुता यत्र चकास्ति केशवः॥' अत्र

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ कलगुञ्जितो न यो
न गुञ्जितं तन्न जहार यन्मनः ॥ १५८ ॥ (भट्टिकाव्य. २. १९.)

पूर्वत्र पुराणां वराङ्गनाः, तासामङ्गविशेषणमुखेन रूपम्, तस्य विलासाः, तेषामप्यस्त्रमित्यमुना क्रमेण विशेषणं विधीयते । उत्तरत्र प्रतिषेधेऽप्येवं योज्यम् ।

That is no water where does not grow the extremely charming lotus; that is no lotus in which the bee has not nestled; that is no bee which has not got the sweet hum; that is no hum that has not ravished the mind! (158)

In the former instance, an attribute is established in the order, *viz.* lovely women the attribute of the houses; beauty (attribute) of them (i. e. lovely women), through the former being the attribute of their bodies; of that the amours are the attribute; of those (amours) again (being) a missile is the attribute. In the latter instance which embodies a denial similar should be the way of construing.

प्रदीपः–मुखेन रूपं तस्य विलासास्तेषामस्त्रत्वमिति क्रमेण विशेषणतया विधिः । निषेधे यथा—**न तदिति** । अत्र जले पङ्कजस्य, तत्र षट्पदानां, तत्र गुञ्जितस्य, तत्रापि मनोहारिताया विशेषणतया निषेधः । **यथेति** । अत्रार्थस्य स्मृतिः स्मरणालंकार

उ०ः–ताऽवच्छेदकनियामकत्वम् । अपोहकत्वं च स्वव्यतिरेकेण विशेष्यताऽवच्छेदकव्यतिरेकबुद्धिजनकत्वम् । **बाहुल्येनेति** । तत्रैव चमत्कारादिति भावः । (**पुराणीति** ।) पुराणि गृहाणि । यस्यां नगर्याम् । (रूपेण परिष्कृतं भूषितं अंगं यासां ताः । विलासाः कुसुमायुधस्यास्त्रमिति रूपकम् । उपजातिश्छंदः) **न तदिति** । भट्टिकाव्ये द्वितीयसर्गे शरत्कालवर्णनम् । न लीनः षट्पदो भ्र-

---

प्रभाः–तच्छब्दार्थे विशेषणं पण्डितः पश्चात्स्वहितार्थदर्शित्वं प्रति विशेष्यस्तेन विशेषणेन पण्डितत्वेनोपपाद्यते । द्वितीयभेदस्य तु 'न तज्जलं यन्न सुचारुपङ्कजं' इति वक्ष्यमाणम् । अत्र हि सुचार्वित्यादिविशेषणेन स्वव्यतिरेकेण विशेष्यतावच्छेदकजलत्वनिषेधबुद्धिरिति । अत्र पुराणि यस्यामित्युदाहरणावाप्तिः सूत्राक्षराननुसारतश्चेति दोषः स्फुट एव । दोषान्तरमप्याह—**प्रकाशेति** । इत्येकावलीप्रकरणम् ॥ ५१ ॥

(७९) यथाऽनुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः ।
स्मरणम्

यः पदार्थः केनचिदाकारेण नियतः यदा कदाचित् अनुभूतोऽभूत्, स कालान्तरे स्मृतिप्रतिबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति, यत् तथैव स्मर्यते, तत् भवेत् स्मरणम् । उदाहरणम्—

निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः ।
तद्भवैः कुहरुतैः सुरनार्यः स्मारिताः सुरतकण्ठरुतानाम् ॥ १५९॥ (—)

---

53. SMARAṆA.

When there results the remembrance of a thing as it was experienced, on the sight of something similar to it, the figure is 'Smaraṇa.'

Gloss:—When a particular object, defined by some form, was at some time experienced, and when, at some other time, it happens to be remembered in the same form, at the sight of another object similar to it, which brings about an awakening of the memory, the figure is 'Smaraṇa.' To illustrate:—

By the gurgles produced by the water impinging on the hollows of the navels of the fickle-eyed ones, the divine damsels were put in mind of the trill in the throat at the time of dalliance! (159)

प्रदीपः— इति लक्षणम् । यथाऽनुभवमिति स्मृत्याकारदर्शनम् । दृष्टे तत्सदृश इति तद्धेतुसंस्कारोद्बोधहेतुर्निर्देशः । अदृष्टादेरप्युपलक्षणात् । यद्वा अन्यादृशस्मृतेश्चारुत्वाभावे-नालंकारत्वाभावाद्यवच्छेदकतया लक्षणान्तर्गतमेवैतत् । तदयं वाक्यार्थः—केनचिदाकारेण नियतो यदा कदाचित्केनचित्प्रमाणेनानुभूतः स कालान्तरे संस्कारोद्बोधहेतौ तत्समानधर्मदर्शने सति यदनुभूतेन प्रकारेण स्मर्यते तत्स्मरणालंकारः । स द्विधा—एतज्जन्मनि जन्मान्तरे वाऽनुभूतस्य स्मृतेः । क्रमेणोदाहरणे । **निम्नेति ।**

उ०:— मरो यत्र । कलं कलस्वरयुतम् । वंशस्थं वृत्तम् ।) **इत्येकावली । अन्यादृशस्मृतेरिति ।** अदृष्टोद्बुद्धजन्मान्तरीणसंस्कारजन्यस्मृतेः, चिन्ताद्युद्बुद्धसंस्कारजन्यस्मृतेः, तावद्भिरद्भिरिदमां स्मृतस्तव भुज इत्यादिभूधारणसंबंधज्ञानजन्यस्मृतेश्चेत्यर्थः । अन्त्याया अपि स्मृतेः संचारितया भूभृद्विषयकरतिभावांगतया प्रेयोऽलंकारत्वेनैव चमत्कारित्वेनैतदलंकारत्वाभावात् । सादृश्यमूलस्मृतेरेव चमत्कारित-

---

प्रभाः—**अन्यादृशेति ।** सादृश्यामूलकेत्यर्थः । 'स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् । ऋषीज्ज्योतिर्मयान्सप्त सस्मार स्मरशासनः ॥' इत्यादौ हि न स्मृतेश्चारुत्वमिति नालं-

यथा वा—

करजुअगहिअजसोअत्थणमुहविणिवेसिआहरपुडस्स ।
संमरिअपञ्चजण्णस्स णमह कण्हस्स रोमञ्चं ॥ १६० ॥ (—)

(७६) भ्रान्तिमानन्यसंवित्तत्तुल्यदर्शने ॥ ४६ ॥

तदिति अन्यत् अप्राकरणिकं निर्दिश्यते, तेन समानम् (अर्थादिह) प्राकरणिकम् (आश्रीयते), तस्य तथाविधस्य दृष्टौ सत्यां, यत् अप्राकर-

Or as in

Do homage to the horripilation of Kṛṣṇa who remembered the Pāñchajanya as he applied his tight lower lip to the nipple of Yaśodā's breast which he held between his hands! (160)

54. BHRĀNTIMĀN.

Where there is a cognition of something else, at the sight of one similar to it, the figure is 'Bhrāntimān.'

Gloss:—By तत् is signified अन्य i. e. the thing other than the one under consideration; as similar to it, is assumed, in the present case, of course, the matter under consideration. At the sight of it (i. e. matter under consideration) which is of that description (i. e. similar), when there arises a cognition of its being the thing other than the one under consideration, the figure

प्रदीपः—स्पष्टम् । **भ्रान्तिमानिति** । अत्राप्यन्यसंविदिति लक्षणम् । तत्तुल्यदर्शन इति हेतुनिर्देशः । अन्येति पदार्थं परामृशता तदित्यनेनाप्राकरणिकं निर्दिश्यते । तथा च तेन तुल्यमर्थादिह प्राकरणिकं लभ्यते । तेन प्राकरणिकस्याप्राकरणिकतुल्यस्य दर्शने सति

उ० :—याऽलंकारत्वमिति भावः । (**निम्नेति** । अप्सरसां जलक्रीडावर्णनम् ।) लहरीभिस्तरंगैश्चलदृशां नायिकानां निम्ननाभिकुहरेषु यदंभः प्लावितं तद्भवैः सुरतकालिककंठध्वनिसदृशैः कुहकुहेति ध्वनिविशेषैरित्यन्वयः । कंठो योनिरूपो गर्तः । 'कंठावटश्वभ्रगर्ताः' इति कोशात् । रुतानामिति कर्मणि षष्ठी । (स्वागता छन्दः ।) **करेति** । करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य । संस्मृतपांचजन्यस्य नमत कृष्णस्य रोमांचम् ॥ (आर्या जघनविपुला ।) **इति स्मरणम्** । **दर्शने सतीति** । प्राकरणिकार्थदर्शनोद्बुद्धसंस्कारजन्याप्राकर-

प्रभाः—कारत्वम् । **करजुएति** । 'करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य । संस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥' इति स्मृतिप्रकरणम् ॥ ५२ ॥

णिकतया संवेदनम्, स भ्रान्तिमान्। न चैष रूपकं प्रथमातिशयोक्तिर्वा। तत्र वस्तुतो भ्रमस्याभावात्। इह च (अर्थानुगमनेन संज्ञायाः प्रवृत्तेः) तस्य स्पष्टमेव प्रतिपन्नत्वात्।

उदाहरणम्—

कपाले मार्जारः पय इति कराँल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान्बिसमिति करी संकलयति।
रतान्ते तल्पस्थान्हरति वनिताऽप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥ १६१ ॥

(Cited in सरस्वतीकण्ठाभरण. ३.)

is 'Bhrāntimān.' This is not the same as Rūpaka or Atiśayokti of the first variety. Since there is no real error in them. Here, on the other hand, it (real error) is obviously assumed as the name (of the figure) gets currency due to its being in agreement with the tenor (of the figure.)

To illustrate:—

The cat licks the rays of the moon (fallen) in the jug taking them for milk; the elephant grips them as they shoot through the interstices of trees thinking them to be lotus-fibres; the woman, at the end of dalliance, snatches at them that are spread on the bed mistaking them for her silken garment. Oh! the Moon maddened by his glory plunges this world in confusion! (161)

प्रदीपः—यदप्राकरणिकत्वेन ज्ञानं स भ्रान्तिमानित्यर्थः। न च रूपके निगीर्याध्यवसानरूपायामतिशयोक्तौ चातिव्याप्तिः। तत्र वस्तुतो भ्रमाभावेप्यध्यवसानमात्रस्वीकारात्। इह त्वर्थानुगमेन संज्ञाप्रवृत्तेर्भ्रमोपगमस्य स्पष्टमेवोपगमात्।

उ०ः—णिकस्मृतिजन्यमित्यर्थः। **अप्राकरणिकत्वेनेति**। अप्राकरणिकतादात्म्येनेत्यर्थः। **ज्ञानम्**। निश्चयात्मकम्। तेन 'कांते तव मुखं पद्मं चंद्रो वेति न निर्णयः।' इति संदेहे नातिव्याप्तिः। तत्र सत्यन्तेनानुभूयमानारोपस्य चिन्तादिजन्यस्मृतिजन्यारोपस्य च व्युदासः। अप्राकरणिकतादात्म्येनेत्युक्तेर्मीलितसामान्यतद्गुणवारणम्। भ्रांतिमात्रमत्रालंकारः। सा च कविप्रतिभानिर्मितैव। तेन रंगे रजतमिति बुद्धेर्नालंकारत्वम्। रूपकवित्तौ च नातिव्याप्तिः। मर्मप्रहारकृतचित्तविक्षेपविरहादिकृतोन्मादादिजन्यभ्रान्तेश्च नालंकारत्वम्। सादृश्यप्रयो-

प्रभाः—**वस्तुत इति**। अनाहार्यतयेत्यर्थः। **अध्यवसानमात्रेति**। मात्रेत्यनाहार्यत्वव्यवच्छेदः। **अर्थानुगमेनेति**। अर्थश्चानाहार्य एवोत्सर्गसिद्धोऽत्र संज्ञाघटक इति भावः। यत्र भ्रमादिशब्देनेतिशब्दादिना वा भ्रमोपनिबन्धस्तत्र भ्रान्तिमानलंकार

(७७) आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धना ॥ ४७ ॥

अस्य धुरं सुतरामुपमेयमेव वोढुं प्रौढमिति कैमर्थ्येन यत् उपमानमाक्षिप्यते, यदपि तस्यैवोपमानतया प्रसिद्धस्य उपमानान्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते, तत् (उपमेयस्योपमानप्रतिकूलवर्तित्वात्) उभयरूपं प्रतीपम् । क्रमेणोदाहरणम्—

---

55. PRATĪPA.

(1) Where an exception is taken to the Upamāna, or (2) if to the same (i. e. Upamāna) is assigned the status of an Upameya, based on contempt, the figure is 'Pratīpa.'

Gloss:—(1) Where an exception is taken on the ground of futility to the Upamāna under the notion that the Upameya itself is capable of fulfilling the function of the former; (2) where again the same that has become established as an Upamāna is conceived to be Upameya as a matter of contempt, with a view to driving at another Upamāna; that is 'Pratīpa' in *two* forms, so called because therein the Upameya stands *pitted against* the Upamāna. Instances in order :—

प्रदीपः–उदाहरणम्—**कपाले इति । आक्षेप इति ।** अस्य प्रयोजनं निर्वाहयितुमुपमेयमेवालमित्यप्रयोजकतयोपमानं यदाक्षिप्यते, यच्चोपमानतया प्रसिद्धस्योपमेये तस्माद्विशेषविवक्षया अनादरार्थमुपमेयभावः कल्प्यते, तदुभयरूपं प्रतीपम् । उपमेयस्योपमाने

उ०ः–ज्यत्वाभावात् । **वस्तुतो भ्रमाभावेऽपीति ।** स्वारसिकभ्रमाभावेऽपीत्यर्थः । अत्र च प्रवृत्तिनिवृत्तिकारिस्वारसिकभ्रमो विवक्षित इति भावः । तयोस्तु शब्दाधीनो व्यांजनिको भ्रम इति तात्पर्यम् । वस्तुतो यत्र 'इति' इत्यादिपदेन भ्रमत्वेन निबद्धो व्यंग्यो वा तत्रायमलंकार इति नातिप्रसंगशंकेति बोध्यम् । **कपाले इति ।** (भासकवेः पद्यमिति शार्ङ्गधरपद्धतौ स्पष्टम् ।) पय इति । पयोभ्रांत्येत्यर्थः । (लेढि आस्वादयति । तरूणां छिद्रेषु प्रोतान्प्रविष्टान् । संकलयति गृह्णाति । प्रभया मत्तः तदतिशयशाली । विभ्रमयति भ्रममुत्पादयति । मत्तो हि स्वत एव भ्रमति न तु परस्य भ्रममुत्पादयतीत्याश्चर्यं अहोशब्देन बोध्यते । शिखरिणी छन्दः ।) **इति भ्रान्तिमान् । अप्रयोजकतया ।** कैमर्थ्येन । तिरस्कारफलकोपमानव्यर्थतोक्तिरेकं प्रतीपमित्यर्थः ।

प्रभाः–इति नातिप्रसङ्ग इत्यप्याहुः । इति भ्रान्तिप्रकरणम् ॥ ५२ ॥ प्रतीपपदप्रवृत्ति-

लावण्यौकसि सप्रतापगरिमण्यग्रेसरे त्यागिनां
देव त्वय्यवनीभरक्षमभुजे निष्पादिते वेधसा ।
इन्दुः किं घटितः किमेष विहितः पूषा किमुत्पादितं
चिन्तारत्नमहो मुधैव किममी सृष्टाः कुलक्ष्माभृतः ॥ १६२ ॥ (—)

ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जं ।
तुज्झ मुहेण किसोअरि चन्दो उअमिज्जइ जणेण ॥ १६३ ॥ (—)

When, O King, the Creator had created you, the sanctum of charm, endowed with the height of prowess, the foremost of the generous, with arms capable of sustaining the burden of the earth, why was the moon shaped? Why was this sun created? Why was that gem fulfilling longings produced? Why were the Kulaparvatas created in vain? (162)

O lovely woman! come along. Lend your ear and listen to the *scandal*: the people are comparing the moon with your face, O lady of slim waist! (163)

प्रदीप :–प्रतिकूलवर्तित्वात् । तत्राद्यं यथा—**लावण्येति** । अत्र यथासंख्यसत्त्वेऽपि आक्षेप एव चमत्कारकारीत्याक्षेपोदाहरणता । द्वितीये तु क्वचिदुपमित्यनिष्पत्त्या तिरस्कारः, क्वचित्तु निष्पन्ना सैव तद्धेतुः । क्रमेणोदाहरणम्—**ए एहीति** । अत्र मुखोपमानस्य शशिनः स्वल्पगुणत्वादुपमित्यनिष्पत्तिर्वअणिज्जमिति पदेन द्योत्यते ।

उ० :–प्रतीपप्रयोगार्थमाह–**उपमेयस्येति** । **लावण्येति** । लावण्याश्रये, प्रतापातिशयसहिते, दातृमुख्ये, भूभरणसमर्थभुजे । पूषा सूर्यः । चिंतारत्नं चिंतामणिः । (कुलक्ष्माभृतः–' महेन्द्रो मलयः सह्यः शक्तिमान् ऋक्षपर्वतः । विंध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः' ॥ शार्दूलविक्रीडितं छन्दः ।) अत्र निषिध्यमानवस्तुगतसकलगुणप्रतीतिर्व्यंग्या प्रयोजनम् । **द्वितीये त्विति** । तिरस्कारार्थमुपमानस्योपमेयत्वकल्पनरूपे इत्यर्थः । (**ए एहीति** ।) ' अयि एहि तावत् सुंदरि कर्णं दत्वा शृणुष्व वचनीयम् । तव मुखेन कृशोदरि चंद्र उपमीयते जनेन ॥' वचनीयं निंदाम् । (आर्या छंदः ।) **उपमित्यनिष्पत्तिरिति** । अत एव व्यतिरेकाद्भेदः । तत्रोपमितिनिष्पत्तावप्युपमेयाधिक्यप्रतीतेः । अत्र वर्ण्यमुख-

---

प्रभा :–निमित्तमाह—**उपमेयस्येति** । **ए एहीति** । ' अये एहि तावत्सुन्दरि कर्णं दत्त्वा शृणुष्व वचनीयम् । तव मुखेन कृशोदरि चन्द्र उपमीयते जनेन ॥' इति । **सैव चेति** । व्यतिरेके तूपमितिनिष्पत्तिरस्तीति वैलक्षण्यमिति भावः । **न्यूनगुणत्वेति** । वस्तुतस्तूपमाने साधारणधर्मसंबन्धोऽनूद्यते उपमेये तु विधीयते । तेन प्रसिद्धसा-

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतर णत्वात् उपमित्यनिष्पत्त्या 'वअणिज्जम्'—इति वचनीयपदाभिव्यङ्ग्यस्तिरस्कारः ।

क्वचित्तु निष्पन्नैवोपमितिक्रिया अनादरनिबन्धनम् । यथा—

गर्वमसंवाह्यमिमं लोचनयुगलेन किं वहसि मुग्धे ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥ १६४ ॥

(Cited in सरस्वतीकण्ठाभरण ४.)

इहोपमेयीकरणमेवोत्पलानामनादरः ।

अनयैव रीत्या यत् असामान्यगुणयोगात् नोपमानभावमपि अनुभूत-

Here the comparison does not materialise owing to the moon, that is being compared with the face, possessing lesser excellence. Thus there is contempt suggested by the word वअणिज्जम् (वचनीयं).

In some cases, however, the comparison though it has materialised is the basis of contempt. To illustrate:—

Why do you cherish, O simple maid! so unbearable a vanity on the score of the pair of your eyes? Indeed on every side there do exist in the lakes blue lotuses similar to these! (164)

Here that the lotuses are reduced to the position of the Upameya is itself a contempt of them.

Likewise, when an object, which on account of its possessing extraordinary qualities, has never before experienced so much as the

---

प्रदीपः—सैव च तिरस्कारहेतुः । **गर्वमिति** । अत्र नलिनानां लोचनोपमेयीकरणमेवानादरहेतुः । उपमेयस्य न्यूनगुणत्वस्थितेः । अनयैव रीत्या तदपि प्रतीपं द्रष्टव्यं यत्सामान्यगुणयोगाभावेनोपमानत्वाननुभवेऽप्यर्थस्योपमानत्वकल्पना । कथमिति चेत् । उपमानतिरस्कारस्यालंकारताबीजत्वात् । तच्च द्विधा संभवति । उपमानत्वेनैव प्रसिद्धस्योपमेयत्वकल्पनया, असदृशत्वेन प्रसिद्धस्योपमानत्वकल्पनया वा । सूत्रं चोपलक्षणतया

उ०:—स्याधिक्यं व्यंग्यम् । (**गर्वमिति** । असंवाह्यं संव्रहनायोग्यम् । अपरिमितमिति यावत् । आर्या छन्दः ।) **अत्र नलिनानामिति** । उपमानत्वेन प्रसिद्धानामित्यर्थः । अत्र नेत्रयोरुपमानत्वेनाधिक्यं फलति । अत्रोपमितिनिष्पत्तावप्युपमेयाधिक्याप्रतीतेर्व्यतिरेकतो भेदः । 'त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ।' इत्यप्यत्रोदाहरणम् । **असदृशत्वेनेति** । उपमेयासंभावितस्वनिष्ठासाधारण-

---

प्रभाः—दृश्यतयोपमानस्याधिक्यं साध्यसादृश्यतया चोपमेयस्य न्यूनत्वं बोध्यम् । **सामान्यगुणयोगाभावेनेति** । स्वभिन्न इति शेषः । इति प्रतीपप्रकरणम् ॥ ५४ ॥

पूर्वि, तस्य तत्कल्पनायामपि भवति प्रतीपमिति प्रत्येतव्यम्। यथा—

अहमेव गुरुः सुदारुणानामिति हालाहल मा स्म तात दृप्यः।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन्वचनानि दुर्जनानाम्॥१६५॥
(—)

अत्र हालाहलस्योपमानत्वमसंभाव्यमेवोपनिबद्धम्।

(७८) प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया।
ऐकात्म्यं बध्यते योगात्तत्सामान्यमिति स्मृतम्॥४८॥

---

status of the Upamāna, comes to be so conceived, it should be recognised also as being 'Pratīpa.' To illustrate:—

O deadly poison, do not be conceited with the idea that you alone are the premier of the extremely dire things. Indeed there exist, in abundance, in this world, the words of the wicked that are like yourself! (165)

Here, though it was quite unlikely (before), the deadly poison has (now) been stated to be the Upamāna.

56. SĀMĀNYA.

Where, with a view to conveying the similarity of attributes, the matter under consideration is described as becoming one with another due to their coming together, the figure is 'Sāmānya.'

प्रदीपः—योज्यम्। उदाहरणम्—**अहमेवेति**। अत्र हालाहलस्य खलवचनोपमानत्वमसंभाव्यमानमेवोपनिबद्धं तिरस्कारहेतुः। **प्रस्तुतस्येति**। अतादृशत्वेऽपि विवक्षितगुणसाम्यस्य प्रस्तुतस्यान्येनाप्रस्तुतेन गुणसाम्यविवक्षया ऐकात्म्यं बध्यते तत्सामान्यम्। समानगुणयोगात्। अत्रापरित्यक्तनिजगुणस्येत्यपि विशेषणं विवक्षितम्। अन्यथा तद्गुणालंकारेऽतिव्याप्तेः।

उ०:—धर्मयोगादसंभावितोपमानभावस्योपमानत्वकल्पनयेत्यर्थः। (**अहमिति**। तातेति सानुकंपसंबोधनम्। मा स्म दृप्यः। गर्वं मा कृथाः। मालभारिणी छन्दः।) **हालाहलस्येति**। अत्युत्कटदुःखहेतोरित्यर्थः। अस्योपमातो भेद उपमाप्रकरण एवोक्तः। **इति प्रतीपम्**। **अतादृशत्वेऽपि**। असमानगुणत्वेऽपि।

प्रभा:—**ऐकात्म्यमिति**। अभेद इत्यर्थः। मीलितेऽग्रहणमेव अत्र तु भिन्नत्वेनाग्रहणमिति भेदः। **तद्गुणेति**। यद्यपि तद्गुणालंकारेऽन्यगुणग्रहणमात्रं न तु धर्मिणोरभेदोपनिबन्धः प्रतीतिर्वा। 'विभिन्नवर्णा गरुडाग्रजेन—'इत्यादावरुणस्य सूर्याश्वानां चाभेदकथनात्तत्प्रतीत्योरभावात् तथापि तद्गुणविषयताया इह निरासे तात्पर्यं बोध्यम्। तद्गुणा-

अताद्दशमपि ताद्दशतया विवक्षितुं यत् अप्रस्तुतार्थेन संपृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते, तत् (समानगुणनिबन्धनात्) सामान्यम्, उदाहरणम्—

मलयजरसविलिप्ततनवो नवहारलताविभूषिताः
सिततरदन्तपत्रकृतवक्त्ररुचो रुचिरामलांशुकाः।
शशभृति विततधाम्नि धवलयति धरामविभाव्यतां गताः
प्रियवसतिं प्रयांति सुखमेव निरस्तभियोऽभिसारिकाः ॥ १६६ ॥

(Cited in वामन's काव्यालंकारसूत्रवृत्ति. ४·३.)

Gloss:—Where a thing when it comes in contact with the matter not under consideration, though not similar to the latter, is sought to be described as similar, and is therefore described as being one with it, even when it has not abandoned its own attribute, the figure is 'Sāmānya', so called because it is based on similar attributes. To illustrate:—

With their bodies besmeared with sandal-paste, adorned with new pearl-necklaces, with their faces lit up by ivory pendants extremely white, clad in gay immaculate silk, the Abhisārikās, who have become *imperceptible*, when the moon with lustre diffused is making the earth white, are proceeding at ease to the abodes of the beloveds, free from concern ! (166)

प्रदीपः–'वध्यते' इत्यस्य प्रत्यायनमात्रमर्थो न तु शाब्दं प्रतिपादनम्। उदाहरणे 'अविभाव्यतां गताः' इत्यादावैकात्म्यस्याशाब्दत्वात्। उदाहरणम्—**मलयजेति**। अत्राभिसारिका-

---

उ०ः–**प्रस्तुतस्य** । प्राधान्येन वर्णनीयस्य। **गुणसाम्यविवक्षया** । गुणसाम्यं प्रतिपादयितुम् । **ऐकात्म्यम्** । पृथक्त्वेनाप्रतीयमानत्वम् । तेन मीलिताद्भेदः । तत्र बलवत्सजातीयग्रहणकृताग्रहणम्, अत्र तु पृथक्त्वेनाग्रहणमिति विशेषात् । न च भ्रांतिमता संकरः । तत्र स्मर्यमाणस्यारोपोऽत्रानुभूयमानस्येति विशेषात्। नापि रूपकप्रथमातिशयोक्तिभ्याम्। उपमेये उपमानतादात्म्यस्य शब्दादप्रतीते रूपकाभावात्। उपमानतावच्छेदकरूपेण अप्रतीयमानत्वान्नातिशयोक्तिः। (**मलयजेति**।) दन्तपत्रं दन्तनिर्मितताटंकम्। (विततं विस्तृतं धाम तेजो यस्य तस्मिन् शशभृति चंद्रे धरां पृथ्वीं धवलयति सति। अविभाव्यतां

प्रभाः–लंकारे सति तल्लक्षणस्यात्रातिव्याप्तेरिति च ग्रन्थार्थः। इति सामान्यप्रकरणम् ॥५५॥

अत्र प्रस्तुततदन्ययोरन्यूनानतिरिक्ततया निबद्धं धवलत्वमेकात्मताहेतुः, अत एव पृथग्भावेन न तयोरुपलक्षणम् ।

यथा वा—

वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गण्डतलागतानि ।
भृङ्गाः सहेलं यदि नापतिष्यन्को ऽवेदयिष्यन्नवचम्पकानि ॥ १६७ ॥
(—)

अत्र निमित्तान्तरजनिताऽपि नानात्वप्रतीतिः प्रथमप्रतिपन्नमभेदं न व्युदसितुमुत्सहते, प्रतीतत्वात्तस्य । प्रतीतेश्च बाधायोगात् ।

Here the whiteness of the matter under consideration and of its correlate, which is stated be neither less nor more, is the occasion for their becoming one. Hence they are not noticed to be distinct.

Or as in:

Who could have detected the fresh *campaka* flowers that had come down to the surface of the cheeks, from above the tops of the ears of the women, whose complexion was like the caneskin, if the bees had not gaily alighted on them ! (167)

Here the apprehension of distinctness though produced by another circumstance is not capable cf making null and void the identity that was felt earlier, since it *was* apprehended and since it is not possible to repudiate an apprehension.

प्रदीपः – चन्द्रिकयोरेकात्मत्वप्रतीतिः । क्वचित्प्रस्तुताप्रस्तुतयोरुत्तरकालीनविवेकादिना तदुन्नयनम् । यथा—**वेत्रेति** । अत्र भृङ्गपातानन्तरं भेदप्रत्ययो न तु पूर्वमेव प्रतीतिः । ननु भृङ्गपातेन भेदप्रत्ययात्कथमेकात्मत्वप्रतीतिरिति चेत् अग्रे तथात्वेपि प्राथमिऽकाभेदप्र-

---

उ० : – अलक्ष्यताम् । अभिसारिकाः –'कान्तार्थिनी तु या याति संकेतं साऽभिसारिका' इत्यमरः । पादाकुलकं छन्दः ।) **तदुन्नयनम्** । पूर्वकालजातैकात्म्यप्रत्ययनिवेदनम् । **वेत्रेति** । (वेत्रस्य त्वचा तुल्या रुक् यासाम् । गौरवर्णानामिति यावत् । कर्णाग्रतः कर्णाग्रात् । गंडतले आगतानि ।) यदि भृंगाः सहेलं नापतिष्यन् तदा नवचंपकानि कोऽवेदयिष्यदित्यन्वयः । (इन्द्रवज्रा छन्दः ।) अत्र गंडचम्पकयोर्गौरत्वाद्भेदाप्रतीतिः । **अग्रे इति** । एवं चाग्रेतनविशेषदर्शनजन्यभेदज्ञानमुत्तरकालिकं न पूर्वोत्पन्नतद्ग्रहं निरसितुमुत्सहते । उत्पन्नत्वात्तस्ये-

(७९) विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा ॥ ४९ ॥
अन्यत्प्रकुर्वतः कार्यमशक्यस्यान्यवस्तुनः।
तथैव करणं चेति विशेषस्त्रिविधः स्मृतः ॥ ५० ॥

प्रसिद्धाधारपरिहारेण यत् आधेयस्य विशिष्टा स्थितिरभिधीयते, स प्रथमो विशेषः। उदाहरणम्—

दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्।
रमयन्ति जगन्ति गिरः कथमिह कवयो न ते वन्द्याः ॥१६८॥ (—)

---

57. VIŚEṢA.

(1) The presence of the abiding object, in the absence of the recognised abode; (2) the presence at one and the same time, of one and the same thing, in many (abodes), in the same form; and (3) the achievement, in the same stroke, of a different thing that is impossible, by one who is performing some other act: this is 'Viśeṣa' in *three* varieties.

Gloss:—Where the peculiar presence of an abiding object in the absence of its recognised abode happens to be described, that is the first variety of Viśeṣa. To illustrate:—

How, in this world, can one help paying homage to the poets, whose words possessed of no small number of merits delight the worlds, till the time of world-dissolution, even when the poets have passed away unto heaven? (168)

प्रदीपः—त्ययस्यानिरासात्। तस्य वृत्तत्वात्। **विनेति**। स एष त्रिधा। तत्र प्रसिद्धमाधारं विनाऽऽधेयस्य विशिष्टावस्थितिर्यदभिधीयते स एको विशेषः। तत्र प्रसिद्ध-मित्यनेनेदमुक्तं यदत्र वास्तवमाधारत्वं न विवक्षितं किं तु कविप्रसिद्धिमात्रसिद्धमिति। अत एव तथैवोदाहरणम्—**दिवमपीति**। अत्र कविरूपं प्रसिद्धमाधारं विना गिरां

उ०:—त्यर्थः। तत्फलीभूतगंडचंपकयोरत्यन्तसमानगुणत्वप्रत्ययस्यातिरस्कार इति तात्पर्यम्। एतेनेदृशे विषये विशेषालंकारः पृथगित्यपास्तम्। **इति सामा-न्यम्**। ननु गिरामाकाश आधारः प्रसिद्धो न कविरत आह—**किं त्विति**। **सिद्धमिति**। सिद्धमपीत्यर्थः। (**दिवमिति**। आकल्पं आप्रलयम्।) गुण-

एकमपि वस्तु यत् एकेनैव स्वभावेन युगपदनेकत्र वर्तते, स द्वितीयः।
उदाहरणम्—

सा वसइ तुज्झ हिअए स च्चिअ अच्छीसु सा अ वअणेसु।
अह्मारिसाण सुन्दर ओआसो णत्थि पावाणं ॥ १६९ ॥ (—)

यदपि किंचिद्रभसेन आरभमाणस्तेनैव यत्नेनाशक्यमपि कार्यान्तरमारभते, सोऽपरो विशेषः। उदाहरणम्—

स्फुरदद्भुतरूपमुत्प्रतापज्वलनं त्वां सृजतानवद्यविद्यम्।

That is the second variety where one and the same thing happens to be simultaneously in many places in one and the same form. To illustrate:—

She dwells in your heart, the same in your eyes, and in your words, again, the same. O beautiful one, how can there be room for wretches like ourselves? (169)

That is another variety of Viśeṣa where one setting about doing a thing vehemently, achieves in the same effort another result though it be impossible. To illustrate:—

In creating you whose beauty is sparkling and striking, whose fire

---

प्रदीपः—विशिष्टावस्थितिरुक्ता। एकस्य वस्तुनो युगपद्या एकात्मा अनेकवृत्तिः स द्वितीयो विशेषः। एकात्मेत्येकेन स्वभावेनेत्यर्थः। एतच्च विशेषणं 'एकत्रिधा वससि—' इत्यादियथासंख्यव्यावर्तनाय। युगपदिति पर्यायनिवारणाय। उदाहरणम्—**सा वसइ इति**। स्पष्टम्। रभसेनान्यत्कार्यं कुर्वतः कर्तुर्यदशक्यस्यान्यस्यापि कार्यस्य तथैव करणं स तृतीयो विशेषः। अत्र तथैवेति तेनैव प्रकारेणेत्यर्थः। एतच्च 'धुनोति चासिं तनुते च कीर्तिम्' इत्यादिसमुच्चयव्यावर्तनाय। उदाहरणम्—**स्फुर-**

उ०:—गणा गिरः। जगंति कर्म (आर्या छन्दः।) **विशिष्टावस्थितिः**। निराधारैव। एवमाधारांतरगतत्वेनाऽधेयवर्णनेऽप्ययम्। यथा 'गतेऽपि सूर्ये दीपस्थास्तमश्छिदंति तत्कराः' इति। (**सेति**।) 'सा वसति तव हृदये सैवाक्ष्णोः सैव वचनेषु। अस्मादृशीनां सुंदर अवकाशो नास्ति पापानाम् ॥' (आर्या छन्दः) **स्फुरदिति**। स्फुरत् प्रकाशमानं अद्भुतं रूपं यस्य। उद्गतः प्रतापाग्निः

प्रभा:—**सेति**। 'सा वसति तव हृदये सैवाक्ष्णोः सा च वचनेषु। अस्मादृशीनां सुन्दर अवकाशो नास्ति पापानाम् ॥' इति। **रभसेनेति**। एतच्चैकेनैव यत्नेन

विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च ॥ १७० ॥ (—)

यथा वा—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥ १७१ ॥

(रघुवंश. ८. ६७.)

सर्वत्र एवंविधविषयेऽतिशयोक्तिरेव प्राणत्वेनावतिष्ठते, तां विना प्रायेणालंकारत्वायोगात् । अत एवोक्तम्—

सैषा सर्वत्र वक्रोक्तिरनयाऽर्थो विभाव्यते ।

---

of prowess is aglow, and whose learning is faultless, the Creator has created on earth, a new Cupid, a new sun, and a new Bṛhaspati, to be sure! (170)

Or as in

(You were to me) a wife, an adviser, a friend in confidence, a favourite pupil in the practice of fine arts. Say, alas! what has not the unrelenting Death robbed me of when it has taken you away? (171)

Everywhere in matters like this, it is Atiśayokti that stands as the life, since, in its absence there could not be, generally speaking, the status of a figure. Hence has it been said:—

This ornate way of expression is found everywhere; an idea gets

---

प्रदीपः—**दिति** । अत्रान्यस्य करणं शाब्दम् । क्वचित्तु व्यङ्ग्यम् । यथा—**गृहिणीति** । अत्र किं न मे हृतमिति सचिवादिसर्वहरणरूपकार्यकरणं व्यज्यते । नन्वाधारं विना वास्तवस्याधेयस्य व्यवस्थितिरनुपपन्नैव, एवमन्ययोरप्यनुपपत्तिरिति चेत्, न । अतिशयोक्तिमालम्ब्य तथाभिधानात् । सर्वत्रैवंविधे विषयेऽतिशयोक्तिरेव प्राणायिता । तां विना प्रायशोऽलंकारत्वाभावात् । अत एवाहुः

उ०:—यस्य । अनवद्या शुद्धा विद्या यस्य । एतादृशं त्वां सृजता ब्रह्मणा नवः मनोभूः मदनः, सविता, बृहस्पतिश्च ससृजे उत्पादितः इति सत्यम् । मालभारिणी छन्दः । **गृहिणीति** । (रघुकाव्ये अष्टमसर्गे इंदुमतीं शोचतः अजराजस्योक्तिः । अपरवक्त्रं छन्दः ।) **अतिशयोक्तिमिति** । अतिशयेनोक्तिमित्यर्थः । आधुनिकोक्तेरपि कव्युक्तित्वोपचारेण हृदयादौ भावनादेव सत्त्वोपचारेण राज्ञस्ताद्रूप्येण मनोभूत्वाद्युपचारेण च तथोक्तिरिति भावः । न त्वतिशयोक्त्यलंकारोऽत्र

प्रभा:—कार्यद्वयं करिष्यामीत्यभिसंधिव्यावृत्त्यर्थम् । स्फुरदित्यादौ यथासंख्यसत्त्वेऽपि

यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना ॥ इति ।

(भामह's काव्यालंकार. २.८५.)

(८०) स्वमुत्सृज्य गुणं योगादत्युज्ज्वलगुणस्य यत् ।
वस्तु तद्‌गुणतामेति भण्यते स तु तद्‌गुणः ॥ ९१ ॥

वस्तु तिरस्कृतनिजरूपं केनापि समीपगतेन प्रगुणया स्वगुणसंपदो-

---

embellished with it. A poet should strive after it. What figure could there be in its absence?

58. TADGUṆA.

That, however, is said to be 'Tadguṇa' where a thing giving up its own attribute, due to the contact of something else that possesses an extremely brilliant attribute, assumes the attribute of the other.

Gloss:—That is 'Tadguṇa' where a thing, whose own hue is obscured, assumes the likeness of something else which, as it comes close to the former,

---

प्रदीपः—**सैषेति** । विभाव्यत इति । विशिष्टो भाव्यते । चमत्कारविशेषविषयः क्रियत इत्यर्थः । **स्वमिति** । अत्युत्कृष्टगुणस्याप्रस्तुतस्य योगात्तद्‌गुणसंपदुपरागात्स्वकीयं रूपं तिरस्कृत्य प्रस्तुतं वस्तु यत्तदनुकारमेवासादयति स तद्‌गुणो भण्यते । तस्याप्रस्तुतस्य गुणोऽत्रेति व्युत्पत्तेः । मीलिते वस्त्वन्तरेणाच्छादितस्य तस्यैव वस्तुनः प्रतीतिः, अत्र त्वनाच्छादि-

---

उ०:—विवक्षितः । तस्यात्रासंभवात् । **वक्रोक्तिः** । वक्रतया गौणतयोक्तिः । त्रिविध इत्युपलक्षणम् । दोषेऽपि गुणं दृष्ट्वा तदभ्यर्थनायामप्ययम् । 'विपदः सन्तु नः शश्वद्यासु संकीर्त्यते हरिः' । एतेनानुज्ञा नामात्र पृथगलंकार इत्यपास्तम् । एवं गुणे दोषं दृष्ट्वा तदभ्यर्थनायामप्ययम् । एवं किंचित्सौकर्यं दृष्ट्वा दोषस्य गुणत्वकल्पनं, गुणस्य वा दोषत्वकल्पनमपि सः । यथा 'नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवम् । शाखिनोऽन्ये विराजन्ते खण्ड्यन्ते चन्दनद्रुमाः ॥' एतेनैतादृशविषये लेशनामा पृथगलंकार इत्यपास्तम् । एवं 'सूच्यार्थसूचनं मुद्रा प्राकृतार्थपरैः पदैः ।' यथा—नाटकादौ, इत्युक्तमुद्रायास्त्वलंकारत्वमेव न । प्रकृतोपस्कारकत्वाभावात् । यत्तु 'क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः । चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥' इति । तन्न । रूपकेणैवात्र वर्ण्य-

---

प्रभा:—विशेषालंकारस्यैव चमत्कारे प्राधान्यात्तदुदाहरणत्वम् । **यदाहुरिति** । काव्यादर्शकृतो दण्ड्युपाध्याया इत्यर्थः । इति विशेषप्रकरणम् ॥ ५६ ॥ **स्वमुत्सृज्य गुणमिति** ।

परक्तं तत्प्रतिभासमेव यत्समासादयति, स तद्गुणः (तस्याप्रकृतस्य गुणोऽत्रास्तीति ।)

उदाहरणम्—

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या ।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः ॥ १७२ ॥

(शिशुपालवध ४.१४.)

अत्र रवितुरगापेक्षया गरुडाग्रजस्य, तदपेक्षया च हरिन्मणीनां प्रगुणवर्णता ।

---

tinges the former with its own rich attribute, on account of its possessing the attribute in a powerful form. It is so called because the attribute of 'that' i. e. of the matter not under consideration is (assumed) in this case (by the matter under consideration).

To illustrate:—

Where (i. e. on the Raivataka) the coursers of the sun, whose hue was altered by Aruṇa, the elder brother of Garuḍa, with (his) splendour gleaming all around, were restored to their own hue by the jewels green like the shoots of the bamboo with (their) splendour gleaming all around! (172)

Here the elder brother of Garuḍa, in comparison with the sun's horses, and in comparison with it, the green jewels possess the colour in an intense form.

प्रदीपः—तत्स्वरूपस्यैव वस्त्वन्तरगुणापत्तिरिति ततो भेदः । उदाहरणम्—**विभिन्नेति** । अत्र तद्गुणद्वयम् । रवितुरगापेक्षया गरुडाग्रजस्य तदपेक्षया च हरिन्मणीनां प्रकृष्टगुणत्वात्तद्रूपतया प्रतीतेः । एतेन यत्केनचिद्व्याख्यातम् 'स्वगुणत्यागानन्तरं पुनस्तत्प्राप्तिस्तद्गुणः' इति, तदनादेयम् । तस्याप्रस्तुतस्य गुणोऽत्रास्तीति व्युत्पत्तिकथनप्रकाशविरोधात् । तत्र गुणद्वयकथनेन च तद्गुणद्वयव्युत्पादनात् । 'आत्ते सीमन्तरत्ने–' इत्यादौ

उ०—स्योपस्कारो न तु क्रमकृतोऽपीति तस्यालंकारत्वाभावात् । **इति विशेषः** । **उत्सृज्येति** । व्याचष्टे—**तिरस्कृत्येति** । अभिभवे वस्तुतः स्वगुणत्यागाभावादिति भावः । **ततो भेद इति** । मीलिते धर्मिण एवाग्रहः, सामान्येऽपरित्यक्तगुणस्यैव अपृथक्प्रतिभासः, इह तु गुणमात्रस्यैवाभिभवः धर्मिणः पृथग्

प्रभाः—स्पष्टम् । इति तद्गुणः ॥५७॥ **स्व (तद्) रूपाननुहारश्चेदिति । धवलोऽ-**

(८१) तद्रूपाननुहारश्चेदस्य तत्स्यादतद्गुणः ।

यदि तु तदीयं वर्णं संभवन्त्यामपि योग्यतायाम् इदं न्यूनगुणं न गृह्णीयात्, तदा भवेदतद्गुणो नाम । उदाहरणम्—

धवलोऽसि जह वि सुन्दर तह वि तुए मज्झ रञ्जिअं हिअअं ।
राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोऽसि ॥ १७३ ॥

(हाल's गाथासप्तशती. ७·६५.)

---

59. ATADGUṆA.

If there is non-assumption of the colour of if (i. e. the other), the figure is 'Atadguṇa'.

Gloss :—If, however, this one (i. e. matter not under consideration) of inferior attrribute does not assume its (i. e. of the other of superior attribute) colour even though there was a propriety in it, the figure would be 'Atadguṇa' in name. To illustrate :—

White as you are, O graceful one, you have rendered my heart passionate (by Śleṣa : red). Though enshrined in (my) heart filled with passion (by Śleṣa : redness), O lovely one, you have not grown passionate (by Śleṣa : red) ! (173)

प्रदीप :—वक्ष्यमाणे संकरोदाहरणे तद्गुणत्वाभावप्रसंगाच्च । न हि तत्र त्यक्तस्य स्वकीयरूपस्यावाप्तिः । **तद्रूपेति** । तदिति प्रकृतेत्यर्थः । अस्याप्रस्तुतस्य । अत्युज्ज्वलगुणयोगेऽपि यदि न्यूनगुणोऽप्रकृतः प्रकृतस्य गुणं नानुहरति तदा अतद्गुणः । उदाहरणम्— **धवलोऽसीति** । अत्रातिरक्ते मनसि धृतस्याप्यरक्तत्ववचनादुत्तरार्धमेवोदाहरणम् । तत्र प्रकृतं हृदयम्, संबोध्यस्त्वप्रकृतः । स्वहृदयवृत्तान्तनिवेदनस्यैव विवक्षितत्वात् । किं चात्र सूत्रे तत्पदेन प्रकृतमिवाप्रकृतमप्युच्यते । तथाऽस्येत्यनेनाप्रकृतमिव प्रकृतमप्युपस्थाप्यते ।

उ० :—भासश्चेति भेद इत्यर्थः । भ्रान्तिमति स्मर्यमाणस्यारोपोऽत्र गृह्यमाणस्येति भेदः । भ्रान्तेर्निबद्धत्वाभावाच्च । **विभिन्नेति** । (माघकाव्ये चतुर्थसर्गे रैवतकपर्वतवर्णनम् । गरुडाग्रजेन अरुणेन विभिन्नवर्णाः । रथ्याः अश्वाः ।) स्फुरंत्या रुचा इति सर्वान्वयि । वंशकरीरं कोमलवंशाग्रभागः । (उपजातिश्छन्दः ।) अत्र द्वितीयं तद्गुणं पूर्वरूपमिति व्यवहरन्ति केचित् । 'पद्मरागायते नासामौक्तिकं तेऽधरत्विषा' इत्यप्युदाहरणम् । एवं परसन्निधानेन प्राक्सिद्धस्व-

---

प्रभा :—**सीति** । 'धवलोऽसि यद्यपि सुन्दर तथापि त्वया मम रञ्जितं हृदयम् ।

अत्रातिरक्तेनापि मनसा संयुक्तो न रक्ततामुपगत इत्यतद्गुणः । किं च तदिति अप्रकृतं अस्येति च प्रकृतमत्र निर्दिश्यते । तेन यत् अप्रकृतस्य रूपं प्रकृतेन कुतोऽपि निमित्तात् नानुविधीयते, सोऽतद्गुण इत्यपि प्रतिपत्तव्यम् । यथा—

गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता चीयते न च न चापचीयते ॥ १७४ ॥

(—)

Here the figure is Atadguṇa since he, though connected with the extremely '*rakta*' mind, did not become '*rakta*'. Or again, '*tad*' shows the matter not under consideration. '*asya*' the matter under consideration. Therefore, (the Definition) may be also taken to mean: That is 'Atadguṇa' where the colour of the matter not under consideration is not assumed by the matter under consideration, due to some circumstance. To illustrate:—

The water of the Ganges is white; that of the Jumna collyrium-like. Your whiteness, O swan! continues to be the same (even) when you plunge in both. Neither is it heightened nor lessened! (174)

प्रदीप :—सामान्यमुखप्रवृत्तत्वात् । तथा चाप्रस्तुतेन प्रस्तुतरूपाननुहरणवत्प्रस्तुतेनाप्रस्तुतरूपाननुहारोऽन्यः प्रकारः । यथा—**गांगमिति** । अत्रान्यापदेशपक्षे राजहंसस्याप्राकरणिकत्वं प्राकरणिकसत्पुरुषोपमानतयोपपादनीयम् । वाच्यमात्रविश्रान्तौ तु न काचिदनु-

---

उ० :—गुणोत्कर्षोऽपि तद्गुणविशेष एवेत्यपि बोध्यम् । यथा 'नीलोत्पलानि दधते कटाक्षैरतिनीलताम्' इति । एतेनात्रानुगुणनामा पृथगलंकार इत्यपास्तम् । **इति तद्गुणः** । **अत्युज्ज्वलगुणयोगेऽपीति** । पूर्ववाक्यस्थयोगादित्यस्यानुषंगादिदं लब्धम् । (**धवलोऽसीति** ।) 'धवलोऽसि यद्यपि सुंदर तथापि त्वया मम रंजितं हृदयम् । रागभरितेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥' निहित इत्यनेन रंजनयोग्यता । (गाथा छन्दः ।) **गांगमिति** । यामुनं यमुनासंबंधि । अंबु जलम् । चीयते वर्धते । अपचीयते अपक्षीयते । (रथोद्धता छन्दः ।) **न काचिदनुपपत्तिरिति** । गंगायमुनयोरप्रकृतयोर्गुणस्य वर्ण्यतया प्रकृतेन राजहंसेनाग्रहणादिति भावः । अमुं विशेषोक्तावंतर्भावयंति परे । **इत्यतद्गुणः** ।

प्रभा :—रागभरितेऽपि हृदये सुभग निहितो न रक्तोऽसि ॥' इति । इत्यतद्गुणप्रकरणम् ॥५८॥

(८२) यद्यथा साधितं केनाप्यपरेण तदन्यथा ॥ ९२ ॥
तथैव यद्विधीयेत स व्याघात इति स्मृतः ।

येनोपायेन यत् एकेनोपकल्पितम्, तस्यान्येन जिगीषुतया तदुपायकमेव यत् अन्यथाकरणम्, स (साधितवस्तुव्याहतिहेतुत्वात्) व्याघातः । उदाहरणम्—

दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुवे वामलोचनाः ॥ १७५ ॥

(विद्धशालभञ्जिका. १.२.)

60. VYĀGHĀTA.

That is stated to be 'Vyāghāta' where whatever thing has been done by someone by whatever means, is undone by another by the same means.

Gloss:—When what has been accomplished by one is upset by another *by the same means*, with a view to surpassing (the former), the figure is 'Vyāghāta,' so called because it is occasioned by the undoing of an accomplished thing. To illustrate:—

I praise those women of charming eyes, the conquerors of Śiva, who restore to life, with but the glance, Love that was burnt down with a glance! (175)

प्रदीपः—पपत्तिः । **यद्यथेति** । यथा येनोपायेन तथा तेनोपायेनेत्यर्थः । तथा च केनापि कर्त्रा यद्वस्तु येनोपायेन यथा साधितं तदन्येन कर्त्रा जिगीषुतया तद्वस्तु तेनैवोपायेन ततोऽन्यथा चेत्साध्यते स व्याघात इत्यर्थः । प्रथमसाधितस्य वस्तुनो व्याहतिहेतुत्वात् । उदाहरणम्—**दृशेति** । अत्र दृशैव दाहो जीवनं च ।

उ०: – **तेनैवोपायेनेति** । तज्जातीयेनैवेत्यर्थः । (**दृशेति** । विद्धशालभंजिकायां प्रथमांके मंगलाचरणम् । विरूपाक्षः शिवः ।) **अत्र दृशेति** । तथा च कार्यवैजात्ये कारणवैजात्यं प्रयोजकमित्यस्य व्याघात इति भावः । इदमुपलक्षणम् । अन्यकारणत्वेन प्रसिद्धात्तदन्यकार्यनिष्पादनेऽप्ययम् । 'यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः' इत्यत्र योगार्थसत्त्वात् । अत्र सर्वत्र कारणयोरेकत्वाध्यवसानात्पुरःस्फुरन्विरोधः प्रातिस्विकरूपेण तत्तत्कार्यहेतुताविमर्शनान्निवर्तते इति बोध्यम् । यदा त्वाश्रयभेदेनैकस्यैव कारणस्य विरुद्धकार्यद्वयजनकत्वं निबध्यते तत्र नायम् । व्याहतेर्विरोधगर्भाया अभावात् । यथा एकस्यैव पाण्डि-

प्रभाः – **यद्यथा साधितमिति** । स्पष्टम् । इति व्याघातप्रकरणम् ॥ ५९ ॥ इति शुद्धालंकार-

(८३) सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ॥ ९३ ॥

एतेषां समनन्तरमेवोक्तस्वरूपाणामलंकाराणां यथासंभवमन्योन्यनि-

---

61. SAMSṚṢṬI.

That is held to 'Samsṛṣṭi' when here they stand exclusively.

Gloss:—Where these i. e. the figures whose natures have just been stated occur together, according to the occasion, one independent of the

---

प्रदीपः–एवं शुद्धालंकारा दर्शिताः। अस्ति पुनः कश्चिद्विषयो यत्राङ्गदादिसंबद्ध-पद्मरागप्रमुखमणिमेलकवत्प्रोक्तानामलंकाराणां संवलन एव चमत्कारः। तस्मात्सोऽप्यलंकारः। तत्र द्वयी गतिः। परस्परमनपेक्ष्य व्यवस्थितेस्तदभावाच्च। तत्र प्रथमा संसृष्टिरुच्यते, द्वितीया तु संकरः। स च त्रिधेति प्रकारचतुष्टयं लक्षयति—**सेष्टेति**। भेदः स्वरूपतो विषयतो वा परस्परमनपेक्षत्वम्। यद्वा विषयभेदे सति परस्परानपेक्षत्वम्। स्थितिर्व्यवस्थितिः।

उ०:–त्यस्य खलवृत्तिमदजनकत्वं सुजनवृत्तिशान्तिजनकत्वं च। एवमेकेन कर्त्रा येन कारणेन यत्कार्यं निष्पिपादयिषितं तदन्येन कर्त्रा तेनैव कारणेन तद्विरुद्धकार्यं निष्पिपादयिषितं चेत्तदाऽप्ययम्। यथा 'विमुञ्चसि यदि प्रियां प्रियतमेति मां मन्दिरे तदा सह नयस्व मां प्रणययंत्रणायंत्रितः। अथ प्रकृति-भीरुरित्यखिलभीतिरक्षाक्षमान्न जातु भुजमंडलादवहितो बहिर्भावय॥' इति वनं प्रति प्रस्थितं रामं प्रति जानक्या वाक्यमिदम्। यत्तु 'निरुक्तिर्योगतो नाम्नामन्या-र्थत्वप्रकल्पनम्। इदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान्॥' इति निरुक्त्यलं-कारः। स श्लेषविशेष एव। यदपि सिद्धस्यैव विधानं विध्यलंकारः। 'पंचमो-दंचने काले कोकिलः कोकिलोऽभवत्।' अत्र द्वितीयकोकिलपदं मधुरध्वनि-शालित्वं लक्षयत् सकलजनहृद्यत्वं व्यनक्ति। तदपि ध्वनिना गतार्थम्। क्वचि-द्गुणीभूतव्यंग्येन वा। न हि सर्वोऽपि गुणीभूतव्यंग्यप्रपंचोऽलंकारगोष्पदेऽन्तर्भा-वयितुं शक्यते वेधसाऽपि। एवं सिद्धनिषेधानुकीर्तनमपि। एवमष्टौ प्रमाणालंकाराः अन्यैर्दर्शिताः। तत्र प्रत्यक्षं भाविकतया निबद्धम्। अन्यादृशं तु न चमत्कारि। अनुमानं तु साक्षादेवोक्तम्। अन्येषां तु नालंकारत्वम्। तत्तत्प्रमाणजन्यप्रमि-तिविषयत्वकृतचमत्काराभावात्। तत्तद्रूपेणोपस्कारकत्वाभावात्। उपमानं तु उपमयैव

प्रभा:– प्रकरणानि। **विषय इति**। काव्यविशेष इत्यर्थः। **विषयत इति**। विषयोऽ-लंकारप्रतिपादक आश्रयो वा शब्दः। एकवाचकानुप्रवेशेन संकरे स्पष्टोल्लसदित्यादौ

रपेक्षतया यत् एकत्र (शब्दभागे एव, अर्थविषये एव, उभयत्रापि वा) अवस्थानम्, सा एकार्थसमवायस्वभावा संसृष्टिः ।

तत्र शब्दालंकारसंसृष्टिर्यथा—

वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशाऽन्यया ॥ १७६ ॥

(शिशुपालवध. ६.१४.)

other, (either in the word portion or sense portion or in both), the figure is 'Samsṛṣṭi,' so called because in essence it embodies a grouping (of figures) in (the frame of) the same idea.

Of them, the Samsṛṣṭi of figures of sound as in:—

Another lady whose eyes were unsteady owing to the hair (falling on them) sent forth a tumult of the tinkling girdle as she moved, with her beauty heightened by the bustle of the bees that were hovering in their craving for the fragrance of the mouth! (176)

प्रदीप :– एतेषां समनन्तरमेवोक्तानामलंकाराणां भेदेन यत्स्थितिः सा संसृष्टिरिष्टा। संकरभेदास्तु नैवम् । अङ्गाङ्गिभावे स्वरूपतः सापेक्षत्वात् । अनिश्चये व्यवस्थितेरेवाभावात् । व्यवस्थिते विषयतः परापेक्षत्वाद्विषयाभेदाच्च । सेयं शब्दालंकारमात्रस्यार्थालंकारमात्रस्य शब्दार्थालंकारयोर्वेति त्रिप्रकारा। तत्राद्या यथा—**वदनेति** । अत्रानुप्रासयमकयोः परस्परमन-

उ० :– गतार्थमित्याद्यूह्यम्। **चमत्कारः** । अधिकश्चमत्कारः । ननु संसृष्टिर्न पृथक् यथा कामिनीशरीरे कुंडलहारकेयूरकंकणादीनां खलेकपोतिकया शोभाजनने न विशेषार्थः । समुदायिभ्यः समुदायस्य भेदाभावात् । अन्यथा लोकेऽपि भेदापत्तिः । तद्दृष्ट्यैव काव्ये गुणालंकारकल्पनादिति चेन्न । तत्र स्वाश्रयभिन्नभिन्नांगोत्कर्षाधानपूर्वकं शरीरेऽवयविनि आर्थः शोभातिशयः, इह त्वेकांगोत्कर्षकतया संसृष्टिरेव । यथा लिंपतीत्यादौ उत्प्रेक्षया तमसः प्रसृतत्वं प्रतिपाद्योपमयाऽतिगाढत्वोपपादनेन संसृष्टिव्यवहारात् । लोकेऽपि बहूनां कंठाभरणानामेकोत्कर्षकत्वं तत्र संसृष्टित्वस्यैवांगीकारात् । **परस्परमपेक्ष्येति** । परस्परनैरपेक्ष्येण लब्धात्मविश्रांतीनामित्यर्थः । **एतेषामिति** । बहुत्वमविवक्षितम्। तेन द्वयोरपि संग्रहः । **भेदेनेति** । अनेन संकरव्युदासः । व्यवस्थित्यभावमुपपादयति—**व्यवस्थितेरिति** । यथा लिंपतीत्यत्रोत्प्रेक्षा लेपनविषया ।

प्रभा :– रूपकानुप्रासयोर्विषयैक्येऽपि परस्परापेक्षाविरहादतिप्रसङ्गतादवस्थ्यादाह—**यद्वेति** ।

अर्थालंकारसंसृष्टिस्तु—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥ १७७॥ (मृच्छकटिक. १.३४.)

पूर्वत्र परस्परनिरपेक्षौ यमकानुप्रासौ संसृष्टिं प्रयोजयतः । उत्तरत्र तु तथाविधे उपमोत्प्रेक्षे । शब्दार्थालंकारयोस्तु संसृष्टिः—

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णं ।
तरुणाण हिअअलूडिं परिसक्कन्तिं णिवारेइ ॥ १७८ ॥ (—)

That of figures of sense as in :—
(See St. 26) (177)

In the former instance, Yamaka and Anuprāsa mutually independent bring about a Samsṛṣṭi. In the latter, however, Upamā and Utprekṣā just like them (i. e. mutually independent.) (bring about Samsṛṣṭi.) As for the Samsṛṣṭi of figures of sound and sense, it is as in :

Such a person is not to be found in this place (ग्राम) as would restrain this (lady) gadding about, whose beauty is being made much of and who is the robber of the hearts of youths ! (178)

प्रदीपः—पेक्ष्य व्यवस्थितिः । द्वितीया यथा—**लिम्पतीति** । अत्रोत्प्रेक्षोपमे परस्परसनपेक्ष्य व्यवस्थिते संसृष्टिं प्रयोजयतः । अन्त्या यथा—**सो णत्थीति** । अत्रानुप्रासरूपके शब्दार्थालंकारौ । नन्वनयोः शब्दार्थरूपाश्रयभेदेन कथमेकार्थसमवायलक्षणा संसृष्टिरिति चेत्,

---

उ०ः—उपमा असत्पुरुषसेवाविषया । **विषयाभेदादिति** । अनिश्चयेति शेषः । **वदनेति** । (माघकाव्ये षष्ठसर्गे कस्याश्चिन्नायिकाया वर्णनम् ।) मुखसौगंध्यलोभेन भ्रमतां भृंगाणां यः संभ्रमो भ्रमणं तेन पूर्णशोभया चूर्णकुंतलैश्चञ्चलदृशा मधुरो मेखलाशब्दो विदध इत्यर्थः । (द्रुतविलंबितं वृत्तम् ।) **लिंपतीवेति** । पूर्वार्द्धे उत्प्रेक्षा उत्तरार्धे उपमा । (**सो णत्थीति** ।) 'स नास्त्यत्र ग्रामे य एनां महमहल्लावण्याम् । तरुणानां हृदयलुंठाकीं परिष्वक्कंतीं निवारयति ॥' महमहल्लावण्याम् नवनवीभवल्लावण्याम् । परिष्वक्कंतीम् स्वानुरूपरमणाभावादितस्ततो गच्छंतीम् । (गाथा छन्दः ।) अत्र पूवार्धे छेकानुप्रासः । उ-

---

प्रभाः—एवं च तत्र विषयभेदाभावान्नातिव्याप्तिरिति भावः । **सो णत्थीति** । 'स नास्त्यत्र ग्रामे य एतां स्फुरल्लावण्याम् । तरुणानां हृदयलुण्ठनं परिसर्पन्तीं निवारयति ॥' अत्र पूवार्धेनुप्रासः उत्तरार्धे हृदयलुण्ठनमिति रूपकम् । इति संसृष्टिः ॥ ६० ॥ **चारु-**

अत्रानुप्रासो रूपकं चान्योन्यानपेक्षे। संसर्गश्च तयोरेकत्र वाक्ये छन्दसि वा समवेतत्वात्।

(८४) अविश्रान्तिजुषामात्मन्यङ्गाङ्गित्वं तु संकरः।

एते एव यदात्मनि अनासादितस्वतन्त्रभावाः परस्परं अनुग्राह्यानुग्राहकतां दधति, स (एषां संकीर्यमाणस्वरूपत्वात्) संकरः। उदाहरणम्—

आत्ते सीमन्तरत्ने मरकतिनि हृते हेमताटङ्कपत्रे
लुप्तायां मेखलायां झटिति मणितुलाकोटियुग्मे गृहीते।

Here the Anuprāsa and the Rūpaka are mutually independent. Their contact is due to their being embodied in one and the same sentence or verse.

62. SAṄKARA.

But 'Saṅkara' consists in their being related as the Principal and Subsidiary, when they (i. e. figures) do not rest in themselves.

Gloss:—When these very (figures), not having attained an independent status, are mutually related as the Principal and Subservient, that is the figure 'Saṅkara' so called because their forms are intermingled (therein). To illustrate:—

When their crest-jewel of emerald is appropriated and the golden ear-ring removed, when the girdle is pilfered and the pair of jewelled anklets suddenly seized, the Śabaras do not so much as remove the pearl

---

प्रदीपः-एकवाक्ये छन्दसि वा समवेतत्वात्। **अविश्रान्तीति**। तेषामेवालंकाराणां चारुत्वार्थं स्वरूपनिष्पत्तये वाऽन्यापेक्षणादात्मन्यनासादितस्वतंत्रभावानां परस्परमनुग्राह्यानुग्राहकत्वं स तु संकरः। संकीर्यमाणस्वरूपत्वात्। उदाहरणम्—**आत्ते इति**। अत्र

उ०:–त्तरार्धे हृदयलुंठाकीमिति रूपकम्। **एकत्रवाक्येति**। 'क्रिया वा कारकान्विता' इति उक्तेरर्थाविच्छिन्नशब्दस्यैव वाक्यत्वम्। तथा चैकं वाक्यमिति प्रतीतिसिद्धमेकत्वमादाय तयोरेकार्थसमवाय इत्यर्थः। वाक्यभेदेऽप्याह—**छंदसि वेति**। चतुष्पादात्मके इत्यर्थः। अर्थालंकाराणामप्यत्र परंपरया स्थितिः। **समवेतत्वम्**। संबद्धत्वम्। **आत्मनि**। आत्ममात्रे। **परस्परमिति**। क-

---

प्रभा:-**त्वार्थमिति**। चमत्कृतिजनकत्वं ह्युपमादेरलंकारत्वम्। अतो विशेषणांशे

शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये
राजन्गुञ्जाफलानां स्रज इति शबरा नैव हारं हरन्ति ॥१७९॥ (—)

अत्र तद्गुणमपेक्ष्य भ्रान्तिमता प्रादुर्भूतम्, तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः। यथा वा—

जटाभाभिर्भाभिः करधृतकलङ्काक्षवलयो
वियोगिव्यापत्तेरिव कलितवैराग्यविशदः।

---

necklace tinged red by the shade of the Bimba-like lips of the deer-eyed women of your foes, that were in flight in the forest, thinking them (i. e. pearl necklaces), O king, to be strings of Guñjā berries! (179)

Here, the Bhrāntimān manifests itself depending on the Tadguṇa, and Tadguṇa becomes the source of great charm to men of taste in so far as the Bhrāntimān is based on it. Thus they are related as the Subsidiary and Principal. Or as in:

With splendour like matted hair, holding with the ray (by Śleṣa: hand) the rosary of the spot, and white (by Śleṣa: pure) due to the loss of redness (by Śleṣa: due to dispassionateness) preferred, it seems, owing to the mishap to the separated lovers (by Śleṣa: owing to the

---

प्रदीपः—बिम्बौष्ठकान्त्या शोणमिति तद्गुणमपेक्ष्य गुञ्जाफलानां स्रज इति भ्रान्तिमानात्मानं लभते। तद्गुणोऽप्यत्र न स्वातन्त्र्येण चमत्कारविशेषं करोति किं तु भ्रान्तिमदपेक्षयैवेति परस्परमनुग्राह्यानुग्राहकभावः। अत्र द्वयोरलंकारयोः संकरः। बहूनामपि यथा—**जटेति**। अत्र जटाभाभिर्भाभिरिति पितृवन इव व्योम्नीति चोपमा। कलङ्काक्षवलयेति तारापरिकरकपालेति च रूपकम्। वियोगिव्यापत्तेरित्युत्प्रेक्षा। वैराग्यविशद इति श्लेषः। चत्वारोऽप्येते परस्परमङ्गाङ्गिभावेन प्रतीयन्ते। तत्रोत्प्रेक्षा श्लेषाङ्गम्। तद्वशादेव वैराग्यविशद इत्यत्र द्वितीयार्थानुसंधानात्।

उ०:—स्यचिदनुग्राह्यत्वं कस्यचिदनुग्राहकत्वमित्यर्थः। योगार्थमाह—**संकीर्यमाणेति**। (**आत्ते इति**।) आत्ते गृहीते सीमंतरत्ने, प्रथमं तत्र दृष्टिपातात्। मरकतिनीत्यनेन झटिति विवेचनम्। शुद्धहेम्नां देहकान्त्याऽभिभवसंभवात्। ताटंकपत्रं कर्णालंकारः। लुप्तायां छिन्नायाम्। मणितुलाकोटियुग्मे नूपुरे। इत्वरीणां गतिशीलानाम्। बिम्बौष्ठकान्त्येति। मुखस्य नम्रत्वात्। हारं मु-

---

प्रभा:—विशेष्यांशे वान्यापेक्षेति भावः। **संकीर्यमाणेति**। परस्परसापेक्षेत्यर्थः।

परिप्रेङ्खत्तारापरिकरकपालाङ्किततले
शशी भस्मापाण्डुः पितृवन इव व्योम्नि चरति ॥ १८० ॥ (—)

उपमा रूपकम् उत्प्रेक्षा श्लेषश्चेति चत्वारोऽत्र पूर्ववत् अङ्गाङ्गितया प्रतीयन्ते । कलङ्क एवाक्षवलयमिति रूपकपरिग्रहे करधृतत्वमेव साधक-प्रमाणतां प्रतिपद्यते । अस्य हि रूपकत्वे तिरोहितकलङ्करूपं अक्ष-वलयमेव मुख्यतयाऽवगम्यते । तस्यैव च करग्रहणयोग्यतायां सा-

---

perishability of the fleeting objects of sense–वियोगि), the moon who is white like ashes (otherwise white : with ashes) is tramping in the sky as on the burial-ground whose surface is dotted with the skulls in the shape of the host of stars that are hanging about ! (180)

Here, the four *viz.* Upamā, Rūpaka, Utprekṣā and Śleṣa are, as above, apprehended as being related as the Subservient and the Principal. The attribute of being held in the hand happens to be the probative ground favouring the assumption of the Rūpaka : Rosary in the form of the spot. For, if this be a Rūpaka, Rosary only is felt as being prominent, the aspect of spot being rendered obscure. And that is universally

---

प्रदीप : – श्लेषश्च रूपकोपमयोरङ्गम् । तद्वशादवगतनिर्वेदमहिम्नैव जटाया अक्षवलयधारणस्य च संगतेः । तारापरिकरकपालेति रूपकं पितृवन इवेत्युपमाया अङ्गम् । तद्बीजं हि सादृश्यम् । न च श्मशाने व्योम्ना सह तत्साहजिकं किं तु रूपितकपालाश्रयत्वेनैवेति । सर्वत्र चाङ्गानां चारुत्वार्थमङ्ग्यपेक्षा पूर्ववदूहनीया । सर्वेषां चैषां पार्यन्तिकचारुत्वहेतुरङ्गिभूता च समासोक्तिः । चंद्रगतत्वेन महाव्रतिवृत्तान्तप्रतीतेः । सा च व्यक्तैवेति प्रकाशकृता नोक्तेत्यवधेयम् । ननु कलंकाक्षवलयेति कथमेकान्ततो रूपकमुच्यते । उपमाया अपि संभवेन संदेहसं-करौचित्यादिति चेत्, न । रूपकपरिग्रहे करधृतत्वमेव साधकं प्रमाणमतः संदेह-स्याभावात् । कथमस्य साधकत्वमिति चेत्, इत्थम्—करधृतत्वरूपविशेषणस्याक्षवलय एव सार्वत्रिकी प्रसिद्धिः, न तु कलङ्के । अतः प्राधान्येनाक्षवलयप्रतीतिरेवोद्देश्या । सा च रूपक-परिग्रहेणैव संभवति । तत्र तिरोहितकलङ्करूपमक्षवलयत्वमेव मुख्यतयावगम्यते । नन्वेवमपि

उ० : – क्तानिर्मितम् । (स्रग्धरा छन्दः) **आत्मानं लभते इति** । अधर-सान्निध्यासादितारुण्यविशिष्टमुक्ताफलानां दर्शनेन गुंजास्मरणाद् भ्रान्तिर्भवतीति भावः । **भ्रान्तिमदपेक्षयेति** । तन्निर्वाहकत्वेनेति भावः । एतच्च प्रकृताभिप्रा-येण । अन्यत्र तस्य स्वातंत्र्येणापि चमत्कारित्वात् । **जटेति** । जटातुल्याभिः पिंगाभिः

प्रभा : – **एकान्तत इति** । निश्चित इत्यर्थः । **अमुख्योपचार एवेति** । गुणे त्वन्याय्यक-

र्वत्रिकी प्रसिद्धिः । श्लेषच्छायया तु कलङ्कस्य करधारणम् असदेव प्रत्यासत्त्या उपचर्य योज्यते । शशाङ्केन केवलं कलङ्कस्य मूर्त्यैव उद्वहनात् ।

कलङ्कोऽक्षवलयमिवेति तु उपमायां कलङ्कस्य उत्कटतया प्रतिपत्तिः । न चास्य करधृतत्वं तत्त्वतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात् ।

एवंरूपश्च संकरः शब्दालंकारयोरपि परिदृश्यते । यथा—

---

accepted as being fit for being held in the hand. The spot being held in the *kara* though unreal, is made figuratively possible owing to proximity, by the shade of Śleṣa. Since, the moon holds the spot merely on its body.

If, on the other hand, it were an Upamā—the Spot like the rosary—the spot would be apprehended as being prominent. And the attribute of being held in the *kara* does not pertain to it in fact. Thus in the matter of the prominent one itself a figurative mode shall have to be resorted to.

Saṅkara like this could be seen even of two figures of sound. To illustrate:—

प्रदीपः—विशेषणमिदमसम्यगेव। चन्द्रपक्षे किरणेन कलङ्कधारणस्याभावात्। मूर्त्यैव तेन तद्धारणादिति चेत्, न। श्लेषच्छायया हि कलङ्कस्याप्रधानस्य करधारणमसदेव प्रत्यासन्नतयोपचर्य योज्यते। तथा सत्युपमापरिग्रहे को दोष इति चेत्, कलङ्कोऽक्षवलयमिवेत्युपमायां कलङ्कस्य प्रधानत्वेन प्रतीतिः। न चास्य करधृतत्वं मुख्यतोऽस्तीति मुख्येऽप्युपचार एव शरणं स्यात्। मुख्यविषयोपचारापेक्षया चामुख्योपचार एव श्रेयानिति रूपकमेवाश्रीयते। शब्दालंकारयोरप्येष संकरो दृश्यत इति प्राञ्चः। उदाहरन्ति च—

उ०:—कान्तिभिरुपलक्षितः। करो हस्तः किरणश्च तेन धृतः कलंक एव वलयाकाररुद्राक्षमाला येन। विरहिपीडयेवांगीकृतं यद्वैराग्यं विगतरक्तता विषयव्यावृत्तिश्च। वियोक्तुं शीलं येषां ते वियोगिनो विषयास्तेषां व्यापत्तिर्नाशश्च। विशदः पांडुरः शुद्धचित्तश्च। उदयकालिकलौहित्यत्यागात्तथात्वम्। प्रेंखत्तारासमूहरूपकपालविहितस्वरूपे। भस्मना पांडुर्भस्मेव पांडुश्च। पितृवनं श्मशानम्। (शिखरिणी छन्दः।) **वृत्तान्तप्रतीतेरिति**। तद्वृत्तांताध्यारोप एव धृतकलंकाक्षवलयत्वान्वयादिति भावः। शशिवर्णनस्यैव प्रकृतत्वादत्रैव विश्रांतिः। **प्राधान्येनेति**। कलंकत्वाच्छादनेनेत्यर्थः। **मुख्यतयेति**। रूपके वलयताद्रूप्यस्योद्भूततया प्रतीतेरिति भावः। **श्लेषच्छाययेति**। करपदश्लेषेण किरणे पाण्यभेदाध्यवसायादित्यर्थः। उपचर्य प्रत्यासन्नतया इत्यन्वयः। सादृश्यसंबंध-

राजति तटीयमभिहत-
दानव-रासाऽतिपाति-साराव-नदा ।
गजता च यूथमविरत—
दान-वरा साऽतिपाति सारा वनदा ॥ १८१ ॥

(हरविजय. ५. १३७.)

अत्र यमकमनुलोमप्रतिलोमश्च चित्रभेदः पादद्वयगते परस्परापेक्षे ।

Here looks splendid the slope that has got a noisy, rapidly flowing river that (i. e. river) has beaten the revels of the demons, while, supreme with unceasing ichor, the powerful (सारा) group of bull—elephants, felling the treee, sedulously protects the herd! (181)

Hers, Yamaka and Anulom–Pratiloma, varieties of the Striking, are mutually dependent.

प्रदीपः–राजतीति । तत्र यद्यपि यमकानुलोमविलोमचित्रभेदयोर्न स्फुटं परस्परापेक्षित्वं, तथापि यमकनिर्वाहप्रवृत्तस्य कवेरपृथक्प्रयत्ननिर्वृत्ततयानुलोमविलोमस्योत्पत्तौ यमकापेक्षा, यमकस्य तु चारुताऽतिशये तदपेक्षता । तदाश्रयेणातिसुन्दरतयाऽतिशयेन विदग्धमनोऽनुरञ्जकत्वादिति तेषामाशयः । वस्तुतस्तु यमकनिर्वाह एव कविप्रवृत्तिरिति निश्चायकं नास्ति । अस्तु वा तथा । तथापि यमकं न चित्रहेतुः । किं तु तत्प्रयत्नः । तस्मादेकाश्रया-

---

उ०ः–मूलकलक्षणापूर्वकमक्षवलयतादात्म्यप्राप्त्या । **तथा सति** । उपमायामप्यसदेव करधृतत्वमुपचर्यतामिति भावः । **प्रधानत्वेनेति** । इतरस्वरूपानाच्छादित्वे सति विशेष्यतयेत्यर्थः । **मुख्येति** । विशेष्यभूतेत्यर्थः । **अमुख्यम्** । विशेषणम् । उपमा पूर्वपदार्थप्रधाना रूपकमुत्तरपदार्थप्रधानमिति भावः । वस्तुतस्तु रूपके अक्षवलयतादात्म्यापन्ने कलंके पाण्यभिन्नत्वेनाध्यवसितकिरणधृतत्वान्वययोग्यताऽस्ति उपमायां तु तत्सदृशत्वेन प्रतीतिविषये कलंकत्वविशिष्टे पाण्यभिन्नत्वेनाध्यवसितेनापि किरणेन धृतत्वान्वययोग्यता नास्तीति रूपकमेवात्र । एवं च रूपके पूर्वपदार्थप्राधान्येऽपि न दोष इत्यवधेयम् । **राजतीति** । (हरविजयकाव्ये पंचमसर्गे पर्वतवर्णनम् ।) इयं तटी राजति । कीदृशी । अभिहतो दानवानां रासः क्रीडा शब्दो वा यस्यां सा । अतिपाती शीघ्रगामी सारावः

प्रभाः–ल्पनेति न्यायादिति भावः । **तदाश्रयेणेति** । अनुलोमविलोमाश्रयेणेत्यर्थः । **न चित्रहेतुरिति** । नानुलोमविलोमरूपशब्दालंकारहेतुरित्यर्थः । **किं त्विति** । यमकप्रय-

(८५) एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥ ५४ ॥

द्वयोर्बहूनां वा अलंकाराणामेकत्र समावेशेऽपि विरोधात् न यत्र युगपदवस्थानम्, न चैकतरस्य परिग्रहे साधकम्, तदितरस्य वा परिहारे बाधकमस्ति, येनैकतर एव परिगृह्येत, स निश्चयाभावरूपो द्वितीयः संकरः। समुच्चयेन संकरस्यैवाक्षेपात्। उदाहरणम्—

And (Saṅkara occurs) where there is absence of determination, owing to the lack of a favourable or unfavourable circumstance for the assumption of one (figure).

Gloss:—Where, though two or more figures are (felt to be) present in one place, they could not be so present *simultaneously* owing to conflict; and where neither a circumstance favourable for the acceptance of one of the two, nor another unfavourable, tending to leave out the other (figure) so that only one could be accepted, is present, it is Saṅkara of the second variety, which consists in the absence of determination. The copulative (*ca*) suggests that Saṅkara itself (is being continued in this definition). To illustrate:—

प्रदीपः–नुप्रवेशेनैवायं संकरो न त्वनुग्राह्यानुग्राहकतयेत्येव युक्तम्। **एकस्य चेति**। न्यायः साधकप्रमाणसत्ता। दोषः प्रतिकूलसत्ता। ग्रहो व्यवस्थितिः। यत्र द्वयोर्बहूनां वाऽलंकाराणामेकत्र योग्यत्वेऽपि विरोधान्नैकदा व्यवस्थितिः, न चैकतरपरिग्रहे साधकं तदितरपरिग्रहे बाधकं येन तदेव व्यवतिष्ठेत, सोऽप्यनिश्चयरूपो द्वितीयः संकरः। सूत्रस्थचकारेण संकरस्यैवाक्षेपात्। उदाहरणम्—**जहेति**। अत्र किं समुद्रे प्रस्तुते श्लिष्टविशे-

---

उ०:–सशब्दो नदो यस्यां सा। गजता गजयूथं अतिशयेन पाति रक्षति। किंभूता। अविरतेन दानेन मदेन वरा श्रेष्ठा। सारा स्थिरा। वनदा वनखंडिका। (आर्यागीतिश्छन्दः।) **चित्रभेदः**। चित्रनामालंकारः। स चात्रानुलोमप्रतिलोमरूपः। **तेषामाशय इति**। एवं चानुग्राह्यानुग्राहकसंकर इति भावः। एतेन शब्दालंकारयोरयं नास्ति शब्दस्वरूपतयोपकार्योपकारकत्वाभावात्, किं तु संसृष्टिरेवेत्यलंकारसर्वस्वोक्तमपास्तम्। **तस्मादेकेति**। मिथश्चारुतातिशये परस्परापेक्षत्वादनुग्राह्यानुग्राहकभावोऽपीत्यन्ये। **एकस्य** एकतरस्य।

प्रभा:–त्वाद्धि तदुत्पत्तिरिति नोत्पत्तौ यमकापेक्षेत्यर्थः। 'साधकप्रमाणसत्ता' इति पाठः। 'साधकप्रमाणता' इत्यपपाठ एव। एवं 'प्रतिकूलसत्ता' इत्येव पाठ इति ज्ञेयम्।

जह गहिरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ ।
तह किं विहिणा एसो सुरसवाणीओ जलणिही ण किओ ॥ १८२ ॥

अत्र समुद्रे प्रस्तुते (विशेषणसाम्यादप्रस्तुतार्थप्रतीतेः) किमसौ समासोक्तिः, किं (अब्धेरप्रस्तुतस्य मुखेन कस्यापि तत्समगुणतया प्रस्तुतस्य प्रतीतेः) इयमप्रस्तुतप्रशंसा इति संदेहः। यथा वा—

नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति ।
अधुनाऽपि निरुद्धाशमविशीर्णमिदं तमः ॥ १८३ ॥ (—)

As it is deep, as it abounds in jewels, and as it is clear in hue, why did not the Creator likewise make the ocean sweet-watered ? (182)

Here arises the doubt: Is it Samāsokti if there is the suggestion of the matter not under consideration, due to similarity of attributes, the matter under consideration being the sea; or is this an Aprastutapraśaṃsā, if there is the suggestion of some matter under consideration, through the sea, the matter not under consideration, owing to similarity with the latter's attributes ?

Or as in:—

Here becomes clear the moon-orb, giving delight to the eyes. Even now the darkness that has enveloped the quarters remains undispelled ! (183)

प्रदीपः–षणमहिम्नाऽप्रस्तुतपुरुषविशेषप्रतीतेरियं समासोक्तिः, किं वाऽब्धेरप्रस्तुतात्प्रस्तुतस्य पुरुषविशेषस्य तत्समानगुणतया प्रतिपत्तेरप्रस्तुतप्रशंसेति संदेहः। एकस्यैकदा प्रस्तुताप्रस्तुतोभयरूपत्वाभावादनयोर्युगपदसंभवात्, न्यायदोषयोरसंभवाच्च। अयं द्वयोः संकरः। बहूनां यथा—**नयनेति**। अत्र किं कामोद्दीपकः कालो वर्तत इति भङ्ग्यन्तरेणाभिधानात्पर्यायोक्तम्। किं वा एतदित्यस्य बिम्बपरामर्शकतया वदनस्येन्दुबिम्बेनाध्यवसानादतिशयोक्तिः। किं

उ०—**प्रतिकूलसत्ता**। बाधकप्रमाणसत्ता। **व्यवस्थितिः**। निश्चयः। **विरोधात्**। विरुद्धतात्पर्यकत्वात्। (**जहेति**।) 'यथा गंभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः। तथा किं विधिना एष सरसपानीयो जलनिधिर्न कृतः॥' (आर्या मुखविपुला।) संदेहबीजमाह। **न्यायदोषयोरिति**। (**नयनेति**।) निरुद्धाशं निरुद्धदिक् निरुद्धप्रत्याशं च। अविशीर्णं न नष्टम्। तमस्तिमिरं

प्रभाः–समुच्चयेनेति वृत्तिग्रन्थं व्याचष्टे—**सूत्रस्थचकारेणेति**। **जह इति**। 'यथा गम्भीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः। तत्किं विधिनैष सुरसपानीयो

अत्र किं (कामस्योद्दीपकः कालो वर्तते इति भङ्ग्यन्तरेणाभिधानात्) पर्यायोक्तम्, उत (वदनस्येन्दुबिम्बतया अध्यवसानात्) अतिशयोक्तिः, किं वा (एतदिति वक्त्रं निर्दिश्य तद्रूपारोपवशात्) रूपकम्, अथवा (तयोः समुच्चयविवक्षायां) दीपकम्, अथवा तुल्ययोगिता, किमु (प्रदोषसमये विशेषणसाम्यादाननस्यावगतौ) समासोक्तिः, आहोस्वित् (मुखनैर्मल्यप्रस्तावात्) अप्रस्तुतप्रशंसा इति बहूनां संदेहादयमेव संकरः।

यत्र तु न्यायदोषयोरन्यतरस्यावतारः, तत्र एकतरस्य निश्चयात् न

Is this Paryāyokta if the idea: "This time stimulates passion" is expressed in a different mode? Or, is it Atiśayokti owing to supersession of the 'face' by the idea of its being the moon-orb? Or, is it Rūpaka if mentioning the face with '*etad*' there is superimposed on it the nature of that (i. e. moon-orb)? Or is it Dīpaka supposing that both are sought to be stated collectively? Or, is it Tulyayogitā? Or is it Samāsokti owing to the 'Face' being suggested by the similarity of attributes in eventide? Or, is it Aprastutapraśamsā, the matter under consideration being the clearness of the face? Owing to the doubt of many figures like these, it is this very Saṅkara.

Where, however, either a favourable or an unfavourable circumstance presents itself, there can be no doubt since there is the determi-

---

प्रदीपः–वा एतदिति वक्त्रं निर्दिश्येन्दुबिम्बरूपणवशाद्रूपकम्। अथ प्रसीदतीत्यस्योभयत्रान्वयविवक्षायामेकतरस्य प्रकृतत्वाद्दीपकम्। द्वयोरपि प्रकृतत्वेऽप्रकृतत्वे वा तुल्ययोगिता वा। किं वा प्रदोषवर्णने चन्द्रबिम्बस्य प्रकृतत्वे विशेषणसाम्यादाननप्रतीतौ समासोक्तिः। आहोस्विन्मुखनैर्मल्यवर्णनप्रस्तावाच्चन्द्रस्याप्रस्तुतत्वेनाप्रस्तुतप्रशंसेति संदेहः। न्यायदोषयोरभावात्। यत्र तु तयोरन्यतरस्यावतारस्तत्रैकतरनिश्चयान्न संशयस्तत्र 'सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः।' इत्यत्र मुख्यत्वेन प्रतीयमाना हसितद्युतिर्वक्त्र एवानुकूल्यं भजते। तत्रैव मुख्यतस्तत्संभवात्। वक्त्रस्य प्राधान्येन स्थितिरुपमायामेवेत्युपमासाधिका। शशिनि तु नानुकूला। मुख्यतस्तत्र हासद्युतेरभावात्। नापि प्रतिकूला। गौणत्वे-

---

उ०:–मोहश्च। **अतिशयोक्तिः**। निगीर्याध्यवसानरूपा। **रूपकमिति**। निगरणाभावादित्यर्थः। **दीपकमिति**। चंद्रबिंबं प्रसीदति एतन्मुखं च प्रसीदतीत्यन्वयादिति भावः। **तुल्ययोगितेति**। द्वयोरौपम्यस्याक्षेपलभ्यत्वात्। **मुख्यत्वेनेति**। ज्योत्स्नासादृश्याश्रयतयेत्यर्थः। **वक्त्रे एवेति**। इतररूपानाच्छादिते वक्त्रे इत्यर्थः। **प्राधान्येन**। इतरानाच्छादितत्वेन। **शशिनि त्विति**। शा-

संशयः । न्यायश्च साधकत्वम् (अनुकूलता) दोषोऽपि बाधकत्वं (प्रतिकूलता) । तत्र

सौभाग्यं वितनोति वक्त्रशशिनो ज्योत्स्नेव हासद्युतिः । ’

इत्यत्र मुख्यतया अवगम्यमाना हासद्युतिर्वक्त्रे एवानुकूल्यं भजते इत्युपमायाः साधकम्, शशिनि तु न तथा प्रतिकूलेति रूपकं प्रति तस्या अबाधकता ।

‘ वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः ।’ (रत्नावली. ३. १३.)

इत्यत्रापरत्वमिन्दोरनुगुणं न तु वक्त्रस्य प्रतिकूलमिति रूपकस्य साधकतां प्रतिपद्यते, न तूपमाया बाधकताम् ।

---

nation of one of the two (figures). A favourable circumstance is one that proves or is agreeable to (the particular figure). An unfavourable circumstance is one that disproves or is disagreeable to (the particular figure). Thus, in

“The brilliance of *smile* like moon-light heightens the beauty of the *face-moon*.”

‘The brilliance of smile’ which is being felt as the prominent thing is agreeable to the ‘face.’ So it is favourable to Upamā; but then it is not so disagreeable to the ‘moon,’ and, therefore, it is not unfavourable to the Rūpaka.

In

“Since, when there was your face-moon, this *other* moon has arisen !”

the attribute ‘other’ is agreeable to ‘the moon;’ but not disagreeable to ‘the face.’ Therefore, it is favourable to the Rūpaka, but not unfavourable to the Upamā.

प्रदीपः – नाप्युपपत्तेरिति न रूपकं प्रति साधिका बाधिका वा । ‘वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्यतः’ इत्यत्रापरत्वमिन्दावनुगुणम् । मुखरूपेन्दौ सति किमपरेणेन्दुनेति प्रतीतेः । तथाप्रतीतिश्च रूपकेण विना नेति रूपकं प्रति साधकतां प्रतिपद्यते । न पुनर्वक्त्रस्य

उ०: – शितादात्म्येन प्रतीते त्वित्यर्थः । **रूपकम्** । वक्त्रमेव शशीत्याकारकम् । तावतापि न संदेहे निरासः (सन्देहसंकरः ?) । द्युतिपदस्य शोभारूपमुख्यार्थत्यागानौचित्यादिति भावः । ज्योत्स्ना यथा शशिनः सौभाग्यं वितनोति एवं हासद्युतिः शशिसदृशवक्त्रसौभाग्यं वितनोतीति वाक्यार्थः । **इन्दाविति** ।

प्रभा: – जलनिधिर्न कृतः ॥ ’ इति संस्कृतम् । न पुनर्वक्त्रस्य प्रतिकूलमित्यत्रापरत्वमित्य-

'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।' (—)

इत्यत्र पुनरालिङ्गनमुपमां निरस्यति, सदृशं प्रति परप्रेयसीप्रयुक्तस्यालिङ्गनस्यासंभवात् ।

'पादाम्बुजं भवतु नो विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः । (पञ्चस्तवी. ३·१.)

इत्यत्र मञ्जीरशिञ्जितम् अम्बुजे प्रतिकूलम् असंभवादिति रूपकस्य बाधकम्, न तु पादेऽनुकूलमित्युपमायाः साधकमभिधीयते । विध्युप-

---

In

"Lakṣmī closely *embraces* you, the King–Nārāyaṇa,"

however, '*embraces*' leaves out Upamā, since it is unlikely that there could be an embrace of one who is similar (to her husband) on the part of the beloved of another.

"May the foot-lotus of Ambikā, which is charming with the sweet tinkle of the anklets, lead to our success"—

Here 'the tinkle of the anklets' is disagreeable to the lotus owing to improbability; so it is described as unfavourable to the Rūpaka, but not as favourable to the Upamā owing to its being agreeable to 'the

---

प्रदीपः–प्रतिकूलम् । इन्दुसमानगुणे वक्त्रे सति किमपर इन्दुरुदित इति प्रतीतावत्रासंगत्यभावात् । अतो नोपमाबाधकम् । 'राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम् ।' इत्यत्रालिङ्गनमुपमायां बाधकम् । स्वामिसदृशं प्रति प्रेयसीप्रयुक्तस्यालिङ्गनस्यानौचित्यात् । न तु रूपके साधकम् । 'पादाम्बुजं भवतु वो विजयाय मञ्जुमञ्जीरशिञ्जितमनोहरमम्बिकायाः ।' इत्यत्र मञ्जीरशिञ्जितमम्बुजे प्रतिकूलम् । तत्रासंभवात् । अतो रूपके बाधकम् । नन्वेतदुपमासाधकमपि भवति । पादेऽनुकूलत्वात् । तत्कथं रूपकबाधकतामात्रत्वमस्योच्यते, न तूपमासाधकत्वमपीति । एवमन्यत्रापि यदेकत्रानुकूलं तद्बाहुल्येन परत्र प्रतिकूलम्, यच्चैकत्र प्रतिकूलं तत्तत एवान्यत्रानुकूलम् । अन्यथा तथात्वस्यैवासंभवादिति चेत्, सत्यम् । किं तु यस्य

उ०:–इन्दुतादात्म्यप्रतीतावित्यर्थः । **साधकतामिति** । अपरत्वस्य पूर्वापेक्षित्वात् प्रथमेन्दोरावश्यकत्वेन रूपकसाधकत्वम् । ननु उपमायां वक्त्रत्वेनैव मुखप्रत्यये शीतांशावपरत्वं व्याहन्येत । इंद्वंतरस्याप्रतीतेरत आह—**इंदुसमानगुणे इति** । कथंचिदेवमर्थघटनासंभवेन वक्त्रप्राधान्ये प्रातिकूल्याभावात् उपमायां

प्रभा:–स्यानुषङ्गः । **न तु रूपके साधकमिति** । उपमाबाधकमुखेन साधकत्वं तूपमाबाधकत्व एव पर्यवस्यतीति भावः । **विध्युपमर्दीति** । स्वविरोधिकोऽप्युपमर्दीत्यर्थः ।

मर्दिनो बाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेः । एवमन्यत्रापि सुधीभिः परीक्ष्यम् ।

(८६) स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम् ।
व्यवस्थितं च

अभिन्ने एव पदे स्फुटतया यत् उभावपि शब्दार्थालंकारौ व्यवस्थां समासादयतः, सोऽप्यपरः संकरः । उदाहरणम्—

---

foot.' Since in comparison with the latter, the unfavourable circumstance that sets at naught the positive assertion, is felt to be more prominent. The intelligent ones should scrutinise, in this way, in other cases also.

And where in one place are present two figures, one of sound and the other of sense, (it is Saṅkara).

Gloss:—That again is another variety of Saṅkara where in one and the same word, both figures, one of sound and the other of sense, happen to be clearly present. To illustrate:—

प्रदीप :–यथात्वमुत्कटं प्रतीयते तत्र तस्य तथात्वव्यपदेशः । अत्र तु विध्युपमर्दि बाधकं साधकापेक्षयोत्कटत्वेन प्रतीयत इति तेनैव व्यपदेशो युक्तः । तदेतदुक्तं विध्युपमर्दिबाधकस्य तदपेक्षयोत्कटत्वेन प्रतिपत्तेरिति । अन्ये तु तदन्यथा व्याचक्षते–विधीयतेऽनेनेति विधिः साधकं, तदुपमर्दि तस्माद्बलीयः । एतदुक्तं भवति—मञ्जीरशिञ्जितस्य पादे संभवमात्रेण न तावदुपमासाधकत्वं निर्वहति यावदम्बुजे तद्विरहो न निश्चीयते । तथा च तद्बाधकस्यैव प्राथमिकत्वात्तन्मुखेनैव व्यपदेशः । एवमन्यत्रापि साधकबाधकसत्त्वं सुधीभिः परिभावनीयम् । **स्फुटमिति** । विषयः पदम् । तेनैकत्र पदे यदुभौ शब्दार्थालंकारौ स्फुटं व्यवस्थितौ भवतः,

---

उ० :–न बाधकमित्यर्थः । एवं चानयोरुदाहरणयोर्यत्कोटेः साधकमस्ति तत्कोट्यंशे संशयस्योत्कटत्वात्संकरलक्षणे च तुल्यकोटिकसंशयस्य विवक्षणान्नात्र संकर इत्याशयः। **न तु रूपके इति** । एतद्बीजमग्रे स्फुटम् । **अंबुजे** । तत्त्वेन प्रतीतेः। **विध्युपमर्दीति** । स्वविरोधिकोटिभूतविध्युपमर्दीत्यर्थः । उपमासाधकमित्युक्ते किंचिद्रूपकस्यापि साधकं स्यादिति संदेहो नापैति, बाधके त्वभिहिते तद्व्यवच्छेदप्रतीतेः संदेहोच्छेद इत्याशयः। **एवमिति** । 'यस्यानिशं दिविषदश्वरणारविन्दमुत्तंसयन्त्यमितभक्तिभरावनम्राः ।' इत्यादौ उत्तंसनमुपमाबाधकमिति

प्रभा :–**साधकापेक्षयेति** । साधकं हि यथोपमायां तथा रूपकेऽपि किंचिद्भवेदिति

स्पष्टोल्लसत्किरणकेसरसूर्यबिम्ब-
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलि संचुकोच ॥ १८४ ॥ (हरविजय. १९.१.)

अत्र एकपदानुप्रविष्टौ रूपकानुप्रासौ ।

Then closed the *lotus of day*, having the ample pericarp of the sun-orb, with the filaments of rays shooting up conspicuously, that enclosed the swarm of bees in the form of darknesss, on its (i. e. of the swarm) descent into its opening, and whose petal-row of the eight quarters was close-knit ! (184)

Here Rūpaka and Anuprāsa are embodied in one word.

प्रदीप :–सोऽप्यपरः संकरः । उदाहरणम्—**स्पष्टोल्लसदिति** । अत्र पादत्रये प्रत्येकं रूपकानुप्रासौ प्रविष्टौ । शब्दार्थालंकृतीति प्रायोवादः । शब्दालंकारयोरप्येतद्दर्शनात् । यथा– 'कलकलोऽलकलोलदृशाऽन्यया' इत्यादावनुप्रासयमकयोः । **तेनेति** । तस्मादनुग्राह्यानुग्राहकतया संदेहेनैकपदप्रतिपाद्यतया व्यवस्थितत्वाच्च त्रिप्रकारोऽयं संकरः कथितः । प्रकारान्तरेण तु न शक्यो व्याकर्तुम् । भेदानामनन्तत्वात् । इति प्रतिपादिताः शब्दार्थतदुभयगतत्वेन त्रिविधा अलंकाराः । ननु त्रिविधानामप्येषां काव्यशोभातिशयहेतुत्वस्य तुल्यत्वेऽपि कुत एष प्रतिनियमः यत्कश्चिच्छब्दस्य कश्चिदर्थस्य कश्चिच्छब्दार्थयोरिति चेत् । उक्तमत्र प्रागेव दोषगुणालंकाराणां शब्दार्थोभयगतत्वव्यवस्थायाम-

---

उ० :–बोध्यम् । तृतीयसंकरमाह—**स्फुटमिति** । स्फुटमित्यनेनास्फुटालंकारद्वयसंसर्गस्य नालंकारत्वं वैचित्र्यानाधायकत्वादिति सूचितम् । (**स्पष्टेति** । हरविजये १९ सर्गे संध्याकालवर्णनम् ।) स्पष्टमुल्लसंतः किरणा एव केसरं यस्य तादृशं सूर्यबिंबमेव विस्तीर्णा कर्णिका यस्य, मिथः संबद्धाः अष्टौ दिश एव दलसमूहा यस्य तच्च तन्मुखं रात्रेरारंभस्तदवतारेण बद्धा अंधकारमधुपावलिर्यत्र तत् । (वसंततिलका छन्दः ।) **प्रत्येकम्** । समस्तपदे । किरणकेसरसूर्यबिंबविस्तीर्णकर्णिकदिग्दलकलापेत्यत्र । **अनंतत्वादिति** । शब्दगतत्वेन अर्थगतत्वेन शब्दार्थोभयगतत्वेन चानुगतीकृत्योक्तम् । उपमारूपकादीन् विशिष्योपादाय त्वनंतत्वात्तत्संकरो वक्तु न शक्यत इत्यर्थः । तदाह–**शब्दार्थेत्यादि** ।

प्रभा :–शङ्कया नेतरव्यवच्छेदसिद्धिः बाधकेन तु सद्यस्तत्सिद्धिरिति तदेव बलवदित्याशयः । अन्ये त्विति मतमुक्तार्थम् । **एकपदप्रतिपाद्यतयेति** । एकपदाश्रितत्वेन गम्यमानतयेत्यर्थः । यथाश्रुते शब्दालंकारे पदप्रतिपाद्यत्वस्यासंभवात् । **प्रकारान्तरे-**

-(८७) तेनासौ त्रिरूपः परिकीर्तितः ॥ ९९ ॥

तदयमनुग्राह्यानुग्राहकतया संदेहेन एकपदप्रतिपाद्यतया च व्यवस्थितत्वात् त्रिप्रकार एव संकरो व्याकृतः। प्रकारान्तरेण तु न शक्यो व्याकर्तुम्, आनन्त्यात्तत्प्रभेदानाम् ।

इति प्रतिपादिताः शब्दार्थोभयगतत्वेन त्रैविध्यजुषोऽलंकाराः ।

कुतः पुनरेष नियमो यदेतेषां तुल्येऽपि काव्यशोभाऽतिशयहेतुत्वे कश्चिदलंकारः शब्दस्य, कश्चिदर्थस्य, कश्चिच्चोभयस्येति चेत् । उक्तमत्र, यथा काव्ये दोषगुणालंकाराणां शब्दार्थोभयगतत्वेन व्यव-

---

Therefore it is declared to be threefold.

Gloss:—Therefore this Saṅkara has been sub-divided as being only of three varieties owing to its presenting itself (I) either as based on figures related as the Principal and the Subservient, or (II) as based on figures that arouse a doubt, or (III) as based on figures that are conveyed by the same word. It cannot be sub-divided any other way, since the varieties resulting therefrom would be infinite.

Thus have been stated the figures of three kinds, according as they are present in the Sound, Sense or both.

If it be urged: Why this restriction that even when these are equally responsible for heightening the charm of Poetry, a particular figure is stated to be of Sound, another of Sense, and some other of both?

We reply: In this matter it has been said (already) that in Poetry, in the matter of the classification of Defects, Excellences and

---

प्रदीपः—न्वयव्यतिरेकावेव प्रभवतः । निमित्तान्तराभावात् । ततश्च योऽलंकारः शब्दार्थयोर्मध्ये यस्यान्वयव्यतिरेकावनुविधत्ते स तदलंकार इति व्यवस्थाप्यते । शब्दान्वयव्यतिरेकानुविधायित्वं चैतदेव, यच्छब्दपरिवृत्त्यसहत्वम् । नन्वेवं यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयभावाभावानुविधायित्वेनोभयालंकारस्तथाऽर्थशब्दहेतुकार्थान्तरन्यास-

---

उ०:—पूर्वं ' व्यवस्थितत्वाच्च ' इत्यस्याप्ययमेवार्थः । **प्रागेवेति** । नवमोल्लासे इत्यर्थः। **परिवृत्त्यसहत्वमिति**। तत्त्वं शब्दगतत्वम्, शब्दस्य तत्सहत्वेऽर्थगतत्वम्,

---

प्रभा:—**णेति** । तत्तदलंकारगतत्वेनेत्यर्थः । **नन्वेवमिति** । योऽलंकारः इत्याद्युक्तरीत्या शब्दार्थालंकारत्वव्यवस्थाभ्युपगम इत्यर्थः । तनुवपुरित्यादिपुनरुक्तवदाभासे तनुशब्दस्य परिवृत्त्यसहत्वाच्छब्दान्वयव्यतिरेकौ वपुःशब्दस्य परिवृत्तिसहतया चार्थान्वय-

स्थायामन्वयव्यतिरेकावेव प्रभवतः । निमित्तान्तरस्याभावात् । ततश्च योऽलंकारो यदीयान्वयव्यतिरेकावनुविधत्ते, स तदलंकारो व्यवस्थाप्यते इति । एवं च यथा पुनरुक्तवदाभासः परम्परितरूपकं चोभयोर्भावाभावानुविधायितया उभयालंकारौ, तथा शब्दहेतुकार्थान्तरन्यासप्रभृतयोऽपि द्रष्टव्याः । अर्थस्य तु तत्र वैचित्र्यम् उत्कटतया प्रतिभासते इति वाच्यालंकारमध्ये वस्तुस्थितिमनपेक्ष्यैव लक्षिताः ।

योऽलंकारो यदाश्रितः स तदलंकार इत्यपि कल्पनायाम् अन्वयव्यतिरेकावेव समाश्रयितव्यौ, तदाश्रयणमंतरेण विशिष्टस्याश्रयाश्र-

---

Figures as being present in Sound, Sense or both, it is *Presence-and-Absence principle* that carries weight. Consequently a figure is classified as belonging to that whose Presence or Absence it depends on. Thus just as Punaruktavadābhāsa and Paramparita-Rūpaka are figures of both owing to their depending on the Presence or Absence of both, similarly, Arthāntaranyāsa based on Sound and others like it should be looked upon (as figures of both). But they have been defined, without regard for actual facts, among the figures of sense since in them the strikingness of Sense appeals as being more prominent.

Even in the matter of the assumption that a Figure belongs to that in which it *abides*, it is the *Presence–Absence principle* that one has to fall back upon. Since without resorting to it, there could not be the

---

प्रदीप :– प्रभृतयोऽप्युभयालंकारा भवेयुरिति चेत्, न । इष्टापत्तेः । एवं तर्हि कथमुभयालंकारप्रस्तावमुल्लङ्घ्यार्थमात्रालंकारप्रस्तावे पठिता इति चेत्, तत्रार्थवैचित्र्यस्य प्रकटतया प्रतिभासात् । अथ योऽलंकारो यदाश्रितः स तदीय इत्येव किं न विभाग इति चेत्, तथा कल्पनायामप्यन्वयव्यतिरेकावेव समाश्रयितव्यौ । तद्व्यतिरेकेण विशिष्टस्याश्रयाश्रयिभावस्याभावात् । तस्मादलंका-

---

उ० :– कस्यचिच्च तत्सहत्वे उभयगतत्वमिति भावः । **अर्थशब्दहेतुकेति** । क्षणदासावक्षणदेत्यादौ शब्दशक्तिमूलविरोधालंकारांगभूतार्थांतरन्यास इत्यर्थः । प्रभृतिपदात् ‘ सकलकलं पुरमेतत् ’ इति शब्दसाम्यनिबंधनोपमादयः । **प्रकटतयेति** । साध्यसाधनभावादीनामर्थधर्मत्वादिति भावः । अत एव शब्दवै-

---

प्रभा :– व्यतिरेकावित्युभयालंकारत्वम् । तथा विद्वन्मानसेत्यादिपरम्परितरूपके मानसपदस्य श्लिष्टतया परिवृत्त्यसहत्वाद्धंसादिपदानां च तत्सहत्वादुभयालंकारता । एवं क्षणदा सा च क्षणदा इत्यर्थान्तरन्यासेऽपि श्लेषमूलकतया शब्दान्वयव्यतिरेकानुविधानम्, उत्तरार्धे त्वर्थस्येत्युभयालंकारत्वं स्यादित्यर्थः । **नेति** । इदमनिष्टापादनं नेत्यर्थः । अलंकारसर्वस्वकारमतमाशङ्कते—**अथेति** । दूषयति—**तथेति** । तथा हि क्वचि-

यिभावस्याभावादित्यलंकाराणां यथोक्तनिमित्त एव परस्परव्यतिरेको ज्यायान्।

(८८) एषां दोषा यथायोगं संभवन्तोऽपि केचन।
उक्तेष्वन्तर्भवन्तीति न पृथक्प्रतिपादिताः॥ ५६॥

तथा हि अनुप्रासस्य प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोध इति ये त्रयो दोषाः, ते प्रसिद्धिविरुद्धतां अपुष्टार्थत्वं प्रतिकूलवर्णतां च यथाक्रमं न व्यतिक्रामन्ति, तत्स्वभावत्वात्। क्रमेणोदाहरणम्—

---

particular *Abode–Abiding principle.* Therefore it is more cogent to hold that the mutual differentiation between figures is due to the circumstance as specified.

DEFECTS OF FIGURES.

Though there are possible certain defects of these, they have not been separately stated since each one of them comes, as the case may be, under those (already) stated.

Gloss:—To explain:—The three defects of Anuprāsa, viz. Absence of established usage, Futility and Stylistic disharmony, do not respectively go beyond (a) Being in conflict with established usage, (b) Redundancy, and (c) Discordance of syllables, as they are identical with them in nature. Instances in order:—

प्रदीप:–राणामन्वयव्यतिरेकनिबंधन एव परस्परं भेद इत्येव ज्यायः। नन्वलंकाराणां दोषाः प्राचीनैरभिहितास्ते किं न सन्त्येव, आहोस्वित्संभविनोऽप्युपेक्षिताः। आद्येऽनुभवविरोधः अन्त्ये न्यूनतेत्यत आह—**एषामिति**। तथा हि अनुप्रासस्य तावत् त्रयो

उ०:–चित्र्यस्योत्कटतया पुनरुक्तवदाभासः शब्दालंकारमध्ये गणितः। वास्तवं सिद्धांतसिद्धं तु सर्वेषामुभयालंकारत्वमिति बोध्यम्। अलंकारसर्वस्वोक्तां युक्तिं शंकते—**अथेति**। **विशिष्टस्य**। तत्तदाश्रयविशिष्टस्य। **ज्याय इति**। साक्षाच्छब्दाश्रितत्वस्य यमकखड्गबंधादौ साक्षादर्थाश्रितत्वस्योत्प्रेक्षासमासोक्त्यादावसंभवात् कथंचित्तदाश्रितत्वस्यातिप्रसक्तत्वात्परिवृत्त्यसहशब्दाश्रितत्वं तत्सहशब्दार्थाश्रितत्वं वाच्यम्। तथा च कथं-

---

प्रभा:–द्रूये पद्ये वा गद्यपद्यान्तरनिरूपितोपमायां शब्दाश्रितत्वेन शब्दालंकारत्वापत्तिः। न चेष्टापत्तिः। अपसिद्धान्तदोषात्। एवमलंकारान्तराणामपि शब्दगतत्वसंभवात्तत्राप्यतिप्रसङ्गो ज्ञेयः। **विशिष्टस्येति**। उक्तविषयव्यावृत्तस्येत्यर्थः। **अलंकाराणा-**

चक्री चक्रारपङ्क्तिं हरिरपि च हरीन्धूर्जटिर्धूर्ध्वजान्तान्
अक्षं नक्षत्रनाथोऽरुणमपि वरुणः कूबराग्रं कुबेरः ।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य
स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात्स्यन्दनो वः ॥ १८५॥

(मयूर's सूर्यशतक. १७.)

अत्र कर्तृकर्मप्रतिनियमेन स्तुतिः अनुप्रासानुरोधेनैव कृता, न पुराणेतिहासादिषु तथा प्रतीतेति प्रसिद्धिविरोधः ।

May that chariot of the sun of hot lustre grown propitious in pleasure protect you : the chariot ever ready to oblige the world, the series of the spokes in whose wheels Viṣṇu, the bearer of the discus, praises; whose bay steeds Indra (Hari) himself (praises); the tops of whose yoke-banners, Śiva (praises); whose axle the moon (praises); also Aruṇa connected with which Varuṇa (praises); the end of whose pole Kubera (praises); whose speed the host of gods (praises), day after day! (185)

Here the praise with a definite subject for a definite object, is effected only with an eye upon the Anuprāsa. It is not found to be so in the Purāṇas, Itihāsa etc. Therefore the defect is Conflict–with–established–usage.

प्रदीपः – दोषाः, प्रसिद्ध्यभावो वैफल्यं वृत्तिविरोधश्च । ते च यथाक्रमं प्रसिद्धिविरोधापुष्टार्थत्वप्रतिकूलवर्णत्वेभ्यो नातिरिच्यन्ते । तत्स्वभावत्वात् । तत्र प्रसिद्ध्यभावो यथा—**चक्रीति** । अत्र चक्रिप्रभृतीनां कर्तॄणां चक्रारपङ्क्त्यादीनां कर्मणां प्रतिनियमेन स्तुतिरनुप्रासानुरो-

---

उ० : – चिदाश्रितत्वांशप्रवेशो विफल इत्याशयः । **वैफल्यम्** । चमत्काराजनकत्वम् । **वृत्तिविरोधः** । उपनागरिकादिवृत्तिविरोधः । **प्रतिकूलेति** । माधुर्यव्यंजिकायां वृत्तौ शब्दत एव टवर्गादिरोजोव्यंजिकायामुद्धतगुम्फविधानमुखेन शिथिलबन्धस्यार्थतः पर्युदासादिति भावः । **तत्स्वभावत्वादिति** । तत्तल्लक्षणाक्रान्तत्वादित्यर्थः । **चक्रीति** । (मयूरकविकृते सूर्यशतके सूर्यरथवर्णनम् ।) अहिमरुचेः सूर्यस्य स स्यंदनो वोऽवतादिति संबंधः । जगदुपकारार्थं नित्यप्रवृत्तस्य यस्य चक्रकीलकपंक्तिं चक्री

प्रभाः – **मिति** । शब्दार्थालंकाराणामित्यर्थः । इति संकरप्रकरणम् ॥ ६१ ॥ **चक्रीति** । अत्र स्तोत्रस्तुत्युपन्यासे न किंचिदनौचित्यम् । अन्यत्र कवेरनुप्रासकुतूहलभङ्गादित्याह—**अत्रेति** । चक्री कर्ता चक्रारपङ्क्तिमेव कर्मभूतां स्तौति नान्यत्र इत्येवंरूपेण

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि ।
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे ॥ १८६ ॥ (—)
अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥ १८७ ॥ (—)

अत्र वाच्यस्य विचिन्त्यमानं न किंचिदपि चारुत्वं प्रतीयते इत्यपुष्टार्थतैवानुप्रासस्य वैफल्यम् ।

अकुण्ठोत्कंठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥ १८८ ॥ (—)

O youthful lady, whose face is like the moon shedding delight and lovely, whose eloquence possesses fine grace, if you proceed to your beloved's house, say, O red-footed one, why your movement, with the jewelled girdle jingling in no small measure and the sweet anklets tinkling without a pause, occasions annoyance to me, for no reason! (186–7)

Here no imaginable charm of the expressed sense could be felt and hence the Futility-of-Alliteration is the same as Redundancy.

O lady of sweet voice, put for a moment in (an embrace of) the neck of the lady with conch-like throat, me who am filled to the brim with an irresistible yearning! Spare me this neck-malaise! (188)

प्रदीप – धेनैव निबद्धा न पुनरितिहासादिषु तथा प्रसिद्धेति प्रसिद्ध्यभावः । सोऽयं प्रसिद्धिविरोध एव । वैफल्यं यथा—**भणेति** । अत्र वाच्यस्यार्थस्य विचिन्त्यमानं न किंचिचारुत्वं प्रतीयत इत्यपुष्टार्थत्वमेवानुप्रासस्य वैफल्यमुच्यते । वृत्तिविरोधो यथा–**'अकुण्ठोत्कण्ठया'** इ–

उ० : – विष्णुः, हरीनश्वान् हरिरिंद्रः, धूर्यानमुखम् तत्रत्यध्वजानामग्रान् धूर्जटिः शिवः, नक्षत्रनाथः चन्द्रः अक्षम् युगम्, अरुणं सारथिं वरुणः, कूबराग्रं युगबंधनाग्रं कुबेरः, रंहो वेगं सुराणां समूहः, स्तौतीति सर्वान्वयि । (स्रग्धरा छन्दः ।) **भणेति** । हे तरुणि आनन्दस्यंदी सुंदरश्च यः इंदुस्तन्मुखि । सलीलमुल्लासयुक्ते । उल्लासो गमनवचनादिप्रकारः । यदि रमणमंदिरं गच्छसि तदा

प्रभा : – स्तुतिरनुप्रासानुरोधेनैव कृता न पुराणाद्यनुरोधान्नाप्यर्थौचित्यादतः प्रसिद्धिविरोधो दोष इत्यर्थः । द्वितीयमुदाहरति—**भणेति** । अत्र यदनुप्रासस्य वैफल्यं तदर्थस्यापरिपोषे तिष्ठति । तादृगनुप्रासप्रसाधितवाचकनिवेशेऽपि वाच्यस्य तद्वारा वाक्यार्थीभूतपरस्य वाच्यत्वासिद्धेरित्याह—**अत्र वाच्यस्येति** । तृतीयमुदाहरति—**अकु-**

अत्र शृंगारे परुषवर्णाडम्बरः पूर्वोक्तरीत्या विरुध्यते इति परुषानुप्रासोऽत्र प्रतिकूलवर्णतैव वृत्तिविरोधः ।

यमकस्य पादत्रयगतत्वेन यमनमप्रयुक्तत्वं दोषः । यथा—

भुजंगमस्येव मणिः सदम्भा ग्राहावकीर्णेव नदी सदम्भाः ।
दुरन्ततां निर्णयतोऽपि जन्तोः कर्षन्ति चेतः प्रसभं सदम्भाः ॥ १८९ ॥

(—)

Here, in the manner stated above (Ullāsa VII), the pompous use of jarring syllables is inharmonious with Love. Therefore jarring alliteration is, in this case, which is called Stylistic disharmony, the same as Discordance-of-syllables.

The embodiment of Rhyme in three quarters is the same as Being-out-of-vogue. To illustrate:—

Like a snakes's jewel of the first water, like a clear–watered river infested by sharks, the wily ones irresistibly attract the heart of a creature even when he has ascertained them as being of sinister aims! (189)

प्रदीप:–त्यादि । अत्र शृङ्गारे परुषवर्णाडम्बरो गुणविवेचनप्रस्तावोक्तरीत्या विरुद्ध इति प्रतिकूलवर्णतैव वृत्तिविरोध इत्युच्यते । यमकस्य तु पादत्रयगतत्वेन यमनमप्रयुक्तत्वमेव । कविभिस्तथाऽप्रयोगात् । यथा—**भुजंगमेति** । उपमायां तु यौ न्यूनाधिकोपमानत्वे दोषौ तत्रोपमाने उपमेयापेक्षया जातिगतं प्रमाणगतं वा यन्न्यूनत्वमधिकता वा तदनुचितार्थम् । धर्मगते न्यूनत्वाधिकत्वे यथाक्रमं न्यूनपदत्वाधिकपदत्वे । तत्र जातिगतं न्यूनत्वं यथा—

उ०:– त्वदीयमेकं प्रयोजनं भणेत्यर्थः। श्वोभाविगमनां प्रति जारस्य वचः। **अननुरणदिति** । शब्दरहितमणिमेखलम्। तत्स्थानस्य गुरुत्वेन लघुसंचारात्। अविरतसिंजानमंजुमंजीरम् इति च परिसरणविशेषणम् । परिसरणं गमनम् । भूषणानां च शिंजितम् । रणरणकमुत्कंठाम् । ईदृशं तव परिसरणं दृष्ट्वा मम चेतोऽकारणमुत्कंठां कुरुते इत्यर्थः । तवोल्लासात् इतः परं भर्तृगृहगमनाच्चेति भावः । (आर्या छन्दः ।) **उच्यते इति** । शब्दानुरूपार्थविरहेणानुप्रासस्त्वेऽपि नास्वादोत्कर्षः । शब्दालंकाराणामप्यर्थातिशयाधानद्वारेणैव चमत्कारि-

---

प्रभा:–**ण्ठेति** । अत्रोपनागरिकां विमुच्य परुषाया अङ्गीकाराद्यो वृत्तिविरोधः स वर्णप्रातिकूल्यान्नातिरिच्यत इत्याह—**शृङ्गारे इति** । यमकविषयं दोषं दोषप्रयुक्तत्वेऽन्त-

उपमायाम् उपमानस्य जातिप्रमाणगतन्यूनत्वम् अधिकता वा तादृशी अनुचितार्थत्वं दोषः। धर्माश्रये तु न्यूनाधिकत्वे यथाक्रमं हीनपदत्वमधिकपदत्वं च न व्यभिचरतः। क्रमेणोदाहरणम्—

'चण्डालैरिव युष्माभिः साहसं परमं कृतम्'

(Cited in वामन's सूत्रवृत्ति. ४·२.)

'वह्निस्फुलिङ्ग इव भानुरयं चकास्ति'

(Cited in वामन's सूत्रवृत्ति. ४·२.)

अयं पद्मासनासीनश्चक्रवाको विराजते।
युगादौ भगवान्वेधा विनिर्मित्सुरिव प्रजाः॥ १९०॥

(Cited in भामह's काव्यालंकार. २·५५.)

In an Upamā, the inferiority, in the matter of the class or size, of the Upamāna, or its superiority in the same, is (the same as) the defect Impropriety. So far as the inferiority or superiority abiding in the Common Property is concerned, they respectively do not fall outside Being-deficient-in-(descriptive)-words, or Being-superfluous-in-descriptive-words. Instances in order:

Like the Caṇḍālas you have performed an eminent act of daring !

Here shines the sun like a spark of fire !

Here looks splendid the Cakravāka perched on the seat of the lotus, like the Lord, the Creator, intending to create the creatures, at the beginning of the aeon (i. e. creation) ! (190)

प्रदीपः–'चण्डालैरिव युष्माभिः साहसं परमं कृतम्'। अत्र चण्डालत्वजातेर्न्यूनतया दुष्कर्मकारित्वव्यक्तेरनुचितार्थत्वम्। प्रमाणगतं यथा—'वह्निस्फुलिङ्ग इव भानुरयं चकास्ति' इति। जातिगतमधिकत्वं यथा—**अयमिति**।

उ०:–त्वात्। शब्दानां परिवृत्त्यसहत्वमात्रेण शब्दालंकारव्यपदेशः। (**भुजंगमस्येति**।) सदंभाः दंभसहिताः। दुरंततां दुःखग्राह्यांतःकरणताम्। निर्णयतोऽपि निश्चिन्वतोऽपि। प्रसभं बलात्। प्रमुखे इति पाठे आपाततः। कर्त्रीति। सत्कांतिसर्पमणिरिव ग्राहयुक्तसजला नदीव। कांतेरंभःपदवाच्यत्वात्। (उपजातिश्छन्दः।) **धर्मगते**। साधारणधर्मगते। **अनुचितार्थत्वमिति**। तद्व्यक्तिविवक्षायां तु न दोषत्वमिति बोध्यम्। (**अयमिति**। पद्ममेवासनं तत्र

प्रभा:–भावयति–**यमकस्य त्विति**। उदाहरति—**यथेति**। अथ **प्रतीयमानेति**। इवादिबोध्येनेत्यर्थः। **तथापीति**। इवादिबोधेनोपमानिर्वाहेऽपीत्यर्थः। एवमुपात्तधर्म-

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः ॥ १९१ ॥

(Cited in वामन's सूत्रवृत्ति. ४.२.)

अत्र चण्डालादिभिरुपमानैः प्रस्तुतोऽर्थोऽत्यर्थमेव कदर्थित इत्यनुचितार्थता ।

स मुनिर्लाञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥ १९२ ॥

(Cited in वामन's सूत्रवृत्ति. ४.२.)

अत्रोपमानस्य मौञ्जीस्थानीयस्तडिल्लक्षणो धर्मः केनापि पदेन न प्रतिपादित इति हीनपदत्वम् ।

Your navel is like the Nether World; your breasts like mountains; while this massive braid of your hair is like the cataract of the Jumna ! (191)

Here, owing to the Upamānas, Caṇḍāla etc., the matter under consideration happens to be very much brought into contempt; therefore it is Impropriety.

That sage, marked by the girdle of Muñja grass and wearing the hide of a black antelope for a garment, looked splendid like the sun wrapped in a fragment of a dark cloud ! (192)

Here since the attribute of Lightning relating to the Upamāna and corresponding to the Girdle of Muñja-grass (relating to the Upameya) has not been stated by any word, the defect is the same as Deficiency-of-words.

प्रदीपः – ब्रह्मणः कल्पभेदेन भेदाद्ब्रह्मत्वं जातिः । प्रमाणगतमधिकत्वं यथा—**पातालमिति** । एषु चण्डालादिभिरुपमानैरुपमेयभूता अर्था अत्यन्तमेव कदर्थिताः । निन्दोपहासादिप्रतीतेरित्यनुचितार्थता । धर्मगतं न्यूनत्वं यथा–**स मुनिरिति** । अत्रोपमेयमौञ्जीस्थानीयस्तडिल्लक्षणो धर्मो न केनापि पदेन प्रतिपादितः । न त्वाक्षेपादिनाऽपि स्पष्टं प्रतीयते

उ० : – आसीनः । विनिर्मित्सुः विनिर्मातुमिच्छुः । स्रष्टा ब्रह्मा । **पातालमिति** । कालिन्दीपातसन्निभः यमुनाप्रवाहतुल्यः ।) **उपहासेति** । अत्युत्कृष्टब्रह्माद्युपमानकत्वम् अपकृष्टोपमेयस्य असत्यतापर्यवसायितयोपहासाय भवतीति भावः । **स मुनिरिति** । (मौंज्या मुंजाख्यतृणनिर्मितमेखलया । लांछितः चिह्नितः ।

प्रभा : – विशिष्टत्वमुपमानोपमेययोरन्यतरस्य भवेत्, तथा च प्रक्रमभङ्ग इत्याह—**न च**

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ॥ १९३ ॥
(Cited in भामह's काव्यालंकार २.५८.)

There Kṛṣṇa clad in a yellow garment and clutching the Śārṅga bow assumed a form both charming and awful, like a cloud, with a streak of lightning and rainbow across it, as it comes in contact with the moon, at night! (193)

प्रदीपः–अविनाभावाद्यभावादिति न्यूनपदत्वमेवैतत् । धर्मगतमधिकत्वं यथा—**स पीतेति** । अत्रोपमेये शङ्खाद्यनिर्देशादुपमाने तत्तुल्यस्य शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वमेवैतत् । भिन्नलिङ्गत्वभिन्नवचनत्वे अप्युपमादोषौ नोक्तदोषातिरेकिणौ । तथा हि । लिङ्गवचनयोर्भेदे यद्युपमानोपमेययोः साधारणधर्मवाचकं पदमन्यतरघटितलिङ्गं कुर्यात्, तदैकतरस्यैव तद्धर्मसमन्वयावगतेः कथमुपमानिर्वाहः । अथ प्रतीयमानं साधर्म्यमाश्रित्येयं स्यात्, तथाप्युपात्तधर्मविशिष्टस्यैवोपमानत्वमुपमेयत्वं वा प्रतीयेत । न च तथा प्रस्तुतम् । अतः

उ०:–कृष्णाजिनरूपं पटं वस्त्रम् ।) जीमूतो मेघः । अंशुमान्सूर्यः । **अविनेति** । व्याप्त्यभावादित्यर्थः । तं विना सादृश्याप्रतीतेर्दोषत्वम् । (**स पीतेति** । पीतवर्णं वासो वस्त्रं यस्य, प्रगृहीतं शार्ङ्गं धनुः येन, स श्रीकृष्णो मनोज्ञं सुन्दरं च तद्भीमं वपुः, आप प्राप । क इव । शतह्रदा विद्युत् इन्द्रायुधं इन्द्रधनुश्च तद्वान् निशायां शशिना संसृज्यमानो मेघ इव । उपजातिश्छन्दः) **अधिकपदत्वमेवैतदिति** । उपमानन्यूनाधिकधर्मत्वमेवोपमेयाधिकन्यूनधर्मत्वमिति पृथङ्नोक्तम् । **प्रतीयमानमिति** । उपात्तधर्मातिरिक्तधर्ममित्यर्थः । **न च तथेति** । किं तु उपमाप्रस्तुतेरित्यर्थः । **प्रक्रांतस्य** । उपमालंकारस्य । **अभावात्** । असंभवात् । इत्यादिना धर्मत्वेनापि उपात्तधर्म एव बोध्यते तस्य निरुक्तोभयनिष्ठत्वे उपमानिर्वाहो नान्यथेति भावः । अपरत्र लिंगविपरिणामेन यथाकथंचिदन्वयेऽपि स्फुटत्वाभावेन चमत्कारापकर्ष इति तत्त्वम् । **मात्रेणेति** । पुंस्त्वान्वितच्युतत्वस्य नपुंसकविशिष्टोपमानधर्मत्वाभावादिति भावः । अत एव यत्रानुपात्तसाधारणधर्मस्तत्र न दोषः । कल्प्यमानस्य लिंगरहितस्यैव कल्पनेन उभयसाधारणत्वात् ।

प्रभाः–**तथेति** । अन्यतरस्य सविशेषणत्वं प्रक्रान्तविरुद्धमित्यर्थः । **पुंलिङ्गत्वादिति** । पुंस्त्वान्वितत्वादित्यर्थः । तथा चोपमाने चिन्तारत्ने बाधेनान्वयादिति भावः । न चेवशब्देनोपमाने साधारणधर्मबोधे बाधकाभाव इति शङ्कनीयम् । उपात्तधर्मस्यैव

अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते इत्यधिकपदत्वम् ।

लिङ्गवचनभेदोऽपि उपमानोपमेययोः साधारणं चेत् धर्ममन्यरूपं कुर्यात्, तदा एकतरस्यैव तद्धर्मसमन्वयावगतेः सविशेषणस्यैव तस्योपमानत्वमुपमेयत्वं वा प्रतीयमानेन धर्मेण प्रतीयते इति प्रक्रान्तस्यार्थस्य स्फुटमनिर्वाहादस्य भग्नप्रक्रमरूपत्वम् । यथा—

Here, when the conch etc. as relating to the Upameya are not stated, the mention of the moon is in excess; so the defect is the same as Superfluity-of-words.

If the divergence of Gender and Number tends to make what is a *common* property otherwise, then the common property is found to be in connection only with one of the two. Therefore it (i. e. the other) will be apprehended as an Upamāna or Upameya only in so far as qualified by the attribute that is understood. So the fault is the same as Breach-of-Motif since the matter sought to be stated is not clearly brought out. To illustrate:—

प्रदीपः– प्रक्रान्तस्याभावाद्भग्नप्रक्रमत्वमेव दोषः । यथा—'चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे' । अत्र च्युत इत्युपमेयमात्रेणान्वीयते । पुल्लिङ्गत्वात् । वचनभेदे यथा—'सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव ।' अत्र शुद्धा इत्युपमेयमात्रेणान्वीयते । लिङ्गभेदोऽत्र विद्यमानोऽप्यप्रधानम् । उपमानस्य बहुत्वे लिङ्गभेदेऽप्युभयान्वयसंभवात् । यत्र तु लिङ्गवचनयोर्भेदेऽपि सामान्याभिधायि पदमुपात्तरूपभेदं नापद्यते, किंतूपात्तेनैव रूपेणोभयत्रान्वेति, तत्र दोषत्वमेव नास्ति । उभयत्राप्यस्यानुगमयोग्यस्वभावत्वात् ।

उ०ः– एवं यत्र लिंगरहितार्थोपस्थापकतिङन्तेन साधारणधर्मोपस्थितिस्तत्रापि न दोषः । यथा 'स्त्रीव गच्छति षंढोऽयम्' इत्यादौ । एवं च 'चंद्र इव सुंदरं मुखम्' इत्यादौ दोष एवेति बोध्यम् । अत्र शुद्धा इति बहुत्वविशिष्टशुद्धत्वसाधारणधर्मस्य बहुत्वावरुद्धसक्तुष्वेवान्वयो न त्वेकत्वावरुद्धवधूरूपे उपमाने इति भावः । **संभवादिति** । उभयत्रापि उपात्तरूपाभेदात् । तदाह–**यत्र त्विति** । **रूपभेदम्** । आनुपूर्वीभेदम् । **उपात्तेनैव रूपेणेति** । उपस्थितोऽर्थ इति शेषः । आनुपूर्वीसाम्येनोभयत्रान्वयसंभवादिति भावः । **अनुगमः** । अन्वयः । **अत्र लिंगेति** ।

प्रभाः– तेन बोधनस्य व्युत्पत्तेः । तस्य च पुंस्त्वान्वितस्योपमाने बाधस्योक्तत्वात् । **लिङ्गभेद इति** । सक्तुशब्दस्य पुल्लिङ्गत्वादित्यर्थः । **लिङ्गभेदेऽपीति** । पुंस्त्वस्येव स्त्रीत्व-

'चिन्तारत्नमिव च्युतोऽसि करतो धिङ् मन्दभाग्यस्य मे' (—)
'सक्तवो भक्षिता देव शुद्धाः कुलवधूरिव ।' (मेधाविन् ?)

यत्र तु नानात्वेऽपि लिङ्गवचनयोः सामान्याभिधायि पदं स्वरूपभेदं नापद्यते, न तत्रैतद्दूषणावतारः, उभयथाऽपि अस्य अनुगमक्षमस्वभावत्वात् । यथा—

'गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः ।' (—)
तद्वेषोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥ १९४ ॥ (—)

You, like a talisman, have slipped from my hand! Fie upon me who am hapless!

O king, barley-meal pure like a wife of good family, has been eaten!

Where, however, even with the divergence of Gender and Number the word expressing the common property does not undergo a change of form, this defect does not present itself, since that (i. e. the common property) possesses the characteristic of agreeing both ways. To illustrate:—

Made famous by priceless virtues, like the great ocean by priceless jewels!

Her costume, full of elegance and unlike that of other women, possessed an exquisite grace like her charms! (194)

प्रदीप :– तत्र लिङ्गभेदे यथा–'गुणैरनर्घ्यैः प्रथितो रत्नैरिव महार्णवः।' अत्र लिङ्गभेदेऽपि विशेषणान्वयस्याविशेषाद्दोषत्वाभावः । वचनभेदे यथा—**तद्वेष इति।** अत्र वचनभेदेऽपि मधुरताभृत इत्यस्योभयान्वयाविशेषान्न दोषत्वम् । एवं कालपुरुषविध्यादिभेदेऽपि भग्नप्रक्रम एव दोषः । तथाप्रतीतेरस्खलितरूपतया

उ० :– गुणरत्नशब्दयोर्लिंगभेदेऽपि अनर्घ्यैरिति धर्मवाचकस्य लिंगद्वयेऽपि तुल्यरूपत्वान्न दोष इति भावः । **तद्वेष इति।** तदीयो वेष उपमेयम् । विभ्रमा उपमानम् । असदृश इति मधुरताभृत इति दधत इति च धर्मवाचकान्युभयत्रान्वयसमर्थानि । असदृश इति कञन्तैकवचनं क्विबन्तबहुवचनं च । भृत इति क्तान्तैकवचनं क्विबन्तबहुवचनं च । दधत इति दध धारणे इत्यस्यैकवचनं धाञो बहुवचनं च । अत्र श्लेषोऽप्युपमोपपादक एवेति बोध्यम् । अन्याभिः

प्रभा :– स्यापि प्रतीतौ यथायोगमन्वयसंभव इत्यर्थः । **उभयत्रापीति** । विशेषाभावेन लिङ्गाविवक्षणादिति । **वचनभेदेऽपीति** । प्रथमैकवचनतद्बहुवचनयोरदन्तहलन्त-

कालपुरुषविध्यादिभेदेऽपि न तथा प्रतीतिरस्खलितरूपतया विश्रान्तिमासादयतीत्यसावपि भग्नप्रक्रमतयैव व्याप्तः । यथा—

अतिथिं नाम काकुत्स्थात्पुत्रमाप कुमुद्वती ।
पश्चिमाद्यामिनीयामात्प्रसादमिव चेतना ॥ १९५ ॥ (रघुवंश. १७.१.)

अत्र चेतना प्रसादमाप्नोति न पुनरापेति कालभेदः ।

प्रत्यग्रमज्जनविशेषविविक्तमूर्तिः
कौसुम्भरागरुचिरस्फुरदंशुकान्ता ।
विभ्राजसे मकरकेतनमर्चयन्ती
बालप्रवालविटपप्रभवा लतेव ॥ १९६ ॥ (रत्नावली. १. २०.)

Even in case of the divergence in Tense, Person, Mood etc. the apprehension does not so much as attain completeness as being free from abruptness. So the same also is comprehended by the Breach-of-Motif. To illustrate:—

Kumudvatī got a son named Atithi from Kākutstha as intellect gets vividness from the last watch of the night! (195)

Here there is the divergence of Tense: Intellect *gets*—not *got*—clarity.

With your figure immaculate, thanks to the special bath taken recently, and with the skirt of your silken garment shining bright with the red hue of saffron, you while worshipping Cupid look splendid like a creeper from which shoot forth tendrils with tender leaves, whose form is clean with the special watering done recently and which is lovely with the pollen (Amśu) glistening bright with the red hue like that of saffron! (196)

प्रदीपः– विश्रान्त्यभावात् । तत्र कालभेदे यथा—**अतिथिमिति** । अत्र चेतना प्रसादमाप्नोतीति प्रक्रतं न तु तमापेति कालभेदे प्रक्रमभेद एव । पुरुषभेद यथा—**प्रत्यग्रेति** । अत्र लता विभ्राजत इति प्रस्तुतं न तु सा विभ्राजस इति तस्मात्पुरुषभेदः । संबोध्यनिष्ठस्य

उ०:–स्त्रीभिः अन्यस्त्रीवेषैः । **कालः** । वर्तमानादिः । **पुरुषः** । प्रथममध्यमोत्तमरूपः । **विधिः** । अप्रवृत्तप्रवर्तनम् । **स्खलितत्वम्** । विजातीयविषयत्वम् । **विश्रांतिः** । चमत्कारः । (**अतिथिमिति** ।) काकुत्स्थात् । कुशात् । कुमुद्वती । कुमुदनागकन्या । (पश्चिमात् चरमात् यामिन्याः निशायाः यामात् चेतना चैतन्यं प्रसादं उद्बोधमिव ।) **अत्रेति** । यद्यप्यतीतपश्चिमरात्रियामा-

---

प्रभा:–त्वाभ्यां भेदेऽपीत्यर्थः । **अतिथिं नामेति** । अत्र यथा चेतना प्रसादं प्राप्नोति

अत्र लता विभ्राजते न तु विभ्राजसे इति संबोध्यमाननिष्ठस्य परभागस्य असंबोध्यमानविषयतया व्यत्यासात् पुरुषभेदः ।

'गङ्गेव प्रवहतु ते सदैव कीर्तिः' (—)

–इत्यादौ च गङ्गा प्रवहति न तु प्रवहतु इति अप्रवृत्तप्रवर्तनात्मनो विधेः। एवंजातीयकस्य चान्यस्यार्थस्य उपमानगतस्यासंभवाद्विध्यादिभेदः ।

ननु समानम् उच्चारितं प्रतीयमानं वा धर्मान्तरमुपादाय पर्यवसितायाम् उपमायाम् उपमेयस्य प्रकृतधर्माभिसंबंधान्न कश्चित्कालादि-

---

Here, it is the third person: "looks splendid," not the second: "look splendid," which applies to the creeper. Therefore, since the latter part (i. e. termination) applying to the thing addressed has to be modified so as to apply to the thing not addressed, the defect is that of Divergence–of–Person.

'Let your glory ever flow forth like the Ganges!'

Here there is the divergence of mood in so far as it consists in making an inactive thing active. Inasmuch as, (the Indicative mood in) "The Ganges flows" (applies to the Ganges) but not (the Imperative) in "Let the Ganges flow." Owing to other things like this not applying to the Upamāna, there results the Divergence–of--Mood etc.

It might be urged: When an Upamā is concluded by admitting another common property whether stated or implied, as the Upameya

---

प्रदीपः – भ्राजनस्यासंबोध्यविषयतया अप्रतीतेः। विधिभेदे यथा—'गङ्गेव प्रवहतु ते सदैव कीर्तिः॥ इत्यादावप्रवृत्तप्रवर्तनात्मनो विधेर्भेदः। यतो गंगा प्रवहतीति विवक्षितं न तु सा प्रवहत्वि-

---

उ०ः – चेतना प्रसादमापेति न कालभेदस्तथापि पश्चिमरात्रियामजातीयादद्यापि प्रसादमाप्नोतीति कालभेद इति भावः। **प्रत्यग्रेति**। (रत्नावल्यां प्रथमांके वासवदत्तां प्रति वत्सराजस्योक्तिः।) अभिनवस्नानविशेषेण शुद्धा मूर्तिः शरीरं यस्याः। कौसुंभरागेण रुचिरः स्फुरन् अंशुकप्रांतो यस्याः। नूतनकिसलयुक्तशाखाप्रभवा लतेव। (वसन्ततिलका छन्दः।) **अत्रेति**। तस्मात् विभ्राजते इति पाठो युक्तः। न च देवीं संबोध्योक्तेः तत्र प्रथमपुरुषार्थानन्वयः। हे देवि भवती भ्राजते इत्यन्वयसंभवात्। **संबोध्यनिष्ठस्येति**। मध्यमपुरुषवाच्यस्य

प्रभाः – तथा सा पुत्रमापेति कालभेददोषः। विध्यादीत्यादिपदार्थमाह—**एवंविधस्येति**। अन्यस्य प्रार्थनाद्यर्थस्येत्यर्थः। 'इन्द्रस्येव श्रियो वृद्धिस्तव संप्रार्थ्यते

भेदोऽस्ति । यत्राप्युपात्तेनैव सामान्यधर्मेण उपमा अवगम्यते, यथा— 'युधिष्ठिर इवायं सत्यं वदतीति'—तत्र युधिष्ठिर इव सत्यवाद्ययं सत्यं वदतीति प्रतिपत्स्यामहे । सत्यवादी सत्यं वदतीति च न पौनरुक्त्यम् आशङ्कनीयम् । रैपोषं पुष्णातीतिवत् युधिष्ठिर इव सत्यवदनेन सत्यवाद्ययमित्यर्थावगमात् ।

---

gets connected with the attribute under consideration, there cannot be any divergence of tense etc. Even in cases where the Upamā is apprehended only on the basis of a common property that is stated, e. g. 'He speaks truth like Yudhiṣṭhira,' we get the idea : 'He, truth-speaking like Yudhiṣṭhira, speaks the truth.' Nor should it be suspected that it is tautology to say: "Truth–speaking like Yudhiṣṭhira, he speaks the truth", for we get the (particular) sense "He, like Yudhiṣṭhira, is truth-speaking by his habit of truth-speaking", as we get it in "He preserves it as he would preserve wealth ".

प्रदीप :–ति । एवंविधस्यान्यस्यार्थस्योपमानगतस्यासंभवाद्विध्यादिभेदो द्रष्टव्यः। ननूदाहृतेषु कथं दुष्टता । भिन्नकालसंभिन्नाद्धर्मादतिरिक्तमुपात्तं प्रतीतं वा कंचित्साधारणं धर्ममुपादायोपमापर्यवसाने पश्चाद्भिन्नकालादिसंभिन्नधर्मान्वयात् । तथा हि—विभ्राजस इत्यत्र विविक्तमूर्तत्वादिना लतानायिकयोरुपमापर्यवसाने पश्चाद्विभ्राजस इत्यस्य नायिकामात्रान्वयेऽपि को दोषः। अथ यत्रोपात्तेनैव धर्मेणोपमानिर्वाहः स च धर्मभेदः कालभेदासंभिन्न एव, तत्र का गतिः । यथा— 'युधिष्ठिर इवायं सत्यवादी' इति । युधिष्ठिरो हि सत्यमवादीत् , न तु वदतीति चेत् । उच्यते। तत्रापि सत्यवादीति प्रतीतधर्मेणैवोपमित्यव्याघातः । न च तथा सति सत्यवाद्ययं सत्यं

उ० :–संबोध्यार्थेनैवान्वयादिति भावः । **भेद इति** । आशीर्विहितलोट्प्रत्ययस्यानागतेष्टविषयार्थकत्वात्कीर्तावेवान्वयो न तु विद्यमाने गंगाप्रवाहे । एवं यथा गंगा प्रवहति तथा कीर्तिः प्रवहत्वित्यर्थे विधेर्भेद इति भावः । ननु प्रवहणस्य सिद्धत्वेऽपि कस्यचिदनागतार्थस्य गंगानिष्ठस्य विधिविषयत्वं स्यादत आह— **एवंविधस्येति । असंभवादिति** । उपमेयेऽसंभवादित्यर्थः । वस्तुतस्तादृशधर्मांतरस्य सत्त्वेऽपि तस्य प्रकृत्यर्थत्वाभावान्न तत्र विध्यर्थान्वयसंभव इति बोध्यम् । **विध्यादिभेद इति** । यद्यपि विधेरेकमात्रान्वयिनो न भेदस्तथाऽपि व्यत्यास एवात्र भेदपदार्थः । नन्विवपदेन धर्मान्तरेणैव साम्यं बोध्यतामुपात्तधर्मस्तूपमेय एवान्वेत्विति कथं लिंगादिभेदो दोष इति शंकते—**नन्विति । अतिरिक्तम्** ।

प्रभा :–जनैः' इत्यादौ प्रार्थ्यमानताविशिष्टा श्रीवृद्धिर्नोपमानमिति द्रष्टव्यम् । केचित्तु विधीयमानधर्मान्तरमेवोपमाने गङ्गायां स्यादत आह—एवंजातीयकस्येति । तथा च तदसंभव

सत्यमेवैतत् । किं तु स्थितेषु प्रयोगेषु समर्थनमिदं न तु सर्वथा निरवद्यम् प्रस्तुतवस्तुप्रतीतिव्याघातादिति सचेतस एवात्र प्रमाणम् ।

असादृश्यासंभवावप्युपमायाम् अनुचितार्थतायामेव पर्यवस्यतः । यथा—

'ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम्' (वामन's सूत्रवृत्ति २.४.)

अत्र काव्यस्य शशिना अर्थानां च रश्मिभिः साधर्म्यं कुत्रापि न प्रतीतमित्यनुचितार्थत्वम् ।

(We reply:) It is quite correct. But this sort of explanation is with regard to usages that have come to stay. It is not, however, completely faultless, as there does occur a marring of the understanding of the matter under consideration. Men of taste alone are the authority in this matter.

Dissimilarity and Improbability also resolve into Impropriety. To illustrate:

I compose this moon of the poem from which spread out the rays of meaning !

Here as the similarity of poem to the moon, and that of meaning to rays, is nowhere felt, the defect is Impropriety.

प्रदीपः—वदतीति पर्याप्तौ सत्यं वदतीति पुनरुक्तमिति वाच्यम् । 'रैपोषं पुष्णाति' इत्याद्यनुप्रयोगवददोषत्वात् । रैपोषमित्यत्रार्थव्ययेन पोषणस्येवात्राप्याजानिकसत्यवादित्वस्य प्रतीतेरिति । सत्यमात्थ । किं तु स्थितेष्वनुप्रयोगेषु क्वचित्तथा पुनरुक्तिमात्रसमर्थनं न तु सर्वथैव तन्निरवद्यम् । प्रस्तुतस्य रसादेः प्रतीतिस्खलनात् । न च तदसिद्धम् । सहृदयसंवे-

---

उ०:—कालविशेषाद्यनवरुद्धम् । **उपात्तम्** । उच्चारितपदबोध्यम् । **प्रतीयमानम्** । अध्याहारलभ्यम् । **न दोष इति** । एवं काम इवायं राजा भातीत्यादौ सौंदर्यादिनाऽनुपात्तेन साम्यप्रतीतौ पश्चात् क्रियालभ्यकालभेदो यथा कामोऽभात् एवमयं भातीत्याकारो न दोषः । कामसदृशसुंदरोऽयं भातीति प्रतीतेः । **यथेति** । यथोपात्तसत्यवादित्वमेव साधर्म्यं, तच्च भिन्नकालमेव, युधिष्ठिरे वर्तमानसत्यवचनाभावात्, धर्मांतरं तु नास्त्येवेत्यभिमानः । **सत्य-**

प्रभा:—इति व्याचख्युः । उपात्तधर्मस्यैवेवादिना बोधनं प्रक्रमभङ्गं चानादृत्य शङ्कते—**नन्विति** । रैपोषमित्यनुप्रयोगेऽपि कथं पुनरुक्तताया अदोषत्वं तत्राह—**अर्थव्ययेनेति** ।

निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ॥१९७॥ (—)

(Cited in भामह's काव्यालंकार २.४७.)

अत्रापि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलात् निष्पतन्त्यो न संभवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति ।

There seemed to pour forth from his mouth, as he stood amidst the circle of the bow, dazzling arrows like burning streams of water from the sun with the halo, at mid-day! (197)

Here burning streams of water as emerging from the sun are improbable. Thus the matter which is being described fosters Impropriety itself.

प्रदीपः—द्यत्वात् । किं च उपात्तमनादृत्य प्रतीतेनोपमा इति तुच्छम् । उपात्तक्रिययैव तद्विवक्षणात् । असादृश्यासंभवावप्युपमादूषणे अनुचितार्थतायामेव पर्यवस्यतः । यथा—'ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ।' अत्र काव्यस्य शशिनाऽर्थानां च रश्मिभिः साधर्म्यं न क्वापि प्रसिद्धमिति तत्रोपमानिबन्धनमनुचितार्थमिति । **निपेतुरिति** ।

उ०:—**वादीति** । सत्यवदनशीलत्वं धर्मांतरमिवार्थ इति भावः । **अर्थव्ययेनेति** । न तु कार्पण्येन यथाकथंचिदित्यर्थः । धनकृतं पोषणमित्यर्थलाभाय रैपोषमित्युक्तेर्न वैयर्थ्यम् । रैपोषमित्यत्र पुषेः प्रयोगः साधुत्वार्थ एव । **आजानिकेति** । स्वाभाविकेत्यर्थः । यथा युधिष्ठिरो लोभादिना न सत्यं वक्ति किं तु ताच्छील्यात्, तथाऽयमपीत्यर्थलाभान्न वैयर्थ्यमिति भावः । एवं गंगेवेत्यादावत्युज्ज्वलेत्यादिपदाध्याहारेण दोषोद्धार इत्याशयः । एतादृशान्वयाध्याहारादिकल्पनमानुभविकमित्याशयवानाह—**सत्यमिति** । **स्थितेति** । रैपोषमित्यादिषु साधुत्वार्थं नियमितेषु कथंचित्समर्थनमित्यर्थः । **उपात्तमिति** । उपात्तधर्ममित्यर्थः । **तुच्छमिति** । श्रुतहान्यश्रुतकल्पनाभ्यामास्वादप्रकर्षप्रतिबंधादिति भावः । तदाह—**उपात्तेति** । (**निपेतुरिति** ।) आस्यादिवेत्युत्प्रेक्षा । तूणाद्बाणाकर्षणे विलंबः स्यादिति

प्रभा:—पोषणसामान्ये धनव्ययकृतपोषणाभेदबोधार्थतया नानुप्रयोगे पौनरुक्त्यदोषः । एवं सत्यवदनसामान्यस्य स्वाभाविकयुधिष्ठिरसंबन्धिसत्यवदनरूपताबोधरूपप्रयोजनसत्त्वान्न पुनरुक्तदोष इत्यर्थः । असंभवमुदाहरति—**निपेतुरिति** । दृशो वारिधारा उपमान-

उत्प्रेक्षायामपि, संभावनं ध्रुवेवादय एव शब्दा वक्तुं सहन्ते, न यथाशब्दोऽपि । केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं पर्याप्तत्वात् तस्य चास्यामविवक्षितत्वादिति तत्राशक्तिरस्यावाचकत्वं दोषः । यथा—

उदयौ दीर्घिकागर्भान्मुकुलं मेचकोत्पलम् ।
नारीलोचनचातुर्यशङ्कासंकुचितं यथा ॥ १९८ ॥ (—)

उत्प्रेक्षितमपि तात्त्विकेन रूपेण परिवर्जितत्वात् निरुपाख्यप्रख्यम्,

---

Even in Utprekṣā, it is only the words *dhruva*, *iva* etc. that are capable of expressing the fancying—not the word *yathā* also. For the latter is adequate to express only similarity. And as similarity is not sought to be expressed here (in Utprekṣā), its incapacity there is the Defect of Non-expressiveness. To illustrate:—

From inside the pond there shot forth a blue lotus that was (yet) a bud, as if due to its having shrunk in fear of the charm (चातुर्य) of the eye of the lady! (198)

Also a matter that is fancied is akin to things that are non-substantial owing to its being destitute of a real form. When, for the

---

प्रदीपः—अत्रापि ज्वलदम्बुधारायाः सूर्यमण्डलान्निपतनमसंभवीति तन्निबन्धनमनौचित्यं पुष्णाति । उत्प्रेक्षायामपि ध्रुवेवादय एव शब्दा व्यक्तमुत्सहन्ते, न तु यथाशब्दोऽपि । केवलस्यास्य साधर्म्यमेव प्रतिपादयितुं समर्थत्वात् । अत उत्प्रेक्षायां यथाशब्दोपादानेऽवाचकत्वमेव । यथा—**उदयाविति** । निर्विषयत्वमप्युत्प्रेक्षादूषणमनुचितार्थत्वमेव । यत्तात्त्विकरूपाभावान्निरुपाख्यप्रख्यं तत्समर्थनाय यदर्थान्तर-

---

उ०:—भावः । धनुर्मंडलं परिवेषश्च बिंबप्रतिबिंबभावापन्ने । (उपजातिश्छन्दः ।) **अनौचित्यमिति** । अप्रयुक्तत्वसांकर्यमप्यत्रेति बोध्यम् । (**उदयाविति** । दीर्घिका वापी ।) मुकुलं मुकुलभावापन्नम् । मेचकं नीलम् । **उत्प्रेक्षादूषणम्** । उत्प्रेक्षाविषयसमर्थकार्थांतरन्यासदूषणम् । **निरुपाख्यम्** । अलीकशशविषाणादि । तत्प्रख्यं तत्तुल्यम् । तत्र हेतुरुत्प्रेक्षाविषयस्य तात्त्विकरूपा-

---

प्रभा:—तया नोपपद्यन्त इत्यनुचितार्थत्वदोष इत्याह—**अत्रापीति** । उत्प्रेक्षादोषमप्यवाचकत्वेऽन्तर्भावयति—**उत्प्रेक्षायामपीति** । **केवलस्येति** । प्रायःपदाद्यसमभिव्याहृतस्येत्यर्थः । उत्प्रेक्षादोषमुदाहरति—**यथेति** । ‘नारीलोचनचातुर्यशङ्कासंकुचितं ध्रुवम्’ इति युक्तः पाठः । **निरुपाख्येति** । असदित्यर्थः ।

तत्समर्थनाय यत् अर्थान्तरन्यासोपादानम् तत् आलेख्यमिव गगनतलेऽत्यन्तमसमीचीनमिति निर्विषयत्वमेतस्य अनुचितार्थतैव दोषः । यथा—

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसामतीव ॥ १९९॥

(कुमारसंभव. १·१२.)

अत्राचेतनस्य तमसो दिवाकरात् त्रास एव न संभवतीति कुत एव तत्प्रयोजितमद्रिणा परित्राणम् । संभावितेन तु रूपेण प्रतिभासमानस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः ।

साधारणविशेषणवशादेव समासोक्तिरनुक्तमपि उपमानविशेषं प्रका-

---

substantiation thereof, an Arthāntara-nyāsa is used, it is extremely ill-suited, like sketching in air. Thus Absence-of-scope for it is the same as Impropriety. To illustrate:—

Which (Himālaya) shelters from the Sun the Darkness lurking in its caves by daytime, becoming frightened as though. Indeed towards one who, howsoever petty, takes refuge (with them), those with heads aloft very much cherish a feeling of kinship! (199)

Here, as the fear itself of the Sun, on the part of the inanimate Darkness, is improbable, how at all could there be the sheltering by the mountain! But when it is apprehended in its imaginary form, no impropriety regarding it presents itself. Thus an attempt to substantiate it is nothing short of futile.

A Samāsokti suggests the particular Upamāna verily in virtue of the attributes applicable in common. So when on its (i. e. of the Upamāna) being stated here (i. e. in Samāsokti) over again, there results the defect of Being-ill-suited-for-statement, for want of

---

प्रदीपः—न्यासोपादानं तद्रूपं हि तत् यथा—**दिवाकरादिति** । अत्र तमसस्त्रास एवासंभवी । तमसोऽचेतनत्वात् । तत्कथं तत्प्रयुक्तमद्रिणा तत्परित्राणम् । उत्प्रेक्षितत्राणवत्तया प्रतीतस्यास्य न काचिदनुपपत्तिरवतरतीति व्यर्थ एव तत्समर्थनायां यत्नः । यत्तु समासोक्तौ

उ०:—भावः । **तत्** । निर्विषयत्वम् । अभित्तिचित्रवदर्थाभावात्तदुदाहरणम् । **दिवाकरादिति** । (कुमारसंभवे प्रथमसर्गे हिमालयवर्णनम् ।) भीतं त्रस्तम् । (उपजातिश्छन्दः ।) **तत्परित्राणमिति** । अद्रेरप्यचेतनत्वादिदमप्युत्प्रेक्षा । त्रासस्य चित्तवृत्तिविशेषरूपस्य तत्परित्राणस्य च चेतनधर्मत्वात् तदाह—**उत्प्रे-**

शायतीति तस्यात्र पुनरुपादाने प्रयोजनाभावात् अनुपादेयता यत्, तत् अपुष्टार्थत्वं पुनरुक्तता वा दोषः । यथा—

स्पृशति तिग्मरुचौ ककुभः करैर्दयितयेव विजृम्भिततापया ।
अतनुमानपरिग्रहया स्थितं रुचिरया चिरयाऽपि दिनश्रिया ॥२००॥
(हरविजय. ३.३७.)

अत्र तिग्मरुचेः ककुभां च यथा सदृशविशेषणवशेन व्यक्तिविशेष-

---

purpose it is the same as Redundancy or Tautology. To illustrate :—

As the sun touched the Quarters with the rays (by śleṣa : with the hands), the Glory of Day, bright and of long standing, with the heat (by śleṣa : torments) augmented, came to assume a size (by śleṣa : huffiness) none small, *like a beloved* ! (200)

Here, the Sun and the Quarters suggest themselves as being the Hero and the Heroines, due to the similarity of attributes and owing to

---

प्रदीपः – साधारणविशेषणबलादेवोपमानप्रतीतौ प्रयोजनाभावेन तदुपादानवैयर्थ्यं तदपुष्टार्थत्वं पुनरुक्तता वा दोषः । यथा—**स्पृशतीति** । अत्र सदृशविशेषणबलेन लिङ्गविशेषपरिग्रहाच्च तिग्मरुचेर्नायकतया ककुभां तु नायिकात्वेन व्यक्तिः । तथा ग्रीष्मदिवसश्रियोऽपि तत एव प्रतिनायिकात्वेन भविष्यतीति दयितयेत्यपुष्टार्थम् । अर्थतः प्रतीतस्योपादाने यदि पुनरुक्तिस्तदाऽर्थपुनरुक्तत्वं दोषः । नन्वस्यापुष्टत्वे

उ० : – **क्षितत्राणवत्तयेति** । **स्पृशतीति** । तिग्मरुचौ सूर्ये ककुभो दिशः करैः स्पृशति सति दिनश्रिया ग्रीष्मदिवसश्रिया अतनुमानपरिग्रहया स्थितम् । करैर्हस्तैः रश्मिभिश्च । तापो ज्वाला खेदश्च । मानं परिमाणं कोपश्च । चिरया दीर्घया चिरकालीनया च । (हरविजये तृतीयसर्गे) ग्रीष्मवर्णनमिदम् । (द्रुतविलंबितं वृत्तम् ।) **अत्रेति** । सूर्यकरेण स्त्रीस्पर्शकारित्वं नायकोचितं विशेषणम्, दिशां च करेण पुरुषस्पृश्यत्वं नायिकायोग्यं विशेषणम्, (तेन) सूर्ये पुल्लिंगसंग्रहः दिशां स्त्रीलिंगपरिग्रहः । **तत एवेति** । अतनुमानपरिग्रहयेति विशेषणात् स्त्रीलिंगाच्चेत्यर्थः । **नन्विति** । यथा दयिते दयितां करैः स्पृशति सति दयितान्तरस्य तापस्तथा रवौ करैर्दिशः स्पृशति ग्रीष्मदिवसश्रियोऽपि ताप

प्रभा : – **स्पृशति तिग्मरुचाविति** । अत्र समासोक्तौ श्लिष्टविशेषणबलाल्लिङ्गबलेन च तिग्मरुचेर्नायकतया ककुभां च नायिकात्वेनाभिव्यक्तिवद्दिनश्रियोऽपि प्रतिनायिकात्वेनाभिव्यक्ति-

परिग्रहेण च नायकतया नायिकात्वेन च व्यक्तिः, तथा ग्रीष्मदिवसश्रियोऽपि प्रतिनायिकात्वेन भविष्यतीति किं दयितयेति स्वशब्दोपादानेन।

श्लेषोपमायास्तु स विषयः, यत्रोपमानस्योपादानमन्तरेण साधारणेष्वपि विशेषणेषु न तथा प्रतीतिः। यथा—

स्वयं च पल्लवाताम्रभास्वत्करविराजिनी।
प्रभातसंध्येवास्वापफललुब्धेहितप्रदा ॥ २०१ ॥ (—)

---

the use of the particular gender (i. e. Fem.). So would the Glory-of-Summer-day suggest itself as being the counter-heroine. Then where is the need of the specific mention of the word "Beloved" for it?

That is, however, the province of Upamā based on Śleṣa, where, unless it (i. e. Upamāna) is stated, there cannot be a suggestion of the Upamāna, like that, even though the attributes are applicable in common. To illustrate:—

And as for herself, bright with her hands ruddy like leaves and lustrous, she fulfilled the desires of those who coveted the fruit not easy to attain (i. e. Mokṣa), like Morning Twilight which looks splendid with the rays of the sun ruddy like leaves, and fulfils the desires of those who longed for the fruit meant for such as are free from sleepiness! (201)

प्रदीपः—श्लेषोपमा निर्विषया स्यादिति चेत्। न। स हि तस्या विषयो यत्रोपमानोपादानं विना श्लिष्टेष्वपि विशेषणेषु न स्फुटा प्रतिपत्तिः। यथा—**स्वयं चेति**। अत्र प्रभातसंध्याया अनुपादाने न स्फुटा प्रतीतिः। अप्रस्तुतप्रशंसायामप्युपमेयस्योपादानवैयर्थ्यं यत्तदपुष्टार्थत्वमेव दोषः। तत्राप्युपमेयमनयैव रीत्याऽवगन्तव्यं न पुनः शब्दप्रयोगेण

उ०:—इत्येवमत्रापि श्लेषोऽस्त्विति भावः। **न स्फुटेति**। अयमाशयः। यत्रोपमानस्य स्वपदोपादानेऽपि न समासोक्तित्यागस्तत्रावश्यकसमासोक्त्यैव निर्वाहे उपमानपदोपादानं व्यर्थम्। यथा स्पृशतीत्यादौ। अत्र दयितयेत्युपादानेऽपि रवेर्नायकत्वं ककुभां नायिकात्वं च समासोक्त्यैवेति तस्या आवश्यकत्वम्। यत्र तूपमानपदोपादाने समासोक्तिनिवृत्तिस्तदनुपादाने च यत्रोपमानाप्रतीतिः उपात्तसाधारणधर्माणामुपमेयमात्रान्विततयैव प्रतीतेः, तत्रोपमाया एव चमत्कारित्वाय देयं तत्पदम्। यथा—**स्वयं चेत्यादौ**। गौरीपक्षे पल्लववदाताम्रौ भास्वन्तौ च यौ करौ ताभ्यां विराजिनी। सुखेनाप्यते इति स्वापं, खल् प्रत्ययः। न

प्रभा:—संभावनाद्दयितयेत्यपुष्टार्थम्। **श्लेषोपमेति**। श्लेषमूलिकोपमेत्यर्थः। **स्वयं चेति**। अत्र तु प्रभातसंध्याया अनुक्तौ न स्फुटा प्रतीतिरित्यदोषः। **अनयैवेति**।

अप्रस्तुतप्रशंसायामपि उपमेयम् अनयैव रीत्या प्रतीतं न पुनः प्रयोगेण कदर्थतां नेयम्। यथा—

आहूतेषु विहंगमेषु मशको नायान्पुरो वार्यते
मध्येवारिधि वा वसंस्तृणमणिर्धत्ते मणीनां रुचम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक्सामान्यमचेतनं प्रभुमिवानामृष्टतत्त्वान्तरम् ॥ २०२ ॥

(भल्लटशतक. ६९.)

अत्र अचेतनस्य प्रभोरप्रस्तुतविशिष्टसामान्यद्वारेणाभिव्यक्तेरयुक्तमेव पुनः कथनम्।

In Aprastuta-praśaṃsā also, the Upameya which is suggested in this very manner, should not be rendered nugatory by being mentioned over again. To illustrate:—

The fly, if it comes forward on the winged creatures being summoned, cannot be resisted. The coral glistening amidst the ocean (pretends that it) possesses the splendour of jewels. Nor does the fire-fly tremble to parade in the very midst of the luminous bodies. Fie upon the dead Universal which is like the master by whom no cognizance is taken of the difference between one object and another! (202)

Here, since the indiscreet master is suggested by the Universal as qualified by the attributes, which is the matter not under consideration, its mention over again is surely improper.

प्रदीपः—दुष्टतां नेयम्। यथा—**आहूतेष्विति**। अत्राचेतसः प्रभोरुपमेयस्याप्रस्तुतनिष्ठसामान्यद्वारेणाभिव्यक्तिसंभवादयुक्तमेव शब्देन कथनमित्यपुष्टार्थत्वं पुनरुक्तता वेति।

उ०ः—स्वापमस्वापं दुःखप्रापं तादृशं यत्फलं मोक्षादि तत्र ये लुब्धास्तेषामीहितप्रदा इष्टदात्री। प्रभातसंध्यापक्षे तु पल्लवताम्रैर्भास्वत्करैः सूर्यकिरणैर्विराजिनी। अस्वापो निद्राभावः तद्रूपफललुब्धे जने हितप्रदा इष्टदात्री। अत्रोपमानपदोपादाने समासोक्तित्यागादिति। **उपमेयस्य**। प्रस्तुतस्य। (**आहूतेष्विति**। भल्लटशतके ६९ पद्यम्।) विहंगमेषु पक्षिषु आहूतेषु पुरः अग्रे आयान् आगच्छन् मशको न वार्यते। तृणमणिः काचादिमणिः प्रवालं वा। मणीनां

प्रभाः—श्लिष्टसाधारणादिविशेषणसामर्थ्येनेत्यर्थः। **आहूतेषु विहंगमेष्विति**। अत्र तादृशं सामान्यं धिगित्येतावतैवाविवेकिप्रभोरवगतिसंभवात्पुनस्तदुक्तिरयुक्तेत्यपुष्टार्थत्वमप्रस्तुतप्रशंसायां दोषः। उपसंहरति—**तदेत इति**। प्रोक्तजात्यंतर्भाविता उक्तदोषसामान्यधर्मा

तदेतेऽलंकारदोषाः यथासंभविनोऽन्येऽप्येवंजातीयकाः पूर्वोक्तयैव दोषजात्या अन्तर्भाविताः न पृथक् प्रतिपादनमर्हन्तीति ।

Thus these defects of figures and also others like these, occurring according to the nature of the case, are comprehended by the class of defects already specified. Hence they require no separate mention.

प्रदीप :—तदेतेऽलंकारदोषा यथासंभवमन्येऽप्येवंजातीयकाः प्रोक्तजात्यन्तर्भाविता इति पृथग्न प्रतिपादनमर्हन्तीति कल्याणमास्ताम् ॥

सम्पूर्णं काव्यलक्षणम् ।

ज्येष्ठे सर्वगुणैः कनीयसि वयोमात्रेण पात्रे धियां
गात्रेण स्मरगर्वखर्वणपरे निष्ठाप्रतिष्ठाश्रये ।

उ० :—मध्ये धुरि अंते वा वसन् मणीनां रत्नानां रुचं कान्तिं धत्ते । खद्योतोऽपि तेजस्विनामग्निसूर्यादीना मध्ये अपिशब्दादग्रे वा प्रचलितुं गंतुं न कम्पते न बिभेति । एतत्सामान्यं अचेतनं अविचारितपदार्थगतविशेषं प्रभुमिव धिक् । (शार्दूलविक्रीडितं छन्दः ।) **अत्र** । आद्यपादत्रयेऽपि । **अप्रस्तुतनिष्ठसामान्येति** । अनाकलितविशेषत्वस्वरूपेत्यर्थः । **तत्** तस्मात् । **एते** उक्ताः । **एवंजातीयका इति** । यथा समासोक्तौ नपुंसके नायकव्यवहारसमारोपः । 'दिलीप इति राजेंदुरिंदुः क्षीरनिधाविव ।' इत्यत्र राजनि इंदुतादात्म्यारोप उपमाविरुद्धस्तदेतदनुचितार्थमेव । यथा वा, भिन्नाश्रययोर्विरोधवर्णनम् । यथोष्णभासस्तनयाया अपि जलं शीतलमित्यादौ । एकाश्रयत्वेनैव विरोधस्योक्तेरिदमनभिहितवाच्यमेव । **प्रोक्तजातीति** । सप्तमोक्तदोषजातीत्यर्थः । **संपूर्णमिति** । लेशतोऽपि न्यूनताविरहात् । **काव्यलक्षणम्** । काव्यं लक्ष्यते स्वरूपतो विशेषतश्च ज्ञाप्यतेऽनेनेति प्रकृतग्रन्थरूपमिति शिवम् ॥

प्रभा :—(न?) तिक्रान्ताः । एवं च पृथक्प्रतिपादने पुनरुक्ततादोषात्तदभावो गुण एवेति तात्पर्यम् ॥

संपूर्णमिदं काव्यलक्षणम् ।

इत्येष मार्गो विदुषां विभिन्नोऽप्यभिन्नरूपः प्रतिभासते यत् ।
न तद्विचित्रं यदमुत्र सम्यग्विनिर्मिता संघटनैव हेतुः ॥ १ ॥

इति काव्यप्रकाशेऽर्थालंकारनिर्णयो नाम दशम उल्लासः ।

॥ समाप्तश्चायं काव्यप्रकाशः ॥

Thus is complete this Definition of Poetry.

That this path of the learned, though varied, appears unvaried like this, is not to be wondered at. Since the well-effected fusion is responsible for it.

Thus ends the Tenth Flash, named as "the Determination of the Figures of Sense" in the "Light of Poetry".

FINISHED IS THIS KĀVYA-PRAKĀŚA.

प्रदीप :– श्रीहर्षे त्रिदिवं गते मयि मनोहीने च कः शोधये-
दत्राशुद्धमहो महत्सु विधिना भारोऽयमारोपितः ॥ १ ॥

परिशीलयन्तु सन्तो मनसा संतोषशीलेन ।
इममद्भुतं प्रदीपं प्रकाशमपि यः प्रकाशयति ॥ २ ॥

दीपिकाद्वितयं कन्ये प्रदीपद्वितयं सुतौ ।
स्वमतौ सम्यगुत्पाद्य गोविन्दः शर्म विन्दति ॥ ३ ॥

उ० :– ' शृंगवेरपुराधीशरामप्रेरणया दृढम् ।
सद्युक्तिमुक्तासंदर्भैर्विद्वच्छ्रुतिमनोहरैः ॥ १ ॥

सेतौ नागेशबद्धेऽस्मिन्नलंकारमहोदधेः ।
सतां मतिः संचरतां यावच्चंद्रदिवाकरौ ॥ २ ॥

काव्यप्रदीपकोद्योतः शिवयोरर्पितो मया ।
यन्निर्मितौ सहायो मे जाता सा प्रतिभा सखी ॥ ३ ॥

प्रभा :– काव्यप्रकाशगम्भीरभाववोधो न चान्यतः ।
इति प्रदीपगम्भीरभावार्थद्योतनं कृतम् ॥
अनेन प्रीयतां देवो नृसिंहो रमया युतः ।
कुलदैवतमस्माकं सर्वभूतात्मना स्थितः ॥

प्रदीप :—इति श्रीमहामहोपाध्यायश्रीगोविन्दविरचिते काव्यप्रदीपेऽर्थालंकारनिर्णयो नाम दशम उल्लासः ।

॥ **समाप्तोऽयं ग्रन्थः** ॥

उ० :—इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते लघुकाव्यप्रदीपोद्योते दशम उल्लासः ।

प्रभा :—इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपाख्यश्रीविठ्ठलसूरिसूनुरामभट्टात्मजवैद्यनाथरचितायां प्रदीपव्याख्यायां प्रभाख्यायां दशम उल्लासः ।

समाप्तोऽयं ग्रन्थः ।

॥ **शुभं भूयात्** ॥

APPENDIX A

रुचककृते सङ्केते

॥ अथ दशम उल्लासः ॥

उपमानस्य चंद्रादेर्विशेषणान्युपमानस्य विशेष(? ष्य)रूपतया व्यवस्थापकाः । **षष्ठीवदिति ।** यथा षष्ठी यदुत्तरा तदेव विशिनष्टि । श्रुत्यैव च संबंधमुभयाधारमभिधत्ते तथैवायं यथेवादिः । सममेव साम्यं साधारणो धर्मः । तुल्यता द्विष्ठरूपं सादृश्यम् । भुजंगः कामुकः अंबररत्नं सूर्यः । **अलंकारांतरं चेति ।** तद्ध्यनुप्रासादि श्लिष्टतरमपि । काव्ये यद्यव्यभिचारितयैव तद्व्यवहारो गण्यते तदा तेन सहोपमादीनां संकरसंसृष्टी स्यातामिति केवलतयैषां विषयो नावकल्पते । **तदिति**-स च स्फुटतरो रसादिरर्थः तथालंकारांतर-मिति । नपुंसकमनपुंसकेनेति नपुंसकैकशेषः । अस्फुटश्च रसादिर्गुणीभूतव्यंग्ये गृहीतः इत्यस्फुटतरोत्र गृह्यते इति संस्पर्शपदेन ध्वनितम् । **मनो विषकल्पं** विषसदृशमित्यर्थः । न तु विषमेवेति । प्रकृत्यर्थसदृशेर्थे कल्पवादीनां स्मरणात् । उपमाया एव हीदमुदाहरणं न तु रूपकस्य । प्रत्ययादमुतः समारोपाप्रतिपत्तेः । सकलकरणपरविश्राम-श्रीवितरणं न सरसकाव्यस्य । दृश्यते अथवा श्रूयते सदृशमंशांशमात्रेण ॥ सरसकाव्यस्य सदृशमिंद्रियाणां परनिर्वृतिप्रदं नोपलभ्यते न वा श्रूयत इत्यर्थः । **असितेति**-अत्रोपमानो-पमेययोरेकपदानुप्रवेशः । पूर्वत्र वर्तते पृथक् निर्दिष्ट इति विशेषात्पुनरुदाहरणम् । अंतःपुर इवाचरत्यंतःपुरीयति अधिकरणाच्चेति वक्तव्येमिति क्यच् । क्यङ्क्यज्वाच्यमाचरणमत्र साधारणो धर्मः । विधवति विधुरिवाचरति सर्वप्रातिपदिकेभ्यः क्विबित्याचारे इति क्विप् । ढुंढुंण्णन्तो परिभ्रमन्मरिष्यसि कण्टककलितानि केतकीवनानि । मालतीकुसुमसदृक्षं भ्रमर भ्रमन्न प्राप्स्यसि ॥ यद्यपि तेन तुल्यमित्यादौ तुल्यादिपदानामुपमेय एव विश्रांति-रित्युक्तं तथापीह कुसुमेन सदृक्षमिति सदृक्षशब्दाभिधेयस्योत्कृष्टतरगुणत्वेनाप्राप्यता-प्रतिपादनादुपमानत्वं बलादायातं तस्य च साक्षादनिर्देशादुपमानस्यैव लोपः । **मृगनयनेति** । मृगनयने इव नयने यस्याः । अत्र गुणद्योतकोपमान-शब्दानां त्रयाणां लोपः । सप्तम्युपमानपूर्वपदस्येत्यादिना हि प्रकरणेन यदुत्तरपदं लुप्यते तत् कंठेकाल इत्यादाविव सर्वत्र प्रथमोत्पादितसमासस्थमेव समाससंनि-योगेनोत्तरपदलोपविधानात् । तदानीं च तस्यैवोत्तरपदत्वात् । बहुव्रीहौ तु विहिते द्वितीय-स्योत्तरपदत्वमिति कुतः तस्योपमेयभूतस्य लोपः । यदातु मृगशब्द एव लक्षणया मृगनयनवृत्तिस्तदा मृग एव नयने यस्याः इत्युष्ट्रमुखवद्रूपकसमासस्यैव विषयो न त्वस्योपमा-

समासस्येति नास्ति स्थानमुपमायाः त्रिलोपिन्याः । अतएवोक्तं **यदेति** । उपमेयेनोपमानधुराधिरूढेन करणात्मना उपमा उपमानस्योपमेयतापादना उपमेयोपमा । संशयस्तु ससंदेहो यदि संशय्यमानस्य तदितरस्मादुत्तरकालं भेदः प्रतिपादितः स्यात् । न वा। शुद्धस्यैव तस्य विच्छित्त्या प्रतिपादितत्वात् । **अनपह्नुतेति** । अनयोरपह्नुतभेदत्वे अतिशयोक्तेर्भावात् । **आरोपितधर्म एव** तस्य प्रसिद्धतरत्वेनानुकूल्यात् । यस्य रणान्तःपुरे करे कुर्वतो मंडलाग्रलताम् । रससंमुख्यपि सहसा पराङ्मुखीभवति रिपुसेना । **सांगमिति** । न यत्र तस्यैव रूपणमपि तु तदंगस्यापि । अंगमत्रोपकरणमात्रं न त्वारंभकमेव लक्ष्याव्याप्तिप्रसंगात् । रहांसि रहस्यानि । दक्षः प्रजापतिः । भीमो भीमसेनः । सन् वंशोन्वयः स एव सद्वंशः शोभनो वेणुः । एवमिति यथा—विलसदमरनारीनेत्रनीलाब्जषण्डान्यधिवसति सदा यः संयमाधःकृतानि । न तु ललितकलापे वर्तते यो मयूरे वितरतु स कुमारो ब्रह्मचर्यश्रियं वः ॥ तथाचोक्तं-इदं ते केनोक्तमित्यादि । श्लिष्टैः समानैः । लब्ध्वा तव बाहुस्पर्शं यस्याः स कोप्युल्लासः । जयलक्ष्मीस्तव विरहे न भवतु सा दुर्बला ननु सा ॥ साशब्दस्त्वत्र दौर्बलस्याविप्रतिपत्तिं व्यनक्ति । तत्सदृशीमित्यत्र वहतीत्यपेक्षणीयम् । यो लघुः स पदमवाप्य पतेदिति संबंधः । शेखरः शृंगम् । राजशुकः कश्चिदुत्कृष्टजातिशाली शुकः । **मुखादिति** लोकप्रसिद्धम् । अत्र मुखमाकृतिः अपेक्षितक्रियं चैतदपादानम् । जात्या वेदकमेतच्छरीरादेतदल्पतरं जातमित्यर्थः । प्रतियातनं संशोधनम् । **श्लेष** इति विशेष्यपदस्यापि श्लिष्टता । **समासोक्तिरिति** समानविशेषणत्वम् । **सादृश्यमात्रमिति** । प्रतीयमानेनापि केनचित् धर्मेणानुगुण्यम् । पुंस्त्वं पुरुषस्य भावः । तस्येव चारुकृत्यं च अधः पातालं निकृष्टा गतिश्च । प्रणयने याच्ञानिमित्तम् । न महानपि स्वल्पोपि । पुरुषोत्तमो विष्णुः सत्पुरुषश्च । एष न शब्दश्लेषोभिधाया एकत्र नियमान्नियतत्वात् । नापि विशेष्यपदस्य श्लिष्टत्वे शब्दशक्तिमूलध्वनिभंगवद्वृत्तान्तस्यात्र वाच्यत्वात् । तस्य चाप्रस्तुतत्वात् । प्रस्तुतार्थमुखेन यत्राप्रस्तुतोर्थो विशेष्यद्वारेणावगम्यते स तस्य ध्वनेर्विषय इत्युक्तम् । सत्पुरुषचरितमेवात्र वाच्यं प्रस्तुतं च तन्मुखेन चेतरार्थप्रतिपत्तिः । ततः शब्दशक्त्युद्भव एवायमिति चेत् । न । तस्य वाच्यत्वासंभवात् । नह्युत्कृष्टतमस्यापि पुरुषस्य सत्यत एवास्ति शक्तिर्विश्वमभ्युद्धर्तुमाक्षिप्यमाणस्य तु तस्य गुणवृत्त्या तद्वर्णनमविरुद्धं गुणभूतत्वादित्यप्रस्तुतप्रशंसैवैषा । पादा रश्मयः पादौ चरणौ । जडधामता शीतलतेजस्त्वं मूर्खास्पदताच । अहो इति यद्यर्थे । कल्पः प्रौढः । रसनाविपर्ययः असत्यभाषित्वमपि । चापलमश्रोतव्यश्रवणमपि । मदो गर्वोपि । शून्यकरत्वमदातृत्वमपि । अन्यल्लटभत्वमपि अन्या कापि वर्तनच्छाया । सामा शंके यदि वा श्यामा सामान्यप्रजापते रेखैव न भवति ॥ श्यामा योषित् । रेखा मर्यादा । **एवमिति** यथा व्यतिरेके । तत्र हि एकस्य बहुभ्यो व्यतिरेकमाला । व्यतिरेकतो यथाहरवन्न विषमदृष्टिर्हरिवन्न विभो विधूतविततवृषः । रविवन्न चातिदुःसहकरतापितभूः कदाचिदसीति ॥ **साधारणधर्मादीनां** साधारणधर्माणामुपमानोपमेयानाम् । साधारणधर्माणां

प्रतिबिंबत्वेन नियतनिष्ठतया कथं साधारणधर्मतेति चेत् न वस्तुतो हि तेषां धर्माणामभेद इति साधारणता शब्दान्तरेण प्रतिपादितत्वात् तु प्रतिबिंबनं इति नास्ति कश्चिद्विरोधः। कृपणानां धनं नागानां फणमणिः केसराणि सिंहानाम्। कुलबालिकानां स्तनाः कुतः स्पृश्यन्ते अमृतानाम्॥ **श्लेषोपीति।** यद्यपि श्लेषोपकृतत्वे व्यतिरेकस्यागांगिभावसंकरत्वं तथापीह विषये श्लेषे व्यतिरेक इत्येषा प्रसिद्धिर्न तु संकर इति। ततस्तदनुसरणार्थं एवैष प्रभेदो व्यतिरेकप्रकारतया व्यवस्थाप्यते। विषमादयश्च शब्दाः श्लिष्टा इति अतःपरम्। अखंडमंडलःश्रीमान् पश्यैष पृथिवीपतिः। न निशाकरवज्जातु कलावैकल्यमागतः॥ अत्र तुल्यार्थे वतिः कलाशब्दः श्लिष्ट इति पाठः। ततो "नित्योदितप्रतापेन त्रियामामीलितप्रभः। भास्वतानेन भूपेन भास्वानेष विनिर्जितः॥ अत्र ह्याक्षिप्तैवोपमा। भास्वतेति श्लिष्ट इति पाठः। तस्य च श्लिष्टत्वं भास्वरत्वस्य समारोपात् रवित्वस्य प्रतिपादनात्। निषेध इवेति न तु निषेध एव। प्रधानस्य निषेधमुखेन विशेष एव तात्पर्यात्। अन्यत्र चोक्तम्। प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सयेति। अय्येहि किमपि कस्या अपि कृते निष्कृप भणाम्यलममथवा। अविचारितकार्यारंभिणी म्रियतां न भणिष्यामि॥ तस्याः फलमस्य काव्यस्य प्रकाशनं कविना प्रतिपादनं न तु भावनम्। कारणमंतरेण कार्योत्पत्तेरसंभवात्। प्रसिद्धतरकारणानुपलब्धेस्तु कार्योत्पत्तिरन्यहेतुकेति निबध्यते। तावन्मात्रलक्षणत्वाद्विभावनायाः। अस्याश्च न विरोधरूपत्वम्। विरोधे द्वयोरपि परस्परं बाधात्। अत्र तु कार्योत्पत्तिरेव कारणप्रतिषेधेन बाध्यमाना प्रतिभाति। न तु विपर्ययेणापि बाधः। कारणप्रतिषेधस्य हि बाधः प्रतिभासमानोपि ज्ञप्त्यपेक्षः ज्ञप्तिश्चोपत्त्यपेक्षया दवीयसी न विभावनां प्रयोजयति। भवतु वात्रापि सामान्येन परस्परं बाधः। तथापि न विरोधरूपत्वम्। हेतुफलभावविशेषमाश्रित्य प्रवर्तनादस्याः तदपवादत्वात्। **विशेषोक्तिरिति।** लक्षणारंभं प्रयोजयति–**निद्रेति।** अत्र चलनाभावस्य निमित्तं मन्मथोन्माथः। गुणानामित्यत्र सिद्धेपि हेतुना नियोगे सहेतुकोसौ न सिद्ध इति तत्सिद्धयेऽर्थान्तरन्यासः। गली कर्मण्यकुशलोत्यन्तमलीमसः। पविर्वज्रम्। बलं जवः सैन्यं च। धाराधरः खड्गः। अनुरज्यत इत्यनुरागः शोणितकृतं शोणत्वमपि। स्नेहो रुधिरार्द्रत्वमपि। जडयति शीतलयति व्यामोहयति च। कश्चिदिह प्रभेदः श्लेषवशादेव समासादितस्वभावः श्लेषात्मक एव। ततः श्लेषेण सहास्य संकरत्वशंका न कार्या भेदाभावात्। एवमन्यत्रापि परीक्ष्यम्। डिंभो बालः। तद्विषया स्वभावोक्तिर्यथा–धूलिधूसरतनवो राज्यस्थितिरचनाकल्पितैकनृपाः। कृतमुखवाद्यविष्काराः क्रीडन्ति सुनिर्भरं डिंभाः॥ इति। द्राघयित्वा दीर्घीकृत्य। प्रियस्थिरेत्यादिना द्राघादेशः। प्रोथोऽश्वस्य मुखाग्रं तुंडं मुखम्। सह दिवसनिशाभिर्दीर्घाः श्वासदंडाः सह मणिवलयैर्बाष्पधारा गलंति। तव सुभग वियोगे तस्या उद्वेजनशीलायाः सह च तनुलतया दुर्बला जीविताशा॥ **अलंकार** इत्यनेन परिवृत्तिशब्दो क्रियामात्रमभिधत्त इति शंकां निराकरोति। विप्रलंभो भ्रान्तिरपायो वा। **वपुष्प्रादुर्भावादिति।** अत्रानुमानसद्भावेपि न तेन सह वाक्यार्थीभूतस्य हेतोः संसृष्टिव्यवहारः। उभयोरपि भिन्नदेशत्वाभावात्। अनुमानं तु हेतोरुत्थापक-

तयोपकारकमिति भवत्यंगांगिसंकरः । किंतु हेतुलक्षणमत्रास्तीत्येतावदभिसंधाय हेतोरिदमुद्राहृतम् । प्रणयिन्यः अस्वस्थाः । **तदेवेति** । पटीयस्त्वादनुभावस्य तदाकारतयैव तस्योत्पत्तेः । **अभिन्नेति** । निरंशस्य वस्तुनो भेदसंसर्गयोरभावात् । तौ हि विकल्पस्यैव व्यापारः । स ह्यभिन्नमपि वस्तु गौः शुक्लश्चल इति एवं भिनत्ति । भिन्नमपि पदार्थजातमयं गौरयमपि गौरित्येवं संसृजति । **तस्येहांगत्वादिति**–अंगत्वेपि न रसवदलंकारः । अस्योदात्तस्य तदपवादत्वात् । **तस्मिन् हीति** । यद्यपि समाधेरपि वक्ष्यमाणस्य विषयं लक्षणमेतदास्कंदयति तथापि समुच्चय इत्यन्वर्थसंज्ञाविज्ञानादिहान्यस्य तुल्यकक्षतयैवोपादानमाश्रीयते न च तत्तत्रास्तीति भिन्न एवासौ । **न पृथगिति । रुद्रटोपि**–त्रैधान्यः सदसतोर्योग इति सद्योगादिना रूपांतरेणामुं पृथगलक्षयत् । **असतामिति**–तत्र नववयःप्रभृतेः सत्यपि सत्त्वे सर्वेषामपि सत्त्वाकथनमसत्त्वेनैव विरहिण्या भावितत्वात् । **तत्रेति**–तत्र शशिनः शोभनत्वं प्रकृतिसौंदर्यादशोभनत्वं च धूसरत्वोपादानात् । एवं चास्य सदसद्रूपस्य तादृशेनैव व्यापारेण योगादिह सदसद्योगः । शशिनि धूसर इति च शोभनाशोभनत्वमुपदर्शितम् । **शल्ये शल्यान्तराणीति** शोभनाशोभनस्य तादृशेनैव योगः । कमलवनेषु तुषारो रूपविलासादिशालिनीषु जरा । रमणीष्वतिदुश्चरितं धातुर्लक्ष्मीश्च नीचेषु ॥ इत्यत्रापि कमलवनस्थस्य तुषारस्य सदसतस्तादृश्यैव तरुणीजरया समुच्चयः न तु कमलवनानां सतामसता तुषारेण तेषां तुल्यकक्षताविरहात् । **गुणाश्च क्रिये चेति** । अत्र गुणस्य क्रियायाश्च युगपदुपपत्तिमुदाहर्तुं पठनीयम् । कलुषं च तवाहितेष्वकस्मात्सितपंकेरुहसुंदरश्रि चक्षुः । पतितं च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षैः ॥ इति । **न वाच्यमिति । रुद्रटेण** ह्युक्तं व्यधिकरणे वा यस्मिन् गुणक्रिये चैककालमेकस्मिन् । उपजायते देशे समुच्चयः स्यात्तदन्योसाविति ॥ **क्रमेणेति** प्रतीकादनन्तरं–श्रोणीबंधस्त्यजति तनुतां सेवते मध्यभागः । पद्भ्यां मुक्तास्तरलगतयः संश्रिता लोचनाभ्याम् ॥ धत्ते वक्षः कुचसचिवतामद्वितीयं तु वक्त्रं तद्गात्राणां गुणविनिमयः कल्पितो यौवनेन ॥ इति पाठः । आद्यार्धमेव श्लोकस्योदाहरणम् । तत्तेषां श्रीसहोदररत्नाभरणे हृदयमेकरसम् ॥ बिंबाधरे प्रियाणां निवेशितं कुसुमबाणेन ॥ तेषामसुराणां श्रीसहोदरं रत्नं कौस्तुभः । निवेशितं चुंबनैकसक्तं कृतम् । पुनः क्रमेणेत्यादिप्रतीकात्परं–मधुरमरुचिरं वचः खलानां अमृतमहो प्रथमं पृथु व्यनक्ति । अथ कथयति मोहहेतुमंतर्गतमिव हालहलं विषं तदेव ॥ तद्गेहं नतभित्ति मंदिरमिदं लब्धावकाशं दिवः । सा धेनुर्जरती नदन्ति करिणामेता घनाभा घटाः ॥ स क्षुद्रो मुसलध्वनिः कलमिदं संगीतकं योषितामाश्चर्यं दिवसैर्द्विजोयमियतीं भूमिं समारोपितः ॥ अत्रैकस्यैव हानोपादानयोरविवक्षितत्वान्न परिवृत्तिरिति पाठः । अञ्चित आकृष्टः । **न दर्शितमिति**–**रुद्रटेन** तु दर्शितम् । **प्रकृतेति ।** क्वचित्प्रकृतनिष्ठं साम्यं यथा–सदयं बुभुजे महाभुजः सहोसोद्वेगमियं व्रजेदिति । अचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ॥ इति । समुच्चितोपमायाम् । क्वचिदप्रकृतनिष्ठं यथा कस्यांचित्तुल्ययोगितायाम् । क्वचिच्च

तदुभयनिष्ठं यथापह्नुत्याम् । तच्चेह नास्ति प्रकृतस्यैव सद्भावात् । व्यासंगो निरोध-स्तस्मात् भंगो भयम् । अवगतं प्रतिपाद्येन ज्ञातम् । आर्यचरितं शिष्टैरनुष्ठितम् । धिषणा प्रज्ञा । युवतिरेव कामस्यास्त्रं आयुधम् । **वैचित्र्याभावात् इति ।** गौणे ह्युपचारे सादृश्यसंप्रत्ययाद्वैचित्र्यं न तु शुद्धे तद्विपर्ययात् । **कोमलेति ।** यद्यप्यव्यभिचरित-यैव विकाशादीनां नैरन्तर्येण जननमिहोपचारप्रयोजनव्यंग्यं तदसुंदरमपि गुणीभूत-व्यंग्यनिबन्धनं भवतीति च प्रतिपादितमेव तथाप्यलंकारचिंतायाः प्रक्रान्तत्वात् तदपह्नु-त्यैवावधारणगर्भमिदमभिहितमत एव तटस्थतयेवोक्तम् । **समाम्नासिषुरिति-उद्भटादयः** प्रत्यपादयन्निति ह्यत्रार्थः । हंसानां सरोभिः श्रीः सार्यते सारीक्रियते अथ सरसां हंसैः अन्योन्यमेवैते आत्मानं केवलं गरयन्ति गुरूकुर्वन्ति ॥ वाणिजक हस्तिदन्ताः कुतोस्माकं व्याघ्रकृत्तयश्च । यावद्विलुलितालकमुखी गृहे परिष्वस्कते विलसति स्नुषा ॥ का विषमा दैवगतिः—किं लब्धं यज्जनो गुणग्राही । किं सौख्यं सुकलत्रं किं दुर्ग्राह्यं खलो लोकः ॥ **अतिशयेनेति ।** अतिशयः कारणस्य कारणान्तरतो विलक्षणता यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोलीकम् । दन्तक्षतं कपोले वध्वा वेदना सपत्नीनाम् ॥ उदीर्णमुद्गतम् । कुकूलं तुषाग्निः । सिंहिकासुतः सिंहो राहुश्च । अत्र न परं शशेनात्मरक्षा समासादिता यावदेष स्वयमेवाधिगतमहावाधः स्वाश्रयबाधेनाश्रयणक्रियाध्वंसात् । **विपु-लेति ।** अत्र हीनेन गुरुकार्यं कृतमिति विषमत्वम् । एवमधिकोपि यः स्वल्पमपि प्रयोजनं न विदधाति तदपि विषमं यथा—किं ददातु किमश्नातु भर्तव्यभरणाकुलः । उदारमतिराप्तोपि जगत्त्रितयमात्रके ॥ इति । **माति** वर्तते । अनेनाश्रयस्य महीयस्त्वमुक्तमन्यथा मानस्यासंभवात् । **संबंधीति ।** संबंधि वक्त्रं तेनेंदोः संबंधः समत्वात् । **अपांगेति ।** अत्रांगकेन मदोदयस्य न धर्मसाम्यादैकात्म्यमतिशयाय विवक्षितमिति त्वनासादि-ततत्स्वभावमिदं वस्तुत एव बलीयस्त्वात् तस्य तिरोधानहेतुः । सामान्ये तु यदैकात्म्यं तदसदेव प्रस्तुततिरोधानयातिशयोक्त्या विवक्षितमिति सिद्धोस्य ततो व्यतिरेकः । **दृष्ट इति ।** दृशिरत्रोपलब्धिमात्रवचनः । स्मारिता इति घटादिषु पठितस्य स्मरतेर्मित्त्वेपि मितां ह्रस्व इति न ह्रस्वः तद्विधौ वेत्यस्यानुवृत्यस्य व्यवस्थितविभाषात्वात् । करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य । संस्मृतपांच-जन्यस्य नमत कृष्णस्य रोमाञ्चम् । **अनयैव रीत्येति ।** अनेन बहुप्रकारं वैचित्र्यमस्य दर्शितम् । तेनोपमानस्योपमेयतानुकंप्यतामात्रप्रतिपादनमपि प्रतीपम् । यथा वदनमिदं सममिंदोः सुंदरमपि ते कियच्चिरं न भवेत् । मलिनावधः कपोलौ लोचनसलिलं हि कज्जलवदिति ॥ गुरुः प्रधानगुणः शुक्लादिको धर्मः । **अपरित्यक्तेति ।** तद्गुणादस्य विशेषं दर्शयति । तत्रैकस्य गुणपरिहारात् । **प्रतीतेश्चेति ।** न हि भातमभातं भवतीति । सा वसति तव हृदये सैवाक्ष्णोः सा च श्रवणयोः । अस्मादृशीनां सुंदर अवकाशः कुत्र पापानाम् ॥ गरुड़ाग्रजः अरुणः । करीरमंकुरः । धवलोसि यद्यपि सुंदर तथापि त्वया मम रंजितं हृदयम् । रागभृतेपि हृदये सुभग निहितो न रक्तोसि ॥ धवलः कामुकोपि रंजितं जनिताभिषंगमपि ।

रागः प्रसक्तिरपि । अत्र पूर्वत्रार्धे विरोधो न तूत्तरत्र भिन्नाधारतयैव रक्ता-रक्तत्वयोः प्रतीतेः । **किंचेति ।** स्फीततमेपि गुणो गुणांतरसंपर्केण किंचिदन्यथात्वं गतो दृष्टः । यदा तु न गच्छति तदाप्यतद्गुण इति प्रकारांतराश्रयणम् । **अंगे**त्यभीष्टामंत्रणे । सैवेनान्यादृशी या न चीयत इत्यध्याहृतेन यदा समन्वयः । **यथासंभवमिति ।** न सर्वेषामेव लक्षितानामपि तु केषांचित् । तत्रापि तेषां मध्ये क्वचिद्द्वयोः क्वचित्त्रिचतुराणामिति यथा-योगम् । संसृष्टेश्च विषयभेदेन त्रिरूपाया अपि संसृष्ट्या चैकरूपयेति प्रागुक्तमभिधानं न विरुध्यते नैरपेक्ष्यलक्षणस्य रूपस्याभिन्नत्वात् । संकरस्तु स्वरूपेणैव नानात्वेनावभासत इति युक्तस्तत्र त्रिरूपतया व्यवहारः । स नास्त्यत्र ग्रामे य एतां सर्वतः प्रसरल्लाव-ण्याम् । तरुणानां हृदयलुंठिं परिष्वस्कमानां निवारयति ॥ न विश्रांतिजुषः अविश्रांतिजुषः । ताटंकं कर्णाभरणभेदः । तुलाकोटिर्नूपुरम् । **लुप्तायामिति**—लुपॢ छेदने । छिन्नायामित्यर्थः । गुंजा रक्तिका । करा रश्मयः करश्च पाणिः । वैराग्यं लौहित्यापगमः विषयवैतृष्ण्यं च । **पूर्ववदिति ।** तथाह्यत्रोपमा श्ले-षस्योत्थापकतयोपकारिणी । श्लेषोपि तथैव । रूपकोत्प्रेक्षयोः तैस्तु समस्तैः साक्षात्पारंपर्येण च यथासंभवमुपमोपकृता तदुपकृताया एवं तस्याः सचेतसां प्रचुर-चमत्कृतिहेतुत्वात् । **मुख्येपीति ।** उपमापक्षे कलंके उपचार एवेति । न च तदाश्रयणं युक्तम् । तस्यागतिकगतित्वात् । **अतिपातिनो** जवेन व्रजन्तः **सारावाः** सशब्दा नदा यत्र तादृशीयं तटी भ्राजते । अभिहतो दानवानां रासः सिंहनादो येनेति शम्भोः संबोधनम् । सा चेयं गजसंहतिः यूथमतिपाति विशेषेण परित्रायते । अविरतेन संततेन दानेन मदेन वरा श्रेष्ठा सारा स्थिरा वनं दयते रक्षति । यदा देङ् रक्षणे । अवनं वा रक्षणं ददाति या । **परस्परापेक्षे** इति इतरेतरविवेकेन द्वयोरिह वृत्तेरसंभवात् । अपेक्षैव च परस्परमनुग्राह्यानुग्राहकभावः तद्वशेन तयोर्विदग्धानां चेतसि परं चमत्करणात् । द्वितीयः संकर इति न त्वनिश्चयाख्यः पृथगलंकारः । समुच्चयेन समुच्चयद्योतिना च-शब्देन । यथा गंभीरो यथा रत्ननिर्भरो यथा च निर्मलच्छायः । तथा किं विधिना सरसपानीयः सरसवाणीकश्च जलनिधिर्न कृतः ॥ तह इति तथेत्यस्यार्थे निपातः । आशा दिशः आस्थाश्च-तमस्तिमिरं मोहश्च । **दीपकमिति**—यद्येकस्य प्रकृतत्वमपरस्य चाप्रकृतत्वम् । **तुल्ययोगितेति ।** यदि द्वयोरपि प्राकरणिकत्वमप्राकरणिकत्वं वा । **अभिधीयत** इति । यद्यपि साधकत्वं बाधकत्वं चोभयमस्यास्ति तथापि प्रधानेन व्यपदेशा भवन्तीति न्यायाद्बाधकत्वेनैवास्य व्यपदेशो न्याय्यो बाधकस्य बलीयस्त्वेनोत्कटतया प्रतीतेः । प्राधान्यात् रूपकं प्रति च बाधकं यत्तदेवोपमाविषयमिह साधकत्वं पर्यवस्यति प्रकरणा-न्तराभावात् । **स्पष्टेति ।** यद्यपि सांगमिदं रूपकमखिलवाक्यव्यापि तथापि प्रत्यवयवं रूपकस्य सद्भावात्तथा व्यपदेश इत्येक पदानुप्रवेशोस्य न विरुध्यते । **तत्प्रभेदेति ।** तस्य प्रभेदाः त्रयः प्रकाराः तेषां भेदाः तत्तदलंकारयोगेनावांतरविशेषा उत्प्रेक्षावयवादयः । **विशिष्ट-स्येति ।** यत्राश्रयस्य नित्यता नास्ति नित्यत्वेपि तस्य न तस्यान्वयव्यतिरेकौ निबंधनं

नित्यस्य व्यतिरेकाभावात् । **रमणमंदिरं** रतिवेश्म् । रमणस्य प्रेयसो मंदिरमिति तु व्याख्यायाम**कारण**मित्यसंगतं स्यात् । सदम्भाः सत्प्रभः । ये च दंभेन सह वर्तन्ते । पातः प्रवाहः **एकतरस्येति** । यदि तु विपरिणामेन लिंगवचसोः परस्याभिसंबंधः तदाभ्यासलक्षणो वाक्यभेदः स्यात् । एवं चाव्यवधानेन प्रकृतार्थो न प्रतीयते । असदृश इति कञंतत्वादेकवचनान्तं लिंगं क्विवन्तत्वाद्बहुवचनान्तं च । मधुरतया भृतो धृतः तां च बिभ्रति । दधत इति दध् धारणे इत्यस्य च दधातेश्च यथाक्रममात्मनेपदैकवचनवहुवचनरूपम् । मज्जनं स्नानं ब्रुडनं च । स्फुरन्नंशुकस्यान्तो यस्याः स्फुरद्भिः अंशुभिश्च कान्ता । मकरकेतनः कामः समुद्रश्च । **उच्चारितमिति** । शब्दतः प्रादुर्भूतं यथा प्रत्यग्रेत्यत्र विविक्तकान्तत्वादि । **केवलस्येति** असमासस्थस्य । समासत्वेसौ योग्यताद्यपि प्रतिपादयति । कराः पाणयोपि । तापः खेदोपि । मानः परिमाणमभिमानश्च । चिरयायिदिनो दीर्घाहो निदाघः । व्यक्तेर्लिंगस्य विशेषः पुंस्त्वं स्त्रीत्वं च । नायकनायिकतयेति नायकश्च नायिकाचेत्येकशेषः । भास्वन्तौ करौ दीप्यमानौ पाणी भास्वतश्च कराः घृणयः । अस्वापं दुर्लभं यत्फलं तत्र लुब्धानामीहितं प्रददाति । स्वापस्य फले विश्रांतौ यो न लुब्धः तत्र हितं प्रदादाति च । **न कंपते** न बिभेतीत्यर्थः । **अन्येपीति** । तद्यथा विरोधस्यासंभवः यथा । या घर्मभासस्तनयापि शीतलैः स्वसा यमस्यापि जनस्य जीवनैः । कृष्णापि शुद्धेरधिकं विधातृभिः विहर्तुमंहांसि जलैः पटीयसी ॥ इति । अत्र घर्मभासस्तनयात्वादीनां शीतलत्वादीनां च धर्माणां भिन्नाधारतया विरोध उक्तः स च न संभवतीत्येकाश्रयतयैव तस्योपपत्तेः अन्यथातिप्रसंगः स्यात् । यद्यपि च तस्याः सरितो जलानां च तात्त्विकमेकत्वं तथापि शब्दसमर्पितमेषां नानात्वमनुभूयते । अयं च विरोधः शब्द एवेष्यते । तथा च तेषां भिन्नाश्रयतया तदवस्थस्य एव तस्यासंभवात् स चाभिहितवाच्यत्व एव पर्यवस्यति । एकाश्रयतया विवक्षितानां तेषाममुना वाक्येनाभिधानादिति । **इतीति** । विदुषां **ध्वनिकृ**त्प्रभृतीनां य एवैष मार्गः स्वसिद्धान्तस्तत्तद्ग्रंथगतत्वेन पृथक् पृथगवस्थितोप्येकरूपतया प्रतिभाति तत्र संघटना एव निमित्तम् । विक्षिप्तस्य सुखावबोधायैकत्र संग्रहणं या संघट्टना तद्वशादेवैकान्ततताप्रतिभासात् । एतेन च महामतीनां प्रसरणहेतुरेष ग्रंथो ग्रंथकृतानेन कथमप्यसमाप्तत्वात् परेण च पूरितावशेषत्वाद्द्विखंडोप्यखंडतया यदवभासते तत्र संघट्टनैव साध्वी हेतुः । न हि सुघटितस्य संदिग्धत्वं कदाचिल्लक्ष्यत इत्यर्थशक्त्या ध्वन्यते ॥ **इति काव्यप्रकाशसंकेते दशम उल्लासः ॥ समाप्तश्चायं काव्यप्रकाशसंकेतः ॥ कृती राजानकरुचकस्य ॥ इति समाप्तं काव्यप्रकाशसंकेतम् ॥**

APPENDIX—B

बालचित्तानुरञ्जनी of नरहरि सरस्वतीतीर्थ

॥ दशम उल्लासः ॥

अथ शाब्दानलंकारानुक्त्वा आर्थान्वक्तुमुपक्रमत इत्युल्लासयोः संगतिमाह—**अर्थेति**। तत्रापि अनेकालंकारबीजभूतत्वात्पूर्वमुपमालंकारलक्षणमिति भावः। ननु किं–संबंधि किमेतत्साधर्म्यमित्यपेक्षायामाह—**उपमानेति**। एवकारव्यावर्त्यमाह—**नेति**। साधर्म्यस्वभावादेव उपमानोपमेयभावयोः सिद्धत्वादुपमानोपमेययोः साधर्म्यमुपमेत्यर्थः। साधर्म्यस्य अनेकविषयत्वात् भेदग्रहणमतिरिच्यत इत्याशंक्याह—**भेदेति**। विभागमाह—**पूर्णेति**। उपमानं उपमेयं साधारणो धर्मः उपमाप्रतिपादकाः इवादयश्चेति चतुर्णां कंठोक्तौ पूर्णोपमा। तेषां एकद्व्यादेः शास्त्रीये स्वारसिके वा लोपे लुप्तोपमेत्यर्थः। पूर्णायाः पुनरपि द्वैविध्यमाह—**साग्रिमेति**। ननु यथेववादिशब्दानां तुल्यादिशब्दानां च उपमानविशेषणत्वस्य अविशिष्टत्वादियं श्रौती इयमार्थीति व्यवस्था कथमित्याशंक्याह—**यथेति**। यथेववादिशब्दानमौभयिकसंबंधप्रत्यायकत्वे दृष्टांतमाह—**षष्ठीवदिति**। यथा राज्ञः पुरुष इति राज्ञि तिष्ठंती षष्ठी पुरुषमप्याक्षिपंती तदुभयनिष्ठं संबंधं समर्पयति एवं यथेववादयोपि। यथा च तत्र शब्दशक्तेर्महिमा न पर्यनुयोगमर्हति एवमत्रापीत्यर्थः। एवं वाक्ये श्रौतीमभिधाय तद्धितेपि तां योजयति-**तथैवेति**। यथा इवप्रयोगे वाक्ये श्रौती उपमा तथैव इवाद्यर्थे तत्र तस्येवेत्यनेन सूत्रेण विहितस्य वतिप्रत्ययस्य तद्धितस्य उपादानेऽविशेषात् श्रौती उपमेत्यर्थः। तुल्यादिशब्दोपादाने आर्थी प्रतिपादयितुमाह—**तेनेति**। तुल्यादिशब्दानां तेन तुल्यमित्यादौ उपमेय एव विश्रांतिः तत्तुल्यमस्येत्यादौ उपमान एव इदं तच्च तुल्यमित्युभयत्रापि विश्रांतिरिति संबंधः। इवादीनामेकत्र श्रूयमाणत्वेपि न तत्रैव विश्रांतिः किं तु प्रतियोगिगतसंबंधाभिधाने। तुल्यादीनां तु न तथा किं तु तुल्यत्वनिर्वाहाय साम्यमपेक्षणीयमित्यार्थी उपमेत्यर्थः। एवं तद्धितेऽप्यार्थीमाह-**तद्वदिति**। स्थितावित्यत्र आर्थीत्यनुषज्यते। समासे श्रौतीमाह—**इवेनेति**। अत्र आर्थी प्रसिद्धा। तथा च वाक्यगा समासगा तद्धितगा चेति श्रौती त्रेधा। एवमार्थ्यपि त्रेधेति पूर्णा षड्विधा भवति।

तत्र वाक्ये श्रौतीमुदाहरति—**चकितेति**। चकितहरिणलोललोचनायास्तस्या नायिकायाः क्रुधि कोपे सति तरुणारुणवत् तारा निर्मला हारिणी क्रांतिर्यस्य तत् इदमाननं सरोजं च सममिति नायकः संमदं विधत्ते। अत्र समशब्दप्रयोगाद्वाक्य एवार्थी उपमा। समासे श्रौतीमुदाहरति—**अत्यायतैरिति**। शौरिः कृष्णः चतुर्भिर्भुजैरिव यो राजा अत्यायतैः उद्धतानां नियमकारिभिः दिव्यैः प्रभाभिः अनपायमयैः लक्ष्मीविलासस्थानैः चर्तुर्भिरुपायैः सामादिभिः सदा भुवनं बभार।

अत्र भुजैरिवेति समासे श्रौती उपमा । विभक्त्यलोप इत्यनेन विशेषणविशेष्यभावसंबंधक्षमत्वस्य ज्ञापितत्वात् । समासे आर्थीमुदाहरति-**अवितथेति** । हे क्षितीश्वर सफलमनोरथमार्गप्रसिद्धिषु गुणगरिम्णा गीता श्रीः यस्य । कल्पवृक्षसदृशः सः प्रसिद्धो भवान्कस्य नाभिलषणीयः अपि तु सर्वस्य (अपि) । अत्र सुरतरुसदृश इति समासे आर्थी उपमा । तद्धिते श्रौतीमार्थीं च उदाहरति-**गांभीर्येति** । तस्य राज्ञो गांभीर्यगरिमा गंगाभुजंगवत् समुद्रवत् । संग्रामे निदाघांबररत्नवत् ग्रीष्मकालतरणिवत् दुरालोकः । अत्र गंगाभुजंगवदिति श्रौती तद्धितगा । अंवररत्नवदित्यत्रार्थी तद्धितगा । नन्वेतत्पूर्वापरग्रंथविरुद्धं यदुत पंचमादौ व्यंग्यस्योदाहृतमेव इदानीमलंकारस्य उदाह्रियते । येन व्यंजनाभिधयोरलंकार्यलंकारयोः व्यापार्यव्यापारयोः ध्वनिवाच्यालंकारिकयोश्च स्पष्टो विरोधश्चमत्कारश्चात्र ध्वनिना गुणीभूतव्यंग्येन वा प्रयुज्यते । तदधीनत्वादुक्तिवैचित्र्यस्य तल्लक्षणत्वाच्चालंकाराणामित्याशंक्याह-**स्वाधीनेति । वैचित्र्यं चेति ।** उक्तिवैचित्र्यमलंकार इति निश्चयात् । तदुक्तं "रसस्यांगं विभावाद्याः साक्षान्निष्पादकत्वतः । तद्वैचित्र्योक्तवपुषोलंकारास्तु तदाश्रया" इति । **ध्वनीति** शृंगारादिरसापेक्षया । **गुणीभूतव्यंग्येति** अवांतरवस्तुध्वन्यपेक्षया । **न खलु** इति । निरलंकारे व्यंग्ये तस्य व्यंग्यत्वादेव चारुता। निर्व्यंग्ये चालंकारे चारुत्वं नास्ति। रसध्वनिर्न यत्रास्ति तत्र वंध्यं विभूषणम् । मृतायामेणशावाक्ष्यां किं फलं हारसंपदेत्युक्तत्वात् । अत्र तु व्यंग्यालंकारयुगलमलंकारांतराले व्यंग्योल्लेखात् न चारुत्वप्रतीक्षा । यावदुक्तिद्वारा वाच्यवैचित्र्यरूपस्यालंकारस्यास्फुरणात् । नन्वत्र रसादिलक्षणो व्यंग्यः किमसत्कल्पः नेत्याह-**रसेति** । सर्वत्राव्यभिचारि सर्वकाव्यार्थानुवृत्तम् । अलंकारांतरं चेत्यनेन दृष्टांत उत्थाप्यते । यथा बह्वलंकारे काव्ये कस्यचिदलंकारस्योद्रेकः एवं व्यंग्यालंकारोभयशालिनि अलंकारस्योद्रेक इत्यर्थः । तस्मान्न केवलं एतद्व्यंग्ये यावदलंकारे समानजातीयेपि क्वचित्कस्यचिदुद्रिक्ततया विवक्षायामन्यस्मिन्नन्यस्यानौल्वण्यात् । तर्हि तादृग्व्यंग्यप्रयुक्तोप्यस्ति चमत्कार इत्यत्राह-**अगणयित्वेति** । अगणनमुपेक्षा न त्वनवधानम् । व्यंग्यस्याप्यत्र सद्भावात् उदाहृता इति सामान्येन उल्लासार्थः सिद्धप्राय इत्याशयेनोक्तम् । ननु व्यंग्यरहिता उदाह्रियंतामलंकाराः येन विषयविवेक इत्यत आह-**तद्रहितत्वेनेति** । विषयविभागमात्रलोभात् उदाह्रियमाणं न चमत्काराय । यथा गौरिव गवय इत्युपमा, खलेवाली द्विज (v. l. यूपः) इति रूपकं, स्थाणुः पुरुषो वेति संदेहः, नेदं रजतमित्यपह्नुतिः, पीनो दिवा न भुंक्ते इति पर्यायोक्तिः, समुद्राः (v. l. द्रः) कुडिकेत्यतिशयोक्तिः, अद्रिरग्निमानित्यनुमानं, आद्यंतौ टिक्तिताविति यथासंख्यं, पुत्रेण सहागतः पितेति सहोक्तिः, श्वेतो धावतीति श्लेषः इत्यादावित्यर्थः । यद्यपि पंचमादावव्यंग्यं चित्रमित्युक्तं तथापि स्वाधीनभर्तृकेत्यादौ विद्यमानमपि व्यंग्यं उपेक्ष्य उदाहृतं इति न पूर्वोत्तरविरोध इति पूर्वापरविरुद्धाभिधानमिति न शंकनीयमित्युपसंहरति-**इतीति** । एवं पूर्णोपमामभिधाय लुप्तोपमां विभजते-**तद्वदिति** । तद्वत् पूर्णोपमावत् । वाक्यगा समासगा तद्धितगा च । तत्र श्रौतार्थभेदेन द्वैविध्यम् । तद्धिते (आर्थी) न संभवतीति पंचप्रकारेत्याह-**तद्धित इति** । आदिशब्देन देश्यदेशीयवद्वचोग्राह्याः । वाक्ये श्रौतीमुदाहरति-**धन्यस्येति** । हे चेतः,

धन्यस्य अनन्यसामान्यो यः सौजन्योत्कर्षः तेन शालते तस्य राज्ञः अमृतं यथा अमृतवन्मधुरं सत्यं वचः करणीयम् । अत्र माधुर्यस्य साधारणधर्मस्य लोपे यथाश्रुत्या श्रौतत्वम् । वाक्ये आर्थीमुदाहरति–**आकृष्टकरवालेति** । असौ प्रभुः संपराये युद्धे आकृष्टकरवालः भ्रमन् शत्रुसेनया दृष्टः सन् कृतान्तेन यमेन समः । कृतान्तेन सम इत्यत्र क्रौर्यादेः साधारणधर्मस्यानुपादानाल्लुप्तोपमा । तथा कृतान्तेन सम इत्यत्र प्रभुरूपे उपमेय एव सदृशत्वलक्षणस्यार्थस्य श्रुत्या विश्रांतिरिति समसद्भावात् आर्थी । न च करवालाकृष्टिः समानधर्मः इति वाच्यम् । यमस्य दंडायुधत्वेन करवालायुधत्वाभावात् । समासे श्रौतीमुदाहरति–**करवाल इति** । हे सखे, तस्य प्रकृतस्य आचारः करवालः (इव ?) वाक् अमृतोपमा मनो विषकल्पं तदेतत् वेत्सि यदि जीवसि । तत्समीपावस्थाने तव जीवनमेव दुर्लभमिति भावः । अत्र करवाल इवाचार इत्यत्र इवशब्दयोगे नित्यसमासे इवश्रुत्या श्रौतत्वम् । अमृतोपमेति समासे आर्थी । विषकल्पमिति तद्धिते आर्थी । वाक्ये समासे च उपमितिकरणस्यानुपादाने श्रौती नास्तीत्याह–**उपमानेति** । यथेववादिशब्दानां तदर्थे विहितस्य वतेश्च उपमानोपादानमंतरेण प्रयोगाभावात् श्रौती न संभवति । आर्थ्येवेति भावः । वाक्यगामुदाहरति–**सअलेति** । सरसकव्वस्स सरसकाव्यस्य सअलकरणपरवीसामसिरिविअरणं सकलकरणपरमविश्रामश्रीवितरणं सरिसिअ सदृशं वस्तु अंसांसमेत्तेण अंशांशमात्रेण ण दीसइ न दृश्यते अहवा अथवा ण सुम्मइ न श्रूयते । सरसकाव्यमेवैवंविधं नान्यदित्यर्थः । अत्र उपमानस्य कस्यचिद्विशिष्टस्यानुपादानाद्वाक्ये आर्थी उपमा । एतदेव समासगोदाहरणत्वेनोदाहार्यमित्याह-**कव्वस्सेति** । कव्वस्सेत्यत्र कव्वस्समिति पाठे आर्थ्येव समासगा । नन्वस्मिन् पादे सरिसिअमित्यनेन पौनरुक्त्यं स्यादित्यत आह–**णूणमिति** । सरिसिअमिति पदं दूरीकृत्य णूणपदप्रयोगान्न दोष इत्यर्थः । अपरां षट्प्रकारामाह–**वादेरिति** । वा इव इत्यादेरुपमाद्योतकस्य लोपे सा आर्थी उपमा समासे । उपमानादाचारे अधिकरणाच्चेति कर्माधिकरणयोर्विहिते क्यचि । कर्तुः क्यङ् सलोपश्चेति कर्त्तरि विहिते क्यङि । उपमाने कर्मणि च चकारात्कर्त्तरिचेति कर्मकर्त्रोर्विहिते णमुलिचेति षट् प्रकारा भवंतीति श्लोकं व्याचष्टे–**वादेरिति** । समास उदाहरति–**तत इति** । ततः कुमुदप्रकाशकेन कामिनीकपोलवत्पांडुवर्णेन नेत्रानंदकरेण चंद्रेण ऐंद्री दिक् अलंकृता । अत्र कामिनीगंडपांडुनेत्यत्र उपमाद्योतकइवशब्दलोपात् समासगा आर्थी उपमा । तत्रैवोदाहरणांतरमाह–**असितेति** । प्रतिभटविक्रमदर्शनेऽयं एवंविध आसीत् कृष्णसर्पवत् भीषणखड्गपत्रः रुहरुहिकया उत्कंठया आहितः स्थापितः चित्ते तूर्णचारः शीघ्रगमनं यस्य सः रोमांचितशरीरः उद्गता कपोलकांतिर्यस्य सः। अत्र असितभुजगभीषणासिपत्र इत्यत्र इवशब्दलोपात् समासगा आर्थी उपमा । कर्माधिकरणयोः क्यचि कर्तरि क्यङि चार्थीमुदाहरति–**पौरमिति** । अयं पौरजनं सुतीयति सुतमिवाचरति । कर्म्मणि क्यच् । विचित्रचरित्रेण प्रसिद्धः असौ संग्रामे अंतःपुरीयति अंतःपुर इवाचरति । अधिकरणे क्यच् । सपत्नसेना संग्रामे खड्गहस्तस्य तस्य लसितानि विलोक्य नारीयते नारीव आचरति । कर्तरि क्यङ् । कर्मणि कर्तरि च णमुलि आर्थीमुदाहरति–**मृध**

इति । परे शत्रवः तं राजानं युद्धे ग्रीष्मर्तुसूर्यमिव पश्यंति । दर्शमिति कर्मणि णमुल् । स राजा पुनः पार्थः अर्जुन इव संचरति अत्र कर्तरि णमुल् । उभयत्र क्यचादिषु यथाविध्यनुप्रयोगः इत्यनुप्रयोगः । पुनरपि द्वैविध्यं पद्यांशमुपादाय व्याकरोति-**एतदिति ।** क्विप्-गा समासगाचेति आर्थी द्विधेत्यर्थः । तत्र धर्मलोपे क्विप्गामुदाहरति-**सवितेति** । सविता सूर्यः विधुवति चंद्र इवाचरति चंद्रोपि सवितरति सवितेवाचरति । तथा यामिन्यो दिनंति दिनानीवाचरंति दिनानि च यामिनयंति यामिन्य इवाचरंति । कस्मिन्सति । मनसि सुखदुःखवशीकृते सति । अत्र सर्वत्र सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्य इति आचारे क्विप् । अत्र शीतलत्वादिको न समानधर्मः न च द्योतकः इति द्विलोप(कः) । ननु आचारे क्विपो विधानादाचाररूपस्य समानधर्मस्य सद्भावात्कथं धर्मलोप इत्युच्यते इति चेन्मैवम् । लुप्तप्रत्यया प्रकृतिः प्रत्ययार्थमपि यद्यपि ब्रूते तथापि वाचकप्रत्ययलोपाद्वाच्यलोप इत्युच्यते । यद्वा प्रकृतिव्यतिरिक्तस्य धर्मवाचकस्याप्रयोगाद्धर्मलोप इत्युच्यते इत्यदोषः । वादिलोपे समासगामुदाहरति-**परिपंथीति ।** परिपंथिनां शत्रूणां मनोराज्यशतैरपि दुरतिक्रमः युद्धप्रवृत्तः असौ राजश्रेष्ठः राजते । अत्र राजा कुंजर इव राजत इति उपमितं व्याघ्रादिभिः सामान्याप्रयोग इति समासः । अत्र इवलोपे समासगा । अपमानासहत्वादिसाधर्म्यात् । पुनरपि द्वैविध्यं प्रतिपादयति-**धर्मेति ।** वृत्तौः समासे । दृश्यते आर्थीति शेषः । धर्मलोपवती उपमानस्य लोपवती चेति द्विविधा इत्यर्थः । धर्मलोपे उपमानलोपे च समासे उदाहरणमाह-**ढुंढुंलेति ।** पुष्पोपचये भ्रमरमालोक्य कस्यचिदुक्तिः । भ्रमन्मरिष्यसि कंटककलितानि केतकीवनानि मालतीकुसुमसदृशं भ्रमर भ्रमन्न प्राप्स्यसि । अत्र मालतीत्यादिसमासे सौरभादिधर्मस्य तदुपमानस्य अन्यस्योत्कृष्टतरस्य वाऽदर्शने आर्थी उपमा । समासोदाहरणमेव पाठांतरे वाक्योदाहरणं स्यादित्याह-**कुसुमेन सममिति ।** प्रकारांतरप्रतिपादकं पद्यांशमुपादाय अप्रसिद्धं व्याकरोति-**क्यचीति ।** व्यंजने(के?)-वादेर्द्योतकस्य उपमेयस्य च लोपे आर्थी उपमेत्यर्थः । तामुदाहरति-**अरातीति ।** शत्रुपराक्रमदर्शनेन विकसनशीले लोचने यस्य । कृपाणेन उदग्रौ दोर्दंडौ यस्य । स राजा सहस्रायुधीयति सहस्रार्जुनं कार्त्तवीर्यार्जुनमिव आत्मानं आचरति । उपमानादाचार इति वा क्यच् । वादयो न संति । उपमेय आत्मापि नास्ति । आचारो नाम साधारणो धर्मोस्ति इति आर्थी उपमेत्याह-**अत्रेति ।** उपमानसाधारणधर्मवादीनां लोपे समासगा आर्थीति प्रकारांतरमाह-**त्रिलोपेति ।** तामुदाहरति-**तरुणिमनीति ।** तरुणत्वविषये कृतमवलोकनं यस्याः । ललितविलासैः स्वीकृतः विग्रहो यस्याः । कामशरैः दूरीकृतं तारतम्यं यस्याः । मृगनयना कांता मुनेर्मनः हरति । ननु मृगनयनेत्यत्र अवयवावयविनोरभेदविवक्षया यदा मृग एव नयनतया उपचर्यते तदा रूपकानुगुणं समासान्तरमिति कथमियं त्रिलोपेत्याशंक्याह-**अत्रेति ।** सप्तम्यन्तोपमानवाचिनी पूर्वपदे यस्य तस्य बहुव्रीहिः उत्तरपदस्य च लोप इति येषां पक्षः तेषां मते मृगस्य नयने इव नयने यस्या इति विग्रहः । तत्र नयने इव विशाले इति उपमानेवशब्दविशालशब्दानां लोप इति

त्रिलोपा उपमेत्यर्थः । अन्येषां मते त्रिलोपा माभूदित्यत्र तात्पर्यम् । केचिदायः-शूलिक इत्युपमेयसाधारणधर्मवाचकलोपे त्रिलोपवतीमुपमामुदाहरंति तन्मतं दूषयितुमाह **–क्रूरस्येति** । अयःशूलेनान्विच्छतीत्यत्रार्थे अयःशूलदंडाजिनीभ्यां ठक्ठञाविति ठक् । अर्थार्जनोपायरूपस्य क्रूराचारस्य उपमेयस्य अयःशूललक्षणेनोपमानेन निगीर्याध्यवसनादतिशयोक्तिरलंकारः । ननु क्रूराचारस्योपमेयस्य तैक्ष्ण्यलक्षणस्य धर्मस्य वादेश्च लोपे इति **चिरंतन**विवक्षिता त्रिलोपवती उपमेत्यर्थः । उक्तमुपमाप्रपंचं संकलय्य दर्शयति**–एवमिति ।** धर्मलोपे पंच उपमानानुपादाने वाक्यगा समासगा चेति द्वे इति सप्त। वादेर्लोपे समासे कर्मक्यचि आधारक्यचि क्यङि कुर्तृणमुलि कर्मणमुलिचेति षट् । इति त्रयोदश । धर्मवाद्योर्लोपे क्विप्गा समासगाचेति द्वे इति पंचदश । धर्मोपमानयोर्लोपे समासगा वाक्यगा चेति सप्तदश । क्यचि वाद्युपमेयलोपे एकेत्यष्टादश । त्रिलोपे च समासगा एकेति एकोनविंशतिर्लुप्ताभेदाः । पूर्णाभेदाः षडिति पंचविंशतिरुपमाभेदा इत्यर्थः । मालोपमां दर्शयति-**अनेयति**। अनीत्या राजश्रीरिव दैन्येन मनस्वितेव हिमांभसा पद्मिनीव सा कामिनी विषादेन मम्लौ । अत्र सर्वत्र म्लानिलक्षणो धर्मो न भिद्यत **इत्यभिन्न इति ।** धर्मभेदे मालोपमा-मुदाहरति**–ज्योत्स्नेति** । नितंबिनी नारी चंद्रिकेव नयनानंदंभूता । सुरेव मदकारणम्। प्रभुतेव समाकृष्टः सर्वलोको यया । अत्र नयनानंदकरत्वमदकारणत्वादिधर्मः प्रत्येकं भिद्यत इत्याह-**भिन्ने वा तस्मिन्निति ।** साधारणे धर्मे । मालोपमाया लक्षणमाह**–एकस्येति** । एकस्यैवोपमेयस्य वहूपमेयोपादाने मालोपमेत्यर्थः । धर्मभेदे रशनोपमाया लक्षणमाह**–यथोत्तर-मिति** । पूर्वपूर्वपर्वणि उपमेयभूतस्योत्तररोत्तरकक्षायां उपमानतया उपादाने पूर्ववत् मालोपमावत् अभिन्नधर्मत्वे रशनोपमा भवतीत्यर्थः । तामुदाहरति-**अनवरतेति ।** हे राजन् अनवरतं यत्कनकवितरणं सुवर्णदानं तत्र ये जलबिंदवः तैर्भृतो यः करः तेन तरंगिता अर्थिततिर्येन तस्य तव भणतिरिव मतिः मतिरिव चेष्टा चेष्टेव कीर्त्तिरतिविमला। अत्र वैमल्यं सर्वत्र समानो धर्मः। धर्मभेदेन चेमामुदाहरति**–मतिरिवेति।** तस्य नृपस्य मतिरिव मधुरा मूर्तिः मूर्तिरिव प्रभावचिता सभा सभेव जयश्रीः परेषां जेतुं शक्या न । अत्र प्रत्येकं माधुर्यादिको धर्मो भिद्यते । कारिकायां इत्यादिका न लक्षितेत्याह-**इत्यादिकेति ।** किमिति न लक्षितेत्यत आह-**एवंविधेति । दंडिभोजा**दिप्रक्रियायां अपरिमितस्य वैचित्र्यस्य प्रकाशयितुमशक्यत्वादित्यर्थः । तर्हि कथं न न्यूनत्वदोषशंकेत्यत्राह**–उक्तभेदेति ।** सामान्यलक्षणेन क्रोडीकारादिति भावः । एवमुपमालंकारं लक्षयित्वा अनन्वयालंकारं लक्षयति**–उपमानेति ।** एकस्यैवेति उक्ताया उपमाया व्यपोहः। एकवाक्यग इति वक्ष्यमाणाया उपमेयोपमाया व्यावृत्तिः। व्याकरोति**–उपमेति ।** तथा चोक्तं 'यत्र तेनैव तस्य स्यादुपमानोपमेयता। असादृश्यविवक्षातः तमित्याहुरनन्वयमिति'। उदाहरति**–न केवलमिति ।** नितांतकांतिः सैव नितंबिनी केवलं नितंबिनीव न भाति यावत् विलासायुधः कामः तस्य लास्यं नृत्यं तस्य वासाः निवासभूताः ते प्रसिद्धाः तस्या विलासाः तद्विलासा इव भांति। नितंबिनी नितंबिनीव तद्विलासास्तद्विलासा इवेति एकस्यैव द्वितीयसदृशवस्तुनिराकरणलक्षणं चमत्कारातिशयमवबोधयितुमुभयथा विवक्षा

यतो न विरुद्धधर्माशंका। श्रौतश्चायमनन्वयः। गगनं गगनाकारं सागरः सागरोपम इत्यार्थो द्रष्टव्यः। उपमेयोपमां लक्षयति-**विपर्यास** इत्यादि। तयोरित्यस्य व्याख्यानं-**उपमेति**। विपर्यास इत्यस्य व्याख्यानं **परिवृत्तिरिति**। अनन्वयत्वस्य व्यावृत्त्यर्थमाह-**अर्थातिति**। महत्याः संज्ञायाः फलमाह-**इतरेति**। अथाहुः 'अन्योन्यमेव यत्र स्यादुपमानोपमेयता। उपमेयोपमामाहुस्तां पक्षान्तरहानिगामिति'। साधारणधर्मोपादाने वस्तुप्रतिवस्तुनिर्देशे च द्विप्रकारेयम्। तत्राद्यामुदाहरति-**कमलेति**। हे राजन् यस्य तव मतिः कमला लक्ष्मीरिव सापि कमला मतिरिव भाति विभा कांतिः तनुरिव तनुर्विभेव भाति। धृतिः धरणीव धरणी धृतिरिव सततं विभाति बत। द्वितीयोदाहरणं यथा-सच्छायांभोजवदनाःस च्छायवदनांबुजाः। वाप्योंगना इवाभांति यत्र वाप्यंगना इव इति। उत्प्रेक्षां लक्षयति-**संभावनमित्यादि**। संभावनं अध्यवसायः अभिमानः तर्कः ऊहः उत्प्रेक्षेति नार्थांतरम्। प्रकृतस्य उपमेयस्य असंतो ये धर्मा गुणक्रियारूपास्तेषां प्रत्येकं भावाभावाभ्यां संभावनयोत्प्रेक्षणमुत्प्रेक्षा। सा च मन्येप्रभृतिना द्योत्यते। तथा चोक्तं-मन्ये-शंके-ध्रुवं-प्रायो-नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः। सा च वाच्या इवादिभिः प्रदृश्यते। प्रतीयमानायां पुनरिवाद्यनुपयोगः। सा च जातिगुणक्रियाद्रव्याणामप्रकृतानामध्यवसायत्वेन चतुर्धा। प्रत्येकं विधिनिषेधाध्यवसायरूपतयाष्टधा। भेदाष्टकस्य च प्रत्येकनिमित्तस्य गुणक्रियारूपत्वे षोडश। तेषां च निमित्तस्योपादानानुपादानाभ्यां ३२ भेदाः। तेषु च प्रत्येकं हेतुस्वरूपफलोत्प्रेक्षारूपत्वे (भेदाः) षण्णवतिः वाच्योत्प्रेक्षायाः। प्रतीयमानाया अपि भेदा ज्ञातव्याः। इति दिग्मात्रम् उदाहरति-**उन्मेषमिति**। हे ललिततनु सुंदरि कमलशोभा इति हर्षात् ते पादयोः लग्नेति मन्ये। इतीति किम्। जातिवैरी यः चंद्रः रात्रौ मम उन्मेषं न सहते, तस्य इंदोः सौंदर्यदर्पः इंदीवरदलदृशा अनया प्रसंभं शांतिं नीतः। अत्र पादशोभाया उपमेयभूताया उपमानभूतपद्मसौंदर्यात्मना संभावनम्। सौदर्यं च गुणः। तत्र हर्षादित्युक्तो गुण एव निमित्तम्। क्रियामुदाहरति-**लिंपतीति**। अत्र तमोविषयतया लेपनं नभोवर्षणं च उत्प्रेक्ष्यत इत्याह-**व्यापनादीति**। आद्यस्य श्लक्ष्णता द्वितीयस्य नीलिमाधिक्यं गुणो निमित्तम्। एवं जात्युत्प्रेक्षादिकमुदाहर्तव्यम्। संदेहालंकारं लक्षयति-**स संदेहस्त्विति**। भेदो व्यावर्तको धर्मः तत्सहितस्तद्रहितश्चेति द्विविध इत्यर्थः। आद्यमुदाहरति-**अयमिति**। अयं सूर्यः किं स सूर्यः खलु सप्तभिः तुरगैरितः। एकेनाश्वेन युक्तत्वात्सूर्यो न भवतीत्यर्थः। तर्हि कृशानुः किम्। एष कृशानुः सर्वा दिशो नियतं न प्रसरति। सर्वदिक्प्रसरणशीलत्वादयं अग्निर्न भवतीत्यर्थः तर्हि साक्षाद्यमः किम्। असौ यमः महिषवाहनः। महिषवाहनत्वाभावादयं यमोपि न भवति। इति प्रतिभटाः युद्धे त्वां चिरं समालोक्य विकल्पान् संशयान् कुर्वंति। अत्र वर्णनीयस्य मार्तंडादीनां च संशये सति सप्तकसंपन्नत्वादिर्भेद उक्तच्यते। कविप्रतिभोत्थापितसंशयग्रहणात् स्थाणुत्वपुरुषत्वादिस्वारसिकसंशयस्यानलंकारतेति द्रष्टव्यम्। भेदोक्तावित्यत्र विवक्षितमर्थमाह-**भेदोक्ताविति**। आद्यंतयोः संशयग्रहणं मध्ये निश्चय इत्येका कोटिः। आदिमध्ययोः संशयः अंते च निश्चय

इत्यन्या । तदुभयमपि विवक्षितमित्यर्थः । निश्चयांतमुदाहरति–**यथेति** । हे हरिणाक्षि एतत् इंदुः किं कलंकः क । कलंकाभावाच्चंद्रो न भवतीत्यर्थः । सरसिजं किं उदकं कुत्र गतं । उदकाभावान्न सरसिजम् । ललितानि मनोहराणि सविलासानि वचनानि तैः परतः पश्चात् मुखमिति निश्चितम् । अत्र कलंकादिको भेदको धर्मः । पर्यंते मुखमिति निश्चितमित्युक्तत्वान्निश्चयांतत्वं च । **रुद्रटेनो**क्तोयं विभागः कस्मा**दुद्भटेनो**पेक्षित इत्यत्राह–**किंत्विति** । व्यज्यमानव्यतिरेकादुच्यमाने निश्चये कश्चमत्कारातिशय इत्यु**द्भटाभि-**प्राय इति यावत् । भेदकधर्मानुक्तानुदाहरति–**तदिति** । अस्याः सृष्टिविधौ कांतिप्रदश्चंद्रो नु । प्रभूतशृंगारैकरसः स्वयं मदनो नु । पुष्पाकरो मासो नु । वेदाभ्यासजडः विषयव्यावृत्तकौतूहल-पुराणो मुनिः इदं मनोहरं रूपं कथं नु निर्मातुं प्रभवेत् । न प्रभवेदित्यर्थः । अत्र नायिकारूपसृष्टौ ब्रह्मत्वं चंद्रस्य मन्मथस्य मधुमासस्य वेति संदेहे भेदको न कश्चिदुक्तः । वेदाभ्यासजाड्यादिकं तु चंद्रमदनमधुमासेभ्यः प्रसिद्धब्रह्मणो वैलक्षण्यम् । न पुनरेतेषामन्योन्यमिति भ्रमितव्यम् । अतश्च संशयावस्थैवात्र चारुतामुत्थापयति । इतरथा नायिकारूपवर्णने कांतिप्रभा(द ?)त्वाद्येकतमविपर्यासापत्तेः । रूपकालंकारं लक्षः-यति–**तद्रूपकमिति** । नन्वपह्नुत्यलंकारे अतिव्याप्तिरित्यत आह–**अतीति** । मुखं चंद्र इति सहप्रयुज्यमानयोरनपह्नुतभेदयोः साम्योत्कर्षात् अभेदो रूपकमिति विवक्षितत्वान्नाति-व्याप्तिरित्यर्थः । एतन्निरवयवं सावयवं परंपरितं चेति त्रिधा । आद्यं केवलं मालालंकारं चेति द्विधा । द्वितीयं च समस्तवस्तुविषयं एकदेशविवर्तीति द्विधैव । तृतीयं च श्लिष्टभिन्नशब्द-निबन्धनत्वेन द्विविधं सत् केवलं मालालंकारं चेति चतुर्विधम् । तदेवमष्टावेतद्भेदाः । तत्र द्वितीये आद्यभेदप्रतिपादकं भेदमुपादाय व्याकरोति–**समस्तेति** । समस्तवस्तुविषयं रूपकमिति भेदः (*v. l.* शेषः) । द्विवचनस्याप्यंगीकार्यत्वाद्बहुवचनमविवक्षितम् । तेन आरोपितौ आरोपिता इति च द्रष्टव्यं इत्याह–**आरोपिता** इति । उदाहरति–**यथेति** । ज्योत्स्नैव भस्म तच्छुरणधवलतारका एवास्थीनि तानि बिभ्रती अंतर्धानव्यसनानुरक्ता । मुद्राशब्दः प्रशंसार्थः । चंद्रमुद्रैव कपालं तस्मिन् लांछन व्याजेन न्यस्तम् । परिमलशब्दः प्रशंसार्थः । सिद्धांजनपरिमलं दधती इयं रात्रिरेव कापालिकी योगिनी द्वीपाद् द्वीपांतरं भ्रमति । अत्र आरोप्यमाणा भस्मादय आरोपविषया ज्योत्स्नादयः लांछनच्छलेनेत्यत्रापह्नुतेर्विद्यमानत्वात्पादत्रयमेवोदाहरणमित्याह–**अत्रेति** । ननु ज्योत्स्ना भस्मेवेत्युपमीयते उत ज्योत्स्नैव भस्मेति निरूप्यते । व्याघ्रादित्वेन वा मयूरव्यंसकादित्वेन वा समास उभयोरप्याकृतिगणत्वादिति संदेहसंकरः न शुद्धं रूपकमिति अत आह–**अंतर्धानेति** । अंतर्धानरसिकत्वं चेतनधर्मत्वात्कापालिक्यामेव मुख्य न रात्रौ । रात्राविवेत्युपमासंदेहाभावान्न शंका कार्येति निगमयति–**तदिति** । अथवा पाठांतराश्रयेण सर्वत्र रूपकेणैव निर्वाहः कार्य इत्याह–**अथवेति** । द्वितीये द्वितीयभेदोपपादकं सूत्रमुपादाय व्याकरोति–**श्रौता इति** । आरोप्यमाणः । एकदेशे चलनात् । उदाहरति–**रिउसेणा** रिपुसेना । रणंतेउरे रणांतःपुरे । मंडलग्गलअ मंडलाग्रलतां करे कुणंतस्स

कुर्वंतः । जस्स यस्य । रससंमुहीवि रससांमुख्येपि । सहसा परमुही पराङ्मुखी होइ भवति । अत्र सर्वविषयत्वप्रतीतिरेकदेशवर्तित्वं कथमित्यत आह–**अत्रेति** । संग्रामांतःपुररूपणेन नायिकात्वप्रतिनायिकात्वप्रतीतेरेकदेशवर्त्तित्वमित्यर्थः । इतोपि विभागं वक्तुकाम उक्तमेकत्र संकलयति–**सांगमिति** । व्याकरोति–**उक्तमिति** । द्विभेदं समस्तवस्तुविषयैकदेशवर्तिरूपम् । निरवयवमाह–**निरंगं त्विति** । अंगविकलं तावत् शुद्धं तदुदाहरति–**कुरंगीति** । अहो सखि यत् इयं गीतध्वनिषु कुरंगीव अंगानि स्तिमितयति यच्च सखीश्रुतमपि कांतोदंतं सखीं पुनः प्रश्नयति । प्रश्नवंतं करोति । चिन्मतोर्लुगितिमतुपो लुक् । कृतपूर्वीकटं इति न्यायेन द्वितीया । यच्च अनिद्रं यथा भवति तथा अंतः स्वपिति तत् तस्मात्कारणात् अस्याः हृदि अभिनवा प्रेमैव लतिका तां प्रेमलतिकां सेक्तुं मनसिजः प्रवृत्त इति वेद्मि । अत्र लतिकालक्षणः अवयवी निरूपितो नत्वन्यत्किमपि विशेषणमुक्तमिति निरवयवमिदं रूपकम् । आद्यस्य द्वितीयं भेदमाह–**मालेति**। यद्यपि कारिकाकारेण मालोपमा पृथङ्नोक्ता तथापि कारिकावृत्त्योरेककर्तृकतया अभेदविवक्षया उक्तं पूर्ववदिति । उदाहरति–**सौंदर्येति** । सौंदर्यस्य तरंगिणी नदी । तरुणिमोत्कर्षस्य हर्षोद्गमः कांतेः कार्मणकर्म । नर्मरहसामुल्लासनावासभूः । विद्या वक्रगिराम् । विधेः अनवधिप्रावीण्यसाक्षात्क्रिया । पंचशिलीमुखस्य बाणाः । ललनाचूडामणिः सा प्रिया वर्तत इत्यर्थः । अत्रैकस्यां प्रियायां तरंगिणीत्वादयो बहवः आरोप्यंते । [अत्र मुखाद्यवयवानिरुपणान्निरवय(व)त्वम् ।] तृतीयस्य लक्षणमाह–**नियतेति** । नियतं व्यवस्थितमारोपणमुपायो यस्यारोपस्य एवंविधः परस्य उत्तरस्य य आरोपः तत्परंपरितं, तद्विविधं वाचके श्लिष्टे वाचके भेदभाजि वा। तत्राद्यमुदाहरति–**विद्वन्मानसेति** । विद्वन्मानसहंस वैरिकमलासंकोचदीप्तद्युते दुर्गामार्गणनीललोहित समित्स्वीकार-वैश्वानर । सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो । प्राग्भावः पूर्वभावः । वरवीर वैरिंचं वत्सरशतं उच्चैः राज्यं क्रियाः । अत्र मानसमेव चित्तमेव सरोविशेष इत्यारोपो हसारोपे निमित्तम् । एवमुत्तरत्रापि वैरिणां कमलायाः लक्ष्म्याः संकोच एव पद्मानां असंकोचः तत्र सूर्यः । दुर्गाणां नगराणाममार्गणं सिद्धत्वमेव दुर्गायाः देव्याः अन्वेषणं तत्र महेश । समितां युद्धानां स्वीकार एव समिधां ईंधनानां स्वीकारः तत्र वह्ने । सत्ये वचने प्रीतिरेव सत्यां गौर्य्यां अप्रीतिः तद्विधाने दक्षप्रजापते । विजयस्य युद्धोत्कर्षस्य प्राग्भावः प्राथमिकत्वमेव विजयात् अर्जुनात्पूर्वजत्वं तादृश । ननूभयालंकारोयं श्लिष्टपरंपरितं नाम । कथमयमर्थालंकारेषु गण्यते इत्यत आह–**यद्यपीति** । मानसशब्दस्य पर्याये निक्षिप्ते न भवत्येव रूपकप्रतीतिरिति शब्दालंकारता हंसशब्दस्य पर्यायेपि क्षिप्ते भवति रूपकमित्यर्थालंकारता । अतः शब्दार्थालंकाररूपमिदं रूपकं स्यान्नत्वर्थालंकार इत्यत्र कथनं उचितं न भवति यद्यपि तथापि प्रसिध्यनुरोधादत्रोक्तमिति भावः । अथ न केनचिदेतत्परंपरितसंज्ञकमुक्तमित्यत आह–**एकदेशेति** । अन्यैः **रुद्रटा**दिभिरेकदेशविवर्तीत्येतदभिधीयते । द्वितीयं प्रकारमुदाहरति–**भेदभाजीति** । हे राजन् जय एव कुंजरः तस्य आलानं गजवंधनस्थानम् । विपदेव वारिधिः तस्य दृषदां सेतुः । करवाल एव चंडमहाः सूर्यः तस्य पूर्वाद्रिः । श्रियः लीलोपधानम् । संग्राम एवामृतसागरः

तस्य प्रमथनमेव क्रीडाविधिः तस्मिन्मंदरः। वीरवैरिवनितावैधव्यदः ते भुजः राजति। (जय एव कुंजरः) नतु मानसशब्दवत् एकशब्दोत्र उभयार्थोस्तीति भेदभाक्त्वम्। लीलोपधानमित्यत्र उपधानपदे श्लिष्टो वाचकः इत्यनंतरोक्तमेव रूपकमत्र नतु यदिदं प्रस्तुतं श्रियो वनितात्वमपि निरूप्यत इत्याह–**अत्रेति**। श्लिष्टमालारूपकमुदाहरति–**अलौकिकेति**। हे देव अलौकिकश्चासौ महांश्चासावालोकश्च ज्ञानं तेन प्रकाशितं जगत्त्रयं येन। सद्वंशस्य मुक्तारत्नं भवान् कैर्न स्तूयते। सर्वैः स्तूयत इत्यर्थः। अत्र वंशोऽन्वय एव वेणुः तस्य मुक्तारत्नमिति श्लेषः। कुलस्य वेणुत्वारोपः वर्णनीयस्य मुक्तामणित्वारोपे निमित्तम्। अश्लिष्टं मालारूपकमुदाहरति–**निरवधीति**। अनिवर्तितः कौतुकप्रपंचो येन एवंविधं यस्य स्थितं स्थितिः निरवधि निराश्रयं च। इह प्रथमः कूर्ममूर्तिः चतुर्दशलोका एव वल्लयः तासां कंदः स भवान् जयति। आदिक्रमठस्य कंदत्वे लोकानां वल्लीत्वं हेतुः। वाचकश्चात्र न श्लिष्टः। मालाप्रस्तावाद्रशनामुदाहरति–**किसलयेति**। मदनः लतानां किसलयकरैः कामिनीकरकमलैः कमलिनीनां कमलमुखैः योषितां मुखेंदुभिः जगतां संबंधि मनो जयति। किसलयान्येव कराः करा एव कमलानि कमलान्येव मुखानि मुखान्येव इंदवः इति सर्वेषां परस्परसंघट्टनाद्रसना। कारिकायामेवंविधस्य लक्षणं किमिति नोक्तमित्यत आह–**नेति**। उद्रिक्तस्य वैचित्र्यस्याभावात् एवंविधं न लक्षितमित्यर्थः। अपह्नुतिं लक्षयति–**प्रकृतमिति**। प्रकृतस्य उपमेयतायाः। अन्यत् उपमानं। निषेधशब्दार्थमाह-उपमेयमसत्यं कृत्वेति। अपह्नुतिस्त्रिधा अपह्नवपूर्व आरोपः आरोपपूर्वोपह्नवः छलादिशब्दप्रयोगश्चेति। तत्राद्यमुदाहरति। हे शैलतनये पार्वति। परिणतकांतेश्चंद्रस्य वपुषि प्रागल्भ्यं अवाप्तः अयं कलङ्को न विकसति। विगलदमृतस्यन्दशिशिरे अमुष्य उरसि गाढं रतिश्रान्ता यामिनीकामिनी शेते इति मन्ये। अत्र वाक्यद्वयेन चांद्रमसं कलंकं मुख्यया निषेधवृत्त्या मिथ्यात्वेनावस्थाप्य तत्प्रतिवस्तुभूता हृदयाधिशायिनी निशीथिनी नितम्बिनी सत्यतया अवस्थाप्यते। अथं चापह्नवपूर्व आरोपः। पूर्वोऽपह्नवो यथा–विकसदमरनारीनेत्रनीलाब्जखंडान्यधिवसति सदा यः संयमाधःकृतानि। न तु ललितकलापे वर्तते यो मयूरे वितरतु स कुमारो ब्रह्मचर्यश्रियं वः–इति। अत्र स्कन्देनाधःक्रियमाणानि नाकनितम्बिनीनेत्रनीलोत्पलानि न पुनरौपवाह्यबर्हिबर्हाणि इति आरोपोत्तरकालोऽपह्नवः। नकारश्रवणान्निषेधस्य मुख्यत्वम्। छलादिप्रयोगं उदाहरति–**बतेति**। हे सखि प्रियविरहक्रशे अस्मिन् रागिलोके स्मरस्य कियदेतत् वैरं पश्य। बतेति दुःखे। तथाहि। उपवनेषु ये रसालाः तेषु उद्भासिनो ये मधुकराः तव्द्याजेन कामेन प्रतिबाणं कालकूटं उट्टंकितम्। अत्र छलप्रयोगस्य निषेधपर्यवसायितामाह—**न सभृंगाणिति**। एकवाक्यं च स्पष्टम्। प्रतीतिरिति। नाभिधेति यावत्। वैचित्र्यान्तरप्रदर्शनाय पुनरुदाहरति—**अमुष्मिन्निति**। शिवदग्धः कामः कुरंगाक्ष्याः पृथुजघनभागे अमुष्मिन् लावण्यामृतसरसि नूनं निपतितः। यस्य कामस्य अंगांगारकाणां प्रशमपिशुना नाभिमध्ये रोमावलिवपुः इयं धूमस्य शिखा परिणमति। अत्र प्रकृतस्त्वंतररूपाभिधायिशब्दनिबन्धनोऽपह्नव इति पूर्वस्माद् विशेषः। अथ श्लेषं लक्षयति–**श्लेष** इति। एकस्यार्थ-

स्योक्तौ सामान्यसिद्धायां संयोगादिव्यवस्थापकाभावात् उक्तेरनियंत्रणात् अनेकस्यार्थस्याभिधानं अभिधासामर्थ्य आर्थोपश्लेष इति व्याकरोति—**एकार्थेति** प्रत्यर्थं शब्दनिवेश इति मतमाश्रित्य शाब्दश्लेष उक्तः। अयं तु एकस्यैव शब्दस्य बह्वर्थत्वमस्तीति मतमाश्रित्योच्यते इति भेदः। उदाहरति—**उदयमिति**। विभानां कांतीनां अधिपो राजा उदयं समृद्धिं अयते प्राप्नोति। दिक् अन्यायमार्गस्तस्य मालिन्यं निराकुरुते। निद्रामुद्रा आलस्यस्य प्रकर्षं निधनं नाशं प्रापयति। क्रिया धर्मक्रियाः प्रवर्तयति। स्वैरा अनीतिकारिणः। तेषामाचारप्रवृत्तेः कर्तनं छेदनं रचयति। लसत्तेजःपुञ्जो विभाति विभाकरः सूर्यः। अयं पक्षः स्पष्टः। नन्वेकस्य शब्दस्य अर्थद्वयवाचकत्वं कथमित्याशंक्य आह—**अत्रेति**। प्रकरणादेर्नियामकस्यात्राभावात् उभयोर्वाच्यत्वमुचितमिति भावः। समासोक्तिं लक्षयति—**परोक्तिरिति**। श्लिष्टैः समानैर्भेदकैर्विशेषणैः परस्य अप्रस्तुतस्योक्तिः प्रतिपादनं समासोक्तिरित्यर्थः। व्याकरोति—**प्रकृतेति**। विशेष्यस्य उपमेयस्य। उदाहरति—**लहीति**। हे राजन् तुह तव। बाहुफंसं बाहुस्पर्शम्। लहिऊण लब्ध्वा। जीये यस्याः। स कोऽप्युल्लासः। सा जयलच्छी जयलक्ष्मीः। तुह तव। विरहे। ण होजु न भवेत्। सा दुर्वला ननु। बाहुस्पर्शेन पाणिपीडनेन वा दुर्वला निष्प्रभा कृशा च इत्येतानि विशेषणानि कांतया समानानि। जयलक्ष्मीति विशेष्यं तु न सममित्याह—**अत्रेति**। निदर्शनालंकारलक्षकं सूत्रमुपादाय व्याकरोति—**निदर्शनेति**। उपमायां पर्यवसितः सन् स्वार्थनिर्वाहकः असंभवद्वस्तुसंबन्धः निदर्शनालंकारः। उदाहरति—**क्व सूर्येति**। अत्र वाक्ययोः अनुपपद्यमान एव सम्बन्धः। उपमायां पर्यवसितत्वात् उडुपेन सागरतरणमिवेत्ययमर्थो लभ्यते इत्याह—**अत्रेति**। उदाहरणांतरमाह—**यथेति**। विततोर्ध्वरश्मिरज्जावहिमरुचौ उदयति सति हिमधाम्नि चास्तं याति सति अयं गिरिः विलंबिघंटाद्वयपरिवारितवारणेंद्रलीलां वहति। अत्र वारणेंद्रलीलां पर्वतः कथं वहतीति अनुपपद्यमान एव संबंध इति उपमायां पर्यवसानमाह—**अत्रेति**। मालारूपां निदर्शनामुदाहरति—**दोर्भ्यामिति**। भो देव यस्तव गुणान् गदितुमुद्यममादधाति एष पुरुषः दोर्भ्यां तरंगवतीभुजंगं तितीर्षति। करेण हरिणांकबिंबमादातुमिच्छति। मेरुं लिलंघयिषति। अत्रापि तत्र तत्रानुपपद्यमान एव संबंध इति उपमापर्यवसितत्वान्निदर्शनमालायोगान्मालानिदर्शनालंकार इत्यर्थः। संभवद्वस्तुसंबंधान्निदर्शनमाह—**स्वस्वेति**। व्याकरोति—**क्रिययैवेति**। अवगम्यत इति यत् सा निदर्शनेति संबंधः। उदाहरति—**उन्नतमिति**। यो लघुः पुरुषः स उन्नतं पदमवाप्य हेलयैव पतेदिति ब्रुवन् पर्वताग्रगतः पाषाणकणः वायुना कंपितः सन् चारु अधः पतति। पततीति या पतनक्रिया सा स्व तस्य हेतुर्लाघवे सति उन्नतपदप्राप्तिः तयोरन्वय न्नतं पदमवाप्य यो लघुः स पतेदिति विधिक्रिययैव शुद्धयाख्याप्यत इत्याह—**अत्रेति**। ध्रुवमिति त (? स) त्ख्यापनप्रयोगादस्ति वस्तुसंबंधः। दृषत्कण इव सर्वो लोकः पततीति उपमाविश्रांतिश्च। उक्तं च—अभवन्वस्तुसंवन्धो भवन्वा यत्र कल्पयेत्। उपमानोपमेयत्वं कथ्यते सा निदर्शना—इति। अप्रस्तुतप्रशंसालंकारं लक्षयति—**अप्रस्तुतेति**। व्याकरोति—**अप्राकरणिकस्येति**। अस्याः प्रथमं पंचधा विभागमाह—**कार्य इति**। कार्ये प्रस्तुते तदन्यस्य

कारणस्य वचः । निमित्ते प्रस्तुते तदन्यस्य कार्यस्य । सामान्ये प्रस्तुते तदन्यस्य विशेषस्य वचः । विशेषे प्रस्तुते तदन्यस्य सामान्यस्य वचः । तुल्ये प्रस्तुते तदन्यस्य तत्तुल्यस्य वच इति पंचधा विभाग इत्यर्थः । आद्यमुदाहरति–**याता इति**। हे सुंदरी देशान्तरगताः पुरुषाः पुनः किं न मिलन्ति । अतः मत्कृते त्वया चिंता न कार्या । सुतरां कृशासि । स्वभावत एव त्वं कृशा चिंतया तु सुतरां कृशा भविष्यसि । अतो मुञ्च चिंतामित्यर्थः । एवं सबाष्पे मयि कथयति सति लज्जामंथरतारकेण निपतत्पीताश्रुणा चक्षुषा मां दृष्ट्वा तया नायिकया हसितेन भाविमरणोत्साह सूचितः । यदि मां त्यक्त्वा यास्यसि (गमिष्यसि) तदाहं मरिष्य इति सूचितमित्यर्थः । प्रश्नद्वारा कार्यप्रस्तावे प्रस्थानस्य निर्णीतत्वात्कारणं मरणोपक्रमसूचनारूपमभिहितमित्यर्थः । द्वितीयमु दाहरति–**राजन्निति** । राजन् राजसुता मां न पाठयति । देव्योपि तूष्णीं स्थिताः । हे कुब्जे मां भोजय । कुमारसचिवैः अद्यापि किं इत्थं न भुज्यते । इत्थं तवारिभवने पंजराद्ध्वगैर्मुक्तः राजशुकः शून्यवलभौ चित्रस्थानवलोक्य एकैकं आभाषते । शत्रुपलायनरूपकारणे प्रस्तुते पंजरशुकवृत्तांतलक्षणं कार्यमुक्तमित्याह–**अत्रेति** । तृतीयमुदाहरति–**एतदिति** । तस्य पुरुषस्य एतत्कियज्जाड्यं यत्स जडः मुखात् वाङ्मात्रेणैव कमलिनीपत्रे वारिणः कणं मुक्तामणिरित्यमंस्त । अस्मात् अन्यदपि शृणु । शनैः आदीयमाने तत्र अंगुल्यग्रलघुक्रियया प्रविलयिनि सति अयं मणिः क्व उड्डीय गत इति अंतःशुचा अनुदिनं न निद्राति । अत्र जडानां स्वल्पेपि महत्त्वसंभावना भवतीति सामान्ये प्रस्तुते मुक्ताफलभ्रांतिमत्त्वलक्षणो विशेष उक्त इत्याह–**अत्रेति** । चतुर्थमुदाहरति । विष्णुना नरकासुरे हते कोपि तन्मंत्री कंचन नरकासुरसुहृदं प्रतीदमाह । यः वैरनिर्यातनेन सुहृद्वधूबाष्पजलप्रमार्जनं करोति स एव पूज्यः स पुमान् स एव नीतिमान् । तस्य सुजीवितं स श्रियो भाजनम् । विशेषे वक्तव्ये सामान्यमुक्तमित्याह–**अत्रेति** । पंचमस्य त्रैविध्यमाह–**तुल्य इति** । आद्यमुदाहरति–**पुंस्त्वेति** । अयं पुरुषः यदि पुंस्त्वादपि प्रविचलेत् यदि अधोपि यायात् यदि प्रणयने याचने सति महानपि न स्यात् लघुरपि स्यादित्यर्थः । तदपि तथापि विश्वमुद्धरेत् । केनापि पुरुषश्रेष्ठेन इति ईदृशी इयं दिक् प्रकटिता । कृष्णपक्षे पौरुषात् प्रचलनं असुरैरमृतापहारे स्त्रैणावलंबनात् आदिकमठाद्याकारेण अधोयानं बलिबंधनोपक्रमे वामनत्वम् । विश्वाभ्युद्धरणं वराहादिना पृथिव्याद्यभ्युज्जीवनम् । अत्र कस्मिंश्चित्सत्पुरुषे प्रस्तुते तत्तुल्यस्वभावस्य भगवतः परमपुरुषस्य प्रशंसा श्लेषेण गृह्यते । विशेष्ये पुरुषोत्तमपदेपि श्लेषेण श्लेषः । द्वितीयमुदाहरति–**येनेति** । हे चंद्र येन अभ्युदितेन क्लांतिं गमितोसि तत्र रवौ ते त्वया प्रतिकर्तुमेव युज्यते । तस्यैव पादग्रहः पुनर्न युज्यते । पादग्रहः चरणोपसंग्रहः किरणग्रहणं च । यदि क्षीणेनैतदनुष्ठितं तन्निमित्तकमात्मनो गोपनं मनागपि किं न लक्ष्यत इत्यर्थः । एवमस्तु यद्यस्मात्कारणात् भवतो जडधामता व्योम्नि विस्फूर्जति । जडधामता शिशिरकिरणता मंदतेजस्त्वं च । अत्र पादग्रहादाविव चंद्रसूर्ययोर्विशेष्यभूतयोरपि श्लेषाभावात् समासोक्तिः । विशेष्यपदे तु श्लिष्टे श्लेषो भवति । यथा पूर्वोदाहरणे पुरुषोत्तमपदे । तृतीयमुदाहरति–**आदायेति** । सरितां मुखेभ्यः परितः वारि आदाय अनेन दुर्णवेन किमर्जितं तावत् ।

चारि क्षारीकृतं वडवानले हुतं च पातालकुक्षिमध्ये विनिवेशितम्। आयव्ययकारिणि पुरुषे प्रस्तुते तत्सदृशः समुद्रो वर्ण्यते। एवं सादृश्यमात्ररूपामुपमामुदाहृत्य वाच्यस्य संभवासंभवावुदाहरिष्यन् संभवं तावदाह–**इयं चेति**। वाच्ये संभवति प्रतीयमानस्यार्थस्यानध्यारोपेण अध्यारोपानपेक्षयेत्यर्थः। जलाच्छादितभुवनविस्तारपातालमध्यस्य समुद्रस्य लंघनेपि इह हि लोके पोतसाधना बहवः पुरुषः क्रमन्ते प्रवर्तन्ते। आहो उत दैवात् एष कथमपि रिक्तो भवेत् तदानीं अस्य अवटकुहरालोकनेपि को नाम समर्थः स्यात्। अधृष्यस्यापि प्रभोः वरं पूर्णत्वमेव। रिक्तत्वं महतोनर्थायेति तात्पर्यम्। अत्र वाच्ये समुद्रे सर्वाप्युक्तरूपा प्रक्रिया संगच्छते। वाच्यस्यासंभवस्थानमुदाहरति–**क्वचिदिति**। भोः कस्त्वं कथयामि दैवहतकं मां शाखोटकं विद्धि। वैराग्यादिव वदसि। साधु ज्ञातं इदम्। कस्मात्। कथ्यते। अत्र वामेन वटोस्ति। अध्वगजनः सर्वात्मना तं सेवते। मार्गस्थितस्यापि मे परोपकारकरणे छायापि न। अत्र अचेतनेन सह प्रश्नोत्तरयोरसंभवाद्वाच्यस्यासंभवः। संभवासंभवमुदाहरति–**क्वचिदिति**। अपूर्वः रसनाविपर्ययो जिह्वापरिवृत्तिः तस्य विधिः प्रकारः। तस्य गजस्य कर्णयोश्चापलं चपलता। सा दृष्टिः विस्मृता स्वपरयोः दिक् यया। अथवा भूयसा उक्तेन किम्। हे भ्रातः भ्रमर सर्वं विस्मृतवानसि। अंतःशून्यकरः सरंध्रशुंडाकः वारणो गजः अद्यापि त्वया निषेव्यते इति यत् एष ग्रहः आग्रहः कः। अन्यत्र रसनाविपर्ययः पैशून्यम्। कर्णचापलं कर्णजापोपजापशुश्रूषा। मदः दर्पः। वारयतीति वारणो निषेधकः। अंतःशून्यकरः रिक्तहस्तः। अत्र असंभवंतमंशमाह–**अत्रेति**। रसनाविपर्यासादेरध्यारोपशरणत्वाद्वाच्यत्वासंभवेन हेतुर्न भवतीत्यर्थः। संभवंतमंशमाह–**कर्णेति**। कर्णचापलरूपो हेतुरनध्यारोपितः। तत्र वाच्यं संभवतीति यावत्। प्रसंगात्संभवतीत्यंशे अनौचित्यलेशमुल्लिंगयति–**मद** इति। मदविस्मृतेत्यादि विरुद्धमित्याकूतम्। उक्तवैपरीत्येन भ्रमरसेवने तस्य निमित्तत्वात्। इदानीमतिशयोक्त्यलंकारं लक्षयति–**निगीर्येति**। अत्र पंचधा वंधच्छाया। भेदे अभेदः अभेदे भेदः संबंधे असंबंधः असंबंधे संबंधः कार्यकारणपौर्वापर्यविपर्ययश्चेति। तत्र निगीर्येत्यादिना प्रथमो लक्ष्यते। प्रस्तुतस्येत्यादिना द्वितीयः। तृतीयो बहिरनूहनीयः। यद्यर्थोक्तावित्यनेन चतुर्थो लक्ष्यते। कार्यकारणयोरित्यादिना पंचमः। तत्राद्यं प्रकारं व्याकरेति–**उपमानेति**। प्रकृतस्य तदन्येन उपमानेन विषयिणा कवलितस्य विषयरूपतया अध्यवसानं एका अतिशयोक्तिरित्यर्थः। तामुदाहरति–**कमलमिति**। स्त्री वर्ण्यते। अनंभसि कमलं कमले च कुवलये नीलोत्पले तानि कमलकुवलयानि कनकलतिकायां सा च कनकलतिका मृदुसुभगा इतीयं उत्पातपरंपरा का। अत्र मुखादीनां कमलादिभिर्भेदेपि अभेदाध्यवसाय इत्याह–**अत्रेति**। द्वितीयमाह–**यच्चेति**। तच्छब्देन प्रस्तुतमुच्यते। सापरा अभेदे भेदरूपा अतिशयोक्तिरित्यर्थः। तामुदाहरति–**अण्णमिति**। सामा श्यामा। सामणपयावइणो सामान्यप्रजापते रेहव्विअ रेखैव न होइ न भवति। यतः अस्या अणं अन्यत् लडहत्तणं लट(र)भत्वं विलासः अणाविअ अन्यैव वत्तणच्छाया वर्त्तनच्छाया। अत्र लट(र)भत्वादीनां अभेदेपि अन्यत्वेनाध्यवसानात् भेद इत्यर्थः। संबंधेप्यसंबंधो बहिरूहनीयो यथा–अस्यास्सर्गविधौ प्रजापतिरभू-

चंद्रो नु कांतिप्रदः शृंगारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः। वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥ अत्र पुराणब्रह्मनिर्माणसंबंधेप्यसंबंध उक्त इति पुरा (*v. l.* चिरं) तनाः। अस्य तु तदप्यभेद एवांतर्भूतमित्याशयः। असंबंधेपि संबंधमाह—**यदीति**। अर्थात्सामर्थ्यादसंभविनो यत्कल्पनमिति संबंधः। उदाहरति—**राकेति**। राकायां पूर्णिमायां अमृतांशोश्चंद्रस्य वपुरकलंकं चेत् तदा तस्याः मुखं साम्यपराभवमवाप्नुयात्। अत्र वास्तवेप्यसंबंधे संभावनया संबंधः। अंतिमभेदमाह—**कारणस्येति**। उदाहरति—**हृदयमिति**। आदौ प्रथमं मालत्याः हृदयं कुसुमचापबाणेन अधिष्ठितम्। भो रमणीवल्लभ चरमं पश्चाल्लोचनविषयं भजता त्वयाधिष्ठितम्। कारणस्य कांतेनाधिष्ठितत्वस्य शीघ्रकारित्वं वक्तुं कार्यस्य कंदर्पाधिष्ठितत्वस्य प्रथममुक्तिरित्यर्थः। प्रतिवस्तूपमालंकारं लक्षयति—**प्रतीति**। नैकं पदं द्विः प्रयोक्तव्यमिति कथितपदत्वस्य दुष्टतयाभिहितत्वात् शब्दभेदेन साधारणो धर्मः उपमेयवाक्ये उपमानवाक्ये च उपादीयते। वस्तुनो वाक्यार्थस्य उपमानत्वात् सा प्रतिवस्तूपमेत्यन्वयः। उदाहरति—**यथेति**। देवीभावं गमिता देवतात्वं प्रापिता एषा परिवारपदं कुटुंबत्वं कथं भजति खलु। यतः दैवतरूपांकितं रत्नं परिभोगयोग्यं न भवति। अत्र परिवारपदयोग्यत्वानौचित्यं परिभोगयोग्यत्वाभावश्चेत्येकमेव सामान्यं वाक्यद्वयेपि पृथक् निर्दिश्यते। अस्यैव मालामुदाहरति—**यदीति**। अनलो यदि दहति अत्र किमद्भुतम्। अद्रिषु यदि गौरवं ततः किम्। महोदधेरंबु सदैव लवणम्। सतां प्रकृतिरेवाविषादिता दुःखरहितता। अत्र पर्यायांतरेण अद्भुताभाव एव प्रतिपाद्यत इति साधारणधर्मोक्तिरिति मालारूपत्वम्। एवमन्यत्रापि मालावैचित्र्यमूह्यमित्याह—**एवमिति**। दृष्टांतालंकारं लक्षयति—**दृष्टांत** इति। साधारणधर्मादीनामित्यत्रादिशब्देनोपमानोपमेययोर्ग्रहणम्। उदाहरति-**त्वयीति**। मनोभवज्वलितं तस्याः मनः त्वयि दृष्ट एव निर्वाति निर्वृतं भवति। हि यतः कुमुद्वत्याः कुमुदं हिमांशोः आलोके विकसति। अत्र निर्वाणस्य विकासात्मना प्रतिबिंबनम्। न केवलमेष साधर्म्येणैव यावद्वैधर्म्येणापीत्याह—**वैधर्म्येणेति**। उदाहरति—**तवेति**। साहसकर्मणि शर्म सुखं यस्य तस्य करं कृपाणांतिकं आनिनीषतः तव आहवे परेषां शत्रूणां भटाः योद्धारः विशरारुतां अहिंसकत्वं अगुः। हि यतः। पांसवः अवाते स्थिरतां दधति। उक्तदार्ष्टांतिकवैलक्षण्येन दृष्टांताभिधानाद्वैधर्म्योदाहरणम्। दीपकालंकारं लक्षयति—**सकृदिति**। प्रकृताप्रकृतात्मनां उपमानोपमेयानां धर्मस्य क्रियादेः बहुषु कारकेषु सकृद्वृत्तिः क्रियादीपकम्। कारकस्य च बह्वीषु क्रियासु सैव सकृद्वृत्तिः कारकदीपकमित्यर्थः। क्रियादिरित्यादिशब्दाद्गुणस्वीकारः। तत्राद्यमुदाहरति—**यथेति**। किवणाणं कृपणानां धणं धनं णायाणं नागानां फणामणिः सीहाण सिंहानां केसराइं केसराः। कुलवालिआण कुलपा (बा) लिकानां च थणा स्तनाः अमुआण अमृतानां कुदो कुतः छिप्पंति स्पृशंति। अस्यां गाथायां छिप्पंति इति क्रिया बहुषु कर्मकारकेषु धनमणिकेसरस्तनलक्षणेषु वृत्ता दीप्यत इति क्रियादीपकम्। तच्चादिमध्यांतभेदात् त्रिविधम्। तत्रांतविषयमुदाहृतम्। चरंति चतुरंभोधिवेलोद्यानेषु इत्यादिकमादिविषयम्। संचारपूतानि दिगंतराणीत्यादिकं मध्यवि-

षयं च स्वयमूहनीयम् । द्वितीयमुदाहरति—**स्विद्यतीति** । नवविवाहा वधूः शयने स्विद्यति कूणति वेल्लति विचलति निमिषति तिर्यग्विलोकयति अंतर्नंदति चुंबितुमिच्छति । एतासु बह्वीषु क्रियासु वधूलक्षणकर्तृकारस्यवृत्तिरिति कारकदीपकमित्यर्थः । मालदीपकं लक्षयति—**मालेति** । गुणावहमुत्कर्षहेतुः । व्याकरोति—**पूर्वेति** । उदाहरति—**संग्रामेति** । भो राजन् संग्रामांगणमागतेन भवता चापे समारोपिते सति परिपंथियोधनिवहे सांमुख्यं संप्राप्ते सति त्वया एतैः एतत्समासादितम् । कैः किम् । कोदंडेन शराः शरैः अरिशिरस्तेनापि भूमंडलं तेन त्वं त्वयापि यशोराशिः तेनापि लोकत्रयम् । अत्र कोदंडादिना पूर्वेण क्रमात् शरादीनामुत्तरेषामुत्कर्षो विहितः । सांमुख्यासादनक्रियानिबंधनं च दीपन द्वितीयपादस्य पृथक्क्रियायामनौचित्यात् । तुल्ययोगितामाह—**नियतानामिति** । प्रस्तुताप्रस्तुतानां समासे दीपकं व्यासे तुल्ययोगितेत्यभिप्रेत्य व्याकरोति—**नियतानामिति** । प्राकरणिकानामेव तुल्ययोगितामुदाहरति—**पांड्विति** । हे सखि तव पांडु क्षामं वदनं सरसं हृदयं अलसं वपुश्च हृदयमध्ये नितातं क्षेत्रियरोगं आवेदयति । क्षेत्रे परशरीरे चिकित्स्यः असाध्य इत्यर्थः । अत्र वदनहृदयवपूंषि प्राकरणिकानि । नायिकावयवभूतत्वात् । तेषां रोगावेदनरूपो धर्मः सकृदुपादीयत इति तुल्ययोगितालंकार इत्यर्थः । अप्राकरणिकानां तुल्ययोगितामुदाहरति—**कुमुदेति** । तस्याः कांतायाः ललितविलासजुषोः दृशोः पुरः कुमुदकमलनीलोत्पलावली का । तदाननस्य पुरः अमृतं चंद्रः कमलं च युगपत्प्रतिहतम् । अत्र कुमुदादीन्यप्राकरणिकानि नायिकालोचनाद्युपमानत्वात्सर्वेषां तेषां च किंवृत्तेन क्षिप्यमाणत्वं धर्मः सकृदुपादीयते । कुमुदस्य लोचनोपमानत्वमन्यैर्दूषितमपि प्रसिध्यनुरोधादुक्तम् । एवममृतादीनां तन्मुखोपमानभूतानां प्रतिहतत्वं नाम धर्मः सकृन्निर्दिष्ट इत्येवं तुल्ययोगितेत्यर्थः । व्यतिरेकालंकारं लक्षयति—**उपमानादिति** । स एव इति व्यतिरेक इत्येव व्यवह्रियते । न्यूनताया अपि व्यतिरेकत्वात् तद्व्यावृत्त्यर्थमाह—**आधिक्यमिति** । चिरंतनाः खलु भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेक इत्यसूत्रयन् । आधिक्यमधिकगुण (त्व) लक्षणं यथायोगमुदाहृत्य न्यूनगुणत्वरूपं विपर्ययं क्षीण इत्यादावुदाजह्रुः । व्याचचक्षिर चंद्रापेक्षया यौवनस्य क्षीणगुणत्वं शशिवैलक्षण्येन तस्य अपुनरागमनादिति । तत्र विप्रतिपद्यमान आह—**क्षीणक्षीण इति** । हे सुंदरि क्षीणः क्षीणश्चंद्रः भूयो भूयोभिवर्धत इति (संयातं) यातं यौवनं अनिवृत्ति तु अतो विरम कोपं मुञ्च प्रसीद । केनचित् गजनिमीलिताशालिनेत्यर्थः । वाक्यार्थस्य यावत्तात्पर्यमपर्यालोचितत्वादित्याह—**तदयुक्तमिति** । यतोत्रापि उपमानादुपमेयस्याधिक्यं न विपर्यय इत्याह—**यौवनेति** । चंद्रापेक्षया तारुण्यस्य गुणो यदस्थैर्यं तस्याधिक्यं अन्यथा वाक्यार्थशक्तिव्याकोपः स्यादिति भावः । इत्थं विप्रतिपत्तिं निराकृत्य विभागमाह—**हेत्वोरिति** । त्रिरष्टेति चतुर्विंशतिः । उपमेयविषयं उत्कर्षनिमित्तं न विपर्ययः । उपमानविषयं तु निकर्षकारणं न विपर्ययः । **एकतरस्येति** हेत्वोरनुक्ती द्वे हेतुद्वयस्य अनुक्तिरेकेति अनुक्तित्रयम् । एतदुक्तं भवति । आधिक्यस्य हेतुरुपमेयगतमुत्कर्षनिमित्तं उपमानगतं निकर्षकारणं अनयोर्हेत्वोरुक्तावेको भेदः । द्वयोर्हेत्वोरनुक्तावेकः । उत्कर्षहेतोरुक्तौ अपकर्षहेतोरनुक्तावपरः । उत्कर्षहेतोरनुक्तौ अपकर्षहेतोरुक्तावेकः एवं चत्वारो

भेदाः। एत एव शब्देन इवादिना अर्थेन तुल्यादिना आक्षेपेण च साम्ये प्रतिपादिते द्वादश भेदाः। एते द्वादशभेदाः श्लेषेणापि भवंतीति चतुर्विंशति भेदा इति। आद्यमुदाहरति–**असीति।** बहूनां शत्रूणां निराकरणे खड्गमात्रसहायस्य महाधृतेः अस्य राज्ञः अन्यतुच्छजनस्येव (वि) स्मयो न। अत्र उपमाने तुच्छत्वमपकर्षनिमित्तं उपमेये महाधृतित्वमुत्कर्षहेतुः अतो हेत्वोरुक्तिः। अन्यदप्यत्रोदाहर्तुं शक्यमित्याह–**अत्रैवेति**। पर्यायेण व्यत्ययेन कदाचिदेकस्य अनुक्तिः कदाचिदपरस्येत्यर्थः। नूनमन्यजनस्येव न स्मयोस्य महाधृतेः–इति पाठे उपमानापकर्षहेतोरनुक्तिः। अन्यतुच्छजनस्येव न स्मयोस्य महीपतेरिति पाठे उपमेयोत्कर्षहेतोरनुक्तिः। नूनमन्यजनस्येव न स्मयोस्य महीपतेरिति पाठे युगपद्धेत्वोरनुक्तिः। उत्तरत्राप्येषारीतिरनुपसरणीयेत्याह–**एवमिति**। उक्तसाम्यस्य शाब्दत्वमाह–**अत्रेति**। एवं श (? शा) ब्देन साम्येन चतुरो भेदानिभिधाय पाठभेदेन आर्थेनापि चतुरो भेदानाह–**असीति।** तेन तुल्यं क्रिया चेद्वतिरिति तुल्यार्थे वतेर्विधानादार्थमौपम्यमित्याह–**तुल्येति**। वतिप्रयोगे हेत्वोरुक्तिरेकः तुच्छपदानुपादानेऽपरः धृतिपदानुपादानेऽन्यः उभयानुपादाने एक इति चत्वारो भेदा इत्यर्थः। आक्षेपे अपरान् चतुरो भेदानुदाहरति–**इयमिति।** सुनयना इयं दासीकृततामरसश्रिया अकलंकेन आननेन कलंकिनमिंदुं जयति। अकलंकेनेति उत्कर्षहेतुः। कलंकिनमित्यपकर्षहेतुः। उभयोरुक्तौ एकः। आननेन मनोज्ञेन जयतीन्दुं कलंकिनं इति पाठे (?) उत्कर्षहेत्वनुक्तौ द्वितीयः। आननेनाकलंकेन जयत्यमृतदीधितिमिति पाठे उत्कर्षहेत्वनुक्तौ तृतीयः। आननेन मनोज्ञेन जयत्यमृतदीधितिमित्युभयानुक्तौ चतुर्थः। एवं द्वादशभेदानुदाहृत्य शाब्देन श्लिष्टानपरान् चतुरो भेदानुदाहरति–**जितेति** जितेंद्रियतया सम्यक् विद्यावृद्धनिषेविणः अतिगाढगुणस्यास्य गुणाः अब्जवद्भंगुरा न भवंति। अत्र तत्र तस्येवेति इवार्थे वतिविधानात् शाब्दमौपम्यम्। गुणाः सौजन्यादयः मृणालसूत्राणि वेति गुणशब्दः श्लिष्टः। विद्यावृद्धनिषेवणं गाढगुणोत्कर्षे हेतुः। भंगुरगुणनिकर्षहेतुर्नोपात्त इति उपमानगतनित्कर्षहेत्वनुपादाने शाब्दौपम्ये श्लेषव्यतिरेकस्य तृतीयो भेदो दर्शितः। अवशिष्टं त्रयं स्वयमूह्यम्। तुल्यादिना अर्थेनापि चतुरो भेदानुदाहरति–**अखंडेति।** पश्य श्रीमानखंडमंडलः एष पृथिवीपतिः जातु कदाचित् निशाकरवत् कलावैकल्यं नागतः। अत्र तुल्यार्थे वतिः तेनतुल्यंक्रियाचेद्वतिरित्यनेन। कला विद्याभागश्च। अत्र उपमेये अखंडमंडलत्वे श्रीमत्त्वं हेतुः। कलावैकल्यहेतुर्नोक्त इति उपमानगतनिकर्षकारणानुपादाने आर्थौपम्ये श्लेषव्यतिरिक्तस्य तृतीयो भेदो दर्शितः। उभयानुक्तावुदाहरणमाह–**हरविदिति।** भो विभो त्वं कदाचित् हरवत् विषमदृष्टिर्नासि। हरिवद्विधूतविततवृषश्वनासि। रविरिव दुःसहकरतापितभूः कदापि नासि। हरेण तुल्यं वर्तत इत्यादि तुल्यार्थे वतेर्विधानादार्थौपम्यम्। विषमादयः श्लिष्टा इति उपमानोपमेयगतात्कर्षापकर्षहेत्वोरनुपादाने आर्थौपम्ये श्लेषव्यतिरेकस्य चतुर्थो भेदो दर्शितः। उत्कर्षापकर्षहेत्वोरन्यतरस्यानुक्तौ उदाहरणद्वयं स्वयमूह्यम् श्लेषव्यतिरकस्याक्षेपे उभयोपादानरूपं प्रथमं भेदमाह–**नित्योदितेति।** नित्योदितप्रतापेन भास्वतानेन भूपेन त्रियामामीलितप्रभः एष भास्वान्विनिर्जितः। अत्र वर्णनीये भास्वत्त्वं परपरिभवासहत्वं अन्यत्र

सूर्यत्वमिति श्लिष्टः इति उपमेयोपमानोत्कर्षनिकर्षहेत्वोरुपादाने आक्षेपौपम्ये श्लेषव्यतिरिक्तस्य प्रथमो भेदो दर्शितः । हेत्वोरनुपादाने चतुर्थं भेदमुदाहरति-**यथेति** । यत्र नगर्यां स्वच्छात्मतागुणसमुल्लसितेंदुविंबं विंबप्रभाधरं अकृत्रिमहृद्यगंधं अंगनानामाननं रजनीषु अतीव पिबतां यूनां तृष्णां जहार मधु न हार । अत्र मधुपक्षे आजनशब्दे च समुल्लसितशब्दः प्रतिविंबार्थः । अत्राक्षिप्तोपमात्वं कथमित्यत्राह-**अत्रेति** । अत्र तृष्णाया हरणे हेतुर्नोपात्त इति आक्षेपौपम्ये श्लेषव्यतिरेकस्य चतुर्थो भेदो दर्शितः । द्वितीयतृतीयौ स्वयमूहनीयौ । एवं श्लिष्टभेदेषु द्वादशेषु श्लिष्टोक्तियोग्यस्य पदस्य पृथगुपादाने अन्ये द्वादश भेदा भवंति तेप्युदाहार्या इत्याह-**इत्येवमिति** । या शैशिरी श्रीस्तपसा मासेनैकेन विश्रुता । तपसा तां सुदीर्घेण दूराद्विदधतीमधः ॥ एकत्र तपो माघमासः अन्यत्र कृच्छ्रादि अभ्युदयहेतुः । इवादयश्चानुपात्ता अपि सामर्थ्यगम्याः । अत्र तप इति श्लिष्टोक्तियोग्यं पदं पृथगुपात्तं अतोयमपि श्लेषव्यतिरेकः । आक्षिप्तौपम्ये उभयोपादाने सति एवमन्येप्येकादशोप्यूहनीयाः । आक्षेपालंकारं लक्षयति-**निषेध** इति । व्याकरोति-**विवक्षितस्येति** । वक्ष्यमाणविषयमुदाहरति-ए **एहीति** । ए अयि सखि एहि गच्छावः कीयेवि कस्या अपि कए कृते किं किमपि णिक्कि निष्कृप ण भणामि न भणामि । अहवा अथवा अलं अविआरिअकज्जारंभआरिणी अविचारित-कार्यारंभिणी मरउ म्रियतां न भणिस्सं न भणिष्यामि । अत्र निःकृप न भणामीत्युक्ते अर्थात्सम्यग्भणामीति प्रतिज्ञा । न भणिष्यामीति निषेधात् वक्ष्यमाणविषयोयमाक्षेपः । उक्तविषयमुदाहरति—**ज्योत्स्नेति** । भो विभो । आः खेदे । तस्याः अंतर्मानसं प्रभवता त्वया ज्योत्स्ना मोक्तिकदाम चंदनरसः शीतांशुकांतद्रवः कर्पूरं कदली मृणालवलयानि अंभोजिनीपल्लवाः स्फुलिंगोत्करव्यापाराय भवंति । हंत इति खेदे । अनेनोक्तेन किम् । न ब्रूमहे । अत्र ज्योत्स्नादीनि तस्यास्तापाय भवंतीति सामान्येनोक्तस्य क्वचिदंशे निषेध इति उक्तविषयोयमाक्षेपः । विभावनालंकारं लक्षयति—**क्रियाया इति** । व्याकरोति—**हेत्विति** । उदाहरति—**यथेति** । सा नलिनी कुसुमितलताभिरहतापि रुजमधत्त । अलिकुलैरदष्टापि परिवर्त्तते स्म । लहरीभिरलोलिताप्यघूर्णत । अत्र लताहननादिरूपे हेतुक्रियानिषेधेपि रुगादिकार्यस्य विशेषेणाभिव्यक्तिर्विभावना । विशेषोक्तिं लक्षयति—**विशेषोक्तिरिति** । व्याकरोति—**मिलितेष्विति** । अनुक्तोक्ताचिंत्यनिमित्तभेदात्सा त्रिविधेत्याह-**अनुक्तेति** । आद्यामुदाहरति-**निद्रेति** । निद्रानिवृत्तौ द्युरत्ने उदिते सखीजने द्वारपदं पराप्ते भुजंगे श्लथीकृताश्लेषरसे सत्यपि सा स्वंगना आलिङ्गनतो न चचाल । अत्र निद्रानाशादिकारणसामग्र्यां सत्यामपि आलिंगनपरित्यागलक्षणं कार्यं न लक्ष्यत इति विशेषोक्तिः । अत्र संभोगौत्सुक्यलक्षणं निमित्तं नोक्तमित्यर्थः । उक्तनिमित्तामुदाहरति-**कर्पूर इवेति** । कर्पूर इव दग्धोपि यः कामः जने जने शक्तिमान् अवार्यवीर्याय तस्मै मकरकेतवे नमोस्तु । दाहलक्षणे कारणे सत्यपि अशक्तिमत्त्वस्य कार्यस्याभावः । अवार्यवीर्यत्वं च निमित्तमुक्तं । अचिंत्यनिमित्तामुदाहरति-**स एक** इति । एकः कुसुमायुधः सः त्रीणि जगंति जयति । यस्य तनुं हरतापि शंभुना बलं न हृतम् । अत्र तनुहरणे सत्यपि बलहरणस्य कार्यस्यानुक्तिः । तत्र

च निमित्तमचिंत्यं पारमेश्वरस्य प्रभावस्य पर्यनुयोगानर्हत्वात । यथासंख्यालंकारं लक्षयति–**यथासंख्यमिति।** प्रथमनिर्दिष्टाः पश्चान्निर्दिष्टाश्चेति द्विविधाः। तेषां मध्ये आद्यैः पश्चान्निर्दिष्टानां क्रमेणान्वयो यथासंख्यालंकार इत्यर्थः । तमुदाहरति–**एक इति**। हे देव एकस्त्वं द्विषां विदुषां मृगीदृशां चेतसि क्रमेण शौर्यौष्मणा तापं च विनयेन संमदरसं च लीलया रतिं चं पुष्णन् त्रिधा वससि। चित्रम्। अर्थान्तरन्यासालंकारं लक्षयति–**सामान्यमिति**। यत्र सामान्यं विशेषेण समर्थ्यते विशेषो वा सामान्येनेति भेदद्वयम्। तदपि साधर्म्यवैधर्म्याभ्यां द्विविधमिति चत्वारो भेदाः इत्याह–**साधर्म्येणेति**। साधर्म्येणाद्यमुदाहरति–**निजेति**। निजदोषेण आच्छादितचेतसां पुरुषाणां सुंदरमेव वस्तु विपरीतं भाति। पित्तोपहतः पुरुषः शशिशुभ्रमपि शंखं पीतं पश्यति। अत्र दुष्टचित्तलक्षणं सामान्यं पित्तोपहतत्वेन विशेषेण समर्थ्यते। **सुसितेति**। सुसिते कौमुदीमहसि कदाचन सुसितवसनालंकारायां स्वैरं यांत्यां सुदृशि, चंद्रो अस्तंगतोभूत्। तदनु भवतः कीर्तिः केनापि अगीयत येन यशोगानेन मुक्ताशंका सती गृहं अगात् अतस्त्वं क्व शुभप्रदो नासि। अपि तु सर्वत्र। अभिसारिकाकारो विशेषः क्वेति सर्वाक्षेपिणा सामान्येन साधर्म्यद्वारा समर्थ्यते। वैधर्म्येणाद्यमुदाहरति–**गुणानामिति**। धुर्यः पुरुषः गुणानामेव दौरात्म्यात् धुरि नियुज्यते। अनुपजातकिणस्कंधो गली कुत्सितो गलोस्यास्तीति गली यो वलीवर्दः गले वलादासंजितं युगं पातयति स गली गौः सुखं स्वपिति। अत्र गुणानामिति सामान्यं गलीति विशेषेण सुखमिति वैधर्म्यद्वारा समर्थ्यते। वैधर्म्येण द्वितीयमुदाहरति–**अहो हि मे इति।** कश्चिदप्रियं दैवोन्नतं विवक्षन्नाह–म आयुषा बह्वपराद्धं अहो यद्यस्मान्मया ईदृशमप्रियं वाच्यम्। ये पुरुषाः सुहृदः पराभवमदृष्ट्वैव विनाशं गताः त एव जगति धन्याः। अत्र सुहृदं प्रति अप्रियं विवक्षन् विशेषरूपः धन्या इति सामान्येन अहमधन्य इति वैधर्म्येण समर्थ्यते। विरोधालंकारं लक्षयति–**विरोध** इति। जातेर्जात्यादिभिः सह चत्वारो विरोधाः। गुणस्य गुणादिभिस्त्रयः। क्रियायाः क्रियाद्रव्याभ्यां द्वौ। द्रव्यस्य द्रव्येणैकः। इति दश भेदा इत्याह–**जातिरिति**। जात्या विरुद्धां जातिमुदाहरति–**अभिनवेति**। हे सुभग विधिवशतः त्वद्विरहाशनिपाते अस्या मृगदृशः नूतनकमलिनीपल्लवमृणालवलयादिकं दावानलराशिः। अत्र नलिनीकिसलयादिजात्या दवदहनजातिर्विरुद्धा विरुद्धगुणकत्वात्। सा च विरहवेदनया परिह्रियते। जात्या विरुद्धं गुणमुदाहरति–**गिरय इति**। हे नरनाथ तव समीपे गिरयोपि नियतं अनुन्नतियुक्ताः मरुदपि च वलरहितः। अब्धयोपि अगंभीराः। भूमिरप्यतिलघुः। अत्र अनौन्नत्यादिर्गुणो गिर्यादिजात्या विरुध्यते। स वर्णनीयस्य महाप्रभावतया परिह्रियते। जात्या विरुद्धां क्रियामुदाहरति–**येषामिति**। हे राजन् तीक्ष्णः स प्रसिद्धः खड्गोपि येषां राज्ञां कंठपरिग्रहप्रणयितां प्राप्य अनुरज्यते अनुरक्तो भवति संगरसंगसक्तमनसां तेषां रिपूणां पांसूनां पटलैः त्वया प्रसाधनविधिर्निष्पाद्यते कौतुकम्। अत्र तीक्ष्णया खड्गजात्या समनुरंजनक्रिया विरुध्यते। पांसुत्वजात्या मंडनक्रिया विरुध्यते साचारिविजयेन समाधीयते। श्लेषच्छाया वा(*v. l.*चा)स्य सहकारिणी। जात्या विरुद्धं द्रव्यमुदाहरति–**सृजतीति**। य इदं जगद्धेलयैव सृजति अवति च संहरति च

सोपि जनार्दनः अवसरवशान्मत्स्यो जातः इदं चित्रम् । अत्र शफरत्वजातेर्भगवता जनार्दनद्रव्येण सह विरोधः। स जगद्रक्षणेन परिह्रियते। गुणेन विरुद्धं गुणमुदाहरति-**सततमिति**। हे नृपते त्वयि सति द्विजपत्नीनां सरोजसुकुमाराः कराः सततं मुसलासंगात् बहुतरगृहकार्यघटनया कठिना भवंति। अत्र सौकुमार्यस्य गुणस्य काठिन्यगुणेन विरोधः। स राजौदार्यात्समाधीयते। गुणेन विरुद्धां क्रियामुदाहरति-**पेशलमिति**। कोमलमपि दुर्जनवचनं सतत्त्वविदां तत्त्वज्ञानां पुरुषाणां मानसं दहतितराम्। कर्कशमपि सुजनवाक्यं चंदनरसवत्प्रमोदयति। अत्र पेशलत्वस्य गुणस्य दाहलक्षणक्रियया पारुष्यस्य प्रमोदरूपया च विरोधः। स खलवचनस्य दुःसहत्वात् सुजनवाक्यस्य हृद्यत्वाच्च परिहरणीयः। गुणेन विरुद्धं द्रव्यमुदाहरति-**क्रौञ्चेति**। यन्मार्गणानर्गलशातपाते सति उद्दामदृषदृढः असौ क्रौंचाद्रिः नवांभोजदलाभिजातः अभूत् स भार्गवः अपूर्वसृष्टिः सत्यम्। शातो वज्रम्। अत्र कमलदलवत्सौकुमार्यस्य गुणस्य पर्वतविशेषरूपद्रव्येण विरोधः स च भार्गवस्य गाढप्रहारितया समाधीयते। क्रियया विरुद्धां क्रियामुदाहरति-**परिच्छेदेति**। परिच्छेदरहितः सकलवचनानामगोचरः। पुनः अस्मिन् जन्मनि यः अनुभवपथं न गतवान्। विवेकनाशात् उपचितमहामोहगहनः कोपि विकारः अंतर्जडयति च तापं च कुरुते। अत्र जडीकरणतापकरणयोः क्रिययोर्विरोधः। औत्सुक्योत्कर्षात् परिह्रियते। क्रियाविरुद्धं द्रव्यमुदाहरति-**अयमिति**। तृष्णातरलितमनोभिः अस्माभिरयमेको जलनिधिः वारां उदकानां निलयः रत्नाकर इति च श्रितः। निजकरपुटीकोटरगतं ताम्यंतः तिमयः मत्स्याः मकराश्च यस्मिन्। एनं समुद्रं मुनिः अगस्त्यमुनिः आपास्यतीति क एवं जानीते। अत्र जलधिपानक्रियाया अगस्त्यरूपद्रव्येण सह विरोधः। सः अगस्त्यमहिम्ना परिह्रियते। द्रव्येण विरुद्धं द्रव्यमुदाहरति-**समदेति**। हे क्षितितिलक राजन् त्वयि तटजुषि सति शंकरचूडापगापि समदमतंगजमदजलनिष्यंदतरंगिणीपरिष्वंगात् कालिंदी भवति। अत्र गंगाकालिंदीद्रव्ययोर्विरोधः मदजलकृतनीलिममत्त्वेन परिह्रियते। स्वभावोक्त्यलंकारं लक्षयति-**स्वभावोक्तिरिति**। द्वयोः क्रियारूपयोर्वर्णनं स्वभावोक्तिः। रूपं च द्विधा वर्णः संस्थानं च। ननु डिंभादेरिति षष्ठ्यैव क्रियारूपयोस्तत्संबंधित्वावगमात्किं स्वशब्दोपादानेनेत्याशंक्याह-**स्वयोरिति**। उदाहरति-**पश्चादिति**। शयनादुत्थितः अश्वः पश्चादंघ्री प्रसार्य त्रिकनतिविततं अंगं उच्चैः द्राघयित्वा दीर्घीकृत्य आभुग्नकंठः सन् उरसि मुखमासज्य धूलिधूम्रां सटां विधूय घासग्रासाभिलाषादनवरतचलत्प्रोथतुंडो मंदं शब्दायमानः खुरेण क्ष्मां लिखति। अत्रांघ्रिप्रसरणांगदीर्घीकरणमुखवक्षोलगनानि संस्थानोक्तयः धूलिधूम्रां इति वर्णस्योक्तिः चलत्प्रोथतुंड इति संस्थानोक्तिः शब्दायमानो विलिखतीति च पदद्वये क्रियाया उक्तिः। व्याजस्तुत्यलंकारं लक्षयति-**व्याजस्तुतिरिति**। मुखे प्रारंभे निंदा श्रूयमाणा निंदेत्यर्थः। रूढिः अन्यथा स्तुतौ वाक्यतात्पर्यमित्यर्थः। प्रारंभे स्तुतिः श्रूयमाणा स्तुतिः रूढिः अन्यथा निंदायामेव तात्पर्यमित्यर्थः। यत्र स्तुतिरभिधीयमाना प्रमाणांतराद्बाधितस्वरूपा निंदायां पर्यवस्यति तत्र व्याजरूपा स्तुतिः। यत्र तु

निंदा अभिधीयमाना पूर्ववद्बाधितस्वरूपा स्तुतौ पर्यवस्यति तत्र व्याजेन स्तुतिः । व्याजनिंदामुदाहरति—**हत्वेति** । उपरोधेन दाक्षिण्येन वंध्यं मनो येषां तेषां मौलिः अग्रणीः त्वां हित्वा परः अन्यो न । हे राजन् त्वद्विधः कोपि निर्दाक्षिण्यो नास्तीत्यर्थः । लज्जावर्जनं रमामंतरेणान्यत्र न दृश्यते । लक्ष्मीसदृशं निर्लज्जं किमपि नास्तीत्यर्थः । यो भवान्मुखशतैरेत्याश्रितायाः श्रियः त्यागं तनुते त्यागकृतावमाननं प्राप्यापि यस्या रमायाः स्थितिस्त्वय्येव । व्याजस्तुतिमुदाहरति—**हे इति** । हेलाजितबोधिसत्व हे तोयधे वचसां विस्तरैः किम् । परहिताधाने गृहीतव्रतः त्वत्सदृशः परो नास्ति । यत् यस्मात्कारणात् तृष्यतः पांथस्य जनस्य या सलिलप्रदानरूपोपकारघटना तत्र वैमुख्यमनादरः तेन लब्धस्य दुःकीर्तिपुंजस्य प्रोद्वहने मरुस्थलस्य साहायकं करोषि क्षारोदकत्वात्। सहोक्त्यलंकारं लक्षयति—**सा सहोक्तिरित्यादि** । अर्थग्रहणं पर्यायस्वीकाराय । बलादित्यनुच्यमाने कस्यचिदेव वाचकत्वाद्विवाचकत्वसिद्धेः । वाचकत्वं च विविच्यमानं क्वचिदभिधायकत्वं क्वचिदवबोधकत्वमित्याह—**उभयस्येति** । उदाहरति—**सहेति** हे सुहअ सुभग तुह तव विउए वियोगे उव्वेरीए (*v. l.* उच्वेविरीए) उद्वेजनशीलायाः तीए तस्याः सासदंडा श्वासदंडाः दिअहणिसाहि दिवसनिशाभिः सह दीहराः दीर्घाः बाहधारा बाष्पधाराः मणिवलएहि मणिवलयैः सह गलंति, तणुलदाए चसह तनुलतया च सह जीविदासा जीविताशा दुर्बला । अत्र श्वासदंडादिविषयस्य दैर्घ्यादेः शाब्दत्वम् । यत्र 'सह युक्ते प्रधान' इति तृतीया तत्र नियमेन गुणभावादार्थत्वमित्याह—**श्वासेति** । औपम्यविवक्षाव्यतिरेकेण सहोक्तिमात्रं नालंकारः । यथाः अनेन सार्धं विरहांबुराशेशीस्तीरेषु तालीवनमर्मरेष्विति । अस्या मालावैचित्र्यं यथा, उत्क्षिप्तं सह कौशिकस्य पुलकैः सार्धं मुखैर्नामितं, भूपानां जनकस्य संशयधिया साकं समास्फालितं, वैदेह्या मनसा समं तदधुनाकृष्टं ततो भार्गवप्रौढाहंकृतिकं दलेन च समं भग्नं तदैशं धनुरिति । अत्र कार्मुक (? कर्म) साहित्यात् सहोक्तिः पूर्वत्र कर्तृसाहित्यादित्यपि भेद उन्नेयः ॥ विनोक्त्यलंकारं लक्षयति—**विनोक्तिरिति** । यत्र अन्येन विना अन्यः सन् न भवति अशोभन इत्यर्थः । इतरः अशोभन इत्यर्थः । आद्यमुदाहरति—**अरुचिरिति** । शशी निशया विना अरुचिः रुचिरहितः अशोभन इत्यर्थः । महत्तम इति रूपकं तमोरुपा सा निशा सापि शशिना विना अरुचिः । उभयेन विना कामिनोः मनोभवस्फुरितं नैव चकास्ति । द्वितीयमुदाहरति—**मृगेति** । अयं राजसूनुः मृगलोचनया विना विचित्रव्यवहारप्रतिभाप्रभाप्रगल्भः । पूर्वं स्त्रीमोहितो व्यवहारज्ञो नासीत् इदानीं तया विना व्यवहारज्ञः शोभन इत्यर्थः । अयं तेन दुष्टसुहृदा विना अमृतद्युतिसुंदराशयः । पूर्वं दुष्टसुहृदा दुष्टबुद्धिः इदानीं तद्विरहित (? तः) शोभनचित्तः ॥ परिवृत्त्यलंकारं लक्षयति—**परिवृत्तिरिति** । अर्थानां समैरसमैश्च वस्तुभिर्विनिमयः परिवृत्तिः । न्यूनाधिकभावे द्विविधमसमं एवं द्विधा परिवृत्तिः । अत्र किं लक्ष्यं किं लक्षणमिति संदेहे निर्णयार्थमाह—**परिवृत्तिरिति** । आद्यं प्रकारद्वयमुदाहरति । अयं मरुत् उदितकुसुमानां तासां लतानां मतं अभिमतं लास्यं नृत्यं दत्वा असमं अधिकं आमोदं आश्रयति आश्रयते लतास्तु

अध्वन्यानां पांथानां दृशं सहसा आदाय अधिव्याधिभ्रमिरुदितमोहव्यतिकरं ददति । अहह । अत्र प्रकारद्वयं कथमुक्तमित्यत आह–**अत्रेति** । समेन लास्येन समस्य परिमलस्यादानं परिवृत्तिः । उत्तमेन दृगादानलक्षणेन व्याध्यादेः न्यूनस्य परिवृत्तिः । तृतीयमुदाहरति–**नानेति** । हे नृप संप्रहारे युद्धे दृप्तशत्रुसमूहेन कर्त्रा नानाविधैः शस्त्रैः कृतान् प्रहारान् स्वीकृत्यापीयं भूः निर्विप्रलंभः विगतविरहः परिरंभविधिर्यस्याः तथा वितीर्णा दत्ता । यथा भूमिस्त्वां न मुंचति तथा दत्तेत्यर्थः । अत्र न्यूनेन प्रहाररूपेण उत्तमभूताया वसुंधराया परिवृत्तिरित्याह–**अत्रेति** ॥ भाविकालंकारं लक्षयति–**प्रत्यक्षा इति** । लोकोत्तरतया अत्यद्भुततया वास्तवसंबंधव्यतिरेकेण शव्दसंबंधसमर्थितत्वाच्च प्रत्यक्षा इवेत्युक्तम् । समासांतरव्यावृत्त्यर्थमाह–**द्वद्वं** इति । भावश्च भावना पुनः पुनः चेतसि निवेशनम् । उदाहरति–**आसीदिति** । कोऽपि पुरुषः स्वनायिकां प्रति कथयति । हे कामिनि अत्र ते लोचन अंजनमासीत् इति पश्यामि स्वभावेनैव नीलयोस्तव लोचनयोः किमंजनेन । क्षिप्तांजने इव लोचने प्रतिभासेते इत्यर्थः । तवाकृतिं भाविभूषणसंभारां साक्षात्कुर्वे । तवाकृतिरपि भूषणाभावेपि रामणीयकं पुष्णाति अतो भूषणमपि न धारणीयमिति भावः । अत्र पूर्वार्धे भूतस्य लोचनांजनस्य प्रत्यक्षतया प्रतिभासं उत्तरत्र भविष्यतो भूषणसंभारस्येत्याह–**अत्रेति** । काव्यलिंगालंकारं लक्षयति–**काव्येति** । यत्र काव्य (*v. l.* व्योपाय)रूपो हेतुः वाक्यार्थस्थित्या विशेषणद्वारेण पदार्थस्थित्या वा लिंगत्वेन निबध्यते तत्काव्यलिंगमित्यर्थः । वाक्यार्थता अनेकपदार्थता एकपदार्थता चेति त्रैविध्यम् । तत्राद्यमुदाहरति–**वपुरिति** । हे पुरारे पूर्वस्मिन् जन्मनि भवंतं क्षणमपि न प्रणतवानस्मि इतीदं वपुःप्रादुर्भावान्मया अनुमितं अन्यथा शरीरोत्पत्तिर्न स्यादित्यर्थः । संप्रति नमन्मुक्तः अतनुरहं अग्रेप्यनतिभाक् । हे महेश तदिदमपराधद्वयमपि क्षंतव्यम् । द्वितीयमुदाहरति–**प्रणयीति** । अघोरघंटो मालतीं घ्नन् माधवेन संबोधितः, हे दुरात्मन् यद्वपुः प्रियसखीसलीलपरिहासरसाधिगतैः ललितशिरीषपुष्पहननैरपि ताम्यति तत्र वपुषि शस्त्रमुपक्षिपतस्तव शिरसि अकांडयमदण्ड इव मदीयः एष भुजः पततु । तृतीयमुदाहरति–**भस्मेति** । समुत्पन्नशिवप्रसादस्य कस्यचिन्महापुरुषस्य वचनम् । हे भस्मोद्धूलन भवते भद्रमस्तु । हे रुद्राक्षमाले ते शुभमस्तु । महेशगृहालंकारभूतां सोपानपरंपरां हा कष्टम् । अभितः इत्यादिना प्रयोगे द्वितीया । हे सोपानपरंपरे त्वमपि त्यक्ष्यस इति कष्टम् । अद्य आराधनतोषितेन विभुना महेशेन युष्मत्समपर्यासुखालोकोच्छेदिनि मोक्षनामनि महामोहे निधीयामहे । वपुःप्रादुर्भावादिति प्रथम श्लोके पूर्वस्मिन्नग्र्ये च जन्मनि यदनमनलक्षणमपराधद्वयकारणं तदेवापराधतया परिणतं वाक्यार्थो जातः अतो (?ऽ) नमनलक्षणो अपराधहेतुरेव वाक्यार्थः । प्रणयि इत्यादिद्वितीयश्लोके शस्त्रोपक्षेपलक्षणो हेतुः पततु भुज इत्येतत्पदद्वयार्थतया परिणतः । भस्मोद्धूलनेत्यादितृतीयश्लोके सुखालोकोच्छेदित्वलक्षणो हेतुर्महामोहलक्षणैकपदार्थतया परिणत इत्याह–**एष्विति** । कारकोऽत्र हेतुः । ज्ञापकः हेतुःपुनरनुमानालंकारे । अत्र हेतुत्वेनोपनिबद्धस्य हेतुत्वं कर्तव्यं अन्यथाऽर्थांतरन्यासत्वापत्तेरिति द्रष्टव्यम् । पर्यायोक्तं लक्षयति–**पर्यायेति** । अभिधायकाभिधेयभावव्यतिरेकादवगमन–

व्यापारेण यत्प्रतिपादनमभिधानरूपं तत्पर्यायोक्तमित्याह—**वाच्येति** । निर्वक्ति—**तदिति** । उदाहरति—**यमिति** । यं रावणं प्रेक्ष्य मदेन रावणमुखे ऐचिरारूढापि निवासप्रीतिरुज्झिता । अत्र कार्यमुखेन रावणस्य स्वर्गजयलक्षणः प्रभावो वर्णितः । अत्र भंग्यंतरेण कथनं कथमित्यत आह—**अत्रेति** । ननु व्यंग्यमपि शब्देनोच्यत इति व्याहतमित्यत आह—**तेनेति** । व्यंग्यापेक्षया प्रकारांतरेणाभिधानसंभवात् । न हि तस्यैव तदेव तथैव विच्छित्त्या गम्यत्वं वा वाच्यत्वं वेत्याचक्ष्महे । किं तर्हि कार्यादिद्वारेण वाच्यत्वं स्वसामग्र्या व्यंग्यत्वमित्यभिधानान्न व्याहतिरिति भावः । एतद्दृष्टांतेन प्रतिपादयति—**यथेति** । **दृष्ट इति** निर्विकल्पकतयेति शेषः । अविकल्पकतया यदेव गवादिकं दृष्टं तदेव चैत्रादि प्रमाता विकल्पयति न पुनर्यथा दृष्टं तथैव विकल्पयितुमर्हति विकल्पाविकल्पयोरवैलक्षण्यप्रसंगादित्यर्थः । ननु विकल्पमानत्वमविकल्पमानत्वं च कथमेकस्येत्यत आह—**अभिन्नेति** । अविकल्पावस्थायां जात्यादिना यदभिन्नमसंसृष्टं विकल्पानुल्लेखाद्भिन्नं च तस्मादेव तद्विकल्पवेलायामभेदेन संसर्गेण च विकल्पयतीति प्रकारभेदात् तत्रापि न व्याहतिरित्यर्थः । उदात्तालंकारं लक्षयति—**उदात्तमिति** । कविवर्णनोद्रेचिता समृद्धिरस्य लक्षणमित्याह—**संपदिति** । उदाहरति—**मुक्तेति** । केलिविसूत्रहारगलिताः संमार्जनीभिर्हृताः प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः मुक्ताः दूराद्दाडिमबीजशंकितधियः केलीशुकाः यत्कर्षन्ति तत् भोजनृपतेः त्यागलीलायितम् । अत्रासंभाव्यमानविभूति त्युक्तस्य वस्तुनो वर्णनं कविप्रतिभोत्थापितमनुभूयते । उदात्तस्यैव लक्षणान्तरमाह—**महतामिति** । उपलक्षणपदं व्याकरोति—**उपलक्षणमिति** । किंविषयमेतदुपलक्षणमित्यत आह—**अर्थादिति** । अर्थादिति अर्थप्राप्तौ अनर्थपरिहारे च प्रवृत्ताः पुरुषाः महान्तः तेषां रामादीनां वर्णनीयेऽर्थे ह्यंगभाव उदात्तालंकार इत्यर्थः । उदाहरति **तदिदमिति** । इदं तद्दण्डकारण्यं यस्मिन् दशरथवचनानुपालनव्यसनी रामः बाहुसहायः एकाकी निवसन् रक्षःक्षयं चकार । अत्र अरण्ये वर्णनीये राघवचरितं अंगत्वेन वर्णितम् । नत्वत्र वीररसप्रयुक्तश्चमत्कारोस्तीत्यत आह—**न चेति** । अत्र वीररसाश्रयस्य रामस्याव्यंगत्वं किं पुनः रसस्यातः न चमत्कार इति भावः । न चास्यांगत्वेपि रसवदलंकारत्वं अस्योपात्तस्य तदपवादत्वात् । समुच्चयालंकारं लक्षयति—**तत्सिद्धिहेताविति** । व्याकरोति—**तस्येति** । उदाहरति—**दुर्वारा इति** । दुर्वाराः स्मरमार्गणाः । प्रियतमो दूरे । मनः अत्युत्सुकम् । गाढं प्रेम । नवं वयः । अतिकठिनाः प्राणाः । निर्मलं कुलम् । धैर्यविरोधि स्त्रीत्वम् । मन्मथसुहृत्कालः वसंतः । कृतांतो यमः अक्षमः मारणे समर्थः । सख्यः चतुरा नो भवंति । इत्थं एवं सति विरहः कथं नु सोढव्यः । अत्र श्रमोपात्ताः स्मरमार्गणा एव विरहवैक्लव्यं उद्भावयितुं प्रगल्भंते । तदुपरि वल्लभप्रवासादायः समुचीयंत इत्याह—**अत्रेति** । अत्रान्यैः समुच्चयस्यैव सद्योगे असद्योगे सदसद्योगे च अन्यदन्यल्लक्षणं कृतं तदसंगतं एतदुपजीवनेनैव तत्संग्रहस्य कर्तुं सुकरत्वात् इत्याह—**एष एवेति** । सद्योगे उदाहरति—**कुलमिति** । अमलिनं कुलं भद्रा मूर्त्तिः श्रुतशालिनी मतिः अलं भुजबलं स्फीता लक्ष्मीः अखंडितं प्रभुत्वम् । एते उक्ता भावाः प्रकृतिसुभगाः स्वभावसुंदराः । अयं भवल्लक्षणो जनः अमीभिरेव भावैः सुतरां दर्पं व्रजति । हे राजन् तव त एव अंकुशाः अपथप्रवृत्तिं न कारयन्तीत्यर्थः ।

अत्र निष्कलंकत्वेन शोभनस्य कुलस्य भद्रमूर्त्यादिभिः शोभनांतरैर्योगः सद्योग इत्याह--**अत्रेति ।** असद्योगस्य दुर्वारा इत्युक्तमेवोदाहरणमित्याह–**उक्तेति ।** तत्र दुःसहत्वादशोभनानां स्मरमार्गणानां अशोभनांतरैः प्रियप्रवासादिभिर्योगः असद्योग इत्यर्थः । सदसद्योग उदाहरति–**शशीति ।** शशी दिवसधूसरः गलितयौवना कामिनी सरो विगतवारिजं स्वाकृतेर्मुखमनक्षरं प्रभुर्धनपरायणः सज्जनः सततदुर्गतः नृपांगणगतः खलः मे मनसि सप्त शल्यानि । अत्र शोभनस्य शशिनः अशोभनेन दिवसधूसरत्वेन योगः । एवं पदांतराणां शोभनानां पदांतरेणाशोभनेन योगो द्रष्टव्यः । नच दुर्वारा इत्यादावपि सदसद्योगत्वप्रसंग इति वाच्यम् । शश्यादिवत् स्मरमार्गणादिनां स्वत शोभनत्वस्य प्रसिध्यभावात् । समुच्चयस्यैव लक्षणांतरमाह–**स त्वन्य इति ।** अत्र गुणाश्च क्रियाश्चेति द्वंद्वे गुणयोः गुणानां क्रिययोः क्रियाणां च समुच्चयो न स्यादिति कृतैकशेषाणां द्वंद्व इत्याह–**गुणौ च क्रिये च गुणक्रिये चेति ।** तंत्रेणोक्तिरिति यावत् । गुणयोर्यौगपद्यमुदाहरति–**विदलितेति ।** भो राजन् विदलितसकलारिकुलं इदं बलं आशु विमलं चाभवत् । तानि प्रखलानां मुखानि मलिनानि च जातानि । अत्र वैमल्यमालिन्ययोर्गुणयोर्यौगपद्यम् । क्रिययोर्यौगपद्यमुदाहरति–**अयमिति ।** एकपदे तया प्रियया सुदुःसहः अयं वियोगश्चोपनतः नववारिधरोदयात् अहोभिश्च निरातपत्वरम्यैर्भवितव्यम् । अत्र वियोगोपनतिक्रियायाः अह्नामुक्तविशेषणतया भवनक्रियायाश्च योगः । गुणक्रियायोगमुदाहरति–**कलुषमिति ।** भो महीपतीन्द्र सितपंकेरुहसोदरश्रि तव चक्षुः अहितेषु अकस्मात्कलुषं च तेषां वपुषि आपदां कटाक्षैः पतितं च । अत्र कलुषगुणस्य आपत्कटाक्षपातक्रियायाश्च यौगपद्यम् । अत्र वैयधिकरण्येनैव एकस्मिन्नेव देशे समुच्चयो नान्यत्रेति कश्चित् तदसंगतमित्याह–**धुनोतीति ।** अत्र क्रिययोरेकाधिकरणयोः समुच्चयदर्शनादसंगतमित्यर्थः । पर्यायालंकारं लक्षयति–**एकमिति ।** व्याकरोति–**एकं वस्त्विति ।** स्वतःसिद्धिरिति भावः । अन्येन प्रयोजकेनोत्पादनं करणम् । एवं च यदेकं तद्भवति क्रियते चेति द्विधा । तत्राद्यमुदाहरति–**श्रोणीति ।** श्रोणीबंधस्तनुतां त्यजति मध्यभागः सेवते, पद्भ्यां तरलगतयः मुक्ता लोचनाभ्यां संश्रिताः, वक्षः कुचसचिवतां धत्ते वक्त्रं तु अद्वितीयम् । यौवनेन तद्गात्राणां गुणविनिमयः कल्पितः । अत्रैकैकस्य तनुतादेरुभयत्र भवनम् । एकस्य बहुषु भवनमुदाहरति–**नन्विति ।** ननु भो कालकूट उत्तरोत्तरा विशिष्टपदा इयं स्थितिस्तव केनोपदिष्टा । प्राक् अर्णवस्य हृदये अथ अनंतरं वृषलक्ष्मणो हरस्य कंठे, अधुना पुनः खलानां वचसि वससि । अत्र एकस्य कालकूटस्य हृदादिष्वनेकेषु भवनम् । एकस्य पूर्वाश्रयमत्यजत एवानेकत्र भवनमुदाहरति–**बिंबोष्ठ** इति । हे तन्वि पूर्वं बिंबोष्ठ एव रागः अदृश्यत । हे मृगशावाक्षि अधुना एष रागः हृदयेपि लक्ष्यते । अत्र एकस्य रागस्य पूर्वमाश्रयं बिंबोष्ठमत्यजत एव हृदये भवनं प्रदर्शितम् । ननु राग एकत्रारुण्यमन्यत्र भावविशेष इति कथमेकत्वमित्यत आह–**रागस्येति ।** एवंलक्षणं अवान्तरभेदमाश्रित्य एकस्यानेकत्र भवने उदाहरणत्रयमुक्तम् । इदानीं द्वितीयं उदाहरति—**तंताणेति ।** ताणं

तेषां सुराणां तं तत् हिअअं हृदयं सिरिसहोअररअणाहरणम्मि श्रीसहोदररत्नाभरणे श्रीकृष्णे एक्करसं एकरसं कुसुमबाणेण कुसुमबाणेन पिआणं प्रियाणां बिंबाधरे णिवेसिअं निवेशितम्। अत्र एकस्य हृदयस्य यथोक्तरत्नाभरणबिंबाधरयोः असहंतयोः वित्तेः कुसुमबाणेनेत्युक्त्वा-त्करणरूपत्वम्। पर्यायस्यैव लक्षणांतरमाह-**अन्य** इति। व्याकरोति-**अनेकमिति।** तत्राद्य-मुदाहरति-**मधुरिमेति।** अहो आश्चर्य खलानां मधुरिमरुचिरं वचः प्रथमं पृथु अमृतं व्यनक्ति। अथ मोहहेतुः तदेव अंतर्गतं हालाहलं विषमिव कथयति। अत्रानेकममृतं विषं च एकस्मिन्नाधारभूते खलवचसि भवति। द्वितीयमुदाहरति-**तद्गेहमिति।** नतभित्ति तद्गेहं दिवः हेतोर्लब्धावकाशं इदं मंदिरं, जरती सा धेनुः एताः घनाभाः करिणां घटाश्चरंति। क्षुद्रः सः मुसलध्वनिः इदं योषितां कलं संगीतकम्। आश्चर्यं अयं द्विजः दिवसैः इयतीं परां भूमिं प्रापितः। अत्र एकस्मिन् द्विजे दिवसैः अनेकं गेहादिकं कृतम्। अस्य परिवृत्त्यलंकारभ्रमं निरस्यस्यति-**अत्रेति।** एकस्यैव कर्त्तुरिति यावत्। अनुमानालंकारं लक्षयति-**अनुमानमिति।** व्याकरोति-**पक्षेति।** पक्षधर्मत्वं पक्षे व्याप्यवृत्तित्वं अन्वयः सपक्षे सत्त्वं व्यतिरेको विपक्षाद्व्यावृत्तिः। अबाधितविषयत्वादेः पक्षधर्मत्वादावंतर्भावात् त्रैरूप्यमुक्तम्। अयोगव्यवच्छेद इति अन्यव्यवच्छेदे पक्षादपि व्यावृत्त्यापत्तेरुक्तम्। उदाहरति-**यत्रेति।** यत् लहरीचलाचलदृशः एताः यत्र भुवं व्यापारयंति तत्रैव मर्मस्पृशः अमी मार्गणाः संततं पतंति तत्तस्मात्कारणात् चक्रीकृतचापं यथा तथा अंचितशरप्रेंखत्कर: क्रोधनः आसां शासनधरः स्मरः सत्यं सदा अग्रत एव धावति। अत्र मार्गणपतनं साधनं स्मरस्य शासनधरत्वं साध्यं भ्रूव्यापारो वा साधनं स्मरशासनधरत्वं साध्यम्। एतदुभयमेकत्रैव धर्मिणि योषिल्लक्षणे वर्त्तते। अत्र साध्यसाधननिर्देशादेवालंकारत्वम्। ननु क्रमोच्चारणे व्युत्क्रमोच्चारणे वैचित्र्याभावादित्याह-**साध्येति।** परिकरालंकार लक्षयति-**विशेषणैरिति।** व्याकरोति-**अर्थादिति।** उदाहरति-**महौजस** इति। महौजसः मानधनाः धनार्चिता संयति लब्धकीर्तयः न संहताः न भिन्नवृत्तयः धनुर्भृतः असुभिः तस्य प्रियाणि समीहितुं वांच्छंति। महौजसः बलिष्ठत्वे सति प्रभोर्वांछितं पूरयितुं शक्यमिति आकूतमस्य विशेषणस्य। एवमन्यविशेषणेष्वपि साकूतत्वं विचार्यम्। विशेष्यपदं त्वत्र धनुर्भृत इति। नत्वपुष्टार्थं पदं प्रयोक्तव्यं इति वचनात् अत्र पुष्टार्थानि विशेषणान्युपात्तानि अतो दोषत्यागमात्रमेतत् कथ-मलंकारत्वमित्याशंक्याह-**यद्यपीति।** व्याजोक्त्यलंकारं लक्षयति-**व्याजोक्तिरिति।** व्याक-रोति-**निगूढमिति।** अस्यापह्नुतित्वमाशंक्य परिहरति-**न चैषेति।** अपह्नुतौ हि उभयनिष्ठ-साम्यं न तथात्रेति भेद इति भावः। उदाहरति-**शैलेंद्रेति।** शैलेंद्रप्रतिपाद्यमानगि-रिजाहस्तोपगूढोल्लसद्रोमांचादिविसंष्ठुलाखिलविधिव्यासंगभंगाकुलः हा तुहिनाचलस्य करयोः शैत्यं इत्यूचिवान् शैलांतःपुरमातृमंडलगणैः सस्मितं दृष्टः शिवः वः अवतात्। तस्य व्याजोक्तित्वं प्रकटयति-**अत्रेति।** परिसंख्यां लक्षयति-**किंचिदिति।** चतुर्धा परिसंख्या प्रश्नस्य वाच्यत्वमुन्नीयमानत्वं च अपोह्यस्य वाच्यत्वमुन्नीयमानत्वं चेति। ननु

शब्दानां स्वार्थाभिधानमात्रव्यापृतानां कथमन्यव्यपोहे तात्पर्यमित्यत आह–**प्रमाणांतरेति**। प्रयोजनांतराभावात् सदृशवस्त्वंतरव्यवच्छेदलक्षणं यत्प्रयोजनं तद्धि हाय यत्प्रयोजनांतरं तदभावादित्यर्थः। अस्याश्चातुर्विध्यमाह–**अत्रचेति**। प्रश्नपूर्वकथनं अप्रश्नपूर्वकं चेति द्वौ भेदौ। उभयत्र वर्जनीयस्य प्रतीयमानता वाच्यता चेति द्वे इति चत्वारो भेदाः। तत्र प्रश्नपूर्वकत्वे वर्जनीयस्य प्रतीयमानतामुदाहरति–**किमिति**। पुंसामासेव्यं किं इति पृष्टे उत्तरं गंगासरित्तटं, एकांते किं ध्येयं विष्णोश्चरणयुगलं, आराध्यं किं पुण्यं, अभिलषणीयं किं करुणा। तेषु सरित्तटादिषु आसक्त्या चेतो निरवधि यथा तथा मुक्त्यै प्रभवति। अत्र किमिति प्रश्नानंतरं आगमप्रमाणावगतं गंगातटं सेव्यमित्युपनिबद्धं तेन कामिनी न सेव्येत्यर्थः प्रतीयते। चरणयुगलमिति नत्वंगनेति । पुण्यमिति न पापमिति प्रतीयते । करुणेति न हिंसेति प्रतीयते । प्रश्नपूर्वकत्वे वर्जनीयस्य प्रतीयमानतामुदाहरति–**कौटिल्यमिति**। कचनिचये कौटिल्यं वसति करचरणाधरपल्लवेषु रागः स्तनयुगले काठिन्यं चपलत्वं लोचनयोर्वसति। अत्र कुचनिचय इति नतु वाचि हृदये वा कौटिल्यमिति प्रतीयते करचरणाधरदलेष्विति न तु परपुरुषे। कुचयुगले इति नावयवांतरे मानसे च। नयनयोरिति न तु स्वभावे इति वर्जनीयस्य प्रतीयमानत्वम्। प्रश्नव्यतिरेके वर्जनीयस्य वाच्यतामुदाहरति–**भक्तिरिति**। भक्तिर्भवे न विभवे व्यसनं शास्त्रे युवतिरेव काम(शा)स्त्रे यशसि चिंता। वपुषि न। महतां प्रायः परिदृश्यते। अत्र अपोह्यमानस्य वाच्यत्वं न भव इत्याद्युक्तत्वात्। कारणमालालंकारं लक्षयति–**यथोत्तरमिति**। उदाहरति–**जितेति**। जितेंद्रियत्वं विनयस्य कारणं विनयात् गुणप्रकर्षः अवाप्यते। गुणप्रकर्षेण जनः अनुरज्यते संपदः जनानुरागप्रभवा हि। अत्र इंद्रियजयाद्विनयः विनयाद्गुणोत्कर्षः तस्मात् जनानुरागः तस्मात्संपल्लाभ इति हेतुमाला। हेतुहेतुमतोः अभेदाभिधानं हेत्वलंकार इति **रुद्रटादिभिरुक्तं** किमिति त्वया न लक्षितमित्यत आह–**हेतुमतेति**। कार्येण सह कारणस्य अभेदाभिधानं हि हेतुः स चायुर्घृतमित्यादिवत् उपचारव्यतिरेकेण वैचित्र्याय न कल्पते अतो नालंकारतया लक्षित इति भावः । ननु हेतोरनलंकारत्वे अविरलेत्यादौ कथं काव्यरूपत्वमित्यत आह–**अविरलेति**। अविरलः कमलविकासो यत्र सकला ये अलयः तेषां मदो यत्र (?श्च) कोकिलानंदकरः लोकोत्कंठाकरः रम्योऽयं कालः संप्रति एति। समाम्नासिषुः प्रत्यपादयन् आचार्या इति शेषः । केवलानुप्रासभावादत्र काव्यत्वं नत्वलंकारादिति भावः। नन्वेवं तर्हि हेतुः कुत्राप्यलंकार एव न स्यादित्यत आह–**पूर्वोक्तमिति**। अन्योन्यालंकारं लक्षयति–**क्रिययेति** । क्रिययेत्येकवचनं विवक्षितमित्यभिप्रेत्य व्याकरोति–**अर्थयोरिति** । उदाहरति–**हंसेति** । सरेहिं सरोभिः हंसाणं हंसानां सिरी श्रीः सारिज्जइ सार्यते क्रियते अह अथ सरणं सरसां हंसेहि हंसैः। अण्णाणं विअइ अन्योन्यमेव एए एते णवर केवलं अप्पाणं आत्मानं गरुअंति गुरूकुर्वते। नत्वत्र हंससरसां मिथो जन्यजनकभावात्कथमन्योन्यालंकार इत्यत आह–**अत्रेति** । हंसाः श्रीमंतः सरोभिः क्रियंते तैश्च सरांसीत्यन्योन्यमलंकारो भवतीति भावः। उत्तरालंकारं लक्षयति–**उत्तरेति**। व्याकरोति–

प्रतीति। अत्र प्रश्ने असति उत्तरश्रुतिमात्रेण प्रतिवचनोपलंभेनैव यत्र प्रश्नोन्नयनं पूर्ववाक्य-परिकल्पनं तदेकमुत्तरं एक उत्तरालंकारः प्रथमार्धे उक्तः। तमुदाहरति–**वाणि**जेति। हे बाणिजअ हे वाणिजक हस्तिदंताः वग्घकित्तीअ व्याघ्रकृत्तयश्च आह्माणं अस्माकं कुतो कुतः, जावि यावत् लुलिआलअमुही लुलितालकमुखी सुण्हा स्नुषा घरंमि गृहे परिसक्कए परिसंक्रामति। जरद्व्याधस्योक्तिरेषा। जरद्व्याधपुत्रस्य स्वकांतायामतिसक्ततया क्षीणत्वेन हस्तिव्याघ्रहनने शक्त्यभावात्स्वगृहे दंतकृत्त्यभाव इति भावः। अत्र हस्तिदंतादेरसंपत्त्यभिधानेन तदर्थिनो वणिजः तत्सद्भावप्रश्नः परिकल्प्यते इत्याह–**हस्तीति**। नत्वेतत्काव्यलिंगमस्त्वित्यत आह–**न चेति**। ताद्रूप्यं प्रश्नरूपत्वं प्रश्नोन्नायकस्य ताद्रूप्यं काव्यलिंगकरणं (*v. l.* लक्षणं) नैतत्तादृशमिति भेद इति भावः। भेदे हेत्वंतरमाह–**नहीति**। जनको हि हेतुः काव्यलिंगं नैवमुत्तरालंकारः ज्ञापकत्वादिति भावः। तर्हि अनुमानालंकारोऽस्त्वत आह–**नापीति**। अनुमानलक्षणाभावादिति भावः। उपसंहरति–**इतीति**। उत्तरालंकारभेदप्रतिपादकं द्वितीयमर्धं व्याकरोति–**प्रश्नादिति**। तत्र प्रश्ने सति प्रस्तुताभिप्रायानुगुण्येन लोकातिशायितया यदनन्यसंभाव्यं प्रतिवचनं तद् द्वितीयमुत्तरमित्यर्थः। असकृद्ग्रहणस्य प्रयोजनमाह–**अनयोश्चेति**। उदाहरति–**केति**। का विसमा का विषमा, दिव्वगई दैवगतिः किं लद्धं किं लब्धं जणो जनः गुणग्गही गुणग्राही किं सोक्खं किं सौख्यं सुकलत्तं सुकलत्रं किं दुःखं जं यत् खलो खलः लोको लोकः। अस्य प्रश्नः परिसंख्या–अभेदमाशंक्याह–**प्रश्नेति**। अत्र (*v. l.* अ) संभाव्योत्तरे वाच्य एव तात्पर्यात् नान्यव्यपोह इति ततोस्य भेद इति भावः। सूक्ष्मालंकारं लक्षयति–**कुतोपीति**। कुतोपीत्यस्यार्थमाह–**आकारादिति**। सूक्ष्मशब्दार्थमाह–**तीक्ष्णेति**। तीक्ष्णमतिभिः कुशाग्रमतिभिः संलक्ष्यः स्थूलबुद्धिभिरसंलक्ष्यश्च। उदाहरति–**वक्त्रेति**। कापि वयस्या तन्व्याः कंठे वक्त्रस्यंदिस्वेदबिंदुप्रबंधैर्भिन्नं कुंकुमं दृष्ट्वा तस्याः पुंस्त्वं व्यंजयंती सती स्थित्वा पाणौ खड्गलेखां लिलेख। लिंगेन उपरिसुरतमनया कृतमिति ज्ञात्वा तज्ज्ञापनार्थं पुरुषयोग्यखड्गलेखां लिलेखेत्यभिप्रायः। अत्र वदनस्वेदप्रवृत्तकंठकुंकुमभेदलक्षणामाकृतिमवलोक्य सख्या परिज्ञातं पुरुषायितं पाणौ पुरुषैकयोग्यखड्गलेखनलक्षणेन धर्मेण प्रकाशितमित्याह–**अत्रेति**। अत्रैवोदाहरणांतरमाह-**संकेतेति**। विदग्धया कयाचित् संकेतकाले ज्ञातव्ये मनो यस्य विकसद्भ्यां नेत्राभ्यामर्पितमाकूतं येन, तादृशं विटं ज्ञात्वा लीलापद्मं निमीलितम्। अत्र विटस्य संकेतकालजिज्ञासां तदीयभ्रूभंगादिना इंगितेनोपलक्ष्य प्रगल्भया कयाचित् सायंसमयोचितेन लीलाकमलनिमीलनेन संकेतसमयोभिव्यज्यत इत्याह–**अत्रेति**। सारालंकारं लक्षयति–**उत्तरति**। पूर्वपूर्वापेक्षया उत्तरोत्तरस्य प्रकर्षकल्पनं सार इत्यर्थः। उदाहरति–**राज्य** इति। राज्ये भूमिः सारभूता भूमौ पुरं पुरे सौधं सौधे तल्पं तल्पे अनंगसर्वस्वं वरांगना। अत्र राज्यापेक्षया भूमेः साधुत्वं तदपेक्षया पुरस्येत्यादि परिपाट्या वरांगनायामुत्कर्षो विश्राम्यति। असंगत्यलंकारं लक्षयति–**भिन्नेति**। व्याकरोति–**इहेति**। उदाहरति–**जस्सेति**। जस्सेअ यस्यैव वणो व्रणः तस्सेअ तस्यैव वेअणा वेदना तत् जणो जनः अलिअं अलीकं भणइ भणति। बहूये वध्वाः कवोले कपोले दंतखदं दंतक्षतं सवत्तीणं सपत्नीनां वेअणा वेदना। अत्र

त्रणनिमित्तसापत्न्यनिमित्तवेदनयोश्च (*v. l.* अ) भेदाध्यवसायः। नन्वियं विरोधभेदेषु कश्चिदित्याशंक्याह–**एषेति**। इयं विरोधस्यापवादिका न विरोध इत्यत्र हेतुमाह–**भिन्नेति**। एकदेशत्वं भिन्नदेशत्वं च विरोधालंकारस्य विषय आसीत् सामान्येनोक्तत्वात्। कार्यकारणयोर्भिन्नदेशतयेत्युक्तत्वात् असंगतिर्विरोधस्यापवादिका अतोस्या विरोधाद्भेद इत्यर्थः। समाध्यलंकारं लक्षयति–**समाधि**रिति। हेत्वंतरानुदये सौकर्याभावः तदुदये तु कर्तुः कार्यं प्रति सौकर्यमित्याह–**साधनांतरेति**। उदाहरति–**मान**मिति। अस्याः मानं निराकर्तुं पादयोः पतिष्यतः मे उपकाराय दिष्ट्या इदं धनगर्जितं उदीर्णम्। अत्रापराद्धेन यूना माननिराकरणलक्षणे कार्ये पादावनतमात्रादारब्धे दैवयोगात् घनगर्जितप्रक्षेपस्तत्सौकर्यायोपकल्पते। समालंकारं लक्षयति–**सम**मिति। व्याकरोति–**इदमनयो**रिति। इदं संबंधिरूपं वस्तु उत्तमविषयं समं अधमविषयं चेति समं द्विविधम्। तत्राद्यमुदाहरति–**धातु**रिति। एषा मृगाक्षी धातुः शिल्पातिशयनिकषस्थानम्। अनुपमे रूपे अयं देवोपि स्मरस्य दत्तपत्रः। अनयोः दैवात् यत्सदृशं संगतं मेलनं जातं तदेतत् अधुना शृंगारस्य एकातपत्रं राज्यमुपनतम्। द्वितीयमुदाहरति–**चित्र**मिति। विधाता उचितरचनासंविधाता दैवाज्जातः यत् निंबानां परिणतफलस्फीतिः आस्वादनीया चित्रं चित्रं बत। एतस्याश्च कवलनकलाकोविदः काकलोकः एतन्महच्चित्रम्। विषमालंकारं लक्षयति–**क्वचिदिति**। अतिवैधर्म्यात् विस्पष्टद्वैलक्षण्यात् श्लेषो घटनां न गतः तदेकं विषमम् क्रियायां सत्यामपि तत्फलानवाप्तौ वैषम्यमात्रस्य प्रादुर्भावः उपर्यनर्थातिपाते तस्योत्कर्ष इति द्वितीयम्। कारणगुणक्रमेण कार्यारंभ इति स्थित्या कार्यस्य कारणस्वभावानुकारः शास्त्रसिद्धः अथापि हेतुनिष्ठाभ्यां गुणक्रियाभ्यां हेतुमन्निष्ठयोस्तयोर्विरोध इति तृतीयम्। तस्यैव गुणक्रियाभेदात् तृतीयस्य द्वैविध्याच्चातूरूप्यमित्याह–**द्वयोरित्यादिना**। आद्यमुदाहरति–**शिरीषा**दिति। शिरीषादपि सुकुमारांगी इमायतलोचना क्व। कुकूलाग्निकर्कशोऽयं मदनानलश्च क्व। अत्रात्यंतकोमलांग्याः अतिक्रूरः कामानलो नोपपद्यते। द्वितीयमुदाहरति। **सिंहि**कासुतसंत्रस्तः शशः शीतांशुं आश्रितः। तत्र अन्यः सिंहिकासुतः साश्रयं तं ग्रसते। सिंही राहुमाता च तदपत्ययोर्मध्ये पूर्वस्मात् संत्रस्तस्य प्रतीयमानोत्प्रेक्षास्पर्शेन शीतकिरणाश्रयणे क्रियाफलस्य निरुपद्रवत्वस्य प्राप्तावंतरायभूतेन राहुणा तस्य स्वाश्रयेण चंद्रेण सह यद्ग्रसनं तन्महदनर्थरूपं संपद्यते। तृतीयमुदाहरति–**सद्य** इति। यस्य कृपाणलेखा रणेरणे यस्य करस्पर्शं अवाप्य तमालनीलापि सती त्रिलोकाभरणं शरदिंदुपांडु यशः प्रसूत इति चित्रम्। अत्र करस्पर्शसंभोगस्या ग्राम्यतया उपलक्षणम्। नीलात्कारणात् धवलकार्योदयोऽपि विरुध्यत इति गुणविरोधः। चतुर्थमुदाहरति–**आनंदे**ति। हे कुवलयदललोचने त्वं अमंदमिमं आनंदं ददासि। त्वयैव जनितः विरहः मे शरीरं तापयतितराम्। अत्र कारणनिष्ठानंदनक्रियया कार्यनिष्ठविरहक्रियाया विरोधः इति क्रियाविरोधः। अथ कर्तृकर्मभावेपि इदमुदाहर्त्तव्यमित्याह–**एव**मिति। यस्य सागरशयस्य विपुलेन कुक्षिणा युगक्षये भुवनानि पपिरे पीतानि स पुनः एकतमया स्त्रिया मदविभ्रमासकलया एकया दृशा पपे। सादरमवलोकित इत्यर्थः। एकस्याः स्त्रियाः एकत्वादेव परिमितत्वयोगिन्याः कर्तृभूतायाः दृष्ट्या सकलभुवनपानक्षमकुक्षि-

कुहरस्य हरेः कर्मभूतस्य पीयमानतायां पारिमित्यपारिमित्यलक्षणौ गुणौ विरुद्धाविति विषमत्वम् । यथायोगं योगो युक्तिः कार्यकारणभावस्य कर्मकर्तृभावपर्यवसानलक्षणतामनतिक्रम्येत्यर्थः । अधिकालंकारं लक्षयति-**महतो**रिति । व्याकरोति-**आश्रतमिति ।** अनन्यत्रभावो विपर्ययार्थः (?) । महतः कस्यचिदाधेयस्य विषयेपि तदपेक्षया तनुरपि आधारो महत्त्वमध्यास्ते यत् तदेकं अधिकम् । महतः कस्याचिदाधारस्य विषये तदपेक्षया तनुरपि आधेयः महत्त्वमध्यास्ते तद्द्वितीयमधिकम् । तत्राद्यमुदाहरति-**अहो** इति । अहो आश्चर्य भूपाल भुवनत्रितयोदरं विशालं यत् मातुमशक्योपि ते यशोराशिरत्र माति अत्र यशोलक्षणस्य महत आधेयस्यापेक्षया अतन्वपि भुवनत्रितयोदरं यशःप्रकर्षविवक्षणादाधिक्योत्कर्षमनुप्राप्यते । द्वितीयमुदाहरति-**युगांतेति ।** युगांतकालप्रतिसंहृतात्मनः कैटभद्विषो यस्यां तनौ जगंति सविकाशमासत तत्र तनौ तपोधनाभ्यागमसंभवाः नारदागमनसंभूता मुदो न ममुः । अत्र महतीं भगवत्तनुं आधारं प्रति नारदागमप्रमोदलक्षणस्याधेयस्य तनोरपि आधिक्योत्कर्षः । प्रत्यनीकालंकारं लक्षयति-**प्रतिपक्षे**ति । व्याकरोति-**न्यक्कृतीति ।** अनीकस्य कटकस्य प्रतिनिधिः प्रत्यनीकं तत्सादृश्यादलंकारोपि प्रतिपक्षसंबंधिविषयं प्रत्यनीकम् । उदाहरति-**यस्येति ।** कायनिग्रहगृहीतविग्रहः कृती राहुर्यस्य विष्णोः किंचिदपकर्तुमक्षमः कांतवक्त्रसदृशाकृतिमिंदुमधुनापि बाधते । अत्र भगवान्प्रतिपक्षः तमपहर्तुमक्षमेण राहुणा तदीयश्चंद्रः तिरस्क्रियते तत्कथं इंदोर्भगवत्संबंधित्वमित्यत आह-**इंदोरिति ।** भगवत्संबद्धं मुखं तत्संबद्धश्च सादृश्याच्चंद्रः यदुक्तं कांतवक्त्रसदृशाकृतीति । मीलितालंकारं लक्षयति-**समेनेति** । समेन निगूह्यसाधारणेन लक्षणेन कृत्या कस्यचिद्वस्तुनो निगूह्यस्य केनचिद्वस्त्वन्तरेण निगूहनं मीलितम् । तच्च साधारणं लक्षणं सहजमागंतुकमिति द्विधेत्याह-**सहजमिति** । आद्यमुदाहरति-**अपांगेति** । लोचने अपांगचंचले गिरो मधुरवक्रवर्णा गतिः विलासभरमंथरा मुखं अतीव कांतं इति मृगदृशां अंगके लीलया स्वतः स्फुरितं तत्तस्मात्कारणाच्च अत्र कृतपदोपि मदोदयो न संलक्ष्यते । अत्र अंगनया कर्त्र्या सहजेन दृष्टितारल्यादिना लिंगभूतेन करणेन सं (? स्व) मदोदयो निगूह्यते । केचित्तु समेन लक्ष्मणा वस्तुनेति सामानाधिकरण्यात् अन्वयमाचक्षाणा अंगनालक्षमणा दृष्टितारल्यादिना मदोदयसाधारणेन मदोदयवर्ति तदेव तिरस्क्रियत इत्याहुः । द्वितीयमुदाहरति-**यद्‌इति** । हे राजन् त्वत्पात शंकितधियः विवशा ये ते द्विषः सदा हिमाद्रेः कंदरासु निवसंति अहो बत आश्चर्य सपुलकं सकंपं अंगं उद्वहतामपि तेषां संबंधिनीनां भियां अभिज्ञः बुधोपि न । अत्र वर्णनीयविद्विषां हिमवत्कंदरानिवासशैत्यसमुद्भाविताभ्यां उभयसाधारणाभ्यां आगन्तुकाभ्यां कंपरोमाञ्चाभ्यां तिरोधीयते । एवमुत्तरे हिमवति वा संप्रयुक्ताभ्यां कंपरोमांचाभ्यां भयसाधारणाभ्यां तावेव भयवर्त्तिनौ कंपरोमांचौ तिरस्क्रियेते । एकावलीमलंकारं लक्षयति-**स्थाप्यत** इति । व्याकरोति-**पूर्वमिति** । स्थापना विधिः अपोहः निषेधः । तत्राद्यमुदाहरति-**पुराणी**ति । यस्यां पुराणि सवरांगनानि वरांगनाः रूपपुरस्कृतांग्यः रूपं समुन्मीलितसद्विलासं विलासाः कुसुमायुधस्य अस्त्रम् । द्वितीयमुदाहरति-**नत**दिति । तज्जलं

न यत् चारुपंकजं न । तत्पंकजं न यत् अलीनषट्पदम् । असौ षट्पदो न यः कलगुंजितो न । तद्गुंजितं न यन्मनो न जहार । क्रमेण विधायकत्वं निषेधकत्वं चा–**पूर्वत्रे**ति । स्मरणालंकारं लक्षयति-**यथेति** । व्याकरोति-**य** इति । उदाहरति–**निम्नेति** । लहरीभिः चलद्दृशां निम्ननाभिविवरेषु यदंभः प्लावितं सुरनार्यः तद्भवैः कुहरुतैः कुहकुहशब्दैः सुरतकंठरुतानां स्मारिताः । अत्र तत्सदृश इत्युक्तत्वात् सादृश्यनिबंधना स्मृतिरलंकारः न स्मरणमात्रम् । अतः पूर्वानुभूतसुरतशब्दानां तत्सदृशशब्दस्मरणेन स्मृतिरलंकारः । अत्रैवोदाहरणांतरमाह–**करेति** । करजुअगहिअजसोआथणमुहंविणिवेसिंआहरपुडस्य करयुगगृहीतयशोदास्तनमुखविनिवेशिताधरपुटस्य । संमरिअपञ्चजण्णस्स संस्मृतपांचजन्यस्य कण्हस्स कृष्णस्य रोमंचं रोमांचं णमह नमत । पूर्वत्र श्रावणं ज्ञानं अत्र चाक्षुषं इति भेदः । भ्रांतिमदलंकारं लक्षयति–**भ्रांती**ति । व्याकरोति-**तदि**ति । तस्यालंकारांतराव्यावृत्तिमाशंक्य परिहरति–**न** चेति । भ्रांतिश्चित्तधर्मः स चमत्काराय विद्यते यत्र स भ्रांतिमदलंकार इति स्फुटत्वेन प्रतीतेस्ततो भेदः स्फुट इत्यर्थः । उदाहरति–**कपाल इति** । मार्जारः कपाले पतितान् शशिकरान् पय इति लेढि । करी वृक्षांतरस्थितान् मृणालमिति आस्वादयति । वनिता रतान्ते तल्पस्थान् तान् अंशुकमिति हरति । प्रभामत्तश्चंद्रः इदं जगत् विप्लवयति अहो आश्चर्यम् । अत्र शशिकराणां प्राकरणिकानामुपलंभे तत्सदृशपयःप्रभृत्यप्राकरणिकं प्रतीयते । इतिशब्दस्तु तत्तदपारमार्थ्यद्योतनाय । एष च मालारूपः । अमालारूपस्तु–अवतंसप्रवालानामादाने यत्र सुभ्रुवः । पाणीनपि मिथः स्पृष्ट्वा त्रपंते धवलैः स्मितैः ॥ अयमपि सादृश्यव्यतिरिक्तो नालंकारः यथा–दामोदरकराघातविह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेन शतचंद्रं नभस्तलम् । प्रतीपालंकार लक्षयति–**आक्षेप** इति । व्याकरोति–**अस्येति** । उपमेयमेव उपमानकार्यं कर्तुं क्षमं किमुपमानेनेति एक उपमानस्याक्षेपः । उपमानतया प्रसिद्धस्यापि उपमेयतया परिकल्पनं द्वितीयः । तत्राद्यमुदाहरति–**लावण्येति** । भो देव लावण्यौकसि सप्रतापगरिमणि त्यागिनामग्रेसरे अवनीभरक्षमभुजे त्वयि निष्पादिते सति वेधसा इंदुः किं घटितः एष पूषा सूर्यः किं विहितः चिन्तारत्नं किं उत्पादितं अमी कुलक्ष्माभृतः मुधैव किं सृष्टाः । अत्रोपमानानामिन्द्रादीनां कार्यमाह्लादनादिकं उपमेयभूतो राजैव कर्तुं क्षम इति तेषां नैरर्थक्येन विधानमाक्षिप्यते । द्वितीयमुदाहरति–**ए एहीति** । ए अयि सुंदरि एहि दाव तावत् कणं (? ण्णं) दाउण कर्णं दत्वा वअणिज्जं वचनीयं शृ (? सु) णुं शृणु । किसोअरि कृशोदरि जणेण जनेन तुह मुहेण तव मुखेन चंद्रो चंद्रः उपमिज्जइ उपमीयते । अत्र चंद्रस्योपमानस्य उपमेयतया परिकल्पनमाक्षेप इत्याह–**अत्रेति** । क्वचित्तु उपमितौ निष्पन्नायामप्यनादरः संभतीत्याह–**क्वचिदिति** । उदाहरति–**गर्वमिति** हे मुग्धे पराजिते लोचनयुगलेन असंवाह्यमपरिमितमिमं गर्वं किं वहसि । दिशि दिशि सरस्सु ईदृशानि नलिनानि संति ननु । अत्र लोचनयुगं प्रति उत्पलानां उपमेयीकरणमेव तिरस्कार इत्याह–**इहेति** । अस्तु उपमितेर्निष्पत्तिरनिष्पत्तिर्वा यत्र पुनरुपमानत्वसंभावनैव नास्ति तत्राप्यनादरगोचरतया प्रतीपमेवेत्याह–**अनयैवेति** । रीतिः तिरस्कारनिबंधनत्वकल्पनाकारिणी युक्तिः

तया । यदसामान्यगुणयोगात् अन्यसदृशगुणसंबंधाभावात् उपमानत्वभावमपि नानुभूतचरं वस्तु (? तस्य) तत्कल्पनायामपि अलंकारः प्रतीपपमेवेत्यर्थः । उदाहरति–**अहमिति** । हे तात हालाहल अहमेव सुदारुणानां गुरुः इति मास्म दृप्यः गर्वं मा कृथाः। अस्मिन् भुवने भवादृशानि दुर्जनानां वचनानि भूयः संति ननु । अत्र दुर्जनवचनानि प्रति हालाहलस्य उपमानत्वं असंभवदेवोपनिबद्धमित्याक्षेप इत्याह–**अत्रेति** । उपमानत्वस्य कथंचिन्निष्पत्तौ तदनिष्पत्तौ च द्विधा द्वितीयं प्रतीपमुत्पाद्यत इति भावः । सामान्यालंकारमाह–**प्रस्तुतेति** । प्रस्तुतस्याप्रस्तुतेन वस्तुनासाधारण गुणयोगात् ऐकरूप्यं सामान्यमित्याह–**अतादृशमपीति** । न्यूनगुणमपि उत्कृष्टगुणेनैकात्मतया विवक्षितम्। वक्ष्यमाणतद्गुणनिराकरणार्थमाह–**अपरित्यक्तेति** । तदेकात्मतया अप्रस्तुतैकरूपेणापि । व्युत्पादयति–**तदिति** । उदाहरति –**मलयजेति** । मलयजरसविलिप्ततनवः नवहारलताविभूषिताः सिततरदंतपत्रकृतवक्त्ररुचः रुचिरामलांशुकाः । विततधाम्नि शशभृति धरां धवलयति अविभाव्यतां गताः। अत एव निरस्तभियः अभिसारिकाः सुखमेव प्रियवसतिं प्रयांति । अत्र प्रस्तुतस्य चंदनलेपादेः अप्रस्तुतया चंद्रिकया समं अविभाव्यतां गता इति अभेदप्रतीतिरलंकारस्य मूलमित्याह–**अत्र प्रस्तुतेति** । अभिसारिकाणां भयनिरासार्थं उच्यते नेत्युक्तम् । अर्थवैचित्र्यार्थमुदाहरणांतरमाह–**वेत्रेति** । वेत्रत्वचा तुल्यरुचां वधूनां कर्णाग्रतो गंडतलागतानि नवचंपकानि भृंगाः सहेलं यदि नापतिष्यन् तर्हि तानि कः अवेदयिष्यत् । अत्र प्रस्तुततदन्ययोः चंपकगण्डस्थलयोः अन्यूनानतिरिक्तं गौरत्वमैकरूप्ये हेतुः । ननु चंपकादीनां सभृंगतया भेदप्रतीतेः कथमैकात्म्यमित्याह–**अत्रेति** । निमित्तांतरं भृंगपतनम् । ऐक्यस्य प्रत्यक्षेणोपलब्धत्वात् । भृंगपतनेनानुमितभेदज्ञानेन बाधः । दिङ्मोहादौ तथा दर्शनादिति भावः । विशेषालंकारं लक्षयति–**विनेति** । व्याकरोति–**प्रसिद्धेति**। आधेयोपस्थितिरनाधारतया निबध्यमाना प्रथमो विशेषः । एकं स्वलक्षणकमेव वस्तु युगपदनेकत्र वर्त्तमानं द्वितीयो विशेषः । कस्यचिदुत्साहोत्कर्षात्कार्यमारभमाणस्य तेनैवारंभेण पृथक् प्रवृत्तावशक्यमपि कार्यान्तरमारभ्यमाणं तृतीयो विशेषः । तत्राद्यमुद्भाव्य उदाहरति–**दिवमिति** । दिवमुपयातानामपि येषां अनल्पगुणा गिरः आकल्पं जगंति रमयन्ति ते कवयः केषां न वंद्याः । अत्र कवीनां वागाधारभूतानामभावेपि आधेयानां वाचां ऐहिकी वृत्तिर्विशेषः । द्वितीयमुद्भाव्य उदाहरति–**सेति** । सपत्न्यनुरक्तनाथं काचनोपालभते । सा वसइ तुज्झ हिअए सा वसति तव हृदये स च्चिअ अच्छीसु सैव अक्ष्णोः सा अ वअणेसु सा च वचनेषु । भो सुंदर अह्मारिसाणं अस्मादृशानां पावाणं पापानां ओआसो अवकाशः कुत्त कुत्र। अत्र एकस्या एव तस्याः युगपदनेकत्र हृदयादिषु वासः विशेषः। तृतीयमुद्भाव्य उदाहरति–**स्फुरदिति** । नवः सविता च ससृजे नवः बृहस्पतिश्च ससृजे । अत्र वर्णनीयमेकमपि सत्यां(? सत्यं)भुवि स्रष्टुन्मुमुखस्य स्रष्टुस्तेनैवारंभेण अपृथक्सामग्रीसाध्यजन्मनां अशक्यनिर्माणानां मनोभवादीनां सृष्टिर्विशेषः । सृष्टिसंहारद्वारा विधिनेषेधप्रदर्शनार्थमुदाहरणांतरमाह–**गृहिणीति** । हे इंदुमति त्वं गृहिणी सचिवः मिथः सखी ललिते

कलाविधौ प्रियशिष्या एवंविधां त्वां हरता करुणा विमुखेनमृत्युना मे किं न हृतं वद । अत्र एकस्या इंदुमत्याः संहारादेव गृहिणीसचिवादिकमनेकं हृतम् । ननु **भामहादि**प्रक्रियायां सर्वमिदमतिशयोक्तावंतःपातीत्याशंक्य तदभ्युपगतप्रायमित्याह—**सर्वत्र** चेति । प्राणत्वेन जीविततया सारभावेनेत्यर्थः । अत्र **भामह**ग्रंथं संवादयति—**सैषेति** । वक्रोक्तिः अतिशयोक्तिः वक्रिमातिशयोरेकत्वात् । अनया वक्रोक्त्या विभाव्यते विचित्रतया प्राप्यते । तद्गुणालंकारं लक्षयति—**स्वमिति** । अत्युज्ज्वलगुणस्य वस्तुन इति शेषः । योगात्संबंधात् । तस्य गुणो यत्र स तद्गुणः । व्याकरोति—**वस्त्विति** । स्वगुणसंपदेत्यत्र स्वपदेन समीपगतपरामर्शप्रतियोगित्वं प्रकाश्यते । तस्य गुणस्यापरव्यंजकस्य प्रतिभासत्वं (? प्रतिभानं) अल्पगुणस्य प्रचुरगुणेन कवलीकारात् । तद्गुणशब्दं व्युत्पादयति—**तस्येति** । उदाहरति—**विभिन्नेति** । यत्र रैवतकपर्वते वंशकरीरनीलै रत्नैः परितः स्फुरंत्या रुचा गरुडाग्रजेन विभिन्नवर्णाः सूर्यस्य रथ्याः पुनः स्वां रुचिमानिन्यिरे । अत्र सूर्यस्यंदनाश्वानां अरुणवर्णस्वीकारः तस्यापि गरुडाग्रजकिरणकवलीकरणमिति तद्गुणद्वयम् । यत उक्तं स्वां रुचं पुनरानिन्यिरे इत्याह—**अत्रेति** । न चेदं मीलितमेवेति वाच्यम् । मीलिते प्रकृतं वस्तु वस्त्वंतरेणाच्छादितत्वेन प्रतीयते । इह तु अनपहृतस्वरूपमेव प्रकृतं वस्तु वस्त्वंतरगुणाक्रांततया प्रतीयते इत्यनयोर्भेदात् । अतद्गुणं लक्षयति—**तद्रूपेति** । रूपं वर्णः अननुहारः अननुवर्त्तनं अग्रहणमिति यावत् । व्याकरोति—**यदि त्विति** । तदीयं उत्कृष्टगुणसंबंधि । न्यूनगुणस्य प्रगुणगुणस्वीकारो न्याय्यः । अन्यथाभावश्चेत्तदानीमतद्गुण तस्य उत्कृष्टस्य गुणा न संतीति ग्रहणम् । अतद्गुणं उदाहरति—**धवल** इति । हे सुंदर प्रिय जहवि यद्यपि धवलोसि तहवि तथापि तुए त्वया मज्झ मम हिअअं हृदयं रंजिअं रंजितम् । राअभरिए वि रागभरितेपि हिअए हृदये सुहअ सुभग णिहितो निहितः ण रत्तोसि न रक्तोसि । अत्र पूर्वार्धे धवलिमारुणिमार्गुणयोर्विरोधः उत्तरार्धे त्वतद्गुण इत्याह—**अतिरिक्तेनापीति** । अतद्गुण इत्येतत्प्रकारांतरेण व्याकरोति—**किंचेति** । अस्मिन्नपि व्याख्याने उदाहरणमाह—**गांगमिति** । गंगाजलं सितम् । यांमुनं कज्जलाभम् । हे राजहंस उभयत्र मज्जतस्तव सैव शुभ्रता न चीयते नाप्यपचीयते । अत्र प्रकृतस्य हंसस्य शुभ्रता सत्यामपि योग्यतायां गंगायामुनोदकगुणौ नानुविधत्ते । व्याघातालंकारं लक्षयति—**यद्यथेति** । व्याकरोति—**येनेति** । कर्त्रा केनचिदुपायविशेषेण निष्पादितं वस्तु अन्येन प्रतिद्वंद्विना तस्मादेवोपायविशेषादन्यथा क्रियते यत्र स व्याघात इत्यर्थः । व्याघातं निर्वक्ति—**स** इति । उदाहरति—**दृशेति** । या दृशा दग्धं मनसिजं दृशैव जीवयन्ति विरूपाक्षस्य जयिनीस्ता वामलोचनाः स्तुवे । अत्र विरुपाक्षेण कर्त्ता दृष्टिरूपेणोपायेन स्मरस्य दाहः साधितः । तज्जिगीषुभिः स्त्रीभिस्तेनैव दृष्टिरूपेण तस्य जीवितं साधितम् । संसृष्ट्यलंकारं लक्षयति—**सेति** । व्याकरोति—**एतेषामिति** । तिलतंडुलन्यायेन मिश्रत्वे संसृष्टिः । क्षीरनीरन्यायेन मिश्रत्वे तु संकरः । तत्र संसृष्टिः शब्दालंकारसंसृष्टिः अर्थालंकारसंसृष्टिः उभयालंकारसंसृष्टिश्चेति त्रिविधा । तत्राद्यामुदाहरति—**कुसुमेति** । कुसुमसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया चलितया अलकलोलदृशा अन्यया वनितया कलमेखला-

कलकलः विदधे । अत्र पूर्वार्द्धे अनुप्रासालंकारः उत्तरार्धे यमकालंकारः उभयोः शब्दालंकारयोः संसृष्टिः । द्वितीयमुदाहरति-**लिंपतीति** । तमः अंगानि लिंपतीव नभः अंजनं वर्षतीव असत्पुरुषसेवेव दृष्टिः निष्फलतां गता । अत्र पूर्वार्द्धे उत्प्रेक्षालंकारः असत्पुरुषसेवेत्युत्तरार्धे उपमालंकारः अनयोरर्थालंकारयोः संसृष्टिः । पूर्वोत्तरश्लोकयोः कथं संसृष्टिरित्याकांक्षायां क्रमेणाह-**पूर्वत्रेत्यादिना ।** पूर्वत्र कुसुमेत्यादौ यमकानुप्रासौ छंदोलक्षणैकार्थसमवायव्यतिरेकेण मिथो निरपेक्षौ संसृष्टिलक्षणं वैशिष्ट्यं प्रयोजयतः उत्तरत्र तु लिंपतीत्यादौ परस्परनिरपेक्षे उपमोत्प्रेक्षे अर्थालंकारौ संसृष्टिलक्षणं वैशिष्ट्यं प्रयोजयतः । तृतीयमुदाहरति-**सो णेति ।** हे सखि एत्थ अत्र गामे ग्रामे सो णत्थि स नास्ति जो य तरुणहिअअलुडिं तरुणानां हृदयोल्मुकं महमहन्तलाअणं महः लावण्यं (?) णिवारइ निवारयति । स्वायत्तीकृत्य पुरुषांतरप्रसंगाद्व्यावर्त्तयति । अत्र णत्थि एत्थेत्यादावनुप्रासशब्दालंकारः । हिअअलुडिमिति तु रूपकालंकारः अनयोः संसृष्टिरित्याह **अत्रेति ।** नन्वत्रालंकारयोर्भिन्नविषयत्वात्कथं संसृष्टिरित्यत आह-**संसर्गस्येति ।** गद्यविवक्षायां वाक्ये पद्यविवक्षायां छंदसि । संकरालंकारं लक्षयति-**अविश्रांतीति ।** व्याकरोति-**एत** इति । अंगमनुग्राहकं अनुग्राह्यमंगि । संकीर्यमाणेत्यादि सामान्यलक्षणं उदाहरति-**आत्ते सीमंतचिह्न इति ।** हे राजन् अरण्ये इत्वरीणां त्वदरिमृगदृशां सीमंतचिह्ने मरकतिनि हेमताटंकपत्रे हृते मेखलायां लुप्तायां मणितुलाकोटियुग्मे झटिति गृहीते सति बिंबोष्ठकांत्या शोणं हारं गुंजाफलानां स्रज इति भ्रांत्या नैव हरंति । अत्र हारस्य शुक्तिमपरित्यागात् शोणिमस्वीकारात् तद्गुणालंकार राद्वा गुंजाफलानां स्रज इति वाक्ये भ्रांतिमानलंकारः । अत्र तद्गुणमंगमपेक्ष्य भ्रांतिमानगी प्रादुरभूत् तदाश्रयेण च तद्गुणः सचेतसां चमत्कारनिमित्तमिति तयोरंगांगिभाव इत्याह-**अत्रेति ।** उदाहरणांतरमाह-**जटेति ।** जटाभाभिः जटातुल्यैर्भाभिः किरणैः उपधृता करधृतकलंकाक्षवलयः करो रश्मःपाणिश्च वियोगिव्यापत्तेरिव कलितवैराग्यविषदः विषयव्यावृत्तता विरागताशच भस्मा पांडुः शशी पितृवन इव परिप्रेंखत्तारापरिकरकपालांकिततले व्योम्नि चलति । अत्र जटाभाभि रित्यार्थी उपमा करवैराग्यशब्दश्लेषस्यांगतां भजते । अयं श्लेषालंकारोपि कलंक एवाक्षवलय इति रूपकस्यांगतां भजते । अयं रूपकालंकारःवियोगिव्यापत्तेरित्युत्प्रेक्षायाश्चांगम् । पितृवन इवेति तु शाब्दी उपमा सर्वत्रोपकरोति इति चतुर्णामंगांगिभाव इत्याह-**उपमेति ।** ननु कलंकोक्षवलय इवेत्युपमितसमासः किमिति न भवति व्याघ्रादीनामाकृतिगणत्वादित्याशंक्याह-**कलंकोक्षवलय** इवेति । समासोपमायां कलंकस्य प्राधान्येन प्रतीयमानत्वात् तस्य करधृतत्वयोग्यता न स्यात् रूपके तु अक्षवलयस्य प्राधान्यात्तस्य करधृतत्वं घटत इति रूपकमेवांगीकर्त्तव्यमिति भावः । ननु करैः रश्मिभिः धृतकलंकश्चंद्र इति शेषच्छायासमाश्रयणे कलंकस्य करधारणं भवद्भिरपि स्वीकृतमेवेत्याशंक्याह-**श्लेषेति** । शशांकतनौ कराः कलंकश्चेति प्रत्यासत्तेः करचरणोपचार इति भावः । उपमितसमासे तु उपचार एव शरणमिति प्रतिपादयितुमाह-**कलंक इति** । न केवलमार्थेष्वेवालंकारेष्वयं संकरः यावत् । अर्थशाब्देष्वपीत्याह-**एवमिति ।** उदाहरति-**राजतीति ।** अभिहतः दानवानां रासः सिंहनादो येन शंभुना तस्य

संबोधनं हे अभिहतदानवरास अतिपातिनः जवेन व्रजंतः सारावाः सशब्दा नदा यत्र सा इयं तटी राजते। अविरतेन संततेन दानेन मदेन वरा श्रेष्ठा सारा स्थिरा वनं दयते रक्षति । वनदा सा च गजता गजसमूहश्च यूथमतिपाति रक्षतिअत्र । यमकं अनुलोम-प्रतिलोमलक्षणश्चित्रभेदश्चेति द्वावलंकारौ मिथः सापेक्षौ अंगांगिभावरूपं संकरमनुभवत इत्याह-**अत्रेति**। अलंकारयोः परस्परापेक्षा कथमित्याशंक्याह-**पदद्वयेति** अपेक्षा परस्परानुग्राह्या-नुग्राहकभाव इत्यर्थः। नच शब्दालंकारयोः शब्दवत् परस्परोपकार्योपकारकभावाभावेन नागां-गिभाव इति वाच्यम्। शब्दालंकारसंसृष्टिस्तत्र श्रेयसीति **अलंकारसर्वस्वकारेणो**क्तत्वात्। शब्दालंकारसंकरभेदांतरमाह-**एकेति**। व्याकरोति-**द्वयोरिति**। एकस्यालंकारस्य ग्रहे स्वीकारे न्यायस्य साधकप्रमाणस्याभावात् तदितरस्यालंकारस्य वा परिग्रहे दोषस्य बाधकप्रमाणस्याभावा-दित्यर्थः। तर्ह्यलंकारद्वयं निश्चितमेवास्त्वित्याह-**द्वयोर्बहूनामित्यादि**। नन्वेकस्य च ग्रहे इत्यादिनापि कथं संकर एव प्रतिपाद्यत इत्याशंक्याह-**समुच्चयेनेत्यादि**। एकस्य च ग्रह इत्यादिसूत्रे संकरसमुच्चयार्थश्चकारः क्रियते तेन समुच्चयेन समुच्चयद्योतकेन चशब्देन संकर आक्षिप्यते। उदाहरति-**जहेति**। जह गंभीरो यथा गंभीरः जह अ रणणिब्भरो यथा रत्ननिर्भरो जह अ णिम्मलच्छाओ यथा च निर्मलच्छायः ता किं तत्किं विहिणा विधिना स जलणिही स जलनिधिः सरसवाणीओ सरसपानीयो ण किओ न कृतः। अत्र समासोक्तिरप्रस्तुतप्रशंसा चेत्याह-**अत्रेति**। विशेषणसाम्यादित्यनेन समासोक्तेर्लक्षणमनुस्मार्यते तत्समानगुणतये त्यनेन अप्रस्तुतप्रशंसायाः एवं द्वयोः संदेहमुदाहृत्य बहूनामुदाहरति-**यथा चेति**। नयनानंददायि इंदोः एतद्विंबं प्रसीदति। अधुना निरुद्धाशमपि इदं तमः शीर्णम्। अत्र पर्यायोक्त्यत्यतिशयोक्तिरूपकदीपकतुल्ययोगितासमत्सोक्त्यप्रस्तुतप्रशंसोक्तीनां शंकया संदेहलक्षणः संकर इत्याह-**किमितीति**। **भंग्यंतरेण** प्रकारांतरेण अथैतयोरिति मुखेंदु-बिम्बयोः समुच्चयविवक्षायां बिंबं प्रसीदति एतच्च मुखं प्रसीदति इति गामश्वं च पुरुषपशुवत् समुच्चयप्रतीतिसद्भावात् प्रस्तुताप्रस्तुतयोश्चंद्रमुखयोर्दीपकम्। **मुखनैर्मल्यप्रस्तावादिति**। मुखनैर्मल्ये प्रस्तुते चंद्रप्रशंसेति अप्रस्तुतप्रशंसेत्यर्थः। **अयमेवति**। अनिश्चयात्मक इत्यर्थः। न्यायदोषयोः संभवे अयं संकरो न संभवतीत्याह-**यत्र त्विति**। न्यायशब्दार्थमाह-**न्यायश्चेति**। मुख्यतया घटितत्वमनुकूलता साधकं प्रमाणं बाधकं तु दोष इति भावः। तत्रोपमारूपकयोः प्रत्येकं साधनदूषणद्वारा चत्वारो दोषाः उपमायाः साधनं न रूपकस्य दूषणं किं तु ताटस्थ्यमित्येकं रूपकस्य साधनं नोपमाया दूषणं किं तु ताटस्थ्यमिति द्वितीयः उपमाया दूषणं रूपकताटस्थ्यमि-ति तृतीयः रूपकस्य दूषणं उपमाया ताटस्थ्यमिति तुरीयः। हासद्युतेर्मुख्यया वृत्त्या वक्त्र एवावस्थानात् शशिनस्तिरोधानं वक्त्रस्याविर्भाव इति तस्य आनुकूल्यं भजत इत्युपमायाः साधनमित्यर्थः। ननु शशिनि तस्याः प्रातिकूल्यात्कोव्यंतरस्य रूपकलक्षणस्य दूषणमेवास्तीतियित आह-**शशिनि त्विति**। तथेति गुणवृत्त्या। द्वितीयमुदाहरति-**वक्त्रेंदाविति**। अत्र चंद्रस्यानूकूलमपरत्वं न वक्त्रस्य प्रतिकूलमिति रूपकं साध्यते नोपमा दूष्यत इत्यर्थः। तृतीयमुदाहरति-**राजेति**। अत्रालिंगनमुपमायां प्रतिकूलम्। तदेवोपपादयति-**सदृशमिति**।

चतुर्थमुदाहरति–**पादांबुजमिति** । पादांबुजमिवेत्युपमा । अत्र मंजीरशिंजितं अंबुजे प्रतिकूलमिति रूपकं दूष्यत इत्यर्थः । ननु यत्र रूपकस्य दूषणं तत्र तत एवोपमासिद्धिरिति कथं नोपमा साध्यत इत्यत आह–**विध्युपमर्दिन** इति । विधिबाधयोर्व्यपदेशविकल्पे बाध एव प्रगल्भत इति न्यायेन रूपकविध्युपमर्दिनो मंजीरसिंजितप्रतिकूललक्षणस्य बाधस्य तदपेक्षया तदनुकूलतालक्षणसाधकापेक्षया उत्कटत्वेन विध्युपमर्दितत्वजनिताधिक्येन परिज्ञानादित्यर्थः । साधकबाधकविषये अतिदेशमाह–**एवमिति** । शरदीव प्रसर्पत्यां तस्य कोदंडसक्तौ । विनिद्रजृंभितहरिर्विंध्योदधिरजायतेत्यत्र विनिद्रजृंभितहरिरिति नरसिंहद्वयविषयं यत्साधारण्येन विशेषणं तत्[विंध्य उदधिरिवेत्युपमां बाधितेन (? त्वा) रूपकं साधयति । सामान्याप्रयोग इत्युक्तत्वात् इत्यादि स्वयमेवोह्यमित्यर्थः । एकपादानुप्रवेशस्वभावं तृतीयसंकरमाह–**स्फुटमिति** । यः कौमारहर इत्यादौ विभावनाविशेषोक्त्योः अस्फुटतया संकर इति तदपोहार्थं स्फुटमित्युक्तम् । अभिन्नपदताभावात्स्फुटं निश्चितमित्यर्थः । व्याकरोति–**अभिन्नेति** । उदाहरति–**स्पष्टेति** । अथो स्पष्टमुल्लसत्किरणा एव केसरा यस्य तच्च तत् सूर्यबिंबमेव विस्तीर्णा कर्णिका यस्य तच्चाश्लिष्टाष्टदिश एव दलानि तेषां कलाप सुखः अवतारो यस्य स चासौ वद्धांधकारश्च स एव मधुपावलिर्यत्र एवंविधं दिवस एव अरविंदं संचुकोच संकुचितवान् । अत्र कयोः सांकर्यमित्यत आह–**अत्रेति** । निगमयति–**तेनेति** । तद्व्याकरोति–**तदिति** । सर्वालंकारोदाहरणानि संकरे दर्शयितुं न शक्यंत इत्याह–**प्रकारांतरेण त्विति** । तत्र हेतुमाह–**आनंत्यादिति** । तस्य संकरस्य प्रभेदाः अंगांगिभाव संदेहैकवाचकानुप्रवेशरूपा तेषां भेदा तदलंकारसंकररूपाः तेषामानंत्यात् त्रिप्रकारतैव न्याय्येति भावः । नवमदशमोल्लासद्वयसमर्थितं परमं प्रकरणार्थमुपसंहरति–**इति प्रतिपादिता** इति । अलंकाराणां शब्दार्थनैयत्यमन्वयव्यतिरेकाभ्यां प्रतिसमाधातुमाक्षिपति–**कुत इति** । प्रतिष्ठितो नियमः प्रतिनियमः आश्रयाश्रयिभावस्वीकारश्चेदभ्युपगम्यत इति भावः । समाधत्ते–**उक्तमत्रेति** । प्रागप्युक्तप्रायमेतत्प्रतिपत्तिसौकर्यात्प्रपंच्यत इत्यर्थः । शाब्दः आर्थः औभयिक इति अलंकारविवेके प्रमाणमन्वयव्यतिरेकावित्याह–**यथेति** । किमलंकारैकचिंतया दोषगुणावप्येव-मित्याह–**दोषेति** । आश्रयाश्रयिभावस्य निमित्तांतरस्य नियामकतायामनुपपत्तेरित्यर्थः । फलितमाह–**ततश्चेति** । उभयालंकारान् दर्शयति–**एवं चेति** । एवमेव अन्यानप्युभयालं-कारानाह–**तथेति** । नन्वर्थान्तरन्यासादयो यद्युभयालंकाराः तर्हि ते अर्थालंकारेषु कथं लक्षिता इत्याशंक्याह–**अर्थस्य इति** । वाच्यालंकारः अर्थालंकारः । तर्हि कथं विवेचकत्वगर्वः तत्राह–**वस्त्विति** । तदनुसारणे पुनः उभयिका एवेति भावः । आश्रयाश्रयिभावेन शब्दार्थो-भयालंकारस्य व्यवस्थानान्नत्वन्वयव्यतिरेकाभ्यामित्य**लंकारसर्वस्वकारादीनां** मतं दूषयि-तुमनुवदति–**योलकार इति** । आश्रयाश्रयिभावस्य अव्यभिचारे प्रमाणमन्वेषणीयं तच्चान्वय-व्यतिरेकरूपमेव प्रमाणमंगी कर्तव्यमिति भावः । विशिष्टस्य व्यवस्थितरूपस्य । यथोक्तावन्वयव्य-तिरेकौ निमित्तं यस्येति विग्रहः । एषामलंकाराणां दोषा उक्तेष्वेव दोषेषु अंतर्भूतत्वात्पृथङ्नो-च्यंत इत्याह–**एषामिति** । तत्रादौ शब्दालंकारेषु अनुप्रासदोषान् आद्योक्तेषु दोषेष्वंतर्भाव-

यति–**अनुप्रासस्येति ।** अनर्थाः दोषाः (? अनुप्रासदोषाः) तत्र प्रसिध्यभावः प्रसिद्धिविरोधे अंतर्भवति । वैफल्यमपुष्टार्थतायां वृत्तिविरोधो वर्णप्रतिकूल्य इत्यर्थः । तत्स्वभावत्वात् तेषां प्रसिध्यभावादीनां प्रसिद्धिविरोधादिलक्षणत्वादित्यर्थः । आद्यमुदाहरति-**चक्रीति ।** जगदुपकृतये नित्ययुक्तस्य अहिमरुचः सूर्यस्य यस्य स्यंदनस्य चक्रारपंक्ति चक्री स्तौति । हरिरिंद्रोपि हरीन् अश्वान् स्तौति । धूर्जटिः शिवःरथस्य धूः अंगविशेषः तद्ध्वजांतान् स्तौति । नक्षत्रनाथश्चंद्रोपि अरुणं अनूरुं स्तौतिः कुबेरः कूवराग्रं स्तौति प्रसन्नः सः स्यंदनः वः अवतात् । अत्र स्तोतृस्तुत्यु-(? त्यो) पन्यासेपि किंचिदनौचित्यं अन्यत्र (? था) कवेरनुप्रासकुतूहलभंगादित्याह–**अत्रेति ।** चक्री कर्ता चक्रारपंक्तिमेव कर्मभूतां स्तौति नान्यत इत्येवंरूपेण स्तुतिरनुप्रासानुरोधेनैव कृता न पुराणाद्यनुरोधात् नाप्यथौंचित्यादतः प्रसिद्धिविरोधो दोष इत्यर्थः । द्वितीयमुदाहरति–**भणेति ।** आनंदस्यंदिसुंदेरंदुमुखि सल्लीलोल्लापिनि अरुणचरणे तरुणि यदि मे रमणमंदिरं रतिवेश्म गच्छसि तत्तर्हि अनणुरन्मणिमेखलं अविरतसिंजानमंजुमंजीरं ते परिसरणं अकारणं रणरणकं किं कुरुते, इत्यत्र यदनुप्रासस्य वैफल्यं तत् अर्थस्यापरिपोषे पतिष्यति । तादगनुप्रासप्रसाधितवाचकनिवेशेपि वाच्यस्य तद्द्वारा वाक्यार्थीभूतपरस्य वाच्यत्वासिद्धेरित्याह–**वाच्यस्येति ।** तृतीयमुदाहरति **अकुंठेति**–अकुंठोत्कंठया आकंठं पूर्णं मां हे कलकंबुकंठ्यास्तव कंठे क्षणं कुरु । कंठार्त्तिमुद्धर । अत्र उपनागरिकां विमुच्य परुषाया अंगीकारात् यो वृत्तिविरोधः स वर्णप्रातिकूल्यान्नातिरिच्यत इत्याह–**शृंगार** इति । यमकविषयं दोषमप्रयुक्तत्वेन्तर्भावयति **यमकस्येति । उदाहरति-यथेति ।** संदभः सदाभा कान्तिर्यस्याः सा भुजंगमस्य मणिरिव ग्राहैर्जलग्राहैः अवकीर्णा व्याप्ता सत् अंभो यस्या स नदीव प्रमुखे आदौ दंभेन सह वर्त्तत इति संदंभाः खलाः जंतोश्चेतः निर्णयतोपि दुरंततां कर्षति । पादद्वये पादचतुष्टये क्वचिदेकत्र पादे वा यमकस्य प्रयोगः । ननु पादत्रये पादत्रययमनत्वप्रयुक्तान्नान्यद्दूषणमित्यर्थः। लिंगवचनभेदलक्षण उपमादोषोपि अत्रान्तर्भवतीति अर्थालंकारेषु **भट्टवामना**द्युदाहृतानुपमादोषानन्यत्र संक्रामयति–**उपमायामिति ।** जातिर्ब्राह्मणत्वादि प्रमाणं परिणाहादि प्रमाणवैशिष्ट्यं तद्वर्ति न्यूनत्वं अधिकता वा तादृशी अनुचितार्थान्न पृथग्दोषावित्यर्थः । उपमानस्य धर्मः साधारणः तद्गतन्यूनत्वं आधिक्यं च पृथग्दोषतया अन्यैरभिमन्यमानं क्रमेण न्यूनपदत्वमधिकपदत्वं च न व्यभिचरतः किं तु तदंतरनुप्रविशत इत्याह–**धर्माश्रये त्विति ।** जातिन्यूनत्वमुदाहरति–**चंडालैरिति ।** युष्मद्वृत्तिसंभाष्यान्पुरुषान् प्रति चंडालानामुपमानीकरणे जातिन्यूनत्वम् । परिमाणन्यूनमुदाहरति–**वह्नीति ।** भगवतः सहस्रधाम्नो ज्वलनस्फुलिंगलक्षणमुपमानं परिमाणन्यूनम् । जात्यधिकमुदाहरति–**अयमिति ।** चक्रवाको भगवान् पितामहो जात्यधिक उपमानम् । परिमाणाधिकमुदाहरति–**पातालमिति ।** अत्र नायिकायाः नाभिस्तनवेणीदंडानां पातालक्षितिधरकालिंदीप्रवाहाः परिमाणाधिकाः । अत्र एषामनुचितार्थत्वमाह–**अत्रेति ।** प्रस्तुत इति साधर्म्येण चमत्काराय विवक्षितोर्थ इत्यर्थः । कदर्थित इति प्रतिपत्तिपरिहारक्षोभेण खलीकृतः अर्थ्यर्थमेवेति यथा यत्रोद्वेगो न धीमतामिति न्यायेन स्वीकर्तुमनौचित्यं तथा विरसीकृत इत्यर्थः । धर्माश्रयन्यूनत्वमुदारति–**स इति ।** अत्र मौजीलं-

छितस्य कृष्णाजिनधारिणो मुनेः उपमेयस्य नीलजीमूतभागाश्लेषिणि सूर्ये उपमाने मौजीसदृशविद्युतो नोक्तिरस्तीति धर्मन्यूनत्वमित्याह–**अत्रेति**। धर्म्माश्रयाधिक्यमुदाहरति–**स इति**। पीतवाससः शार्ङ्गधरस्य चोपमेयीकरणे शतद्रुदेंद्रायुधत्वमत्र समुचितं न पुनः शशिनो ग्रहणं पांचजन्यानिर्देशादतो धर्माधिक्यमित्याह–**अत्रेति**। इदानीं लिंगवचनभेदस्वग्राह्यो दोषः क्रमभंगेन्तर्भवतीत्याह–**लिंगवचनेति**। लिंगभेदेन वा वचनभेदेन वा अन्यरूपमित्यर्थः। सविशेषणस्यैवेति वक्ष्यमाणच्युतादिविशेषणकस्येत्यर्थः। आद्यमुदाहरति–**चिंतेति**। अत्रोपमेये पुंसि च्युत इति उपमाने तु चिंतारत्ने च्युतमिति लिंगविकारेण पुंसः चिन्तारत्नस्य वा कस्यचिदेव च्युतलक्षणधर्मसमयावगतेः च्युतत्वरूपविशेषणशून्यस्य उपमानत्वं उपमेयत्वं वा न घटत इति तस्य उभयत्रान्वयेन भाव्यं तच्च क्वचिदुच्यते पुंसि चिंतारत्ने तु केवलं प्रतीयत इति लिंगवैषम्यं यत् तत्क्रमभंगेन्तर्भवतीति भावः। (?वचनभिन्न)तामुदाहरति–**सक्तव** इति। अत्रोपमेयेषु सक्तुषु शुद्धा इति वहुवचनं उपमाने कुलवध्वां शुद्धेति एकवचनमिति वचनवैकृतेन सक्तूनां कुलवध्वा वा कस्यचिदेव शुद्धिलक्षणधर्मसमन्वयावगतेः शुद्धत्वरूपविशेषणशून्यस्य उपमेयत्वमुपमानत्वं वा न घटत इति तस्य उभयत्रान्वयेन भाव्यं तच्च क्वचिदुच्यते सत्कुलवध्वां तु प्रतीतिपरिस्खलनात् वचनभेदः क्रमभंग एवांतर्भवतीति भावः। असाधारणधर्मस्य अनन्यथाकरणे निर्दोषत्वमाह–**यत्र त्विति**। उपमानोपमेययोरवैषम्यप्रतीत्या प्रवर्तमानत्वादिति हेतुमाह–**उभयथेति**। उदाहरति–**यथेति**। अत्र गुणानां रत्नानां च तत्त्वतो लिंगभेदेपि तृतीयांततया तिरोधानात् लिंगभेदरूपः प्रक्रमभंगो न भवतीति भावः। वचनभेदस्यादोषत्वमुदाहरति–**तद्वेष** इति। तस्याः वेषः आकारः असदृश इति कञ्प्रत्ययांतमेकवचनं कित्प्रत्ययांतं वहुवचनम् मधुरतया भृतः युक्त इत्येकवचनांतं मधुरतां विभ्रतीति वहुवचनम् दधृधारणे इत्यस्मादेकवचनं दधत इति दधातेर्वहुवचनम्। अत्र वेषस्य विभ्रमाणां वचनभेदेपि श्लेषवलात् प्रतीतिः(?न) स्थगते तद्भेदरूपो न प्रक्रमभग इति भावः। अन्यानप्युपमादोषान् प्रक्रमभंगेन्तर्भावयति–**कालेति**। आदिशब्दादामंत्रणकालभेदमुदाहरति–**यथेति**। सर्वेषां चेतना अद्यापि प्रसादमाप्नोतीति वर्तमानकाल एव न्याय्यः इति कालभेद इत्याह–**अत्रेति**। विधिभेदमुदाहरति–**गंगेति**। गंगा प्रवहत्विति लोडंत एव भवतु को दोष इत्यत्राह–**अप्रवृत्तेति**। अप्रवृत्तप्रवृर्तनात्मा विधिः विधिरत्यंतमप्राप्तौ इत्युक्तत्वात् गंगायां न संभवति नित्यप्राप्तत्वात्तस्याः। एवंच कालपुरुषविध्यादीनामुपमेये केवलमौचित्यं नोपमाने इति तद्भेदस्य प्रक्रमभंगेन्तर्भाव इति भावः। नन्वेवं सर्वोपि सर्गवंधादिव्यवहारः उत्सन्नः स्यादित्यालंकारिकं प्रति कविराक्षिपति–**नन्विति**। साक्षादुच्चरितस्यः प्रतीयमानस्य वा धर्मस्य न वैषम्यं तन्मात्रोपादानेपि उपमायाः प्रसर्पणात्। ततश्च सामान्येनोपमायां परिपूर्णायां यथोचितकालान्वय इति कोयं कालभेद इत्याक्षेपार्थः। साक्षादुच्चरितेपि धर्मे तदभिसंवंध उपमेये पार्ष्ठिकसंबंधलक्षणात्प्रयत्नभेदादेवेति सर्वत्र उपमायाः स्वभाव इत्याह–**यत्रापीति**। उपात्तेन साक्षादुच्चरितेन युधिष्ठिर इवायं पुरुषः सत्यं वदतीत्यत्रापि प्रयत्नवलात्सत्यवादीव सत्यं वदतीत्यर्थः पर्यवस्यति। सामान्यविशेषभावसंमिश्रोयमन्वयः उपमायां सार्वत्रिक

इति प्रतिपत्स्यामह इति प्रयत्नभेदमवलंबमानानस्मान् प्रति न कालादिभेदोद्भावनौचित्यमिति भावः। सत्यवादी सत्यं वदतीति पौनरुक्त्यमित्याशंक्याह–**सत्येति**। अर्धांगीकारेण परिहरति–**सत्यमिति**। यद्यपि चिरंतनप्रयोगेषु कालभेदादि दृश्यते तथापि तन्मात्रमेव समर्थनीयं नतु तद्वदन्येन प्रयोक्तव्यं प्रस्तुतप्रतीतिविघातात्। तथा चोक्तं–पूर्वे विशृंखलगिरः कवयः प्राप्तकीर्त्तयः। तत्समाश्रित्य न त्याज्या इति रेषा (? रीतिरेषा) मनीषिणामिति। दोषा इति शेषः। इति परिहारग्रंथार्थः। असादृश्यमसंभवश्चेति उपमादोषावनुचितार्थतायामंतर्भूतावित्याह–**असादृश्येति**। असादृश्यमुदाहरति–**यथेति**। असादृश्यस्यानुचितार्थत्वमाह–**अत्रेति**। ननु अर्था रश्मय इव प्रीतिदायिन इति साधर्म्यसिद्धेः काव्यशशिनोऽपि तत्सिद्धिरिति चेत् मैवं इतरेतराश्रयपराहतत्वात्। तथा च **वामनः**—तदेवमितरेतराश्रयदोषो दुरुत्तर इति। असंभवमुदाहरति–**निपेतुरिति**। तादृशो वारिधारा उपमानतया नोपपद्यंत इत्यनुचितार्थत्वं दोष इत्याह–**अत्रापीति**। उत्प्रेक्षादोषानप्यवाचकत्वेन्तर्भावयति–**उत्प्रेक्षायामपीति**। इवादय इव यथाशव्दोपि संभावनायां द्योतयितुमयुक्तं तस्य तथाशक्त्यभावात् क्वचित्समर्थस्यापि अन्यत्रासामर्थ्यदर्शनात्। यथा उत्प्रेक्षायां द्योतयितुं समर्थस्यापि मन्ये शंके इत्यादेरुपमायामसामर्थ्यम्। केवलस्य समासरहितस्येत्यर्थः। अस्यामित्युत्प्रेक्षायाम्। अत्रेति सामर्थ्यप्रतिपादने। शक्तिः सामर्थ्यम्। अत्रेत्युत्प्रेक्षायां अवाचकत्वं दोष इवशव्दस्य साधर्म्यं संभावनां च प्रकटयितुं पाटवमस्ति यथाशव्दस्य तु साधर्म्यमेवेति भावः। उत्प्रेक्षादोषमुदाहरति–**यथेति**। नारीलोचनचातुर्यशंकासंकुचितं ध्रुवमिति युक्तः पाठः। इदानीमुत्प्रेक्षामूलस्य अर्थान्तरन्यासस्यापि अनुचितार्थत्वमेवेत्याह–**उत्प्रेक्षितमिति**। निरुपाख्यप्रख्यमित्यसत्यप्रायत्वात्तत्समर्थनाय उत्प्रेक्षितस्यार्थस्य समर्थनाय। **गगनतल इति**। समर्थनीयस्य वास्तवस्याभावादित्यर्थः। उदाहरति–**यथेति**। अत्रासंभावनैकशरणत्वं परिशेषयति–**अत्राचेतनस्येति**। तदेकशरणतायां नार्थान्तरन्यासापेक्षा निर्विषयत्वात्। एवं चोत्प्रेक्षेवे दुर्लक्ष्येत्याह–**संभावितेनेति**। अथ समासोक्तावुपमानविशेषप्रकाशनप्रभवमपुष्टार्थत्वं पुनरुक्तत्वं वा स्यादिति समर्थयते–**साधारणेति**। एवकार उपमापेक्षामपहस्तयति। **अनुक्तमपीति**। तादृक्स्वभाववत्त्वात्तस्याः तस्योपमानस्य प्रयोजनाभावादपुष्टार्थता अनुपादेयत्वात्पौनरुक्त्यं वा दोष इत्यर्थः। उदाहरति–**यथेति**। तिग्मरुचौ सूर्ये करैः किरणैः ककुभः दिशः स्पृशति सति दयितयेव जृंभिततापया अतनुमानपरिग्रहया रुचिरयापि दिनं ग्रीष्मदिनं तस्य श्रियां स्थितम्। कराः रश्मयः पाणयोपि ताप उष्णानुभूतिरनुतापश्च मानः अभिमानः मानं नाडिकाधिक्यम्। अत्र समासोक्तेरपुष्टार्थत्वामाह–**अत्रेति**। सदृशविशेषणं अनुकूलविशेषणं तच्च रवौ करैः स्पृशतीति दिनश्रिया विजृंभिततापयेति विशेषणम्। **व्यक्तिविशेषेति**। व्यक्तिलिंगं तिग्मरुचावित्यत्र पुल्लिंगं ककुभ इति दिनश्रियेति स्त्रीलिंगम्। **नायकतयेति**। नायकश्च नायिका चेति पुमांस्त्रियेति कृतैकशेषो नायकशव्दः। अन्यथा तिग्मरुचेः ककुभां चेति वक्तुमयुक्तत्वात्। **अतः किमिति**। कृतं अपुष्टार्थेन पुनरु-

क्तेन दयितयेति स्वशब्दप्रयोगेणेत्यर्थः। ननु यथा दयिते दयितां करैः स्पृशति दयितान्तरस्य तापो भवति तथा रवौ करैः ककुभः स्पृशति तथाविधसमये दिनश्रियोपि ताप इति श्लेषोयमित्युपादेयमेव दयितेति पदमित्याशंक्याह–**श्लेषेति।** उदाहरति–**यथेति।** भास्वंतौ करौ दीप्यमानौ पाणी भास्वतश्च करा रश्मयः। अस्वापं दुर्लभं यत्फलं तत्र लुब्धानां ईहितं प्रददाति। स्वापस्य फले विश्रांतौ यो लुब्धः तत्र हितं न प्रददाति च। अत्र गौर्या उपमेयत्वम्। अप्रस्तुतप्रशंसायामुपमेयस्य उपमानीकरणं अपुष्टार्थत्वं पौनुरुक्त्यं वा दोष इत्याह–**प्रस्तुतेति।** अनयैव च समासोक्त्युक्तरीत्यैव अप्रस्तुतप्रस्तुतयोस्तुल्यनिबंधनत्वादुपमानानां तदा उपमेयप्रतीतौ किं तत्पदप्रयोगेण पुनरुपमेयस्योपमानीकरणेनेत्यर्थः। उदाहरति–**यथेति।** विहंगमेषु आहूतेषु पुर आयान्मशको न वार्यते। तृणमणिः अप्रधानमणिः काचादिः मणीनां मध्ये धुरि वा विशन् रुचं धत्ते। तेजस्विनां मध्ये खद्योतोपि प्रचलितुं न कंपते न बिभेति। तत्त्वानां क्षुद्रमहतां यदंतरं विशेषः अनामृष्टं अपरामृष्टं येन तं अचेतनं प्रभुमिव सामान्यं धिक्। अस्याप्यपुष्टार्थत्वं पुनरुक्तत्वं चेत्याह–**अत्रेति।** अचेतनत्वेन विशिष्टं सामान्यम्। अवान्तरप्रकरणमुपसंहरति–**तदिति। यथासंभविन** इति। **उद्भटादिभि**रुपमादौ लक्षितपरीक्षिताः। **अन्य इति। व्यक्तिविवेका**दियुक्त्या समासोक्त्यादौ परिकल्पिताश्च। **एवं जातीयका** इति। तत्तुल्योहः तदीयं च योजनं विषयांतरे येषां ते संग्राह्याः। पूर्वोक्तयैव सप्तमसमर्थितयैव दोषजात्या अंतर्भावयोग्यतायां पृथक् प्रपंचनमनौचित्यायेति भावः। उक्तमखंडं प्रकरणार्थमुपसंहरति–**इति संपूर्णमिति।** ननु प्राचीनाचार्यमतोल्लंघनेन विरचितमिदमप्रमाणमेव स्यादित्याशंक्याह–**इत्येष** इति। विदुषां **ध्वनिकारा**दीनां य एष मार्गः स्वसिद्धांतः विभिन्नः विप्रकीर्णोपि अभिन्नरूपः एकत्र संकलितः प्रतिभासत इति यत् तत् न विचित्रं यत् यस्मात्कारणादमुत्र ग्रंथे सम्यग्विनिर्मिता संघटनैव हेतुः। येन ग्रंथसंदर्भेण विकीर्णं प्रमेयजातं संकल्प्य प्रतिपाद्यते स ग्रंथसंदर्भः कृत इति नाप्रामाणिक इति भावः। एवं **सरस्वतीतीर्थयतिनांभ्रेण** निर्मिता टीका **काव्यप्रकाशस्य** मुदे स्याद्विदुषां चिरम्। पंचक्लेशान–जैषुर्जगति सुकृतिनो दुश्चरैर्ये तपोभिर्येषां चेतोरविंदे स किल पुरहरो वासमंगीचकार। येषां पादारविंदस्मृतिरपि जडताहारिणी देहभाजां तैष्टीकेयं सरस्वत्युपपदविलसत्तीर्थसंज्ञैरकारि ॥ २॥ साहित्यकुमुदकानन निद्राविद्राणयामिनीनाथाः। काव्यप्रकाशटीकां व्यरीरचंस्ते **सरस्वतीतीर्थाः** ॥ ३॥ इति **श्रीमत्परमहंस (परिव्राजकाचार्य) श्रीसरस्वतीतीर्थविरचितायां काव्यप्रकाशटीकायामर्थालंकारनिर्णयो नाम दशम उल्लासः।**

॥ शुभं भूयात् ॥

ॐ

॥ श्रीशान्ता विजयतेतराम् ॥

Notes: Exegetical and Critical

अथार्थालंकारानाह:—मम्मट has defined and illustrated शब्दालंकारs in उल्लास IX. Now he proceeds to define and illustrate अर्थालंकारs—61 or 62 (if मालादीपक is regarded as an independent figure) in number. They are called अर्थालंकारs because they depend for their विच्छित्ति (also termed वैचित्र्य or चमत्कारित्व) on the अर्थ i. e. the sense of the काव्य. The काव्य again which depends on अलंकारs for its charm is the lowest type of काव्य (अवर or अधम).


According to a tradition vouched for by the author of the commentary निदर्शना, मम्मट's contribution to this उल्लास extends up to the figure परिकर; the remaining portion beginning with व्याजोक्ति is, they say, the work of one अलक also styled as अल्लट or अलट. The closing stanza of this उल्लास, इत्येष मार्गो etc., it may be noted, has been interpreted by माणिक्यचन्द्र in the light of this tradition. After dealing with अर्थालंकारs, and after cursorily dealing with उभयालंकारs, अल्लट (not मम्मट) will deal with the question of अलंकारदोषs, in his own way.

The text, which we shall have to deal with, consists of three parts: कारिकाs—split into सूत्रs, वृत्ति and उदाहरणs, all the work of one writer, मम्मट possibly. The closing portion, from व्याजोक्ति onwards, with the कारिकाs, वृत्ति and उदाहरणs may similarly be taken to be the work of अल्लट.

१—उपमा

The आलंकारिकs are generally unanimous in commencing the treatment of अर्थालंकारs with उपमा which, they say, deserves this pride of place due to its being the basis of several other figures. अपह्नुति, ससन्देह, उत्प्रेक्षा, रूपक—not to mention others—are essentially based on औपम्य, albeit with specific modifications.

उपमा is possibly the oldest figure. The different वेदs made use of the word उपम to convey an idea of similarity. But the earliest recognition of its status as an अलंकार is possibly the one in मैत्र्युपनिषद् where different varieties of उपमा are referred to. It may be noted in passing that, as in several other matters, here also the आलंकारिक was indebted to the वैयाकरणs for the word उपमा. And the boringly minute divisions and sub-divisions of उपमा are a standing testimony to the influence that the वैयाकरणs exercised on the आलंकारिकs. यास्क, भरत, अग्निपुराण, भामह and दण्डिन्, उद्भट, वामनः all recognised उपमा as an अलंकार. मम्मट recognised 25 divisions of उपमा :—



These divisions and sub-divisions which have been admitted by others besides मम्मट *e.g.* विश्वनाथ (with certain modifications) and जगन्नाथ, are essentially grammatical in their significance. So grammatical are they in their bearing that उद्योत was tempted to remark

वस्तुतोऽयं पूर्णालुप्ताविभागो वाक्यसमासविशेषगोचरतया शब्दशास्त्रव्युत्पत्तिप्रदर्शनपरत्वादत्र शास्त्रे न व्युत्पाद्यतामर्हति । There are others like रुय्यक who make no scruples to ignore these divisions.

An उपमा to be complete requires four constituents (1) उपमेय, (2) उपमान, (3) साधारणधर्म (sometimes simply called धर्म), & (4) उपमाप्रतिपादक-शब्द also called द्योतक or वादि (i. e. words like वा = इव). In some उपमाs all of these are stated, giving rise to पूर्णा उपमा. In others, some of these constituents may be dropped—1, 2, 3—not 4, of course, since that would mean the total elimination of the figure. Where one or more constituents are dropped, the उपमा is called लुप्तोपमा.

Essentials of the figure :—In उपमा [उप (उपमानस्य) समीपे मीयते उपमेयं यत्र], the central interest lies in comparing one object with another due to both possessing a common characteristic. Such a comparison may tend to exalt or degrade an object. To compare the मुख with the चन्द्र may be a compliment; to compare दुर्जनवचः with हालहल is a way of degrading the former.

In साधर्म्य, i. e. connection with the same property, of two objects, lies the charm (विच्छित्ति or वैचित्र्य) of the figure. The object which the poet by association of ideas compares with another is called the उपमेय or object of comparison; the object with which it is compared is called the उपमान, the standard of comparison; the word expressive of the similitude such as इव, यथा, वा (= इव), सदृश, तुल्य and the affix वत् are called उपमाप्रतिपादक; the common property is called साधारणधर्म. In मुखं चन्द्र इव रम्यम्, मुख is उपमेय, चन्द्र उपमान, रम्यम् साधारणधर्म and इव उपमाप्रतिपादक.

When I compare मुखं with चन्द्रः, I am as much conscious of the difference between the two as of their similarity. That is why उपमा is based on भेदाभेद unlike other figures. Then when I compare मुखं with चन्द्रः, मुख is in my mind the प्रधान theme; चन्द्र is गौण. How there is प्राधान्य of उपमेय in उपमा is well borne out by the grammatical phenomenon of उपमितसमास standing in sharp contrast to the रूपकसमास (otherwise called मयूरव्यंसक समास). [See below.] It is further evidenced by the well-known rule of the वैयाकरणs that there should be सामानाधिकरण्य (the sameness of case-relation or grammatical co-ordination) between the उपमेय and उपमान : in other words, that the case of the उपमान should be determined by that of the उपमेय.

When I say मुखं चन्द्र इव रमणीयम्, I acknowledge *perfect equality* between चन्द्र and मुख so far as रमणीयत्व is 'concerned. If there is the

slightest consciousness of inequality in respect of रमणीयत्व, there cannot be उपमा. चन्द्र may surpass मुख in other respects but it must be on all fours with the उपमेय so far as रमणीयत्व is concerned. The figures व्यतिरेक and प्रतीप are cases where this balance between the उपमान and उपमेय is disturbed.

सूत्र १. साधर्म्यमुपमा भेदे :—This embodies मम्मट's definition of उपमा. To make the सूत्र quite explicit construe : (उपमानोपमेययोः) भेदे (सति) साधर्म्यं उपमा. उपमा consists in the similarity of attributes between the उपमान and the उपमेय, provided they (i. e. the उपमान and the उपमेय) are distinct. This definition lays down two essentials of उपमा (1) that there should be साधर्म्य ; and (2) that it should be between two distinct entities.

साधर्म्य is समानेन धर्मेण सम्बन्धः. As such it conveys the similarity between *two* things. Why then talk of the things being भिन्न (भेदे सति) when साधर्म्य itself presupposes भेद ? मम्मट himself will say later that भेदे has been inserted in the definition to exclude अनन्वय.

जगन्नाथ in his रसगंगाधर (162) criticises the definition for failing to embody हृद्यत्व or charmingness as an essential of a good उपमा, मम्मट, it may be seen, does not specify हृद्यत्व in the definition of any अलंकार, indicating thereby that he tacitly admits it as a necessary prerequisite of all figures whatsoever.

उपमानोपमेययोः न तु *etc.* As seen above, to make the definition explicit, we have to amplify it as उपमानोपमेययोः भेदे सति साधर्म्यं उपमा (by adding उपमानोपमेययोः). साधर्म्य is समानेन धर्मेण सम्बन्धः. सम्बन्ध requires सम्बन्धिन्s or correlates and मम्मट does not mention them. So one might just find fault with the definition for being incomplete.

मम्मट says : Though it is true that there are so many correlates, like कार्य and कारण, ज्ञाप्य and ज्ञापक, साधर्म्य subsists only between one pair of correlates viz. उपमान and उपमेय. Hence when one speaks of साधर्म्य, the correlates concerned can be none else than उपमान and उपमेय. Therefore the bare mention of साधर्म्य is enough to make one conscious of its subsisting between उपमान-उपमेय only, and no other pair. The definition by using the word साधर्म्य does, though tacitly, refer to उपमान-उपमेय only: and as such does not drop the vital constituents, as one is likely to think. So उपमा is the connection of no other pair but उपमान-उपमेय with the same common property.

भेदग्रहणमनन्वयव्यवच्छेदाय :—Why is the word भेदे inserted in the definition ? In order to exclude (व्यवच्छेद) the figure अनन्वय, says मम्मट. In अनन्वय, as we shall see later, a thing is compared with itself. In

उपमा, however, one thing is compared with another; in other words, the उपमान and उपमेय are अभिन्न in अनन्वय, while they are भिन्न in उपमा. तस्याः मुखं तस्या मुखमिव is अनन्वय; तस्याः मुखं चन्द्र इव is उपमा.


§ सूत्र २

पूर्णा and लुप्ता उपमा

Where all the four constituents of an उपमा—उपमान, उपमेय, साधारणधर्म and उपमाप्रतिपादक—are stated the उपमा is called पूर्णा. Where one or two or three happen to be dropped it is called लुप्ता उपमा.

मम्मट recognises 6 sub-divisions of पूर्णा and 19 of लुप्ता.

The six sub-divisions of पूर्णा are as follows:



उपमानोपमेय.........लुप्ता :—The वृत्ति supplements the 2nd सूत्र : पूर्णा लुप्ता च. For it is the वृत्ति which explains पूर्णा and लुप्ता that the सूत्र leaves undefined.

एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता :—For reasons too obvious, all the four could not be dropped, for then there will be no constituent of the उपमा which hence would cease to exist. The आलंकारिक did not regard the उपमा as defective though it lacked one or more constituents.

एकस्य द्वयोस्त्रयाणां वा लुप्ता :—एकलुप्ता is possible only in *three* cases *viz.*, धर्मलुप्ता, उपमानलुप्ता, and वादिलुप्ता (वादि = उपमाप्रतिपादक). उपमेयलुप्ता is not possible; for the absence of उपमेय knocks out the bottom of the figure itself.

द्विलुप्ता is possible only in *three* cases *viz.* धर्मवादिलुप्ता, धर्मोपमानलुप्ता and वादि-उपमेयलुप्ता. No धर्म-उपमेयलुप्ता, वादि-उपमानलुप्ता or उपमान-उपमेयलुप्ता is possible. No धर्म-उपमेयलुप्ता or उपमान-उपमेयलुप्ता is possible, for only in one case of doubtful *rhetorical* value, can उपमेय be eliminated. No वादि-उपमानलुप्ता is possible, (though त्रिलोपा, वादि-धर्म-उपमानलुप्ता is possible due to grammatical technicalities) as absence of वादि-उपमान means the elimination of a vital constituent of उपमा *viz.* उपमान.

त्रिलुप्ता is possible only in *one* case *viz.* वादि-धर्मोपमानलुप्ता, due to a certain grammatical technicality.

Taking a survey of the लुप्ता उपमा, one can come to these conclusions :—

(1) Where the धर्म is dropped, its absence is not felt because being too well-known, it could be easily conjectured. *e. g.* in मुखं चन्द्र इव, we know that the धर्म is रम्यत्व. (2) Where the उपमान is dropped, really speaking, there cannot be an उपमा, for उपमान is a vital constituent which needs to be stated and *which cannot be conjectured*. How then is उपमानलोप possible ? To state the truth, in the first two out of the three cases of उपमानलुप्ता (*viz.* उपमानलुप्ता, धर्म-उपमानलुप्ता and वादिधर्मोपमानलुप्ता), it seems as if, the उपमेय is too exalted to have an उपमान, while in the last case—वादिधर्मोपमानलुप्ता—the absence of the उपमान is merely a matter of grammatical technicality, though for all practical purposes, the उपमान *is* there. (3) That the आलंकारिक should go to the length of the admitting उपमेयलोप (that in वादि-उपमेयलुप्ता) shows their servile obedience to grammar. It was a feat of which the grammarian in his stark accuracy was capable. But it ill suits an आलंकारिक to talk of an उपमा where the उपमेय itself is wanting! A good many of the लुप्तोपमाs as also पूर्णोपमाऽ are quite grammatical in complexion, as pointed out by उद्योतकार.

§ **सूत्र ३. साग्रिमा......तद्धिते तथा ।**

Construe : सा आग्रिमा श्रौती आर्थी च (सती) वाक्ये, समासे तथा तद्धिते भवेत् ।

Herein मम्मट gives the sub-divisions of पूर्णा. **सा अग्रिमा** *i.e.* the former of the two: पूर्णा लुप्ता च, mentioned in the preceding सूत्र. (अग्रिमा as opposed to चरमा latter). अग्रिमा is, therefore, पूर्णा in the present case.

श्रौती–आर्थी उपमा

उपमा is साधर्म्य. साधर्म्य is the connection between the उपमान and the उपमेय based on their similarity of attributes. There are some words and affixes which have the power of *expressing* this connection. When these are used to convey औपम्य, we call the उपमा श्रौती, शाब्दी or expressed. There are certain other words and affixes which merely *imply* this connection and hence give rise to आर्थी or implied उपमा. In the course of his treatment of व्यतिरेक, मम्मट talks of आक्षिप्ता उपमा which is not the same as आर्थी, and which is conveyed by words like जयति, तिरस्करोति. *cf.* जयतीन्दु कलङ्किनम्. The particles इव, यथा, वा, the nominal affix वत् (used in the sense of तत्र इव or तस्य इव) are said to *express* साधर्म्य. Because when they are used, though apparently they seem to go with the उपमान alone, actually they

comprehend the उपमेय also. In मुखं चन्द्र इव, though इव appears to go with the उपमान चन्द्र alone, still, it has a peculiar power, due to which it comprehends मुखं also. And thus comprehending both, it becomes expressive of the connection of साधर्म्य *between two*. It is just like the genitive. In राज्ञः पुरुषः, though the genitive is affixed to the word राजन्, still, it is comprehensive enough to convey the connection of राजन् to पुरुष.

As opposed to these, words like तुल्य, सदृश and the affix वत् (तेन तुल्यं क्रिया चेद् वतिः) are regarded as merely *implying* साधर्म्य. When I say चन्द्रेण तुल्यं or चन्द्रसदृशं मुखम्, the word तुल्य goes only with the उपमेय; it fails to comprehend the उपमान. In चन्द्रः मुखस्य तुल्यः, तुल्य goes only with उपमान; and does not comprehend the उपमेय. In चन्द्रः मुखं च तुल्यं, तुल्य *alternately* (क्रमेण adds मा. चं.) goes with the उपमान and उपमेय, but does not simultaneously comprehend both. Thus these words and the affix are supposed to imply साधर्म्य, as they fail to comprehend both the उपमान and उपमेय.

There are some who explain away this fact as being due to the fundamental difference between साधर्म्य and सादृश्य. सादृश्य, they say, is a धर्मविशेष, produced by साधर्म्य and as such distinct from the latter. Thus इव, यथा etc. though they express साधर्म्य, yet imply सादृश्य; while तुल्य etc. though they express सादृश्य, imply साधर्म्य. And as उपमा is साधर्म्य, इव etc. are supposed to be expressive of it; while तुल्य etc. are said to imply it, according to this view.

This view is not shared by others who look upon साधर्म्य and सादृश्य as identical; मम्मट, in all probability, did not share it for he is found using साम्य, साधर्म्य, सादृश्य etc. as if they were synonyms.

